भाषा परिच्छेद with सिद्धान्तमुक्तावली of विश्वनाथ न्याय पञ्चानन – ~~alongwith~~ प्रत्यक्षखण्ड – alongwith the commentary विलासिनी in Sanskrit and Hindi by पं. ज्वाला प्रसाद गौड़ – Edited by पं० ढुण्ढिराजशास्त्री.

Benares, 1958.

(29)

भाषा परिच्छेद with सिद्धान्तमुक्तावली of विश्वनाथ न्याय पञ्चानन – ~~Edited~~ शब्दखण्ड – Edited with the Commentary विलासिनी by पं ज्वाला प्रसाद गौड़.

Benares, 1959.

(28)

in संस्कृत + हिन्दी

1330

Bill No. 5/07-08

40 41

2008 – 0498 (Part 1)

" – 0499 (Part 2)

श्री विश्वनाथ विरचितो

भाषापरिच्छेदः

निजनिर्मितसिद्धान्तमुक्तावल्या विशदीकृतः

प्रत्यक्षखण्डो भागः ।

न्यायाचार्य पं० श्री ज्वालाप्रसाद गौड़

विरचित विलासिनी-हिन्दी संस्कृत टीका द्वय विभूषितः

पं० श्री दुण्ढिराजशास्त्रिणा संशोधितः

पूज्यपाद महामहोपाध्याय कल्प

पं० श्री शिवदत्तमिश्रचरणैः, निध्यायानुमोदितः

प्रथम संस्करण २०००] जुलाई १६५८

प्रकाशक
सरजू देवी
१८५ गनेश महाल
वाराणसी

मुद्रक—
बैजनाथ प्रसाद
कल्पना प्रेस
रामकटोरा रोड, वाराणसी।

* श्री *

न्याय सिद्धान्त मुक्तावल्याम्

चूड़ामणीकृतविधुर्वलयीकृतवासुकिः ।
भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥१॥

जो कि चन्द्रमा वास्तविकमें चूड़ा (मस्तक) का मणि (आभूषण) नहीं हो सकता है उस चन्द्रमा को सर्वशक्तिमान् होने के नाते जिस भगवान् शङ्कर ने, मस्तक का आभूषण बना लिया है तथा जो कि वासुकि (एतन्नामक सर्पराज) वलय (हस्तका आभूषण) नहीं हो सकता परन्तु उस वासुकि को जिस भगवान् शङ्कर ने हाथ का आभूषण बना लिया है, एवं जो कि भगवान् शंकर लीला (विनोद) से होने वाले नृत्य के विशेषज्ञ हैं वे हमारे कल्याण करनेवाले होवें ॥१॥

यत्कारुण्यकणस्पर्शान्मूको वाचस्पतीयति ।
ब्रह्मोपेन्द्रशिवैर्वन्द्यां नौमि तां वागधीश्वरीम् ॥१॥
जननीजनकौ नत्वा शिवदत्तगुरोः पदम् ।
ज्वालाप्रसादः कुरुते मुक्तावलिविलासिनीम् ॥२॥
श्रीगुरुं मनसा ध्यात्वा श्रीगुरुं संप्रणम्य च ।
व्याख्यायते निबन्धोऽयं श्रीगुरोः परितुष्टये ॥३॥

विघ्नापनुत्तये कृतं मंगलं शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो मंगलाय च ग्रन्थकोटावुल्लिखति चूड़ामणीकृतेति । अत्र च लीलाताण्डवपण्डितो भव्याय भवतु इत्यन्वयः[1] । लीलया यत्ताण्डवं नृत्यविशेषः तत्र पण्डितोऽभिज्ञः भव्याय-

---

१ नातः समाप्तपुनरात्तत्वं दोषः । समाप्तपुनरात्तत्वं तदैव भवति यदा विशेष्यवाचकपदप्रयोगानन्तरं विशेषणवाचकपदप्रयोगो भवति स चात्र नास्ति लीलाताण्डवपण्डितस्यैव विशेष्यत्वात् । समाप्तपुनरात्तत्वं हि क्रियान्वयेन शान्ताकांक्षस्य विशेष्यवाचकपदस्य विशेषणान्तरान्वयार्थं पुनरनुसन्धानम् । समाप्तं सत्पुनरात्तं-उपात्तं यत्र वाक्ये तत्समाप्तपुनरात्तमिति व्युत्पत्तेः । तदुक्तं—

समाप्तपुनरात्तं तत्पूर्णे यद्‌गृह्यते-ऽन्वये ।
चन्द्रार्धशेखरः शंभुर्मां पातु गिरिजाधिपः ॥ इति ।

अन्वये पूर्णे-समाप्ते सत्यपि यत्पदं तदन्वयि शब्दान्तरेण पुनर्गृह्यते तत्समाप्तपुनरात्तमिति तदर्थः ।

कल्याणाय भवतु कल्याणं करोतु इत्यर्थः। विशेषणमाह **चूड़ामणीकृतेति**। न चूड़ामणिः अचूड़ामणिः–अचूड़ामणिश्चूड़ामणिः संपद्यते इति चूड़ामणीकृतः चूड़ामणीकृतो-विधुर्येन स चूड़ामणीकृतविधुः। चूड़ामणिः शिरोभूषणम्। यस्य ललाटे चन्द्रमा राजते इति भावः। प्रकृष्टप्रकाशवतो नमस्कार्यत्वकथनेन प्रौढयुक्तिमत्त्वमाविष्कृतम्। विशेषणान्तरमाह **वलयीकृतेति**। न वलयः अवलयः अवलयो वलयः संपद्यते इति वलयीकृतः वलयीकृतो वासुकिर्येन स वलयीकृतवासुकिः। वलयः कंकणम्। वासुकिः सर्पविशेषः। यस्य कङ्कणस्थानापन्नो वासुकिरित्यर्थः। एतेन दुर्गमविषयधारिणो नमस्कार्यत्वाव-गत्या दुर्गमयुक्तिमत्त्वं प्रकृतग्रन्थस्येत्यभिव्यज्यते। विशेषणान्तरमाह **भव** इति। भवति जगदस्मादिति भवः, जगत्कारणं महादेव इति यावत्।

अथ जातितद्भिन्नप्रवृत्तिनिमित्तकशब्दानां मध्ये जातिप्रवृत्तिनिमित्तकशब्द एव विशेष्यवाचक इति नियमः[1]। विशेष्यविशेषणभावे कामचार इति प्रवादस्तु यत्र द्वयोरेव जातिप्रवृत्तिनिमित्तकत्वं, तद्भिन्नप्रवृत्तिनिमित्तकत्वं वा तत्स्थलाभिप्रायेण। यथा नीलोत्पलमित्यादौ जातिप्रवृत्तिनिमित्तकत्वादुत्पलशब्दस्य विशेष्यवाचकत्वमेव, तथा प्रकृतेऽपि शिवशरीरवृत्तिभवत्व[2]जातिविशेषप्रवृत्तिनिमित्तकस्य भवशब्दस्य विशेषणपरत्वानुपपत्त्या विशेष्यपरत्वमेव वक्तव्यम्, तथा च सति भवो भव्याय भवत्वित्येवान्वयात्समाप्तपुनरात्तत्वदोषो दुर्वारः, चूड़ामणीकृतविधुर्वलयीकृतवासुकि-र्भवो भव्याय भवत्वित्येतावताऽन्वयबोधेनैव शान्ताकाङ्क्षस्य विशेष्यवाचकभवपदस्य लीलाताण्डवपण्डित इति विशेषणान्तरान्वयार्थं स भवः कीदृश इत्याकाङ्क्षा-संपादनाय भवस्मरणस्यावश्यकत्वादिति चेन्न।

---

१ उक्तनियमानङ्गीकारे नीलोत्पलयोर्विशेष्यविशेषणभावे नियामकाभावेन उत्पलस्य विशेषणत्वविवक्षया उत्पलनील इति प्रयोगप्रसंगः। न चेष्टापत्तिः। **कड़ाराः कर्मधारय** इति सूत्रवैयर्थ्यप्रसंगात्। अत्रेदमाकूतम्। मानुषब्राह्मण इत्याद्यप्रयोगाद् विशेषणविशेष्य-योर्यत्र मिथस्तादात्म्येन व्यभिचारस्तत्रैव कर्मधारय इति नियमः। तथा च कर्मधारये उभयस्य व्यभिचारनिरूपकाधिकरणव्यावर्त्तकतया विद्यमानत्वे सतीतरव्यावर्त्तकत्वरूप-विशेषणलक्षणाक्रान्ततया विशेषणत्वसंभवेन नीलोत्पलमितिवदुत्पलनीलमिति प्रयोगप्रसंगः। तथा हि समासविधायकसूत्रे यत्प्रथमान्तनिर्दिष्टं तत्समासे पूर्वं निपततीति नियमः। **विशेषणं विशेष्येण बहुलमिति** कर्मधारयविधायकसूत्रे विशेषणवाचकपदस्य प्रथमा-न्तनिर्दिष्टत्वात्पूर्वनिपातनियमः। एवं चोत्पलनीलमितिप्रयोगापत्तिवारणाय जातितद्भिन्न-प्रवृत्तिनिमित्तकशब्दानां मध्ये जातिप्रवृत्तिनिमित्तकशब्द एव विशेष्यवाचक इति नियमा-ङ्गीकार आवश्यकः। तथाचोत्पलस्यैव विशेष्यतया न तथा प्रयोग इति ध्येयम्।

२ न चैकव्यक्तिवृत्तितया भवत्वं न जातिरिति वाच्यम्। कल्पभेदेन शिवशरीरस्य नानात्वात्। न च भवपदस्य शरीरपरत्वे भवः सर्वं-जानातीति प्रयोगानुपपत्तिः, ईश्वरज्ञानस्य किंचिदनवच्छिन्नत्वनियमेनाऽवच्छेदकतासंबन्धेन ज्ञानवत्त्वबोधकतायाः स्वीकर्त्तुमशक्यत्वात्,

लीलाताण्डवपण्डित इत्यस्यानन्वये विशेष्यबाचकभवपदस्य शान्ताकाङ्क्षत्वासंभवात् तथाहि-विधोश्चूड़ामणीकरणं किमर्थं वासुकेर्वलयीकरणं वा किमर्थं इति प्रयोजनाकाङ्क्षासंभवात्[1]। प्रथमतो लीलाताण्डवपण्डित इत्यस्यान्वये तु नर्त्तनं भूषणं विना न शोभते इति चूड़ामणीत्यादिकमुक्तमिति नोक्तशंकावकाशः। तथा च लीलाताण्डवपण्डित इति विशेषणमेव। तथा च भवपदस्यैव विशेष्यवाचकत्वमिति ध्येयम्। अत्र भवपदार्थस्य नर्तनवत्त्वप्रतिपादनेन सन्तुष्टत्वलाभात्प्रार्थिता अर्था भविष्यन्त्येवेति सूचितम् ॥१॥

निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः।
विशदीकरवाणि कौतुकान्नतु राजीवदयावशंवदः ॥२॥

अपने से बनाई हुई कारिकावलीको अत्यन्त संक्षिप्त प्राचीनाचार्यों की उक्तियों के द्वारा राजीव नामक शिष्य के ऊपर जो मेरी दया उसके आधीन होकर मैं विश्वनाथ पञ्चानन अना-

---

समवायेन ज्ञानवत्तायाश्च तत्रासत्त्वादिति वाच्यम्। स्वाश्रयविशिष्टत्वसंबन्धेन भवत्वजातिमत आत्मन एव भवपदार्थत्वात्। स्वपदं भवत्वजातिपरम्। वै० स्ववृत्तिचेष्टाऽसाधारणकारणप्रयत्नवत्त्वसंबन्धेन, स्वपदं स्वाश्रयीभूतशरीरपरम्। न च भवति जगदस्मादिति व्युत्पत्त्या जगत्कारणत्वमेव भवपदप्रवृत्तिनिमित्तमस्त्विति वाच्यम्। शीघ्रोपस्थितिकरूढ्यर्थमादायाऽन्वयबोधोपपत्तौ बिलंबोपस्थितिकयोगार्थमादायान्वयबोधे निराकाङ्क्षत्वात्। वस्तुतो जगत्कारणत्वस्याऽतिप्रसक्ततया भवत्वसहितमेव तद् भवपदप्रवृत्तिनिमित्तं वाच्यं, तद्वरं लाघवाद्भवत्वमेव भवपदप्रवृत्तिनिमित्तमिति ध्येयम्।

१ न चैवं समाप्तपुनरात्तत्वदोषः कुत्रापि न स्यात्, शाब्दबोधे आकाङ्क्षायाः प्रयोजकत्वेन विशेषणान्तरान्वयार्थं स कीदृश इत्याकाङ्क्षाया अन्ततः कल्पनीयतया शान्ताकाङ्क्षत्वाभावादिति वाच्यम्। यत आकाङ्क्षा द्विविधा—उत्थाप्याकाङ्क्षा उत्थिताकाङ्क्षा च। तत्र अनियताकाङ्क्षा आद्या। भवः कीदृश इत्याकाङ्क्षा तु न नियता, प्रयोजनाकांक्षा तु नियता। तथा च नियताऽऽकांक्षारहितान्वयबोधोत्तरं विशेष्यवाचकपदस्य पुनरनुसन्धानमेव समाप्तपुनरात्तत्वम्। स कीदृश इत्याद्युत्थाप्याकांक्षया विशेषणान्तरान्वयस्थले एव स दोषः। यत्र तु आकांक्षा नियता तत्र न समाप्तपुनरात्तत्वम्, यथा क्रियाकारकपदानां परस्पराकांक्षा नियता तथा प्रयोजनाकांक्षापि नियतैव। तथा च प्रकृतान्वयसमाप्त्युत्तरकालीनप्रकृतान्वयानुपपादकविशेषणोपादाने एव स दोषः। यत्र तु प्रकृतवाक्यार्थोपपादकविशेषणोपादानं प्रकृतवाक्यार्थसमाप्त्युत्तरकालीनं तत्र न तथा। अत्र मङ्गलकार्यकारित्वरूपवाक्यार्थस्योपपादकं इष्टदेवतात्वमिति नोक्तदोषावसरः। तदुक्तम्—

समाप्तपुनरात्तं स्याद् गुणो वाक्यान्तरोदये।
रामापि स्यादुपादेया महागुणवती सतीति ॥

वाक्यविशिष्टत्वं समाप्तपुनरात्तत्वम्। वै० स्वतादात्म्य- स्वघटकविशेष्यवाचकपदविशिष्टविशेषणवाचकपदघटितत्वोभयसं०। वै० स्वोत्तरत्व- स्वान्वयानुपपादकत्वोभयसं०।

सद्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणां ज्ञापिका
सत्सामान्यविशेषनित्यमिलिता ऽभावप्रकर्षोज्वला ।
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ॥ ३ ॥

यास से विशद करता हूँ । अभिप्राय यह है कि राजीवनामक शिष्य परममन्दमतिथा, परन्तु इनका परम भक्त था । भक्ति के कारण ही राजीव इनका परमदयापात्र हुआ जिस दया के अधीन होकर ही भाष्योक्तियों से निबद्ध इस कारिकावली ग्रन्थ को विश्वनाथपञ्चानन ने मुक्तावली टीका के द्वारा विशद किया ॥२॥

प्रवृत्त्यङ्गतया इतरग्रन्थवैलक्षण्यं दर्शयति **निजनिर्मितेति** । अत्राऽहमित्यध्याहारः । तथा चाहं "विश्वनाथपञ्चाननो" राजीवदयावशंवदः "सन्" निजनिर्मितकारिकावलीं अतिसंक्षिप्तचिरन्तनोक्तिभिः कौतुकान्ननु विशदीकरवाणि इत्यन्वयः । स्वकृतमूलस्य स्वयं व्याख्याने निमित्तमाह **राजीवेति** । राजीवस्तन्नामकशिष्यस्तत्र या दया तया वशंवदस्तदधीनः सन्नित्यर्थः । एतेन ग्रन्थव्याख्याने राजीवदयावशंवदत्वं निमित्तमिति सूचितम् । अथ वा राजीवस्य-राजीवलोचनस्य भगवतो या दया तया वशंवद इति विग्रहः । **"विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वाच्य"** इति वचनेन लोचनशब्दस्य लोपः । निजेन निर्मिता निजनिर्मिता निजनिर्मिता चासौ कारिकावली चेति निजनिर्मितकारिकावली तामिति विग्रहः । अति अत्यन्तं संक्षेपः शब्दसंक्षेपो[1] यासु ताः अतिसंक्षिप्ताः । चिरन्तनानामुक्तयश्चिरन्तनोक्तयः । अतिसंक्षिप्ताश्च ताश्चिरन्तनोक्तयश्चेति अतिसंक्षिप्तचिरन्तनोक्तयस्ताभिरिति विग्रहः । अभेदे तृतीया, तस्य विशदीकरणेऽन्वयः । **विशदीकरवाणि** व्याख्यामि । पद्यस्याऽतिसंक्षिप्तेतिविशेषणेन लीलावत्यादिप्राचीननिबन्धेषु ग्रन्थबाहुल्येन बहुतरदुःखहेतुप्रतिपत्तिकतया बालानां प्रवृत्तिर्न स्यादिति सूचितम् । एतेन लीलावत्यादिप्राचीननिबन्धाध्ययनेनैव कारिकावलीप्रतिपादितार्थो बोद्धव्य इति किं भवत्कृतविशदनिबन्धनेनेति शंका निरस्ता । स्वकीयकल्पनामूलकताप्रयुक्ताऽनादरणीयतां निरसितुं **चिरन्तने**त्युक्तम् । नन्वित्यवधारणे । कौतुकादेवेत्यर्थः । एतेन स्वस्य ग्रन्थकरणे क्लेशाभावः सूचितः । अनेन विषयप्रयोजनसंबन्धाधिकारिरूपानुबन्धचतुष्टयमपि दर्शितम् । कारिकावलीं विशदीकरवाणीत्यनेन कारिकावल्यर्थस्य विषयत्वात् । कारिकावल्यर्थज्ञानस्य प्रयोजनत्वात् । कारिकावल्यर्थमुक्तावल्योः प्रतिपाद्यप्रतिपादकभावस्य संबन्धत्वात् । तदर्थजिज्ञासोरधिकारित्वादित्यस्मद्गुरुचरणाः ॥२॥

---

१ तत्त्वर्थसंक्षेपः, तथा सति अर्थसंक्षेपेण सकलार्थाप्रतिपादकतया बालव्युत्पत्तिजनकता न स्यादिति ध्येयम् ।

सिद्धान्तमुक्तावली नाम दो वस्तुओं का है–ग्रन्थ का–तथा माला का। ग्रन्थ पक्षमें२ श्लोकार्थ–सद्रव्या-द्रव्यकी प्रतिपादिका। (पृथिवी आदि नव द्रव्यों का प्रतिपादन करने वाली)। रूप-रस-आदि २४ गुणों की प्रतिपादिका। उत्क्षेपण आदि ५ कर्मोंकी बोधिका। सामान्य-विशेष-नित्यमिलित-समवाय इनसे युक्त-तथा अभाव का जो प्रकर्ष प्रागभावादि भेद से चातुर्विध्य उससे उज्जवल (वर्णन करने वाली) सद्युक्ति-अच्छी २ युक्तियों वाली, विश्वनाथपंचानन के द्वारा विष्णुभगवान् को अर्पित की हुई यह सिद्धान्तमुक्तावली नामक पुस्तिका विद्वान् लोगों के मन के हर्ष को बहुकाल पर्यन्त बढ़ावे।

मालापक्ष में–सिद्ध हो गया है अन्त जिन्हों का–अर्थात् जिनसे बढ़कर अतिशयित्व किन्हीं भी मोतियों में नहीं है, ऐसे मुक्ता(मोतियों) की आवलीरूप माला कैसी है कि–सद्रव्या-द्रव्यसाध्य है। गुण (सूत्र) धागे से गुम्फित (गूंथी हुई है)। तथा सुकृती पुण्यात्मा लोगों के सत्कर्मों की बोधिका है–अर्थात् जिस व्यक्तिके पास यह सच्चे मोतियों की माला हो–समझ लीजिये कि उसने बहुत ही अच्छे कर्म किये हैं, जिन कर्मों के कारण वह माला उसे प्राप्त हुयी है। एवं माला के सामान्य धर्म मालात्व विशेष धर्म-महत्त्व- निर्मलत्व-वर्त्तुलत्व आदि से नित्य-हमेशा, मिलित-सवद्ध है। एवं अभाव (तेजोऽभावरूप अन्धकार) के होने पर अपने प्रकर्षसे उज्जवल (घट-पट-आदि पदार्थों का प्रकाश करने वाली) है। विश्वनाथ भगवान् शंकर ने इस माला को विष्णु भगवान्के वक्षस्थल में पहिना दी है। इश श्लोक से अनुबन्धचतुष्टय दिखला दिया है। विषय-प्रयोजन-सम्बंध अधिकारी- ये अनुवन्धचतुष्टय हैं। इस ग्रन्थ में निरूपित द्रव्य-गुण-आदि ७ पदार्थ विषय हैं। सात पदार्थों का ज्ञान होना ही प्रयोजन है। जिस व्यक्ति को सात पदार्थों के ज्ञान की इच्छा हो वही इस ग्रन्थ का अधिकारी है। और ग्रन्थ का तथा पदार्थों का प्रतिपाद्यप्रतिपादकभाव सम्बन्ध है। अर्थात् यह ग्रन्थ सात पदार्थों का प्रतिपादक है–और पदार्थ इससे प्रतिपाद्य हैं ॥३॥

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।

यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥ इति स्मृत्या क्रियमाण-कर्मणो भगवदर्पणीयत्वस्मरणेन स्वचिकीर्षितग्रन्थं मुक्तावलीत्वेन निरूप्य भगवत्यर्पयन् सुकृतिनां सन्तोषं प्रार्थयते **सद्रव्येति**। एषा सिद्धान्तमुक्तावली विष्णोर्वक्षसि विन्यस्ता सुकृतिनां मनसो मुदं वितनुतामित्यन्वयः। अन्यानि विशेषणानि। एषा-मत्कृतवाक्यसन्दर्भरूपा हृदिस्था। मालापक्षे सिद्धान्ताश्च ता मुक्ताश्चेति सिद्धान्तमुक्ताः तासामावली इति सिद्धान्तमुक्तावली। "ग्रन्थपक्षे सिद्धान्ता एव मुक्ताः सिद्धान्ताः मुक्ता इवेति वा सिद्धान्तमुक्तास्तासामावली सिद्धान्तमुक्तावली। कीदृशी सिद्धान्तमुक्तावली सद्रव्या-द्रव्यमेव द्रव्यं मूल्यं तेन सह वर्त्तते इति सद्रव्या। गुण एव गुणः सूत्रं तेन गुम्फिता। सन्ति-प्रामाणिकानि-कर्माणि उत्क्षेपणादीनि तान्येव कर्माणि "मुक्तावलीप्राप्तिहेतुसुकृतकर्माणि" तेषां ज्ञापिका। सामान्यमेव सामान्यं मुक्तानां परस्परसादृश्यं विशेष एव विशेषा, नित्यमिलितं"समवायः" एव नित्यमिलितं अखण्डितसंबन्धः अत्रुटितत्वमिति यावत्। सामान्यं च विशेषश्च नित्यमिलितं चेति सामान्यविशेषनित्यमिलितानि, सन्ति सामान्यविशेषनित्यमिलितानि यस्यां सेति बहुव्रीहिः। अभाव एवाऽभावः "अन्धकारः" तत्र प्रकर्षेणोज्वला द्योतमाना।

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति नूतनेति ।

ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणम् ।

विनापि मङ्गलं नास्तिकादीनां ग्रन्थेषु निर्विघ्नपरिसमाप्तिदर्शनादिति चेत् ।

विघ्नध्वंस के लिये मंगल किया-हमारे शिष्य भी अगाड़ी ऐसे ही करें इस प्रकार की इन्हें शिक्षा देने के लिये ग्रन्थ में उसे (मंगल को) लिखा । "नूतन" इत्यादि कारिका से—

नवीन मेघों की तरह कान्तिवाले, तथा गोपों की स्त्रियों के वस्त्र चुराने वाले- संसाररूपी वृक्ष के कारण उस कृष्ण को नमस्कार है ।

नवीन मंगल को विघ्वध्वंस के प्रति कारण मानते हैं-प्राचीन समाप्ति के प्रति कारण मानते हैं- नास्तिक दोनों मत का खण्डन करता है—"ननु मंगलं न" इत्यादि ग्रन्थ से, मंगल नतो विघ्न-ध्वंस के प्रति कारण है और न समाप्तिकारण है । (क्योंकि मंगल यदि कारण होता तो कारण के विना कार्य नहीं होता है क्यों कि कार्यकारणभाव का निश्चायक होता है अन्वयसहचार तथा व्यतिरेक सहचार- प्रकृत में दोनों का व्यभिचार है) क्योंकि मंगल के विना भी नास्तिकों के किरणा-वली आदि ग्रन्थों में निर्विध्न समाप्ति देखी जाती है । ("निर्विघ्नसमाप्तिदर्शनात" इसका अर्थ है "विघ्नध्वंस पूर्वक समाप्ति दर्शनात्" अर्थात् नास्तिकों के ग्रन्थों में मंगल के विनाही कारणान्तर से या स्वतः पहिले विघ्नध्वंस उसके बाद समाप्ति बराबर देखते हैं । अतः मंगलाचरण निष्फल है ।

अथवा नवो अप्रश्लेषेण स्वान्तविज्ञानातिशयानन्दजननीत्यर्थः । सत्यो युक्तय एव युक्तयो "रचनाविशेषाः" यस्यां सेति विग्रहः । अत्र श्लेषेण परंपरितरूपकम् । तदुक्तं-

अन्यारोप्याभावप्रयोजकस्य स्वभावस्य ।
प्रतियोगीपरकीयारोपस्तत्परंपरितम् ॥

यदारोपं विना आरोपान्तरं न निर्वहति तत्परंपरितरूपकमित्यर्थः । ग्रन्थपक्षे सिद्धान्ता एव मुक्ताः "सिद्धान्ताः मुक्ता इवेति वा" सिद्धान्तमुक्तास्तासामावली सिद्धान्तमुक्तावली । द्रव्यैः सहिता सद्रव्या—प्रतिपादकतासंबन्धेन द्रव्यवती । गुणैश्चतुर्विंशतिसंख्याकैर्गुम्फिता प्रतिपादिका । सुकृतिनामित्यस्य मनस इत्यने-नाऽन्वयः । सत्कर्मणां-उत्क्षेपणत्वादिजात्याक्रान्तानां ज्ञापिका-बोधिका । सामान्यं च विशेषश्च नित्यमिलितं चेति द्वन्द्वः । ततः सन्ति सामान्याविशेषनित्यमिलितानि यस्यां सेति बहुव्रीहिः । प्रतिपादकतासम्बन्धेन सामान्याद्यन्यतमवतीति भावः । नञ् प्रश्लेषेण अभावस्य य प्रकर्षः- प्रागभावादिभेदेन वैलक्षण्यं तस्योज्वला-प्रति-पादिकेत्यर्थः । कृतिना-कुशलेन ।

केचित्तु अनेन श्लोकेनाऽनुबन्धचतुष्टयं प्रदर्शितमिति वदन्ति । तथाहि द्रव्यादयो विषयाः । पदार्थतत्वज्ञानं प्रयोजनम् । प्रतिपाद्यप्रतिपादकभावः संबन्धः । पदार्थतत्वावधारणकामोऽधिकारीति । तच्चिन्त्यम् । कारिकावलीव्याख्यानग्रन्थस्य कारिकात्रय्यनुबन्धचतुष्टयेनैव तद्वत्वात्-पृथगनुबन्धचतुष्टयप्रदर्शने प्रयोजनाभावा-दिति ध्येयम् ॥ ३ ॥

ननूद्देशलक्षणपरीक्षासंग्रहात्मकशास्त्रानन्तर्गतनूतनेतिश्लोकः शास्त्रादौ किमर्थं रचितः, न्यायवैशेषिकपदार्थजिज्ञासुज्ञानानुपयोगित्वादित्यत आह **विघ्नविघातायेति ।**

प्रारिप्सितग्रन्थस्येत्यादिः। समाप्तिप्रतिबन्धकाऽधर्मविशेषो विघ्नः, तस्य विघातो-ध्वंस[1]ः। तस्मै[2] मङ्गलशब्देनाऽत्र नूतनेत्यादिश्लोक उच्यते। तथा च मङ्गलं कर्त्तव्यं "कृतिसाध्यं" विघ्नध्वंसजनकत्वादित्यनुमानं फलितम्। ग्रन्थादौ मङ्गलोल्लेखस्य प्रयोजनमाह **शिष्यशिक्षायै** इति। ईप्सितविघ्नशान्तये ग्रन्थादौ मंगलं कर्त्तव्यमिति शिष्यशिक्षार्थमित्यर्थः। **निबध्नाति**। ग्रन्थे उल्लिखतीत्यर्थः। तथा च मंगलस्य विघ्नध्वंसः फलम् तन्निबन्धनं च शिष्यशिक्षार्थमिति भावः।

ननु कारणत्वग्रहेऽन्वयसहचारग्रहस्य व्यतिरेकसहचारग्रहस्य चाऽन्वयव्यतिरेकाभ्यां सहकारित्वेन सिद्धतया मङ्गलविघ्नध्वंसयोर्मङ्गलसमाप्त्योर्वाऽन्वयसहचारव्यतिरेकसहचारग्रहाऽसंभवेन मङ्गलविघ्नध्वंसयोः समाप्तिमङ्गलयोर्वा न प्रत्यक्षेण कार्यकारणभावग्रहः संभवति, तथा हि-**यत्सत्त्वे यत्सत्वमन्वयसहचारः**— कारणसत्वे कार्यसत्वमिति यावत्। **यत्सत्वे यदभावो ऽन्वयव्यभिचारः**—कारणसत्त्वे कार्याभाव इति यावत्। अन्वयव्यभिचारश्च कादंबर्यादौ, तत्र मङ्गलसत्वेऽप्यसमाप्तेः। **यदभावे यदभावो व्यतिरेकसहचारः,** कारणाभावे कार्याभाव इति यावत्। **यदभावे यत्सत्त्वं व्यतिरेकव्यभिचारः,** कारणाभावे कार्यसत्वमिति[3] यावत्। व्यति-

---

१ वीत्युपसर्गसमभिव्याहृतघातपदस्य विलक्षणनाशार्थकत्वात्। दिनकरीकृतस्तु घातपदेनैव विघ्नध्वंसबोधनाद् विपदानर्थक्यमाशंक्य विशिष्टवाचकपदानां सति पृथग्विशेषणसमवधाने विशेष्यमात्रपरत्वमिति नियमानुरोधेन घीतपदस्याऽभावमात्रपरत्वं- विपदस्य जन्यपरत्वं तथा च ध्वंसलाभः। न च तादृशनियमे मानाभावः। स कीचकैर्मारुतपूर्णरन्ध्रैरित्यभियुक्तप्रयोगस्यैव प्रमाणत्वात्। तथाहि- वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः इति कोषान्मारुतपूर्णरन्ध्रत्वध्वनिमत्वोभयविशिष्टे वेणावेव कीचकपदप्रयोगान्मारुतपूर्णरन्ध्रैः कूजद्भिरिति पदद्वयार्थस्य पौनरुक्त्यापत्तेरित्याहुः। तच्चिन्त्यम्। घातपदस्य प्राणवियोगानुकूलव्यापाररूपहिंसार्थकत्वेन वीत्युपसर्गबलेन जन्याभावरूपध्वंसपरत्वात्। उपसर्गस्य द्योतकत्वपक्षे विपदानर्थक्यमिष्टमेव वाचकत्वपक्षेऽपि घातशब्दस्य जन्याभाववाचकत्वाभावाद् विशिष्टवाचकपदानामिति नियमप्रसक्तेरभावादिति ध्येयम्।

२ उद्देश्यत्वं चतुर्थ्यर्थः। अन्वयश्चाऽस्य कृतौ। विषयत्वं क्तप्रत्ययार्थः। तच्च साध्यत्वरूपं मङ्गलान्वयि। मङ्गलमिति द्वितीयार्थः कर्मत्वं, निबन्धनेऽन्वेति। शिष्यशिक्षायै इति चतुर्थ्यर्थः उद्देश्यत्वं निबन्धेऽन्वेति। निबन्धनं च श्लोकज्ञानजनकलिपिकरणम्। आख्यातार्थः कृतिः। तथा च विघ्नध्वंसोद्देश्यककृतिसाध्याभिन्नमंगलकर्मकशिष्यशिक्षाफलक"नूतनेत्यादिग्रन्थाभिन्न" निबन्धनानुकूलकृतिमान् कारिकावलीकार इति विघ्नविघातायेत्यादिवाक्याद्बोधः।

३ कार्याधिकरणवृत्तिभेदप्रतियोगितानवच्छेदकमिति तत्वम्।

रेकव्यभिचारश्च नास्तिकग्रन्थेषु तत्र विनापि मङ्गलं समाप्तेः। तथा च प्रवृत्तिं प्रतीष्ट-साधनतानिश्चयस्य कारणतया मङ्गले समाप्तिविघ्नध्वंसकामस्य प्रवृत्तिर्न स्यात्, तत्र समाप्तिविघ्नध्वंसरूपेष्टसाधनत्वनिश्चयाभावात्, इष्टसाधनताभ्रान्तिमूला वा प्रवृत्तिः स्यादित्याशंकते **नन्विति**। नन्वित्याशङ्कायाम्। नव्यमतमाक्षिपति **न विघ्नध्वंसं प्रतीति**। **कारणं**—कारणत्वेन निश्चितम्[1]। प्राचीनमतमाक्षिपति **नवेति**। मङ्गलमित्यनुषज्यते। **समाप्तिं प्रतीति** विघ्नध्वंसद्वारा इति शेषः। कारणमिति[2]। कारणताग्रहविरोधि[3]व्यतिरेकव्यभिचारं दर्शयति **विनापि मङ्गलमिति**। मङ्गलविरहेऽपीत्यर्थः। अनेन कारणाभावः सूचितः। निर्विघ्नपरिसमाप्तिदर्शनादित्यनेन च विघ्नध्वंसरूपस्य समाप्तिरूपस्य वा कार्यस्य सत्वं सूचितम्। तथा च कारणाभावे कार्यसत्वरूपव्यतिरेकव्यभिचार इति भावः। **निर्विघ्नेति**। विघ्नस्याभावो निर्विघ्नम् अर्थाभावेऽव्ययीभावः। अभावश्चात्र ध्वंसरूपो विवक्षितः। निर्विघ्नं परिसमाप्तिः निर्विघ्नपरिसमाप्तिः। निर्विघ्नमित्यस्य विघ्नध्वंसादित्यर्थः। **अव्ययादाप्सुप** इति पञ्चम्या लोपात्। उत्तरत्वं पञ्चम्यर्थः। विघ्नध्वंसपूर्वक[4]समाप्तिदर्शनादित्यर्थः। तथा च मङ्गलविरहेऽपि नास्तिकग्रन्थसमाप्तिविरोधिनः पापविशेषरूपविघ्नस्य ध्वंसदर्शनात्, नास्तिकग्रन्थघटकीभूतचरमवर्णध्वंसरूपसमाप्तिदर्शनाद्वेति समुदितार्थः[5]। इदमुपलक्षणम्—कादंबर्यादिग्रन्थे मङ्गलसत्वेऽपि समाप्तेरदर्शना-

१ मङ्गलं "विघ्नध्वंसं प्रति" अनन्यथासिद्धत्वे सति स्वरूपेण विघ्नध्वंसाधिकरणवृत्तिभेदप्रतियोगितानवच्छेदकभिन्नमिति फलितम्।

२—तथा च मङ्गलं "समाप्तिं प्रति" अनन्यथासिद्धत्वे सति समाप्त्यधिकरणवृत्तिभेदप्रतियोगितानवच्छेदकभिन्नमिति फलितम्।

३—ननु अन्वयव्यभिचारग्रहव्यतिरेकव्यभिचारग्रहयोः कथं कारणताग्रहविरोधित्वमिति-चेद्, इत्थम्—अन्यथासिद्धिशून्यत्वे सतिकार्याव्यवहितप्राक्क्षणे कार्याधिकरणवृत्तिभेदप्रतियोगितानवच्छेदकत्वं हि कारणत्वम्। तत्राऽन्वयव्यभिचारग्रहः कारणताघटकाऽन्यथासिद्धिशून्यत्वग्रहविरोधी अवश्यक्लृप्तनियतपूर्ववर्तिभिन्नत्वरूपपञ्चमान्यथासिद्धत्वस्यैव निश्चयस्य जननात्, तथाचाऽन्यथासिद्धिशून्यत्वघटितकारणताग्रहविरोधित्वम्। व्यतिरेकव्यभिचारस्य तु कार्याधिकरणवृत्तिभेदप्रतियोगितावच्छेदकत्वरूपतया तन्निश्चयस्य ग्राह्याभावावगाहितया कारणाताग्रहविरोधित्वं बोध्यम्।

४ विघ्नध्वंसपूर्वकेति कथनेन विघ्नध्वंसेपि व्यभिचारः संपादितः। न च ग्रन्थसमाप्तौ विघ्नात्यन्ताभावपूर्वकत्वमेवेति न विघ्नध्वंसे व्यभिचारसंपादनमिति वाच्यम्। अग्रे वाच्यत्वात्।

५ मङ्गलं न विघ्नध्वंसकारणं विघ्नध्वंसवन्नास्तिकात्मवृत्तिभेदप्रतियोगितावच्छेदकत्वात्, मङ्गलं न समाप्तिकारणं समाप्त्यधिकरणनास्तिकात्मवृत्तिभेदप्रतियोगितावच्छेदकत्वादिति हेतुद्वयं फलितम्। अतो यथाश्रुते साध्यहेत्वोर्वैयधिकरण्येपि न क्षतिः।

दन्वयव्यभिचारोपि बोध्यः[१]। तथा च यस्य पुरुषस्य प्रमत्तकर्तृकसमाप्तिस्थले ऐहिकमङ्गलविरहनिश्चयो मङ्गलसत्वेऽपि समाप्तिविरहेण लोकावगतकारणेनैव समाप्तेर्वक्तव्यतया समाप्तिं प्रति मङ्गलस्यान्यथासिद्धत्वग्रहश्च विद्यमानः तेन पुरुषेण तदानीं समाप्तिहेतुत्वस्य मङ्गले प्रत्यक्षतो निश्चेतुमशक्यत्वादिति तत्वम्।

ननु विघ्नविघाताय कृतं मङ्गलमिति ग्रन्थेन मङ्गलं विघ्नध्वंसं प्रति कारणमिति सूचितम्, तदुपरि मङ्गलं न विघ्नध्वंसं प्रति कारणमित्याक्षेपस्यैव युक्ततया न वा समाप्तिं प्रति कारणमित्याक्षेपोऽसंगत एवेति चेन्न। विघ्नविघातायेत्यस्य विघ्नध्वंसपूर्वकसमाप्तये इत्यर्थात्। वस्तुतो मङ्गलं नाचरणीयं निष्फलत्वादित्यनुमानादेव वादिना मङ्गलाचरणमाक्षिप्यते-तत्र निष्फलत्वसिद्धिर्यावत्फलविशेषशून्यत्वेन हेतुना कार्या मङ्गलं निष्फलं यावत्फलविशेषशून्यत्वादित्यनुमित्याकारः। यावत्फलविशेषशून्यत्वस्य निष्फलत्वप्रयोजकत्वं निर्विबादमेव, यावद्विशेषाभावस्य सामान्याभावहेतुत्वात्। तत्रापि पशुपुत्रहिरण्यादिफल "जनकत्व" शून्यत्वस्य मङ्गले सर्वसम्मतत्वेन प्राचीननव्याभ्यां समाप्तिविघ्नध्वंसयोरेव फलत्वेनाऽङ्गीकारेण तदुभयफल "जनकत्व" शून्यत्वसाधनेनैव यावत्फलविशेष "जनकत्व" शून्यत्वसिद्धिः। तथा च यावत्फलविशेष "जनकत्व" शून्यत्वसाधनायैव न वा समाप्तिं प्रति इत्यादिग्रन्थस्तेन नाऽसंगतिरिति ध्येयम्।

एतावता मङ्गले निष्फलत्वसाधनाय विघ्नध्वंसजनकत्वाभावः समाप्तिजनकत्वाभावो वाऽन्वयव्यतिरेकव्यभिचारहेतुना साधितः, परन्तु नास्तिकात्मनि जन्मान्तरीयमङ्गलस्य शिष्यानुजिघृक्षाऽभावेन मङ्गलप्रतिपादकश्लोकाऽकरणेपि जन्मान्तरीयकर्मणो निष्फलत्वकथनेऽपि च ऐहिककर्मणो निष्फलत्वकथने क्षुत्तृष्णानिवृत्त्यर्थमन्नभक्षणजलपानयोरपि प्रवृत्त्यनुपपत्त्या समाप्तिरूपैहिकफलार्थं मङ्गलस्य नास्तिकेनापि करणावश्यकतया व्यभिचाराप्रसक्तेः। परकीयचित्तवृत्तेर्निर्णेतुमशक्यत्वेन मङ्गलकरणस्य सन्देहेऽपि व्यतिरेकव्यभिचारस्य सन्दिग्धत्वात्, कादम्बर्यादिकर्तुः मङ्गलसत्वे आलस्यादिदोषवशेनाऽऽयुषः प्रमाणाभावेन च सहकार्यभावादपि ग्रन्थसमाप्त्यभावेनान्वयव्यभिचारस्यापि सन्दिग्धत्वात्। तथाचाऽन्वयव्यतिरेकव्यभिचाररूपहेतोर्निश्चयाभावेन नोक्तहेतुभ्यां विघ्नध्वंसजनकत्वाभावस्य समाप्तिजनकत्वाभावस्य च साधनं संभवतीत्याशयेन पूर्वपक्षं दूषयति **नेति**। "अन्वयव्यतिरेकव्यभिचारसन्देहेन" समाप्ति-विघ्नध्वंस-जनकत्वाभावसाधकहेतोः संशयादिति शेषः। तेन हेत्वनुक्तेर्न न्यूनतेति भावः।

अन्वयव्यतिरेकव्यभिचारग्रहसत्त्वे ऽन्वयव्यतिरेकसहचारग्रहाऽसंभवेनाऽन्वय-व्यतिरेकव्यभिचारसहकृतप्रत्यक्षेण मंगलविघ्नध्वंसयोर्मंगलसमाप्त्योर्वा कार्य-

---

१ तथा च मङ्गलं न विघ्नध्वंसकारणं विघ्नध्वंसं प्रति अवश्यक्लृप्तनियतपूर्ववर्त्तिभिन्नत्वरूपान्यथासिद्धत्वात्। मङ्गलं न समाप्तिकारणं समाप्तिं प्रति अवश्यक्लृप्तनियतपूर्ववर्त्तिभिन्नत्वरूपान्यथासिद्धत्वाच्चेति हेतुद्वयं बोध्यम्।

कारणभावप्रत्यक्षं माभूत्, कारणताप्रत्यक्षे एव व्यतिरेकसहचारसंशयस्य प्रतिबन्धकत्वात्। अनुमानेन तु कारणत्वग्रहो भवितुमर्हति। तथा हि–मंगलं बलवदनिष्टाननुबन्धित्वे सति इष्टसाधनं बलवदनिष्टाननुबन्धित्वे सति इष्टसाधनत्वभ्रमाजन्यकृतिसाध्यत्वात् दर्शादिवदित्यनुमानेन मंगले समाप्तीतरफलसाधनत्वबाधनिश्चयसहकृतेन समाप्तिसाधनत्वनिश्चयात्, न चोक्तानुमानेन सामान्यतः बलवदनिष्टाननुबन्धीष्टसाधनत्वसिद्धावपि कथं समाप्तिसाधनत्वसिद्धिः, व्यापकतावच्छेदकरूपेणैवानुमितिर्भवतीति नियमादिति वाच्यम्। तादृशनियमस्येतरबाधादिभिन्नविषयत्वात्[1]। अथवा मङ्गलं समाप्तिसाधनं समाप्तीतरफलासाधनत्वे सति फलसाधनत्वादित्यनुमानेन समाप्तिसाधनत्वसिद्धिर्बोध्या। इदमेव परिशेषानुमानमुच्यते। न च समाप्त्यन्यासाधनत्वरूपविशेषणाऽसिद्धिरिति वाच्यम्। मंगलं न समाप्त्यन्यफलसाधनं समाप्त्यन्यफलोद्देश्यककृत्यसाध्यत्वात्, यद् यदन्यफलोद्देश्यककृत्यसाध्यं तन्न तदन्यफलसाधनं यथा रोगनिवृत्त्यन्यफलोद्देश्यककृत्यसाध्यं औषधपानं रोगनिवृत्त्यन्यफलासाधनं दृष्टं, तथा चेदं-तस्मात्तथेत्यनुमानेन मंगले समाप्त्यन्यफलासाधनत्वसिद्ध्या विशेषणासिद्धिनिरासात्।

अविगीतशिष्टाचारविषयत्वेन सफलत्वे सिद्धे

उत्तर–अविगीत (अनिन्दित) जो शिष्टों का आचार (कृति) उसका विषय होने से अर्थात् "अविगीतशिष्टाचारविषयत्वहेतु" के द्वारा मंगल में सफलत्व का अनुमान करेंगे (मंगलं सफलम् अविगीत 'शिष्टाचार' विषयत्वात् यागादिवत्) इससे मंगल में सफलत्व सिद्ध हुआ।

मंगलं समाप्तिसाधनं समाप्तीतरफलासाधनत्वे, सति सफलत्वादिति परिशेषानुमाने विशेष्यासिद्धिनिरासायाह **अविगीतशिष्टाचारविषयत्वेनेति**। हेतुनेति शेषः। **सफलत्वे सिद्धे** इति। तथा च मंगलं सफलं अविगीतशिष्टाचारविषयत्वादित्यनुमानेन मंगले सफलत्वसिद्धिरिति भावः। सफलत्वं च फलसाधनत्वं तेन न पूर्वस्माद्भेदः।

१—अथ महानसीयवह्नीतरवह्न्यभाववान्पर्वत इत्याद्यप्रामाण्यज्ञानानास्कन्दितनिश्चयदशायां वह्निव्याप्यधूमवान्पर्वत इति सामान्यपरामर्शादपि महानसीयवह्निमात्रनिष्ठविधेयताशाल्यनुमितिर्जायते इति सकलतान्त्रिकमतम्। सा चाऽनुमितिः किं 'वह्नित्वेन' महानसीयवह्निमात्रनिष्टविधेयताशालिनी महानसीयवह्नित्वेन वेति। अत्रोपाध्यायाः। वह्नित्वैवतादृशविधेयताशाल्यनुमितिर्जायते, यद्धर्मे व्यापकतावच्छेदकत्वं गृह्यते तद्धर्मावच्छिन्नविधेताकानुमितिरितिनियमात्। नचैवं महानसीयवह्निभाववानिति बाधनिश्चयस्य तत्र प्रतिबन्धकत्वानुपपत्तिः, वह्नित्वाचच्छिन्नविधेयताकानुमितौ तस्याऽप्रतिबन्धकत्वादिति वाच्यम्। इष्टापत्तेः। विशेषरूपेण सकलरूपाभावनिश्चयेपि रूपसामान्यसंशयानुभवात्, समानप्रकारत्वेनैव विरोधिता न तु समानविषयकत्वेन, तथा च सामान्यतो व्यापकतावच्छेदकरूपेण व्यापकत्वावगाहिपरामर्शत्तेन रूपेण साध्यानुमितौ कथं विशेषबाधो दोषतामासादयेद्। विशेषरूपेणानुमतिस्तु तेन

ननु किं तावन्मंगलत्वम्! न च समाप्तिजनकतावच्छेदकतया सिद्धो जातिविशेष इति वाच्यम्। मंगलस्य कायिकवाचिकमानसिकभेदेन नानात्वतया करशिरःसंयोग–नमःशब्दप्रयोग–मानसज्ञानविशेषरूपत्वेन संयोगत्व-शब्दत्व-ज्ञानत्वादिभिः सांकर्यात्। न च करशिरःसंयोगाद्यन्यमत्वं तदिति वाच्यम्। तस्याऽसिद्धिनिरूपकत्वेन जनकतानवच्छेदकत्वात्। अन्यथा तृणारणिमणीनामन्यतमत्वेन हेतुत्वे मीमांसकानां

रूपेण व्यापकताज्ञानविरहादेव न जायते। नहि सामान्यरूपेण व्यापकत्वबुद्धेरपि इतरबाधबलाद्विशेषरूपेण साध्यप्रकारकानुमितिसामग्रीत्वमित्यत्र किंचित्प्रमाणमीक्षामहे।

अथेच्छा द्रव्याश्रिता गुणत्वाद् रूपवदित्यादौ इच्छायां पृथिव्याद्यष्टद्रव्यवृत्तित्वबाधावतारदशायां जायमानद्रव्याश्रितत्वानुमितिः पृथिव्याद्यष्टकभिन्नद्रव्याश्रितत्वं विषयीकरोति तदुत्तरं तादृूप्येण संशयानुत्पादस्य सर्वानुभवसिद्धत्वादिति व्यापकतानवच्छेदकरूपेणाप्यनुमितेः स्वीकार आवश्यकः, तथा च तादृशानुमानेन विशेषरूपावच्छिन्नसिद्धिस्तत एव संशयनिराशादिति चेन्न। व्यापकतानवच्छेदकरूपेणानुमितेः सिद्धान्तविरुद्धत्वात्। अत एव मणिकृतैव इतरबाधसहकृतगुणत्वादिहेतुकानुमित्याऽष्टद्रव्यातिरिक्तव्यत्वसिद्धिमाशंक्य व्यापकतावच्छेदकरूपेणैवानुमितिरिति नियमेन पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वादिव्यतिरेकिहेतुना तत्सिद्धिः सिद्धान्तिता। इच्छाश्रये द्रव्यमष्टद्रव्यातिरिक्तं इच्छाश्रयत्वात् पृथिव्यादित्वेबाधसत्वादित्यनुमानेन साध्यप्रसिद्धिरपि संपादिता। न चानुमाने तुल्यवित्तिवेद्यताविरहादिच्छाश्रयद्रव्ये पृथिव्यादिभिन्नत्वस्योक्तानुमानादेव तुल्यवित्तिवेद्यतया पृथिव्यादिभिन्नद्रव्यवृतित्वभानसंभवेन व्यतिरेकवैयर्थ्यप्रसंगादित्याहुः।

दीधीतिकृदनुयायिनस्तु अनुमानान्तरकल्पनापेक्षया लाघवेन इच्छा द्रव्याश्रिता गुणत्वादित्यनुमानस्यैव विशेषरूपेण द्रव्याश्रितत्वसाध्यकत्वं कल्पयितुमुचितम्। न चेतरबाधघटितसामग्र्यतरस्य विशेषरूपेणानुमित्युत्पादप्रयोजकत्वकल्पनापेक्षयाऽन्यत्र क्लृप्तसामग्रीतोऽनुमित्यन्तरकल्पनमेवोचितमिति वाच्यम्। अनुमित्यन्तरनिर्वाहकव्याप्त्यादिकल्पनापेक्षया लाघवेन क्लृप्तानुमितेर्विशेषप्रकारकत्वसिद्धौ इतरबाधादेस्तत्प्रयोजकत्वकल्पनागौरवस्य फलमुखत्वेनादोषत्वात्। व्यापकतावच्छेदकरूपेण व्यापकानुमितिरिति प्रवादो निर्युक्तिकत्वादश्रद्धेयः। अत एव च कर्तुरेकत्वे लाघवमित्याकारकलाघवज्ञानसहकृतसकर्तृकत्वव्याप्यवत्ताज्ञानात् क्षितिरेककर्तृकेत्यनुमित्युत्पादस्तदनन्तरं क्षितिकर्त्ता एकः अनेको वेति संशयानुत्पादः सर्वानुभवसिद्धः। न च तद्धर्मिकलाघवज्ञानस्य तद्विपरीतकोटिविरोधितायाः क्लृप्तत्वात्तत एव संशयनिरासः संभवतीति वाच्यम्। लाघवज्ञाननाशेपि अनुमितिसत्वे संशयानुदयात् उत्तरकालं संशयनिवृत्तये लाघवज्ञानान्तरकल्पनापेक्षया ऽनुमितावेव लघ्वर्थविषयकत्वकल्पनौचित्यात्। न च विशेषरूपेण व्याप्त्यवगाहिपरामर्शस्य तादृूप्येणानुमितिहेतुतायाः क्लृप्तत्वात्तं विना कथं तेन रूपेणानुमितिरिति वाच्यम्। तादृशपरामर्शघटिताया इतरबाधघटितसामग्र्या अपि विशेषरूपेणानुमितिजनकत्वोपगमात् तादृशसामग्र्यास्तादृशानुमितिजनने तादृशसामग्रीविरहस्याऽकिंचित्करत्वात्। महानसीयत्वविशिष्टवह्न्यादिवैशिष्ट्यावगाहिताया विशेषरूपेण व्यापकत्वघजन्यतावच्छेदकत्वोपगमान्महानसीवह्नीनरवयभाववानित्यादिबाधीधन्यानुमितिपूर्वकाले च नियमतो

कारणतावच्छेदकतया शक्तेः अस्माकं कार्यतावच्छेदकतया वैजात्यस्य कल्पनायाः सिद्धान्तसिद्धाया अनुपपत्तेरिति चेन्न। संयोगत्वादिव्याप्या नानैव मंगलत्वजातिरिति स्वीकारात्। वस्तुतो ज्ञानविशेषे एव मंगलपदस्य शक्तिः, अन्यत्र तु लक्षणैव। तथा च विघ्नान्यत्वे सति विघ्नध्वंससाधनत्वं मंगलत्वम्। विघ्नेऽतिव्याप्तिवारणाय सत्यन्तम्। घटादावतिव्याप्तिवारणाय विशेष्यदलम्। नन्वेवमपि कार्यमात्रसाधारणकारणकालादृष्टदिगीश्वरतज्ज्ञानादावतिव्याप्तिरिति चेन्न। विघ्नान्यत्वे सति विघ्नध्वंसासाधारणकारणत्वस्य वाच्यत्वात्। विघ्नध्वंसाऽसाधारणकारणत्वं च कार्यत्वानवच्छिन्नविघ्नध्वंसनिष्ठकार्यतानिरूपितकारणतावत्त्वे सति ज्ञानत्वमिति दिक्।

सफलत्वं साध्यम्। तच्च बलवदनिष्टाननुबन्धित्वे सति इष्टसाधनत्वम्। न च सत्यन्तं व्यर्थम्। प्रवर्त्तकज्ञानसंपादनाय तदुपादानात्। मधुविषसंपृक्तान्नभोजनादौ तृप्तिरूपेष्टसाधनताज्ञानसत्त्वेपि प्रवृत्त्यभावेन बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनताज्ञानस्यैव प्रवर्त्तकत्वात्। इष्टसाधनत्वमित्यत्र इष्टे वेदबोधितत्वमपि विशेषणीयम्, नातः स्वध्वंसफलकत्वमादाय सिद्धसाधनम्। इष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वं सत्यन्तार्थः।

अविगीतशिष्टाचारविषयत्वं हेतुः। अविगीतो यः शिष्टाचारस्तद्विषयत्वादित्यर्थः। यदविगीतशिष्टाचारविषयीभूतं तत्सफलं यथा दर्शादिः, तथा चेदं तस्मात्तथेति सफलत्वसिद्धिर्बोध्या। अत्र यत् अविगीतत्वे सति यदीयशिष्टाचारविषयीभूतं भवति तत् तत्पुरुषीयेष्टसाधनं भवति इति रीत्या यद्विशेषयोरिति न्यायेन मंगलसामान्यस्येष्टसाधनत्वं सिद्धयतीति सिद्धे इत्यन्तमूलाशयः।

श्येनेनाऽभिचरन्यजेतेतिश्रुत्या श्येननामकयागस्य शत्रुनाशकत्वप्रतिपादनात् श्येनयागे व्यभिचारवारणाय हेतावविगीतेति। अविगीतत्वं च बलवदनिष्टाननुबन्धित्वं–तच्चाऽऽचारविशेषणम्। तादृशयागस्य नरकसाधनत्वेन न व्यभिचारः, अभिचारे प्रायश्चित्तोपदेशात्। निष्फले जलताड़नादौ व्यभिचारवारणाय **शिष्टत्व**निवेशः। शिष्टत्वं च फलसाधनतांशे भ्रान्तिरहितत्वम्। शिष्टपदं शिष्टसमवेतपरम्। न च तस्याऽवितगीत्वाभावः, **न विप्रः क्षणिको भवेत्**, वृथाचेष्टां न कुर्वीत, **निष्फ-**

विशिष्टविशेषणकज्ञानानवस्थानात् विशेष्ये विशेषणमितिरीत्यैवानुमितेस्ततोभ्युपगन्तव्यतया परामर्शविशेषस्येतरबाधादिजन्यानुजितौ व्यभिचारानवकाशात्।

वस्तुतः कार्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशादेव परामर्शविशेष-लाघवज्ञाने-तरबाधज्ञानानां परस्परं न व्यभिचारः। यदि च विशिष्टविशेषणावगाहिज्ञानं प्रत्येव विशिष्टं विशेषणधियो हेतुता न तु विशिष्टप्रतियोगिकविलक्षणसंसर्गावगाहित्वं तज्जन्यतावच्छेदकं, अतएवाऽप्रसिद्ध "अभाव" साध्यकेपि साध्यविशेष्यकानुमितिरिति स्वीकुर्वन्ति इत्युच्यते तदाऽप्रसिद्ध "अभाव" साध्यकव्यतिरेकिविलोपो दुर्वारः। यदि च प्रत्यक्षत्वमेव विशिष्टविशेषणधीजन्यतावच्छेदकं न तु ज्ञानत्वं अतएव विशिष्टावान्तरवाक्यार्थज्ञानं विनापि महावाक्यार्थबोध इत्युपेयते तदापि प्रतियोगिन्यापकाभावहेतुकाऽप्रसिद्धाभावसाध्यकानुमानवदितरबाधबलादप्रसिद्धविशिष्टसाध्यकं सामान्यतोदृष्टानुमानमपि निष्प्रत्यूहमेव।

लानि च कर्माणि नारभेत विचक्षणः इत्यादिना निषेधादिति वाच्यम्। अस्य पर्युदासत्वात्, निषेधविधेः वैधरागजप्राप्तिपूर्वकत्वात्, प्रकृते तु वृथाचेष्टां कुर्वीतेति वाक्यानाकलनेन निष्फले कर्मणि रागतः प्रवृत्त्यभावेन च निषेधविष्यसंभवात्। एतेन शिष्टपदं स्पष्टार्थमिति दीपिकाकारोक्तिर्विभावनीया। रामरुद्रीकृतस्तु पश्वादिकृतनिष्फले गमनादौ व्यभिचारवारणाय शिष्टपदम् विधिनिषेधयोर्नराधिकारिकत्वेन तदीयवृथाचेष्टाया निषेधाविषयत्वेन बलवदनिष्टाजनकत्वादिति प्राहुः[1]। नचाऽऽचारपदस्य क्रियार्थकत्वे तद्विषयत्वस्याऽप्रसिद्धिरिति वाच्यम्। आचारपदस्य प्रवृत्त्यर्थकत्वात्। न च फले व्यभिचारः तस्याप्युद्देश्यतयाऽविगीतप्रवृत्तिविषयत्वादिति वाच्यम्। साध्यत्वाख्यविषयत्वस्य हेतुत्वोपगमात्। प्रवृत्तेरुद्देश्यत्वाख्यविषयताशालिनि फले तथाविधसाध्यत्वाख्यविषयताविरहेण न व्यभिचारः। एवं च मंगलं बलवदनिष्टाननुबन्धित्वे सति वेदबोधितेष्टसाधनतावत् बलवदनिष्टाननुबन्धिशिष्टसमवेतकृतिविधेयत्वाद्दर्शयागवदित्यनुमानं फलितम्।

ननु मंगलं समाप्तिसाधनं समाप्त्यन्याऽसाधनत्वे सति सफलत्वादित्यनुमानेन समाप्तिकारणत्वं साधितम्। तत्र समाप्त्यन्याऽसाधनत्वे वादिनामविवाद एव। मंगलं सफलं अविगीतशिष्टाचारविषयत्वादित्यनुमानेन विशेष्यासिद्धिनिरासोपि कृतः। सफलत्वं च बलवदनिष्टाननुबन्धित्वे सति इष्टसाधनत्वम्। परन्तु मंगले समाप्तिसाधनत्वसिद्धावपि निर्विघ्नपरिसमाप्त्यर्थं ग्रन्थादौ मंगलमेव कर्त्तव्यमिति नियमे मानाभावः, प्रायश्चित्तादिनापि विघ्ननाशसंभवात्ततः समाप्त्युत्पत्तेश्च। नाप्युक्तानुमानात्समाप्तिजनकतासिद्धिः, उक्तानुमितेः स्वतन्त्रप्रमाणाऽमूलकत्वेनाऽप्रामाण्यशंकास्कन्दितत्वादिति चेन्न। मंगलं वेदबोधितकर्तव्यताकम्, अलौकिकाविगीतशिष्टाचारविषयत्वाद्दर्शवदित्यनुमानेन वेदानुमानात्। तादृशी च श्रुतिः समाप्तिकामो मंगलमाचरेदित्याकारिका। अत्र यद्वक्तव्यं तद्दीपिकायां मुक्तम् श्रीचरणैः। एवं मंगलादीनि मंगलमध्यानि मंगलान्तानि शास्त्राणि प्रथन्ते इति श्रुतिरपि मंगले प्रमाणम्।

अत्रेदं बोध्यम्। मंगलस्य समाप्तिहेतुत्वे न प्रत्यक्षं प्रमाणम्, अन्वयव्यतिरेकसहचारनिश्चयसहकृतस्यैव प्रत्यक्षस्य कारणताग्राहकतया नास्तिकग्रन्थसमाप्त्या तदसंभवात्। नापि श्रुतिः, आनुपूर्वीविशेषनिर्णयाभावेन तस्या अबोधकत्वात्। अतोऽनुमानं प्रमाणतयोपन्यस्तम्। व्यतिरेकव्यभिचारसन्देहस्य साध्यसन्देहपर्यवसन्नतया अनुमितौ साध्यसन्देहस्यानुगुणत्वाज्जन्मान्तरीयसन्देहेन व्यभिचारनिश्चयाभावात्। अत एव साध्यसंशयः पक्षतेति प्राचीनाः। वेदात्कर्तव्यतानिश्चयोऽपि उपायस्योपायान्तरादूषकत्वाच्चेति ध्येयम्।

सफलत्वे सिद्धे इति। सफलत्वसिद्ध्यनन्तरमित्यर्थः।

प्राचीनमतस्य निराकरणीयतया तन्मतनिराकरणपूर्वकं नवीनमतं व्यवस्थापनीयमित्यभिप्रायवान् पूर्वपक्षे पश्चाद्दूषितमपि प्राचीनमतमादौ व्यवस्थापयति तत्रेत्या-

दिना। एतेन "ननु मंगलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारण" मिति पूर्वपक्ष-ग्रन्थे मंगलस्य नवीनमतसिद्धविघ्नध्वंससाधनत्वमेवादौ निराकृत्य प्राचीनमतसिद्ध-समाप्तिसाधनत्वं निराकृतमिति सिद्धान्तेऽपि आदौ नवीनमतमेव व्यवस्थापनीयमिति शंका निराकृता। **तत्र चेति** । मंगले चेत्यर्थः। सप्तम्यर्थो विशेष्यकत्वम्। **फलजिज्ञासायां** विशेषतः फलजिज्ञासायाम्। फलत्वव्याप्यधर्मावच्छिन्ननिरूपितसाधनत्वजि-ज्ञासायामिति यावत्। अनेन फलत्वेन फलसाधनत्वज्ञानमात्रस्य प्रवृत्त्यजनकत्वात्, फलत्वव्याप्यधर्मावच्छिन्ननिरूपितसाधनत्वज्ञानस्यैव प्रवृत्तिजनकत्वात् मंगलं स-फलमित्याकारकफलत्वावच्छिन्ननिरूपितसाधनत्वविधेयकमंगलोद्देश्यकानुमितिमात्रेण मंगले प्रवृत्तिः प्रेक्षावतां न स्यादिति सूचितम्। जिज्ञासायामित्यत्र कालीनत्वं सप्तम्यर्थः, अस्य कल्प्यते इति कल्पनापदार्थेऽन्वयः। तथा च तादृशजिज्ञासा-कालीनकल्पनाविषयीभूतं फलं समाप्तिरेवेति भावः। केचित्तु- **तत्र चेति फले** चेत्यर्थः। जिज्ञासायामिति विशेषधर्मप्रकारेण मंगलीयफलजिज्ञासायामित्यर्थः। शेषं पूर्ववदित्याहुः।

ननु फलत्वव्याप्यधर्मावच्छिन्ननिरूपितसाधनत्व-फलत्वव्याप्यधर्मावच्छि-न्नान्यतरविषयकजिज्ञासासत्त्वेपि फलविशेषसाधनत्व-फलविशेषान्यतरसिद्धिः कुत इत्याशंक्येतरबाधबलादुक्तविशेषसिद्धिरित्याह **संभवतीति** । न चाऽदृष्टफल-कल्पनाया अन्याय्यत्वादित्येव वक्तव्यमिति वाच्यम्। तथा सति गंगास्नानादीना-मप्यदृष्टार्थकता न स्यात्, तदुक्तौ च तत्र दृष्टफलासंभवेनाऽदृष्टकल्पनात्। फले दृष्टत्वं च उपायानुष्ठानावच्छेदकशरीरावच्छिन्नभोगविषयत्वम्। अदृष्टत्वं च तत्र उपाया-वच्छेदकशरीरभिन्नशरीरावच्छिन्नभोगविषयत्वम्। तथा च मंगलस्य दृष्टफलकत्वे संभवति[1] सतीत्यस्य मंगलनिष्ठमंगलानुष्ठानावच्छेदकशरीरावच्छिन्नभोगविष-यपशुपुत्रविघ्नध्वंससमाप्त्याद्यन्यतमफलसाधनत्वे संभावनाविषये सतीत्यर्थः। **अदृष्टफलकल्पनाया** इति। **अदृष्टे स्वर्गादौ**—फलत्वकल्पनाया इत्यर्थः। **अन्याय्य**-

तत्र च फलजिज्ञासायां संभवति दृष्टफलकत्वेऽदृष्टफलकल्पनाया अन्याय्यत्वादुपस्थितत्वाच्च समाप्तिरेव हि फलं कल्प्यते।

वहां फल की जिज्ञासा हुई कि मंगल का दृष्टफल मानना या अदृष्टफल ! तो इस प्रश्न का उत्तर देते हैं कि दृष्टफल यदि संभव हो सके तो अदृष्टफल की कल्पना अन्याय्य है अतः प्रकृत में समाप्तिरूप दृष्टफल जब कि उपस्थित है तो वही मंगल का फल (कार्य) मानना चाहिये।

---

१ दृष्टफलकत्वे संभवत्वं च मंगलवृत्तिभेदप्रतियोगितावच्छेदकत्वम्। अवच्छेदकता च स्वनिष्ठापादकताकायत्तयविशेष्यत्वसंबन्धावच्छिन्ना बोध्या। अस्ति चैतन्मंगलनिष्ठदृष्ट-फलकत्वे मंगलं यदि दृष्टफलकत्ववत्स्यात्तदा कापि आपत्तिर्नास्तीति तादृशविशेष्यत्वस्याऽन्यत्र गंगास्नानादौ वर्तमानतया तादृशविशेष्यत्वसंबन्धेन दृष्टफलकत्ववान्नेति भेदस्य मंगले सत्वेन तादृशभेदप्रतियोगितावच्छेदकत्वस्य दृष्टफलकत्वे सत्वादिति ध्येयम्।

त्वादिति। अनुपस्थितोपस्थितिकल्पने गौरवात् अन्यथा गंगास्नानस्येव कषायपान-स्यापि अदृष्टफलकत्वापत्तेरिति भावः। तथा च मंगलानुष्ठानावच्छेदकशरीरभिन्नशरीरा-वच्छिन्नभोगविषयफल(स्वर्ग)साधनत्वविधेयकानुमितेरप्रामाण्यप्रकारकज्ञानविषयत्वा-दिति यावत्। ननु मंगलविशेष्यकनिरुक्तदृष्टफलकत्वप्रकारकसंभावनायां समाप्ति-विघ्नध्वंसातिरिक्तदृष्टफलविषयकैवानुमितिर्भवतु इत्यत आह **उपस्थितत्वाच्चेति**। ग्रन्थादौ मंगलकर्त्तुर्मंगलानुष्ठानसमये ग्रन्थसमाप्ति-तत्प्रतिबन्धकविघ्नध्वंसयोरेवे-च्छाविषयत्वेन स्मृतिविषयत्वादित्यर्थः। इतरेषां फलानामनुपस्थितत्वादिति यावत्।

केचित्तु उपस्थितत्वादित्यस्य आरब्धकर्माङ्गतयोपस्थितत्वादित्यर्थः। तथा च यद्यदारब्धकर्माङ्गं तत्तदारब्धकर्मफलफलकं यथा प्रयाजादि। ननु मंगलस्याऽऽरब्ध-कर्माङ्गत्वे मानाभाव इति चेत्। मंगलं आरब्धकर्माङ्गं तत्फलार्थितयाऽभ्रान्तैस्तत्पूर्व-मनुष्ठीयमानत्वात्प्रयाजवदित्यनुमानस्य प्रमाणत्वादिति प्राहुः।

तथा च संभवति दृष्टफलकत्वे इत्याद्युपस्थितत्वाच्चेत्यन्तफक्किकया बलदनिष्टान-नुबन्धीष्टसाधनत्वव्याप्याऽविगीतशिष्टाचारविषयत्ववन्मंगलमिति परामर्शात् निर्विघ्न-परिसमाप्तीतरफलसाधनत्वाभाववन्मंगलमितीतरबाधसहकृतात्, निर्विघ्नपरिसमाप्ती-तरफलसाधनत्वाभावविशिष्टबलवदनिष्टाननुबन्धीष्टसाधनत्वव्याप्याऽविगीतशिष्टाचार-विषयत्ववन्मंगलमिति परामर्शाद्वा मंगलं समाप्तिसाधनमिति परिशेषानुमितिर्जायते। यथा पर्वते पर्वतीयवन्हीतरवह्निर्नास्तीति बाधसत्वे पर्वतीयवह्नीतरवह्न्यभावविशिष्टवह्नि-व्याप्यधूमवांश्चायमिति परामर्शेण पर्वतीयवह्निमानित्याकारिका पर्वतो वह्निमानित्या-कारिका वह्नित्वावच्छिन्नपर्वतीयवह्निविधेयकानुमितिर्भवति, तथा बलवदनिष्टाननु-बन्धीष्टसाधनत्वव्याप्याऽविगीतशिष्टाचारविषयत्ववन्मंगलमिति परामर्शेण मंगलं बलवदनिष्टाननुबन्धीष्टसाधनमित्याकारिका बलवदनिष्टाननुबन्धीष्टसाधनत्वत्वावच्छि-न्नसमाप्तिविधेयकानुमितिः। "इतरबाधबलाद् व्यापकतानवच्छेदकप्रकारेणाऽनुमिति-स्वीकारे तु" मंगलं समाप्तिसाधनमित्याकारिका वाऽनुमितिरुत्पद्यते इत्याह **समाप्तिरेव हि फलं कल्प्यते** इति। "समाप्तिविघ्नध्वंसान्यतरत्" **फलं**-मंगलजन्यं **कल्प्यते**-अनुमीयते-परिशेषानुमितिविषयीक्रियते इत्यर्थः। तथा च समाप्तिविघ्नध्वं-सान्यतरस्य मंगलजन्यत्वलाभे मंगले तुल्यवित्तिवेद्यतया समाप्तिविघ्नध्वंसान्यतरसाध-नत्वमनुमीयते इति फलितोर्थः। समाप्तिरेवेत्येवकारेण पशुपुत्रादीनां दृष्टानाम्-अदृष्टस्य च स्वर्गादेर्व्यावृत्तिः। तथा च परिशेषानुमानान्मंगले समाप्तिजनकत्वसिद्धिरिति निष्कर्षः। इदमुपलक्षणम्— मंगलस्य समाप्तिजनकत्वे शिष्टाचारानुमितश्रुतिरपि प्रमाणम्। तादृशश्रुतेः सर्वज्ञभाष्यकारप्रभृतिभिः उच्चरितानुपूर्वीविशेषनिर्णयादेव बोध-कतासंभवात्, अत एव "न च तस्य निष्फलत्वे" इत्यग्रिममुक्तावलीग्रन्थोऽपि संगच्छते।

अत्रेदं बोध्यम्—"तत्र च फलजिज्ञासाया"मित्यस्य सफलत्वानुमितिसह-कारीभूतपक्षताघटकतया नोपादानम्, मंगलं सफलमिति सिद्धेर्मंगलं समाप्तिफल-

कमित्याकारानुमितावप्रतिबन्धकतया सफलत्वविधेयकमंगलोद्देश्यकानुमितिकालेऽपि विनैव सिषाधयिषां समाप्तिफलकत्वविधेयकानुमित्युत्पत्तौ बाधकाभावात। समानकालिकसिद्धेः समानाकारानुमितिं प्रति विरोधित्वात्। तर्हि किमर्थं तदुपादानमिति चेत्। मंगलं निष्फलमित्याशंकायाः, मंगलं सफलमित्यनुमानेन निरासेपि तावता मंगले प्रवृत्तिनिर्वाहो न संभवतीति प्रवृत्तिनिर्वाहकं किं फलविशेषसाधनं मंगलमित्येवंविधवादिजिज्ञासायाः समाप्तिफलानुमानोपयोगितयाऽनुपयुक्तत्वाभावादिति।

अथ समाप्तिश्चरमवर्णध्वंसरूपा-न तु चरमवर्णरूपा, तथा सति चरमवर्णस्य तृतीयक्षणे नाशेन ततो ग्रन्थः समाप्त इति व्यवहारानुपपत्तेः। वर्णे चरमत्वं च - स्वघटितग्रन्थघटकवर्णप्रागभावाऽसमानकालीनत्वम्। तथा च ध्वंसप्रागभावयोः स्वप्रतियोगिसमवायिदेशवृत्तित्वनियमेन समाप्तिराकाशनिष्ठा- मंगलं ज्ञानरूपमात्मसमवेतम् इति समाप्तिमंगलयोरेकाधिकरणवृत्तित्वविरहात्कथं समाप्तिं प्रति मंगलं कारणम्, ययोः सामानाधिकरण्यं तयोरेव कार्यकारणभावात्, तथाहि-मंगलं कारणं कारणं हि कार्याधिकरणे नियतपूर्ववृत्ति, अत्र हि समाप्त्यधिकरणे आकाशे मंगलं ज्ञानात्मकं नैव वर्त्तते इति चेत्। सत्यम्। स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसंबन्धेन समाप्तिं प्रति समवायेन मंगलं कारणमिति विवक्षणात्। स्वपदं चरमवर्णध्वंसपरम्। तथा हि ग्रन्थकर्त्तरि पुरुषे स्वप्रतियोगिचरमवर्णानुकूलकृतिर्वर्त्तते। तत्र समवायेन मंगलं वर्त्तते इति चरमवर्णध्वंसरूपसमाप्तेः स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसंबन्धेनाधिकरणे आत्मनि मंगलं समवायेन वर्त्तते इति समाप्तिमंगलयोर्वैयधिकरण्याभावात्कारणकार्यभाव इति ध्येयम्।

एवमनुमानेन सफलत्वस्य समाप्तिफलकत्वस्य च सिद्धावपि स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसंबन्धेन समाप्त्यधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकमंगलत्वाश्रयत्वे सति समाप्तिं प्रति अनन्यथासिद्धं मंगलमित्याकारककारणताग्रहे निरुक्तसम्बन्धेन समाप्त्यधिकरणवृत्त्यभावप्रतियोगितावच्छेदकं मंगलमित्याकारकव्यतिरेकव्यभिचारज्ञानस्य तदभाववत्ताज्ञानस्य तद्वत्तानिश्चयविधया प्रतिबन्धकतया तन्निरासः

इत्थं च यत्र मंगलं न दृश्यते तत्रापि जन्मान्तरीयं तत्कल्प्यते। यत्र सत्यपि मंगले समाप्तिर्न दृश्यते, तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यम्। प्रचुरस्यास्यैव बलवत्तरविघ्ननिवारणे कारणत्वं बोध्यम्। विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः प्राञ्चः।

यह प्राचीन ने कहा। (प्राचीनमत में नास्तिक प्रदत्त व्यतिरेक व्यभिचार का वारण आस्तिक करता है, "इत्थञ्च" इत्यादि ग्रन्थ से कि इस प्रकार जहां (किरणावली आदि नास्तिक ग्रन्थों में) मंगल नहीं देखते हैं वहां पर हम जन्मान्तरीय मंगल का अनुमान करते हैं कि नास्तिक पूर्वजन्म में पूर्ण आस्तिक था जिसके नाते इसने बहुत ही ईश्वरनमस्कारात्मक

मंगल किया था, मृत्युकाल में किसी कर्मवैगुण्य के नाते वह नास्तिक होगया—परन्तु जन्मान्तरीय आस्तिकताप्रयुक्त किये हुवे मंगल का फल (समाप्ति) उसे अवश्य प्राप्त होगया। अन्वयव्यभिचार का वारण करते हैं "यत्र च सत्यपि" इससे, जहां (कादम्बरी में) मंगल के होने पर भी समाप्ति नहीं देखते हैं वहां या तो वलवान् विघ्न है या विघ्न अधिक हैं, अतः समाप्ति नहीं होसकी। अतः प्रचुर (अधिक संख्या वाला) यह मंगल ही वलवत्तर विघ्न के निवारण में कारण हो सकता है। विघ्नध्वंस मंगल का द्वार (व्यापार) है। ऐसा प्राचीन कहते हैं। अर्थात् मंगल से जो समाप्ति होती है वह विघ्नध्वंसद्वारा। (इससे यह सिद्ध हुआ कि प्राचीनमत में मंगल का फल समाप्ती है)।

कथं संभवतीत्याशंक्याह इत्थं चेति। मंगलस्य समाप्तिसाधनत्वसिद्धौ चेत्यर्थः। यत्र नास्तिकग्रन्थे। समाप्तिरूपकार्यदर्शनेन मंगलकारणस्याऽनुमातुं शक्यतया निरुक्त-संबन्धेन समाप्त्यधिकरणे नास्तिकात्मनि मंगलस्यैव सत्त्वेन समाप्त्यधिकरणवृत्त्य-भावप्रतियोगितावच्छेदकं मंगलत्वमिति व्यभिचारज्ञानाऽसम्भव इति भावः। नन्वत्र जन्मान्तरीयमंगलकल्पनमयुक्तं, समाप्तिरूपकार्येण मंगलमात्रस्यैवानुमातुं शक्यत्वात्, न तु जन्मान्तरीयस्येति चेन्न। समाप्त्या मंगलमेवानुमीयते, अनुमितिश्च नास्तिकः मंगलवान् समाप्तिमत्त्वादित्याकारिका, तत्रैहिकबाधे जन्मान्तरीयं तदर्थात्कल्प्यते इति ध्येयम्। न चैहिकफलार्थस्य कर्मणोऽनुष्ठाने फलादर्शनेन वैगुण्यकल्पनमेव युक्तं, न तु जन्मान्तरीयफलकल्पनमिति वाच्यम्। वृष्टिकामनया कारीरीष्ट्यादौ तथा कल्पनेऽपि पुत्रकामनया पुत्रेष्ट्यादौ जन्मान्तरीयपुत्रस्यापि फलत्वस्य न्यायसिद्धतया प्रकृतेऽपि जन्मान्तरीयसमाप्तेः फलत्वसंभवात्। नचाद्यैव वृष्टिर्भूयादिति कामनया कारीर्यनुष्ठानवत्, प्रारीप्सितं कर्म समाप्यतामिति कामनया मंगलानुष्ठानदर्शनादत्र फलादर्शने ऽमुत्रफलकल्पनापेक्षया वैगुण्यकल्पनमेव युक्तमिति वाच्यम्। इष्टेर्बह्वङ्गकलापयुक्ततया विशिष्टकर्त्तृकतया च तत्तदङ्गकर्त्तृवैगुण्यसंभवेपि नमस्कारमात्रादिरूपमंगलस्य वर्णाश्रमविशेषानादरेण पुरुषमात्रस्यैव तत्र कर्त्तृतया कर्त्तृवैगुण्यासंभवात्, ईश्वरादिविशेष्यकस्वापेक्षोत्कर्षप्रकारकज्ञानादिरूपतया तत्राङ्गकलापाभावाच्च वैगुण्यकल्पनाऽसंभवेन फलकल्पनस्यैव युक्तत्वात्।

ननु कार्यात् कारणस्यानुमेयतया नास्तिकग्रन्थे समाप्तिरूपकार्यदर्शनेन तत्कारणेऽनुमातव्ये जन्मान्तरानुष्ठितसुवर्णदानादिजन्यविघ्नध्वंसस्य विघ्नात्यन्ता-भावस्य वा कारणस्यानुमानेन जन्मान्तरीयमंगलकल्पनमयुक्तमेवेति चेत्। सत्यम्। तस्य दृष्टकामनानुरोधेन जन्मान्तरे सत्त्वेन समाप्तिं प्रति कारणीभूतविघ्नध्वंसाभा-वप्रदर्शनेन स्वेतरप्रतिबन्धकाभावरूपविघ्नध्वंसात्मककारणसमवहितस्य स्वाव्यवहि-तोत्तरत्त्वणावच्छेदेन समाप्त्यभावकमंगलस्यैवाऽन्वयव्यभिचाररूपतया मंगलाधिक-रणे "जन्मान्तरे" विघ्नध्वंसाभावेन विघ्नध्वंससहितस्वाधिकरणवृत्तिसमाप्त्यभाव-त्वरूपान्वयव्यभिचारो नास्तीति प्रदर्शितमिति कुतोऽन्यथासिद्धिरिति भावः।

न च सिद्धे जन्मान्तरीये मंगले व्यभिचाराभावज्ञानेन कार्यकारणभावग्रहः,

गृहीते च कार्यकारणभावे समाप्त्या तदनुमानमित्यन्योन्याश्रय इति वाच्यम्। समाप्तिकार्यत्वेन परिशेषात् मंगलानुमाने बाधकाभावादिति।

ननूक्तरीत्या कारणताघटकसमाप्त्यधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकं मंगलमित्याकारकव्यापकताज्ञानविरोधिज्ञानविषयीभूतसमाप्त्यधिकरणवृत्त्यभावप्रतियोगितावच्छेदकमंगलत्वरूपव्यतिरेकव्यभिचारस्य निरासेऽपि समाप्तिं प्रति अवश्यक्लृप्तनियतपूर्ववृत्तिभिन्नत्वरूपाऽन्यथासिद्धत्वज्ञानप्रयोजकस्वाव्यवहितोत्तरक्षणावच्छिन्नस्वाधिकरणवृत्तिसमाप्त्यभावकमंगलरूपाऽन्वयव्यभिचारो दुष्परिहर इत्यत आह **यत्र चेति**। कादम्बर्यादौ चेत्यर्थः। सत्यपि मंगले समाप्तिर्न दृश्यते इत्यनेन स्वाव्यवहितोत्तरक्षणावच्छेदेन स्वाधिकरणवृत्तिसमाप्त्यभावत्वरूपान्वयव्यभिचारप्रदर्शनेन समाप्तिं प्रति अवश्यक्लृप्तनियतपूर्ववृत्तिभिन्नत्वरूपान्यथासिद्धिरुद्घाटिता। **बलवत्तर** इति। बलवत्तरत्वं च विघ्नत्वव्याप्यजातिविशेषः। तदाश्रयप्रतियोगिकनाशत्वं जन्यतावच्छेदकं बलवत्तरत्वरूपवैजात्यकल्पने गौरवादाह **विघ्नप्राचुर्यं वेति**। प्राचुर्यमनेकत्वम्। **तत्र च बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्य**मित्यनेन समाप्तिप्रतिबन्धकस्यैव तत्र सत्त्वेन समाप्तिकारणीभूतविघ्नध्वंसाभावप्रदर्शनेन स्वेतरप्रतिबन्धकाभावरूपविघ्नध्वंसात्मककारणसमवहितस्य स्वाव्यवहितोत्तरक्षणावच्छेदेन समाप्त्यभावकमंगलस्यैवान्वयव्यभिचाररूपतया मंगलाधिकरणे विघ्नध्वंसाभावेन विघ्नध्वंससहितस्वाधिकरणवृत्तिसमाप्त्यभाववत्त्वरूपान्वयव्यभिचारो नास्तीति प्रदर्शितमिति कुतोऽन्यथासिद्धिरिति भावः। ननु नाशकसत्त्वेन नाशापत्तिरत आह **प्रचुरस्यैवेति**। विघ्नाऽन्यूनसंख्याकमंगलत्वेनैवेत्यर्थः। **अस्य** मंगलस्य। **बलवत्तरविघ्ननिवारणे** बलवत्तरादिविघ्ननिवारणे। आदिना प्रचुरविघ्ननिवारणपरिग्रहः। तथा च प्रचुरविघ्ननाशं प्रति विघ्नान्यूनसंख्याकमंगलत्वेनैव कारणतया प्रचुरमंगलाभावात्प्रकृते न विघ्ननाश इति भावः। इदमुपलक्षणम्। पूर्वोत्पन्नविघ्नानां तेन नाशेऽपि तदुत्तरविघ्नानां नाशकाभावेन न समाप्तिरित्यपि बोध्यम्।

अत्रेदं बोध्यम्। यत्र मंगलसत्त्वेऽपि समाप्तिर्न दृश्यते तत्र विघ्नध्वंसो नोत्पन्न इति न बुद्धिप्रतिभादिरूपकारणान्तराभावात् मंगलानन्तरोत्पन्नविघ्नाद् बलवत्तरविघ्नाद्वा समाप्त्यभावः संभवति तस्मात्कुतोऽन्वयव्यभिचारः। न चैवं मंगलस्य मंगलजन्यविघ्नध्वंसस्य च सत्त्वेऽपि समाप्त्यनुत्पत्तौ सहकारीभूतविघ्नध्वंससहितस्वाधिकरणवृत्तिसमाप्त्यभावकत्वरूपाऽन्वयव्यभिचार एव भवता दृढीकृत इति वाच्यम्। स्वस्वव्यापारीभूतविघ्नध्वंसेतरयावत्कारणसमवहितस्वाधिकरणवृत्तिसमाप्त्यभावकत्वस्येहान्वयव्यभिचारपदार्थतया मंगलतद्व्यापारीभूतविघ्नध्वंसयोः सत्त्वेऽपि बुद्धिप्रतिभादिकारणान्तराभावेन मंगलाऽनाश्यप्रबलप्रतिबन्धकध्वंसाभावरूपकारणाभावेन च स्व-स्वव्यापारेतरयावत्कारणसमवहितस्वाधिकरणवृत्तिसमाप्त्यभावकत्वरूपान्वयव्यभिचारो नास्तीति कुतोऽन्यथासिद्धिशंकेति। बलवत्तरो विघ्नो विघ्नप्राचुर्यं वेत्यत्र मंगलानन्तरोत्पन्न इति पूरणीयम्।

न चैवमवश्यक्लृप्तनियतपूर्ववृत्तिविघ्नसंसर्गाभावेनैव समाप्तिसंभवे तत्सहभूतमंगलस्याऽन्यथासिद्धत्वमिति वाच्यम्। कारीरीष्टिपुत्रकामेष्टयादेरवग्रहरूपदुरितविशेषपुत्रप्रतिबन्धकदुरितविशेषनिवृत्तिद्वारा हेतुत्वेप्यन्यथासिद्धयभाववत्, मंगलस्यापि विघ्ननिवृत्तिद्वारा हेतुत्वेप्यन्यथासिद्धयभावस्य वक्तुं शक्यत्वात्।

न च **वृष्टिकामो यजेत पुत्रकामो यजेत** इत्यादिश्रुत्या वृष्टिकामेष्टिपुत्रकामेष्ट्योः कारणत्वेन श्रुतिसिद्धत्वाद्दुरितविशेषसंसर्गाभावेनान्यथासिद्धेराशंकितुमशक्यत्वेऽपि मंगलस्यानुमानप्रमाणेन कारणतया सिद्धस्य विघ्नसंसर्गाभावेनाऽन्यथासिद्धिः संभवत्येवेति वाच्यम्। अत्रापि शिष्टाचारानुमितस्मृत्यादिना समाप्तिसाधनत्वस्य सिद्धत्वेन विघ्नध्वंसत्वादिनाऽन्यथासिद्धेराशंकितुमशक्यत्वादिति ध्येयम्।

ननु कादम्बर्यादौ विघ्नध्वंसो मा जायतां समाप्तिः परं जायतां मंगलरूपहेतोः सत्त्वादित्याशंक्याह **विघ्नध्वंसस्त्विति**। विघ्नध्वंस एवं व्यापार इत्यर्थः। तथा च स्वजन्यविघ्नध्वंससंबन्धेन मंगलाभावान्न समाप्तिरिति भावः। तज्जन्यत्वे सति तज्जन्यजनकत्वं हि व्यापारः। प्रकृते च विघ्नध्वंसे मंगलजन्यत्वमपि मंगलजन्यसमाप्तिजनकत्वमपीति समन्वयः।

अत्रेदं बोध्यम्। विघ्नध्वंसस्य समाप्तिं प्रति प्रतिबन्धकाभावविधया कारणत्वेन सिद्धस्य मंगलफलत्वकल्पने तस्यैव द्वारत्वमुचितं, न तु मंगलध्वंसस्य। न च विघ्नध्वंसस्य समाप्तिं प्रति कारणत्वेन क्लृप्तत्वेऽपि मंगलजन्यत्वस्य कल्पनीयतया मंगलध्वंसस्य च समाप्तिं प्रति कारणत्वस्य कल्पनीयत्वेपि मंगलजन्यत्वस्य क्लृप्तत्वात् तयोर्व्यापारत्वे विनिगमनाविरह इति वाच्यम्। मंगलनाशस्य द्वारत्वे समाप्तिं प्रति कारणीभूताभावप्रतियोगित्वेन मंगलस्य विघ्नवत्प्रतिबन्धकत्वापत्तेः। न च कारणीभूतात्यन्ताभावप्रतियोगित्वं प्रतिबन्धकत्वमिति वाच्यम्। विघ्नस्यापि समाप्तिकारणीभूतध्वंसप्रतियोगित्वेन प्रतिबन्धकत्वानापत्तेः। प्रतिबन्धकसंसर्गाभावस्य कार्यमात्रे कारणत्वकल्पनानुपपत्तेश्च। अथाऽपूर्वमेव व्यापारोस्तु इति चेन्न। सिद्धस्य विघ्नध्वंसस्य द्वारत्वकल्पनायां लाघवात्, निर्विघ्नं समाप्यतामितीच्छाविषयाऽसिद्धेश्च प्रतिबन्धकाभावहेतुतया तद्धेतुत्वस्य तवाप्यावश्यकत्वेन तत्रैव द्वारत्वकल्पनायां लाघवादिति संक्षेपः।

ननु चरमवर्णध्वंसरूपायाः समाप्तेः प्रतियोगितया चरमवर्णस्य कारणत्वेनैव निर्वाहे मंगलस्य तद्द्वारकविघ्नध्वंसस्य समाप्तौ हेतुत्वासिद्धिरिति चेन्न। विना बीजप्रयोजनाभ्यां यस्य कस्यचित्कार्यस्यानुपपत्तेरिति न्यायेन तत्तत्कार्यविशेषे अदृष्टविशेषरूपबीजस्य विघ्नध्वंसात्मकप्रयोजनस्य वा हेतुत्वेन तद्द्वारा मंगलस्यापि हेतुत्वात्।

ननु ग्रन्थघटकयावद्वर्णध्वंसविशिष्टतद्ग्रन्थघटकचरमवर्णध्वंसरूपसमाप्तेः प्रत्येकसामग्रीसमुदायप्रयोज्यस्याऽर्थसमाजग्रस्ततया नैककारणप्रयोज्यत्वमिति चेन्न।

नव्यास्तु मंगलस्य विघ्नध्वंस एव फलम्, समाप्तिस्तु बुद्धि-प्रतिभादिकारणकलापात्। न चैवं स्वतःसिद्धविघ्नविरहवता कृतस्य मंगलस्य निष्फलत्वापत्तिरिति वाच्यम्। इष्टापत्तेः। विघ्नशंकया तदाचरणात्, तथैव शिष्टाचारात्।

नवीन कहते हैं कि मंगल का विघ्नध्वंस ही फल है, समाप्ति तो बुद्धि-प्रतिभा-आदि कारण कलाप से स्वयं हो जावेगी (अतः नवीनमत में विघ्नध्वंस के लिये मंगल की आवश्यकता है समाप्ति के लिये नहीं) प्रश्न—यदि नवीन ने मंगल का फल विघ्नध्वंस ही मान लिया तो जिस निष्पाप पुरुष ने कोई विघ्न (पाप) ही नहीं किया—ऐसे स्वतःसिद्धविघ्नविरहवान् निष्पाप पुरुष से किया हुआ मंगल निष्फल हो जावेगा, क्योंकि मंगल से तो विघ्नध्वंस ही होना है वह उसे स्वयं ही है। उत्तर—ऐसे स्थल में मंगल की निष्फलता हमें इष्ट है, क्योंकि विघ्न की शंका से मंगल किया है, वैसा ही शिष्टों का आचार है, कि यदि विघ्न होंगे तो मंगल से नष्ट हो जावेंगे-यदि नहीं होगे तब वहां मंगल निष्फल है।

प्रमाणाभावे अर्थसमाजग्रस्तस्य कार्यस्य एककारणताप्रयोज्यत्वाभावेऽपि प्रमाणसद्भावे अर्थसमाजग्रस्ततादृशध्वंसरूपसमाप्तेः एककारणप्रयोज्यत्वे बाधकाभावात्।

ननु विघ्नसामान्यशून्यपुरुषकृततद्ग्रन्थसमाप्तौ मंगलजन्यविघ्नध्वंसरूपद्वाराऽभावेन मंगलस्य हेतुत्वं न संभवतीति चेन्न। विघ्नसामान्यशून्यपुरुषे मानाभावात्।

इत्थं च स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसंबन्धेन समाप्तिं प्रति स्वजन्यविघ्नध्वंसवत्तासंबन्धेन मंगलस्य कारणत्वं फलितम्।

आहुरित्यनेनाऽस्वरसः सूचितः। स च समाप्तिमंगलकार्यकारणभावकल्पने गौरवमेव। तथाहि समाप्तेः स्वतःसिद्धविघ्नात्यन्ताभावेन भोग-सुवर्णदानादि-विघ्नध्वंसेन- मंगलजन्यविघ्नध्वंसेनाप्युत्पत्त्या परस्परं व्यभिचारः, विघ्नध्वंसद्वारा सुवर्णदानजन्यसमाप्तौ मंगलस्य, मंगलजन्यसमाप्तौ सुवर्णदानस्य विघ्नात्यन्ताभाव-जन्यसमाप्तौ सुवर्णदानमंगलयोश्चाऽभावात्। न च सुवर्णदानस्य विघ्नध्वंसं प्रत्येव कारणत्वं न समाप्तिं प्रत्यपीति सुवर्णदानजन्यसमाप्तौ कथं व्यभिचार इति वाच्यम्। एवमपि सुवर्णदानजन्यविघ्नध्वंसजन्यसमाप्तौ मंगलाभावेन व्यभिचारस्य दुष्परिहरत्वात्। न च मंगलजन्यविघ्नध्वंसविशिष्टसमाप्तिं प्रति मंगलस्य हेतुत्वकल्पने न व्यभिचार इति वाच्यम्। तथासति गौरवस्यावेदित्वात्। कारणस्य कार्यतावच्छेदकत्वकानुपगमाच्च। सुवर्णदानादिस्थले समाप्तिं प्रति विघ्नध्वंसस्य कारणतायाः स्वीकारेण प्रतिबन्धकाभावस्य कार्यमात्रे कारणतया च अत्रापि विघ्नध्वंसेनैव समाप्ति-निर्वाहे मंगलस्यान्यथासिद्धत्वाच्च नोक्तकार्यकारणभावसंभव इति।

नास्तिकसमाप्तौ जन्मान्तरीयमंगलस्य हेतुत्वे जन्मान्तरीयसमाप्तिमुद्दिश्यापि प्रवृत्त्यापत्तिः, नहि तादृशप्रवृत्तिः शिष्टसिद्धा। एवं स्वतःसिद्धविघ्नविरहवतां ग्रन्थसमाप्तौ व्यभिचारश्चेति अस्वरस आहुरित्यनेन सूचित इत्यपरे।

"शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ।। सर्वे विघ्नाः शमं यान्ति गणेशस्तवपाठत" इत्यादिस्मृत्या, समाप्तिं प्रति मंगलस्य हेतुत्वं वदतामपि विघ्नध्वंसस्य मंगलजन्यत्वाभ्युपगमेन च दर्शितरीत्या समाप्तिं प्रति मंगलस्याऽन्यथासिद्धत्वेन च विघ्नध्वंस एव मंगलफलमिति वदतां चिन्तामणिकृतां मतमाह **नव्यास्त्विति** । विघ्नध्वंस एवेत्येवकारेण समाप्तेर्मंगलफलत्वव्यवच्छेदः । तथा च मंगलं सफलं अविगीतशिष्टाचारविषयत्वाद्दर्शवदित्यनुमानेनेतरबाधबलान्मंगलं विघ्नध्वंसफलकमेव सिद्ध्यतीति भावः । तर्हि समाप्तौ किं कारणमत आह समाप्तिस्त्विति । चिकीर्षितग्रन्थप्रतिपाद्यज्ञानं **बुद्धिः** । आपतितशंकाविरोधपरिहारानुकूलबुद्धिविशेषसंस्कारविशेषान्यतररूपा च **प्रतिभा** । आदिपदात्प्रतिबन्धकाभावपरिग्रहः । **कारणकलापात्**—सामग्रीवशात् । तथा च विघ्नध्वंसरूपप्रतिबन्धकाभावसहितबुद्ध्यादिसामग्रीवशात् "मंगलस्य हेतुत्वाभावेपि" समाप्तिर्भवतीति नानुपपत्तिरिति भावः । ननु मंगलस्य विघ्नध्वंसं प्रति हेतुत्वं न संभवति, विघ्नात्यन्ताभावस्थले सत्यपि मंगले स्वाव्यवहितोत्तरक्षणावच्छेदेन स्वाधिकरणे विघ्नध्वंसानुत्पत्तेरन्वयव्यभिचारेण विघ्नध्वंसं प्रत्यन्यथासिद्धत्वादित्याशंक्य निराचष्टे **न चैवमिति** । **एवं**—मंगलस्य विघ्नध्वंसं प्रति कारणत्वे । **स्वतःसिद्धविघ्नविरहवता** = विघ्नसामग्र्यभाववता । विघ्नात्यन्ताभाववता विघ्नप्रागभाववता चेति यावत् । **कृतस्य मंगलस्य** = विघ्नशंकयाऽनुष्ठितमंगलस्य । **निष्फलत्वापत्तिरिति** । विघ्नध्वंसहेतुत्वानुपपत्तिः, विघ्नरूपकारणाभावेन विघ्नध्वंसोत्पत्त्यभावात्, स्वाव्यवहितोत्तरक्षणावच्छिन्नस्वाधिकरणवृत्तिविघ्नध्वंसकभिन्नत्वेन विघ्नध्वंसं प्रति अवश्यक्लृप्तनियतपूर्ववृत्तिभिन्नत्वरूपान्यथासिद्ध्याक्रान्तत्वादिति भावः । शंकामुद्धरति **इष्टापत्तेरिति** । स्वतःसिद्धविघ्नविरहस्थले मंगलसत्त्वेऽपि विघ्नध्वंसं प्रति कारणीभूतविघ्नाभावेन स्वेतरकारणीभूतविघ्नसमवहितस्वाधिकरणवृत्तिविघ्नध्वंसान्यकभिन्नत्वरूपान्वय-व्यभिचाराभावेन विघ्नध्वंसं प्रति अवश्यक्लृप्तनियतपूर्ववृत्तिभिन्नत्वरूपान्यथासिद्ध्यभावेन मंगलस्य विघ्नध्वंसं प्रति स्वरूपयोग्यतारूपकारणत्वे क्षत्यभावात्, सामग्र्यैव फलोपधानस्य दृष्टत्वेन स्वतःसिद्धविरहस्थले विघ्नरूपसहकार्यभावेन मंगले विघ्नध्वंसानुपधायकत्वस्येष्टत्वादित्यर्थः। ननु विघ्नाभावे स्वतःसिद्धविघ्नविरहवतो मंगलाचरणमयुक्तं निमित्तनिश्चयस्यैव मिनैत्तिकानुष्ठानप्रवृत्तिहेतुत्वादित्यत आह **विघ्नशंकयेति** । पापसंशयेनापि शिष्टानां प्रायश्चित्तानुष्ठानदर्शनेन संशयनिश्चयसाधारणनिमित्तज्ञानमात्रस्यैव नैमित्तिकानुष्ठानहेतुत्वान्न स्वतःसिद्धविघ्नविरहवतो मंगलानुष्ठाने प्रवृत्त्यनुपपत्तिरिति भावः । **तदाचरणादिति** । मंगलाचरणादिति भावः । तत्र प्रवृत्तेरिति यावत् । अत्र तदाचरणादिति पाठः प्रामादिक एव, अन्यथा पञ्चम्यन्तद्वयानुपपत्तेः ।

न च तस्य निष्फलत्वे तद्बोधकवेदाऽप्रामाण्यापत्तिरिति वाच्यम् । सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात् । अत एव पापभ्रमेण कृतस्य प्रायश्चित्तस्य निष्फलत्वेऽपि न तद्बोधकवेदाऽप्रामाण्यम् ।

प्रश्न—मंगल के निष्फल होने पर मंगल की सफलता के बोधक वेद को अप्रामाण्य (मिथ्यात्व) आजावेगा। उत्तर—उस वेद का यही अर्थ है कि विघ्न के रहने पर ही विघ्न का नाश मंगल करता है। इसीलिये पापभ्रम से किये हुवे प्रायश्चित्त के निष्फल होने पर भी प्रायश्चित्त के पापनाशकत्व का बोधक जो वेद-उसे अप्रामाण्य कदापि नहीं। (क्योंकि पापनाश के लिये ही प्रायश्चित्त का विधान है, जब कि पाप ही नहीं केवल भ्रममात्र है तो वहां नाश किसका)

आचरणमित्येव पाठः साधुः। ननु नैमित्तिके निमित्तनिश्चयवानधिकारीति निमित्तज्ञानमात्रस्य हेतुत्वे मानाभाव इत्यत आह **तथैवेति**। निमित्तशंकयैवेत्यर्थः। **शिष्टाचारादिति शिष्टानां**=आस्तिकानां, **आचारात्**—प्रवृत्तेरित्यर्थः। निमित्तशंकयैव शिष्टाः नैमित्तिकमाचरन्तीति दृष्टत्वात्, इष्टानुरोधित्वात्कल्पनायाः। तथा च पापध्वंसार्थिप्रवृत्तौ पापनिश्चयो हेतुरिति व्याप्तिरप्रयोजिकेति भावः। ननु मंगले विघ्नध्वंससाधनत्वबाधाद् बाधितार्थबोधकत्वेन श्रुतेरप्रामाण्यमित्याशंक्य निराचष्टे **न चेति। तस्य**=स्वतःसिद्धविघ्नविरहवता कृतमंगलस्य। **निष्फलत्वे**= फलानुपधायकत्वे। ध्वंसं प्रति प्रतियोगिनोपि हेतुत्वादिति भावः। **तद्बोधकेति।** मंगलविघ्नध्वंसयोः कार्यकारणभावबोधकेत्यर्थः। **वेदाप्रामाण्यापत्तिरिति।** विघ्नध्वंसजनकत्वाभाववति विघ्नध्वंसजनकत्वप्रतिपादनादिति भावः। उक्ताशंकानिरासे हेतुमाह **सति विघ्ने** इति। मंगलादिति शेषः। विघ्नरूपकारणान्तरसमवधाने सतीत्यर्थः। **तन्नाशस्यैव**=विघ्नध्वंसजनकत्वस्यैव। **वेदबोधितत्वात्**=प्रमाणबोधितत्वात्। तथा च स्वतःसिद्धविघ्नविरहवत्कृतमंगलस्य विघ्नासहितस्य विघ्नरूपकारणान्तराभावेनैव विघ्नध्वंसरूपफलानुपधायकत्वोपपत्तौ स्वरूपयोग्यताया अबाधेन नाऽप्रामाण्यशंकेति भावः। यथा केवलदण्डाद् घटानुत्पादेऽपि दण्डो घटकारणमिति वाक्यस्य नाऽप्रामाण्यं तद्वत्प्रकृतेपीति ध्येयम्। ननु विघ्नो निवर्त्ततामिति कामनया क्रियमाणमंगलस्य केवलस्यैव विघ्ननाशजनकत्वं युक्तं, न तु विघ्नसहितस्य मानाभावादित्यत आह **अत एवेति।** स्वरूपयोग्यत्वादेवेत्यर्थः। ध्वंसं प्रति प्रतियोगिनः कारणत्वादेवेति **दिनकरी। निष्फलत्वेपीति।** पापभ्रमेण कृतस्य प्रायश्चित्तस्य पापसहितस्यैव पापनाशरूपफलोपधायकत्वेन पापाभावेन पापध्वंसोपधायकत्वाभावेपीत्यर्थः। **तद्बोधकवेदस्य**=पापजनकत्वस्वरूपयोग्यताबोधकवेदस्य। **नाऽप्रामाण्यम्।** पापजनकत्वाभाववति पापजनकत्वबोधजनकलक्षणमप्रामाण्यं नास्ति

कचिच्च विघ्नात्यन्ताभाव एव समाप्तिसाधनम्, प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वात्। इत्थं च नास्तिकादीनां ग्रन्थेषु जन्मान्तरीयमंगलजन्यदुरितध्वंसः, स्वतःसिद्धविघ्नात्यन्ताभावो वाऽस्तीति न व्यभिचार इत्याहुः।

प्रश्न—मंगल सम्पूर्ण जो विघ्न उसके ध्वंस में कारण है-अथवा कतिपय विघ्नों के ध्वंस में कारण है। उत्तर मंगल कतिपय (कुछ) जो विघ्न उनके ध्वंस में ही कारण है। अन्य कतिपय विघ्न (बीमार होजाना इत्यादि) ध्वंस में गणेशस्तुति पाठ आदि कारण हैं। कहीं पर विघ्नात्यन्ताभाव ही कारण है। क्योंकि प्रतिबन्ध का भाव कार्यमात्र के प्रति कारण होता है। प्रकृत में वह प्रतिबन्धक (विघ्न) का अभाव संसर्गाभावरूप ही है। संसर्गाभाव के अन्तर्गत अत्यन्ताभाव भी आगया अतः कहीं स्थलविशेष में विघ्नात्यन्ताभाव को ही समाप्ति कारणत्व है। नवीनमत में पूर्वोक्त व्यभिचारों का वारण करते हैं, कि नास्तिकों के ग्रन्थों में जन्मान्तरीय मंगल से विघ्नध्वंस हुआ है, अथवा स्वतःसिद्ध वहां विघ्नात्यन्ताभाव है, अतः कोई व्यभिचार नहीं है।

प्रायश्चित्ते पापजननस्वरूपयोग्यताया अबाधादिति भावः। ननु विघ्नध्वंससामान्ये मंगलस्य हेतुत्वमसिद्धं विनायकस्तवपाठ-सुवर्णदान-प्रायश्चित्तजन्यविघ्नध्वंसे व्यभिचारादित्यत आह **मंगलं चेति। विघ्नध्वंसविशेषे** विजातीयविघ्नध्वंसं प्रतीत्यर्थः। वैजात्यं च मंगलनाश्यतावच्छेदकतया सिद्धो विघ्ननिष्ठो जातिविशेषः। तथा च विजातीयविघ्नध्वंसं प्रति मंगलं कारणम्। अथवा मंगलविशिष्टविघ्नध्वंसं प्रति मंगलं कारणम्। वै० स्वसामानाधिकरण्य-स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबन्धेन। एवं विनायकस्तवपाठादेरुपदर्शितसंबन्धेन विनायकस्तवपाठादिविशिष्टविघ्नध्वंसत्वं विजातीयविघ्नध्वंसत्वं वा कार्यतावच्छेदकमिति न व्यभिचार इति भावः। ननु **सर्वे विघ्नाः शमं यान्ति गणेशस्तवपाठत** इति स्मृत्या गणेशस्तवपाठस्य विघ्नध्वंससामान्ये हेतुत्वप्रतिपादनेन मंगलजन्यविघ्नध्वंसेऽपि तस्य हेतुत्वात्तद्रहितमंगलस्य विघ्नध्वंसहेतुत्वमेव न संभवति सामान्यकारणविशिष्टविशेषकारणस्यैव फलोपधायकत्वादित्यत आह **विघ्नध्वंसविशेषे चेति**। शिष्टानां ग्रन्थारंभसमये मंगलाचरणस्यैव दर्शनेन मंगलाऽनाश्यसर्वविघ्नपरतया सर्वे विघ्ना इति सर्वशब्दस्य संकोचनीयत्वात्। मंगलजन्यविघ्नध्वंसं प्रति विनायकस्तवपाठस्य हेतुत्वाभावेन तद्रहितस्यापि मंगलस्य हेतुत्वमव्याहतमेवेति भावः।

ननु मंगलस्य समाप्तिजनकत्वाभावेपि विघ्नध्वंसद्वारा समाप्तिप्रयोजकत्वमवश्यमङ्गीकार्यम्, अन्यथा समाप्तिकामनया ग्रन्थारंभसमये शिष्टानां मंगलाचरणानुपपत्तेः, विघ्नध्वंसस्य मंगलफलत्वेपि समाप्तिजनकतया एव मंगले प्रवृत्त्युद्देश्यतया तदनुपपत्तेश्च, इत्थं च स्वतःसिद्धविघ्नविरहवत्कृतमंगलेन विघ्नध्वंसाजननात्समाप्तिप्रयोजकत्वमपि मंगलस्य न स्यादित्यत आह **क्वचिच्चेति**। स्वतःसिद्धविघ्नवि-

संसारेति । संसार एव महीरुहो वृक्षस्तस्य बीजाय निमित्तकारणायेत्यर्थः । एतेन ईश्वरे प्रमाणमपि दर्शितं भवति ।

संसारेति—संसाररूप जो वृक्ष उससे बीज (निमित्तकारण) भगवान् कृष्ण ही हैं । "संसारमहीरुहस्य बीजाय" इससे ईश्वर में प्रमाण दिखला दिया, अर्थात् इस संसाररूपी वृक्ष का कारण ईश्वरातिरिक्त कोई नहीं हो सकता है ।

रहस्थले त्वित्यर्थः । **विघ्नात्यन्ताभाव एव समाप्तिसाधनमिति ।** न तु विघ्नध्वंस एव सर्वत्र समाप्तिसाधनमित्यर्थः । तथा च समाप्तिं प्रति विघ्नसंसर्गाभावस्यैव विघ्नसंसर्गाभावत्वेन हेतुत्वं वक्तव्यमिति स्वतःसिद्धविघ्नविरहस्थले विघ्नध्वंसेन समाप्त्यजननेपि समाप्तौ विघ्नध्वंसस्य कचिज्जनकतया तत्फलकमंगलस्य समाप्तिप्रयोजकत्वे क्षतिर्नास्तीति भावः । ननु समाप्तिं प्रति विघ्नसंसर्गाभावत्वेन कारणत्वे मानाभाव इत्यत आह **प्रतिबन्धकसंसर्गाभावस्यैवेति ।** इदं च ध्वंसस्यापि हेतुत्वरक्षणाय प्राचीनमतेनोक्तम्, नव्यमते तु अत्यन्ताभावस्य ध्वंसाद्यविरोधितया प्रतिबन्धकात्यन्ताभावत्वेनैव हेतुत्वम्, इत्थं च ध्वंसमुत्पाद्याऽत्यन्ताभावसत्त्वसंपादनेन मंगलस्य समाप्तिं प्रति प्रयोजकत्वं बोध्यम्, तथा च प्रतिबन्धकसंसर्गाभावस्यैव कार्यमात्रे तत्त्वेन हेतुत्वावश्यकतया विघ्नस्यापि समाप्तिप्रतिबन्धकतया तत्संसर्गाभावत्वेनैव समाप्तिं प्रति हेतुत्वं युक्तमिति भावः । **इत्थंचेति ।** प्रतिबन्धकसंसर्गाभावत्वेन हेतुत्वे चेत्यर्थः । **जन्मान्तरीयमंगलजन्यदुरितध्वंस** इति । नन्वेवं जन्मान्तरीयसमाप्तिमुद्दिश्यापि मंगले प्रवृत्त्यापत्तिरत आह **स्वतःसिद्धेति ।** वस्तुतस्तु **जन्मातरीयमंगलजन्यदुरितध्वंसः** = जन्मान्तरीयदुरितध्वंससामग्रीप्रयुक्त इत्यर्थः । तच्चाऽत्यन्ताभावविशेषणम् ।

वस्तुतस्तु प्राचीनमते आहुरित्यनेन सूचितामन्यथासिद्धिं प्रकटयति **क्वचिच्चेति ।** विघ्नात्यन्ताभाव एवेत्येवकारेण विघ्नध्वंसस्य तद्द्वारकमंगलस्य च व्यवच्छेदः । तथा च विघ्नात्यन्ताभावेनैव मंगलस्थलीयसमाप्तिनिर्वाहे मंगलस्य तज्जन्यविघ्नध्वंसस्य चान्यथासिद्धिः, ध्वंसप्रागभावयोरत्यन्ताभावविरोधे मानाभावाद् ध्वंसाधिकरणेऽपि अत्यन्ताभावसत्वात् । अन्यत्सर्वं पूर्ववत् ।

नवीनमते कार्यकारणभावद्वयं, मंगलविघ्नध्वंसयोः, समाप्तिविघ्नध्वंसयोश्च । स्वरूपसंबन्धेन विघ्नध्वंसं प्रति आश्रयतासंबन्धेन मंगलं कारणम् । यत्र च सत्यपि मंगले न समाप्तिः, तत्र मंगलाद्विघ्नध्वंसो भवत्येव, समाप्त्यभावस्तु विघ्नभूयस्त्वान्मंगलानन्तरोत्पन्नविघ्नाद्वेति ध्येयम् । स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसंबन्धेन समाप्तिं प्रति स्वरूपसंबन्धेन विघ्नध्वंसः कारणमिति समाप्तिविघ्नध्वंसयोः कार्यकारणभावः । तस्य च कारणता विघ्नध्वंसत्वेन विघ्नसंसर्गाभावत्वेन विघ्नात्यन्ताभावत्वेन वेत्यन्यदेतत् ।

मंगलश्लोकार्थस्तु **तस्मै**=सकलजनप्रसिद्धाय-**कृष्णाय**, गोपीजनवल्लभाय नमः। कथंभूताय तस्मै-**नूतनजलधररुचये**। पुनः किंभूताय गोपवधूटीदुकूलचौराय, पुनः किंभूताय संसारमहीरुहस्य बीजायेत्यन्वयः।

तत्पदं चाऽत्र प्रसिद्धार्थकम्, अतो न यत्पदाऽपेक्षा। एतेन यत्तदोर्नित्यसंबन्धात्प्रकृतश्लोके यत्पदाभावात्कथं तत्पदसंगतिरिति समाहितम्। स्वापकर्षबोधानुकूलो व्यापारो नमःपदार्थः। स्वं-प्रयोक्ता। एवं च कृष्णाय नम इत्यत्र अवधित्वं चतुर्थ्यर्थः। तच्च स्वरूपसंबन्धविशेषः। तत्र च प्रकृत्यर्थकृष्णस्य आधेयतासंबन्धेनान्वयः। तस्य निरूपकतासंबन्धेनाऽपकर्षेऽन्वयः, तथा च कृष्णावधिकग्रन्थकृदपकर्षबोधानुकूलो ग्रन्थकृद्व्यापार इति बोधः। वस्तुतस्तु स्वावधिकोत्कर्षवत्तया ज्ञापनं नमःपदार्थः, विषयित्वं चतुर्थ्यर्थः, तत्र प्रकृत्यर्थस्य निरूपितत्वसंबन्धेनाऽन्वयः, तस्य च नमःपदार्थघटकज्ञानेऽन्वयः, तथा च ग्रन्थकृदवधिकोत्कर्षवत्तया कृष्णविशेष्यकज्ञानानुकूलो ग्रन्थकृद्व्यापार इति बोधः। तादृशं ज्ञानं च श्रीकृष्णो मदुत्कृष्ट इत्याकारकम्। धरन्तीति धराः। जलस्य धराः इति जलधराः। न तु जलानि धरन्तीति व्युत्पत्तिः, तथासति कर्मण्यणिति अण्-प्रत्यये उपधावृद्धौ जलधार इति प्रयोगापत्तेः। नूतनाश्च ते जलधराश्चेति नूतनजलधराः नूतनजलधराणां रुचिरिव रुचिर्यस्य स नूतनजलधररुचिः, तस्मै, अतीवश्यामवर्णायेति भावः। गोपानां वध्वो गोपवध्वः-गोपस्त्रियः तासां दुकूलानि-वस्त्राणि-तेषां चौरः-तस्मै। अतिप्रसन्नायेति भावः। अथवा गाः-इन्द्रियाणि पाति-रक्षतीति गोपं-मनः-तस्य वधूटी-बुद्धिः-तस्या दुकूलानि-अहंकारादयः (आवरकत्वाद्बुद्धेः) तेषां चौरः-नाशकः-तस्मै। संसार-एव महीरुहः-संसारमहीरुहः-तस्य बीजाय। जगत्कारणायेति भावः।

संसार एवेति। संसारः कार्यजातम्। न च कर्मधारयप्रदर्शनं व्यर्थम्। संसारस्य महीरुह इति षष्ठीतत्पुरुषभ्रान्तिनिरासाय तद्दर्शनात्। तथासति सकलप्रपंचहेतोरीश्वरस्य महीरुहमात्रबीजत्वकथनस्यानौचित्यापातात्। बीजत्वं-समवायिकारणत्वं तच्चेश्वरे बाधितमत आह **निमित्तकारणायेति**। एतेनेश्वरस्य कार्यमात्रं प्रति साधारणकारणत्वं सूचितम्। समवायिकारणाऽसमवायिकारणयोः साधारणत्वाभावादिति ध्येयम्।

ननु ईश्वरे न किमपि प्रमाणं-तथाहि ईश्वरसद्भावे न प्रत्यक्षं प्रमाणं-तथाहि-विवादाऽध्यासित ईश्वरो न मानसान्यप्रत्यक्षनिरूपितलौकिकविषयतावान् अरूपद्रव्यत्वात्, बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे उद्भूतरूपस्य कारणत्वात्। न मानसनिरूपितलौकिकविषयतावान् स्वात्मभिन्नद्रव्यत्वात्। परात्मनः परेण मनसा प्रत्यक्षवारणायाऽऽत्मप्रत्यक्षं प्रति परात्मव्यावृत्तविजातीयमनःसंयोगस्य हेतुत्वावश्यकतया ईश्वरे तस्याभावात्। एवमीश्वरोऽनुमानगम्यत्वाभाववान् तद्व्याप्यलिङ्गाभावात्। उपमानस्य शक्तिमात्रसाधकत्वेन तत्प्रमाणागम्यत्वात्। आगमो नेश्वरसाधकः निर्णीतप्रामाण्यकत्वाभावात्। तथाचेश्वरः प्रमाणसामान्यगम्यत्वाभाववान् प्रत्यक्षादिप्रमाण-

तथाहि यथा घटादि कार्यं कर्तृजन्यं तथा क्षित्यङ्कुरादिकमपि। न च तत्कर्तृत्वमस्मदादीनां संभवतीत्यतस्तत्कर्तृत्वेनेश्वरसिद्धिः।

तथाहि-घट आदि कार्य किसी (कुलाल आदि) कर्त्ता से जन्य है-कार्य होने से-ऐसे ही क्षिति-अङ्कुरादि कार्य भी किसी कर्त्ता से जन्य हैं। क्षिति-अङ्कुर-आदि कार्य के कर्त्ता हम शरीरधारी नही हो सकते हैं, अतः जो उनका कर्त्ता है वही ईश्वर है इससे ईश्वर सिद्धि होगयी।

विशेषगम्यत्वाभावकूटवत्त्वाद्यन्नैवं तन्नैवं यथा घट इति फलितम्। न च नित्यत्वेन निर्दोषत्वं श्रुतीनां तेनैव तासां न सन्दिग्धं प्रामाण्यमिति वाच्यम्। वर्णानित्यत्ववादे नित्यत्वस्य दूषितत्वादित्यत आह **एतेनेति**। जगत्कारणत्वप्रतिपादनेनेत्यर्थः।

प्रमाणं = अनुमानं प्रमाणम्।

आचार्यैरीश्वरसाधकानि नवानुमानानि दर्शितानि, तेषु कार्यत्वहेतुकप्राथमिकानुमानम्, क्षित्यंकुरादिकं कार्यं कर्तृजन्यं कार्यत्वाद् घटवदित्याकारकम् तत्र व्याप्तिं दर्शयति **तथाहीति**। घटादि कार्यमिति पदद्वयम्। तथा च कार्यं घटादि यथा कर्तृजन्यं तथा क्षित्यंकुरादिकमपीत्यन्वयः। **अनुमाननवकं च** "कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः। वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः" इति वेदितव्यम्।

अत्रेदं बोध्यम्। क्षितिश्चाऽङ्कुरश्च क्षित्यङ्कुरौ तावादिर्यस्येति क्षित्यंकुरादिकम्, तथा च क्षितिः सकर्तृका (कर्तृजन्या) कार्यत्वाद् घटवदित्यनुमितिः। सापि क्षितित्वसामानाधिकरण्येन-क्षितित्वावच्छेदेन वा। नाद्यः—घटादिकमादाय सिद्धिसाधनप्रसंगात्। न द्वितीयः। नित्यक्षितौ "परमाणौ" कार्यत्वहेतोर्भागासिद्धिः, कर्तृजन्यत्वस्य बाधश्च, अवच्छेदावच्छेदेनानुमितौ सामानाधिकरण्येन बाधनिश्चयस्यापि प्रतिबन्धकत्वात्। जन्यक्षितित्वस्य पक्षतावच्छेदकत्वे परमते जन्यपदव्यावृत्त्यसिद्धिः। तन्मतेऽजन्यक्षितेरभावात्। जन्यत्वस्यैव तथात्वसंभवेन पक्षतावच्छेदककोटौ क्षितित्वस्य वैयर्थ्यं चाऽतोऽङ्कुरस्य पक्षत्वमुक्तम्। तथाचाऽङ्कुरः कर्तृजन्यः कार्यत्वाद् घटवदिति संपन्नम्। अवच्छेदावच्छेदेन साध्यसत्त्वान्न सिद्धिबाधौ। अत्रापि अंकुरत्वस्य पक्षतावच्छेदकत्वं न संभवति अंकुरत्वावच्छेदेन साध्यसिद्धावपि जन्यमात्रे सकर्तृकत्वासिद्धेः। तत्सिद्ध्यर्थमनुमानान्तरकल्पने गौरवादादिपदं जन्यमात्रस्य पक्षत्वलाभाय। तथा च—कार्यं कर्तृजन्यं कार्यत्वाद् घटवदिति स्थापनानुमानं पर्यवसितम्। अत्र कार्यत्वं पक्षतावच्छेदकम्। अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वान्न सिद्धसाधनावकाशः। एतेन जन्यकृत्यजन्यं अजन्यं पक्षः नातो घटादिकमादाय सिद्धसाधनं, परमाण्वादिकमादायाऽशंतो बाधश्चेति वदन्तः समाहिताः। अवच्छेदकावच्छेदेनानुमित्युद्देश्यतायां सामानाधिकरण्येन सिद्धेरविरोधित्वात्। तथा च नोपादेयमेव जन्यकृत्यजन्यमिति ध्येयम्। न च पक्षतावच्छेदकहेत्वोरैक्ये उपनयवाक्याच्छाब्दबोधानुपपत्तिः उद्दे-

श्यतावच्छेदकविधेययोरैक्यादिति वाच्यम्। स्वरूपसंबन्धविशेषरूपकार्यत्वस्य पक्षतावच्छेदकत्वात्, प्रागभावप्रतियोगित्वरूपकार्यत्वस्य हेतुतयोक्तानुपपत्त्यभावात्। न च विनिगमकाभावेन स्वरूपसंबन्धरूपकार्यत्वमेव हेतुरस्त्विति वाच्यम्। तथासति पक्षवृत्तिकार्यत्वस्य पक्षात्मकतया अनुगमकाभावेन सपक्षावृत्तित्वादसाधारण्यापत्तेः। न च प्रतियोगित्वस्यापि स्वरूपसंबन्धविशेषतया तद्दोषतादवस्थ्यम्। प्रतियोगित्वस्य पदार्थान्तरत्वात्, सप्तपदार्थविभागस्तु तत्त्वज्ञानोपयोगितयेति ध्येयम्। वस्तुतोऽत्र प्रागभावप्रतियोगित्वादित्यस्य प्रतियोगितासंबन्धेन प्रागभाववत्वादित्यर्थः। यद्यपि स्वरूपसंबन्धरूपकार्यताव्यक्तीनां तत्तद्व्यक्तिमात्रपर्यवसितत्वेन नानुगतपक्षतावच्छेदकलाभस्तथापि अन्यतमत्वेनानुगतीकृतानां पक्षतावच्छेदकत्वं बोध्यम्।

कर्तृजन्यत्वं साध्यं, तस्य कृतिजन्यत्वमर्थः। नातः साध्यतावच्छेदकानन्त्यम्। समवायसंबन्धेन कार्यत्वावच्छिन्नं प्रति उपादानत्वाख्यविषयतासंबन्धेन कृतेर्हेतुतया तथाविधविषयतासंबन्धावच्छिन्नकृतिनिष्ठकारणतानिरूपितसमवायसंबन्धावच्छिन्नकार्यत्वस्य साध्यत्वे पर्यवसानम्।

अथैवं जन्यं तथाविधविषयतासंबन्धावच्छिन्नकृतिनिष्ठकारणतानिरूपितसमवायसंबन्धावच्छिन्नकार्यतावत् प्रागभावप्रतियोगित्वादित्यनुमानं पर्यवसन्नम्, तथा सति ध्वंसे पक्षतावच्छेदकाक्रान्ते व्यभिचारः, तत्रोक्तसाध्यविरहात्। न च सत्वविशिष्टजन्यत्वं ध्वंसप्रतियोगित्वविशिष्टजन्यत्वं वा पक्षतावच्छेदकं वक्तव्यं, तथा च नोक्तव्यभिचारः, ध्वंसस्य सत्ताभाववत्तया ध्वंसप्रतियोगित्वाभाववत्तया वा पक्षतावच्छेदकानाक्रान्तत्वादिति वाच्यम्। तथापि तादृशसाध्याभाववति ध्वंसे प्रागभावप्रतियोगित्वरूपहेतोः सत्त्वेन व्यभिचारतादवस्थ्यादिति चेन्न। हेतावपि सत्त्ववैशिष्ट्यनिवेशेन व्यभिचारानवकाशादिति ध्येयम्।

ननु सर्वमिदं तदैव संभवति यदि कार्यत्वावच्छिन्नं प्रति कृतित्वेन हेतुत्वं स्यात्, तदेव कुत इति चेत्। सत्यम्। घटादिस्थले कुलालादिकृतीनां अन्वयव्यतिरेकानुविधानबलाद् घटादिकं प्रति कुलालादिकृतित्वेन हेतुत्वं न कल्प्यते, लाघवात्कार्यत्वावच्छिन्नं प्रत्येव कृतित्वेन तत्कल्प्यते न तु घटत्वपटत्वाच्छिन्नं प्रति, तथा सति अनन्तकार्यकारणभावकल्पने गौरवात्। अथैवं विशेषकार्यकारणभावाऽस्वीकारे कुलालकृत्यभावेपि तन्तुवायकृतिसत्त्वे घटोत्पत्तिवारणाय कुलालकृतिसत्त्वे घटसत्वम्, तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्यां घटत्वावच्छिन्नं प्रति कुलालकृतित्वेन विशेषकार्यकारणभाव आवश्यकः; यद्रूपावच्छिन्नयोरन्वयव्यतिरेकग्रहः तद्रूपावच्छिन्नयोरेव कार्यकारणभावनियमात्, तथा च सामान्यकार्यकारणभावो निर्युक्तिक इति चेन्न। यद्विशेषयोः कार्यकारणभावोऽसति बाधके तत्सामान्ययोरपीति न्यायेन सामान्यकार्यकारणभावस्याऽऽवश्यकत्वात्। कार्यत्वावच्छिन्नाभावे तत्तत्कृत्यभावकूटस्य प्रयोजकत्वकल्पने गौरवात्, कृतित्वावच्छिन्नाऽभावस्यैकस्यैव प्रयोजकत्वे लाघवात्, तथा चोक्तन्यायस्य लाघवमूलकत्वान्न निष्प्रमाणकत्वमिति ध्येयम्। अस्तु वा घटत्व-

न च शरीराजन्यत्वेन कर्त्रजन्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यम्। अप्रयोजकत्वात्।

शंका—"क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत्" इस आस्तिक के अनुमान में नास्तिक कहता है कि शरीरजन्यत्व उपाधि है। शरीर जन्यत्व का अर्थ सर्वत्र शरीरिजन्यत्व समझना। उपाधि उसे कहते हैं जो साध्य का व्यापक हो तथा साधन (हेतु) का अव्यापक हो। जैसे शरीरजन्यत्व उपाधि कर्तृ जन्यत्व रूप साध्य का व्यापक है-क्यों कि घट-पटादि कार्य कुलालादिरूप शरीरी कर्त्ता से जन्य हैं। अतः यह उपाधि साध्य की व्यापक हुवी-और कार्यत्व हेतु पृथिवी अङ्कुर आदि कार्य में भी है उसमें शरीरीजन्यत्व नहीं है क्यों कि पृथिवी-अङ्कुर आदि कार्य ईश्वर से उत्पन्न होने के नाते शरीरी से जन्य नहीं अतः यह उपाधि साधन की अव्यापक हुवी। अब प्रश्न यह है कि उपाधि क्या करती है, सो उपाधि अपने अभाव को हेतु करके साध्य के अभाव को पक्ष में सिद्ध कर देती है। जैसे क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत् इस आस्तिक के अनुमान मे नास्तिक ने शरीरजन्यत्व उपाधि दी है उपाध्यभाव हुआ शरीराजन्यत्व, वह कर्तृजन्यत्वरूप साध्य के अभाव कर्त्रजन्यत्व (कर्तृजन्यत्वा भाव) को सिद्ध करके अर्थात् "क्षित्यङ्कुरादिकं कर्त्रजन्यं शरीराजन्यत्वात् आकाशवत्" इस कर्तृजन्यत्वाभाव साधक अनुमान से पूर्वोक्त "क्षित्यङ्कुरादिकं कर्तृजन्यम्" इस आस्तिकानुमान का बाध हो जावेगा। यही सत्प्रतिपक्ष है। साध्यके अभाव का साधक जहां दूसरा हेतु हो उसे सत्प्रतिपक्ष कहते हैं—जैसे प्रकृत में "क्षित्यङ्कुरादिकं कर्तृजन्यम्" यहां पर साध्य जो कर्तृजन्यत्व उसका अभाव हुवा कर्त्रजन्यत्व (कर्तृजन्यत्वाभाव) उसका साधक हेत्वन्तर उपाध्यभाव (शरीराजन्यत्व) है। यही मूल में कहा है कि "नच शरीराजन्यत्वेन" इत्यादि। अर्थात् कर्त्रजन्यत्व का साधक हेत्वन्तर जो शरीराजन्यत्व, उससे पूर्वोक्त आस्तिकानुमान में कर्तृजन्यत्व का साधक कार्यत्व हेतु सत्प्रतिपक्षित हो जावेगा। उत्तर—"अप्रयोजकत्वात्" अर्थात् नास्तिक का अनुमान अप्रयोजक (व्यभिचारशंकानिवर्त्तकतर्क शून्य) है। इस ग्रन्थ का अभिप्राय यह है कि जैसे "पर्वतो वन्हिमान् धूमात्" यहां पर यदि कोई व्यभिचारशंका करता है कि पक्षे (पर्वते) हेतुः (धूमः) अस्तु साध्यं (वन्हिः) मास्तु) इस प्रकार की हेतु में "साध्याभाववद्वृत्तित्व" रूप व्यभिचार की यदि कोई आशंका करता है तो उसका निवर्त्तक तर्क है कि यदि "पर्वते वन्हिर्न स्यात्तदा धूमोऽपि न स्यात् धूमस्य वन्हिजन्यत्वात्"। परन्तु "क्षित्यङ्कुरादिकं कर्त्रजन्यं शरीराजन्यत्वात् आकाशवत्" इस नास्तिकानुमान में यदि व्यभिचारशंका की जाय कि "क्षित्यङ्कुरादिषु शरीराजन्यत्वमस्तु कर्त्रजन्यत्वं मास्तु"। अर्थात् क्षिति-अङ्कुर-आदि कार्य शरीरी जो हमलोग हैं उनसे सर्वथा अजन्य हैं, क्योंकि वे ईश्वर से जन्य हैं-ईश्वर शरीरी नहीं है अतः शरीराजन्यत्व रहे, और क्षित्यङ्कुरादि ईश्वररूप कर्त्ता से जन्य होने के नाते उनमें सर्वथा कर्तृअजन्यत्वरूप साध्य न रहे। अतः नास्तिकाका अनुमान अप्रयोजक सिद्ध हुवा।

पटत्वावच्छिन्नं प्रति कृतित्वेन विशिष्यैव हेतुत्वं तथापि सर्गादिकालीनघटादिकं पक्षीकृत्य घटत्वादिहेतुना सकर्तृकत्वसाधनेनेश्वरसिद्धिरप्रत्यूहैवेति।

तत्र परार्थानुमाने विचाराङ्गविप्रतिपत्तेरावश्यकतया अनित्याऽसर्वविषयकज्ञानाजन्यं जन्यं सकर्तृकं न वा, क्षितिः सकर्तृका न वा, जन्यं कर्तृजन्यं न वेत्यादिविप्रतिपत्तयो बोध्याः।

एवं च तादृशकृतिः द्रव्याश्रिता गुणत्वाद्रूपवदित्यनुमानेन तादृशकृतेर्द्रव्याश्रितत्वसिद्धौ अनुपदोक्तरीत्या जीवबाधादीश्वरसिद्धिः।

अथ कार्यं कर्तृजन्यं कार्यत्वादित्यनुमाने सत्प्रतिपक्षः—विवादास्पदं "कार्यं" न कर्तृजन्यं शरीराजन्यत्वाद् व्योमादिवत् व्यतिरेकेण घटादिवदित्यनुमानेन कर्त्रजन्यत्वस्यापि साध्यतया सत्प्रतिपक्षः, साध्यव्याप्यहेतुमान्पक्षः साध्याभावव्याप्यप्रतिहेतुमान्पक्ष इत्युभयपरामर्शकाले सत्प्रतिपक्षव्यवहारात्, स्वसाध्यपरामर्शकालीनस्वसाध्यविरोधि"साध्याभाव"परामर्शविषयस्य सत्प्रतिपक्षदोषत्वात्। प्रकृते च कर्तृजन्यत्वव्याप्यकार्यत्ववत्कार्यस्य कर्त्रजन्यत्वव्याप्यशरीराजन्यत्ववत्कार्यस्य सत्प्रतिपक्षतया तन्निश्चयस्य परस्परानुमितिप्रतिबन्धान्नेश्वरसिद्धिसंभव इति शंकते न चेति। अप्रयोजकत्वादिति। व्यभिचारशंकानिराकरणानुकूलतर्करहितत्वादिति भावः। तथाच समबलयोरेव सत्प्रतिपक्षता न न्यूनाधिकबलयोरिति। अयं भावः। व्यभिचारज्ञानाभावसहकृतसहचारदर्शनं व्याप्तिग्रह कारणम्। न च व्यभिचारज्ञानाभावस्य कुतो व्याप्तिग्रहहेतुत्वमिति वाच्यम्। सति व्यभिचारज्ञाने व्याप्तिग्रहासंभवेन व्यभिचारज्ञानाभावस्य हेतुत्वावश्यकत्वात्। व्यभिचारज्ञानस्यापि संशयनिश्चयसाधारणज्ञानत्वेन प्रतिबन्धकत्वम्। तथा च शरीराजन्यत्वमस्तु कर्त्रजन्यत्वं मास्तु "कर्त्रजन्यत्वरूपसाध्याभाववति अपि शरीराजन्यत्वं स्यात्" इत्याकारकव्यभिचारशंकायाः "कर्त्रजन्यत्वव्याप्यं शरीराजन्यत्वमिति व्याप्तिग्रहे" प्रतिबन्धकत्वे तन्निवृत्त्यर्थं तर्कोऽपेक्षणीयः। स चात्र न संभवति- शरीराजन्यत्वकर्त्रजन्यत्वयोः "शरीरजन्यत्वाभाव-कर्तृजन्यत्वाभावरूपयोः" अत्यन्ताभावरूपत्वेन नित्यत्वात्। तथा च नित्ययोर्व्याप्तिग्राहककार्यकारणभावरूपानुकूलतर्काभावादिति ध्येयम्।

इदमुपलक्षणम्—शरीराजन्यत्वादित्यत्र शरीरांशविशेषणस्य व्यर्थत्वात्, अजन्यत्वस्यैव सम्यक्त्वात्। केवलस्याऽजन्यत्वस्य कर्त्रजन्यत्वव्यभिचारे हि सति तद्व्यावर्त्तनेन विशेषणस्य सार्थक्यं स्यात्, नचात्र केवलस्य व्यभिचारोऽस्ति। न च केवलस्याऽजन्यत्वस्य स्वरूपाऽसिद्धत्वेन तत्परिहारार्थत्वेन विशेषणसार्थक्यमस्तीति वाच्यम्। स्वरूपासिद्धिपरिहारेऽपि व्याप्यत्वासिद्धेरपरिहारात्। तदुक्तं- **एकामसिद्धिं परिहरतो द्वितीयापत्तेरिति।** गौरवेण नीलधूमत्ववद्विशेषणान्तर्भावेन शरीराजन्यत्वस्य व्याप्यतानवच्छेदकत्वात्। नचाऽखण्डाभावघटकतया न वैयर्थ्यम्। तथापि व्याप्यत्वासिद्धितादवस्थ्यात्। तथा चोक्तानुमानस्य समबलत्वाभावान्न सत्प्रतिपक्ष इत्यन्यत्र विस्तरः।

अथैवमपि कार्यत्वहेतोः सत्प्रतिपक्षितत्वं दुर्वारं-ईश्वरो न कर्त्ता अशरीरित्वादित्यनुमानात्। न चेश्वरपक्षककर्तृत्वानुमानेऽसौ सत्प्रतिपक्षः, न तु कार्यत्वेन क्षितौ

कर्त्तृजन्यत्वानुमाने इति नायं कार्यत्वहेतौ दोष इति वाच्यम्। कार्यत्वहेतुना पक्षधर्मताबलादितरबाधबलाच्चाऽशरीरेश्वरकर्त्तृकत्वस्य क्षितौ सिषाधयिषिततया तत्रापि परंपरया एतत्सत्प्रतिपक्षस्य प्रसरसंभवात्। यद्वा कर्त्ता शरीर्येवेति व्याप्त्या क्षित्यादौ शरीरिकर्त्तृकत्वसाधने वाऽशरीरिकर्त्तृकत्वसाध्यकहेतोः सत्प्रतिपक्ष इति चेन्न। प्रथमे पक्षसिद्धयर्थं कार्यत्वहेतुकानुमानस्यापेक्षणीयत्वेनोपजीव्यतया बलवत्वात्। यद्वेत्याद्युक्तसत्प्रतिपक्षोपि न, पक्षीभूतक्षित्यङ्कुरादिकार्ये गृहीतकार्यत्वे कर्त्तृजन्यत्वव्याप्तेर्बलवत्त्वात्। पार्थिवादेः शरीरस्य सृष्ट्युत्तरकालभावितया क्षित्यादावशरीरिकर्त्तृजन्यत्वस्यैव संभवात्, कार्यत्वे सकर्त्तृकत्वव्यभिचारशंकानिवर्त्तकेन "कार्यत्वं यदि कर्त्तृजन्यत्वव्यभिचारि स्यात्तदा कर्त्तृजन्यतावच्छेदकं न स्यादि"त्यादितर्केण निश्चितत्वाच्च बलवत्त्वं बोध्यम्। बलवत्त्वं च सकर्त्तृकत्वसिद्धयुपधायकत्वम्।

अथैवमपि कार्यत्वहेतौ बाधो दुर्वारः, ईश्वरे कर्तृत्वविरहात्, कर्तृजन्यत्वाभावश्च कर्तृजन्यत्वरूपसाध्यके, कर्त्तरि विशेषणस्य कर्त्तृत्वस्य विरहात्, परमेश्वरे कर्तृत्वाभावश्च कर्तृत्वव्यापकीभूतशरीराभावाद्बोध्यः। निर्धर्मितावच्छेदककेपि विशिष्टसाध्यग्रहे विशेषणबाधग्रहस्य प्रतिबन्धकत्वात्। ईश्वरे कर्तृत्वं नास्तीति प्रत्ययस्य क्षितिनिष्ठजन्यतानिरूपकत्वरूपस्येश्वरत्वावच्छिन्ननिरूपितवृत्तित्वेन कर्तृत्वाभावस्यावगाहिनः क्षितौ कर्तृनिरूपितजन्यताग्रहं प्रति विरोधस्यानुभवसिद्धत्वाच्च। (इदं चाऽसत एवेश्वरस्य भानमित्यभिमानेन)। सत्यम्। ईश्वरो न कर्त्ता इति ज्ञानं न प्रत्यक्षात्मकं, अधिकरणज्ञानस्याऽभावज्ञाने हेतुतयाऽधिकरणज्ञानं विना अभावज्ञानाऽसंभवात्, तथा चाऽधिकरणज्ञानजनकतया कार्यत्वस्याऽवश्यापेक्षणीयत्वात्, तेनैवेश्वरसिद्धेः। न च वायौ रूपं नास्तीतिवत् कर्त्तृत्वे ईश्वरवृत्तित्वाभावो गृह्यतामिति वाच्यम्। अस्मदादिवृत्तिकर्त्तृत्वस्य धर्मित्वे इष्टापत्तेः। ईश्वरवृत्तिकर्त्तृत्वन्तु व्याघातादसंभवीति। वस्तुतो महति वायौ रूपवत्त्वे रूपोपलब्धिप्रसङ्गेन योग्यानुपलब्धिसंभवाद् वायौ रूपं नास्तीति प्रत्यक्षं संभवतीति दृष्टवैषम्यं बोध्यम्। तस्याऽनुमित्यात्मकत्वे पक्षप्रसिद्धयर्थं स्थापनानुमानस्योपजीव्यत्वाद्बलवत्वम्।

तदुक्तमाचार्यैः—**न बाधोऽस्योपजीव्यत्वात्प्रतिबन्धो न दुर्बलैः।**

सिद्ध्यसिद्ध्योर्विरोधो न नाऽसिद्धिरनिबन्धना ॥

अस्या अर्थः—**बाधो न** अधिकरणज्ञानं विनाऽसंभवात्। **अस्य**— कार्यत्वस्य हेतोर्धर्मिसाधकस्याऽधिकरणज्ञापकस्योपजीव्यत्वेन बलवत्त्वात्। **प्रतिबन्धः**-सत्प्रतिपक्षो न शरीराजन्यत्वादिति हेतोः शरीरांशस्य व्यर्थत्वेन व्याप्यत्वासिद्धस्य दुर्बलत्वात्। एवं कर्ता शरीर्येवेति व्याप्तेश्च दुर्बलतया न प्रतिबन्धः, कार्यत्वव्याप्तेः पक्षधर्मतासहकाराद्विपक्षबाधकतर्काच्च बलवत्त्वम्। ननु कुलालादौ कर्तृत्वशरीरित्वदर्शनात्मकेन यः कर्त्ता स शरीरी यथा घटादिकर्त्ता कुलालादिरित्याद्युदाहरणेन बोधितया व्याप्त्या शरीरित्वव्याप्यतया कर्त्ता उपनयेन

मम तु कर्त्तृत्वेन कार्यत्वेन कार्यकारणभाव एवाऽनुकूलस्तर्कः।

"द्यावाभूमी जनयन्देव एकः, विश्वस्य कर्त्ता भुवनस्य गोप्ता" इत्यादय आगमा अप्यनुसन्धेयाः।

आस्तिक कहते हैं कि "क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत्" हमारे इस अनुमान में पक्ष क्षित्यङ्कुरादि में हेतुः (कार्यत्वम्) अस्तु-साध्यं (कर्त्तृजन्यत्वं) मास्तु—इस प्रकार की यदि व्यभिचार शंका की जाय तो हमारे यहाँ उस शंका का निवर्त्तक तर्क है, कि "यद्यत् कार्यं तत्तत् कर्त्तृजन्यम्" अर्थात् जो २ भी कार्य हैं वह किसी कर्त्ता से जन्य अवश्य है—अतः जहाँ कार्यत्व हेतु रहेगा, वहाँ कर्त्तृजन्यत्व साध्य अवश्य ही रहेगा—यह कार्यकारणभावानुकूल तर्क विद्यमान है। वही मूल में कहा है कि—"मम तु कर्त्तृत्वेन कार्यत्वेन" इत्यादि। आस्तिक के यहाँ और ईश्वर साधक प्रमाण है कि आकाश तथा पृथ्वी को उत्पन्न करनेवाला कोई एक देव अवश्य है जो विश्व (संसार) का कर्त्ता है—और संसार की रक्षा करनेवाला है। यही मूल में कहा है कि "द्यावाभूमी" इत्यादि।

बोधितः—पक्षधर्मतया च क्षित्यादावशरीरिकर्त्तृजन्यत्वं साधनीयमिति विशिष्टसाध्याप्रसिद्धिः-विरोधविशेषश्चेत्यत उक्तं **सिद्ध्यसिद्ध्योर्विरोधो नेति।** तथा च यदि पक्षधर्मतयाऽशरीरी सिद्धः तदा न **विरोधः**—नकर्त्तृत्वेऽशरीरित्वसामानाधिकरण्याभावः तदा कार्यत्वहेतोःशरीरिकर्त्तृकत्वव्यभिचारोपलंभेन तद्व्याप्त्याभावात्। यदि तु न सिद्ध स्तदाकर्त्तुरनुपस्थानेपि न विरोधः-न कर्त्तृत्वेऽशरीरित्वसामानाधिकरण्याभावग्रहः-विशेष्यतावच्छेदकप्रकारेण विशेष्यस्य "अशरीरस्य कर्त्तुः" अग्रहादिति भावः। **अनिबन्धना**—निर्बीजा- तर्काभावनिबन्धनेति यावत्। **असिद्धिर्नेति।** शरीरजन्यत्वरूपोपाधिमादाय व्याप्यत्वासिद्धिर्नेत्यर्थः। इदमुपलक्षणम्—शरीरजन्यत्वस्य कर्त्तृजन्यत्वव्यापकत्वस्यैवाऽसिद्धया तस्योपाधित्वासंभवादिति संक्षेपः।

ननु कार्यं कर्त्तृजन्यं कार्यत्वाद् घटवदित्यत्रापि कार्यत्वमस्तु कर्त्तृजन्यत्वं मास्तु "कर्त्तृजन्यत्वाभाववति अपि कार्यत्वं स्यात्" इत्याकारकव्यभिचारशङ्काया निवर्तकतर्काभावस्तुल्य एवेत्यतस्तर्कं दर्शयति **मम त्विति।** नैयायिकस्येत्यर्थः। **कर्त्तृत्वेनेति।** आत्मत्वेनेत्यर्थः। नातः कारणतावच्छेदकानन्त्यं, न वा परंपरया कृतित्वस्य तथात्वम्। पूर्वं तु नित्यकृतिसिद्ध्यर्थं तथोपन्यासात्। **कार्यत्वेनेति।** कालिकेन ध्वंसमहाकालान्यत्वविशिष्टसत्तावत्त्वेनेत्यर्थः। यथाश्रुते कार्यत्वस्य जन्यतावच्छेदकत्वे आत्माश्रयः स्यात्। स्ववृत्तिकृतीयोपादानत्वाख्यविषयत्व-समवायौ कारणकार्यतावच्छेदकसम्बन्धौ। स्वपदमात्मपरम्। **अनुकूलस्तर्क** इति। कार्यत्वं यदि

कर्तृजन्यत्वव्यभिचारि स्यात्तदा "कर्तृ"जन्यतावच्छेदकं न स्यात्, अनतिरिक्तवृत्तेरेवावच्छेदकत्वादिति।

एतेन स्थापनानुमाने शरीरिकर्तृकत्वं शरीरजन्यत्वं वोपाधिरित्यपि परास्तम्। उपदर्शितकार्यकारणभावरूपानुकूलतर्केण कार्यत्वे सकर्तृकत्वव्याप्यत्वनिर्णये सकर्तृकत्वव्याप्याव्यापके शरीरिकर्तृकत्वादौ साध्याव्यापकत्वानुमानसंभवे साध्यव्यापकतानिर्णयाभावेन नोपदर्शितोपाधिरिति ध्येयम्। ननु ईश्वरो यदि कर्त्ता स्यात्तदा प्रयोजनवान् स्यात्, सुखी स्यात्, दुःखी स्यादित्यादयः प्रतिकूलास्तर्काः कर्तृबाधका अपि सन्तीति चेत्। अत्र **आचार्यपादाः**—

तर्काभासतयाऽन्येषां तर्काशुद्धिधरदूषणम्।
अनुकूलस्तु तर्कोऽत्र कार्यलोपो विभूषणम्॥

अन्येषां प्रतिवादिनां यदीश्वरः कर्त्ता स्याच्छरीरी स्यादित्यादिभिस्तर्कैरत्रानुमाने **याऽशुद्धिः** प्रतिबन्धायोद्भावनं **तन्न दूषणं** तेषां प्रतिकूलतर्काणामाभासत्वात् कर्तृत्वाभावरूपविषयाऽपरिशोधकत्वात् ते तर्का न बाधकाः। ईश्वरसिद्ध्यसिद्धिभ्यां व्याघातेनाऽऽभासत्वादिति पूर्वार्द्धफलितार्थः। ननु प्रतिकूलतर्कैरसिद्धिर्मास्तु अनुकूलतर्काभावादनुमानाऽप्रवृत्तिरेव तर्काशुद्धिरस्तु इत्यतोऽनुकूलतर्कमाह **अनुकूलस्त्विति।** कर्तुरभावे कार्यविलोपः स्यादित्यनुकूलतर्कस्तु **विभूषणं** उपकारकः व्याप्तिग्राहकः। कार्यत्वेन कर्तृत्वादिना च कार्यकारणभावेन कर्त्रादेः कार्यमात्रहेतुत्वावधारणात् कर्तृजन्यं न स्यात्कार्यं न स्यादित्यादितर्क एव कार्यलोपपदेन विवक्षितः। न च कर्त्रभावेपि कारणान्तरात्कार्यं स्यादिति वाच्यम्। कारणान्तरवत्कर्त्तुरपि कारणत्वात्, यत्किंचित्कारणाभावस्यैव कार्यानुत्पत्तिव्याप्यत्वात्, अन्यथा कर्त्तुरिव कारणान्तराणामभावेऽपि कार्यं स्यादिति जितं चार्वाकैः। वेदोपीश्वरे प्रमाणम् तथाहि **विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन्देव एकः॥** इति। अक्षरार्थस्तु **एकः** अनादि **देवः** विश्वकर्मा द्यौश्च भूमिश्चेति द्यावाभूमी द्वितीयाद्विवचनं, **धाता** इति ऊर्ध्वसप्तलोकोपलक्षणम् **भूमिरधस्तात्।** जनयन् सन् बाहुभ्यां बाहुस्थानीयाभ्यां धर्माधर्माभ्यां-सन्धमति-संगच्छते। धर्माधर्मौ हि लोकयात्रावहनाद् बाहू। पतत्रैः परमाणुभिः पंचमहाभूतैः संयोजयति। परमाणवो हि गतिशीलत्वात्पतत्रव्यपदेश्यः। विश्वतश्चक्षूंषि यस्य सः। अनेन सर्वज्ञत्वं चक्षुषा दृष्टेरुपलक्षणात्। विश्वतो मुखानि यस्य सः। अनेन सर्ववक्तृत्वं मुखेन वागुपलक्षणात्। विश्वतो बाहवो यस्य सः। अनेन सर्वसहकारित्वं बाहुना सर्वसहकारित्वोपलक्षणात्। विश्वतः पादा यस्य सः। **पादस्य लोपोऽहस्त्यादिभ्य** इति पादस्याऽन्त्यलोपः। अनेन व्यापकत्वं, पदा व्याप्तेरुपलक्षणात्। परमेश्वरस्य सर्वप्राण्यात्मकत्वाद् यस्य यस्य प्राणिनो ये चक्षुरादयस्ते तदुपाधिकस्य परमेश्वरस्यैवेति सर्वत्र चक्षुरादयः संपद्यन्ते इत्यर्थ इति।

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः ॥२॥

पदार्थों का विभाग करते हैं—"द्रव्यं गुणस्तथा कर्म" "इत्यादि ग्रन्थ से ।
द्रव्य, गुण, कर्म, सामान्य, विशेष, समवाय, अभाव, ये सात पदार्थ कहे हैं ।

पदार्थान्विभजते **द्रव्यं गुण इति ।**

संक्षेपतः शास्त्रप्रतिपाद्यज्ञानार्थं आदौ पदार्थान् कथयति **द्रव्यं गुण** इति । यत इत्यादिः । पदार्थ इतिविपरिणामेन द्रव्यादिषु प्रत्येकमन्वयात्, यतो द्रव्यादिकं पदार्थः—अतः पदार्थाः सप्तेत्यन्वयः । यद्यपि द्रव्याणां नवविधत्वाद् द्रव्याणीत्येव वक्तुमुचितं तथापि जातावेकत्वभानोपगमेन द्रव्यमित्येकवचनसंगतिः । तथा च द्रव्यमित्यस्य द्रव्यत्वावच्छिन्नमित्यर्थः । अत एवाऽग्रे द्रव्यत्वजातौ किं मानमिति पूर्वपक्षोपि सङ्गच्छते । अन्यथा पूर्वं द्रव्यत्वजातेरप्रतिपादनात्पूर्वपक्षाऽसङ्गतिः स्यात् । एवं गुण इत्यादावपि एकवचनसंगतिर्बोध्या । गुणत्वावच्छिन्न इति तदर्थः । संयोगापेक्षया कर्मणोऽतिरिक्तत्वं नास्तीति मतं निराकर्त्तुं "तथे" त्युक्तम् । यथा गुणः पदार्थान्तरं तथा कर्माऽपि । **कर्म** कर्मत्वावच्छिन्नमित्यर्थः । **सामान्यं**—जातिः—सामान्यत्वरूपोपाध्यवच्छिन्नमित्यर्थः । विशेषेण सहितं सविशेषं सविशेषमेव सविशेषकमिति विग्रहेण परमाणूनां परस्परभेदसाधकत्वरूपविशेषविशिष्टो विशेष इत्यर्थः । तथा च परमाणूनां परस्परभेदसिद्ध्यर्थं विशेषपदार्थोऽङ्गीकर्त्तव्य इति भावः । समवायः-सम्बन्धविशेषः । अधिकरणात्मकतयाऽभावो भावरूप एवेति प्रभाकरमतं निरसितुं तथेत्युक्तम् । तथा च यथा समवायोऽतिरिक्तपदार्थस्तथाऽभावोपीति भावः । युक्तिश्च तत्तन्निरूपणावसरे वक्ष्यते । तथा च द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्त पदार्था इति फलितम् ।

अत्रेदं बोध्यम् । द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः पदार्था इति वाक्येन पदार्थानुद्दिश्य द्रव्यादयो विधीयन्ते । अत्र पदार्था उद्देश्याः-उद्देश्यतावच्छेदकं "उद्देश्यांशे विशेषणीभूतं" पदार्थत्वम् । द्रव्यादीनां विधेयत्वे विधेयविशेषणीभूतंद्रव्यत्वादिकं विधेयतावच्छेदकं, तच्च न विधेयीभूतद्रव्यादिसप्तानुगतं-द्रव्यत्व-गुणत्व-कर्मत्व-सामान्यत्व-विशेषत्व-समवायत्वा-भावत्वानां पदार्थविभाजकोपाधीनां प्रत्येकवृत्तित्वात् । एवं च पदार्थो द्रव्यं-पदार्थो गुणः-पदार्थः कर्म-पदार्थः सामान्यं पदार्थो विशेषः पदार्थः समवायः पदार्थोऽभाव इत्येवंरीत्याऽभिधाने पदार्थत्वावच्छेदेन द्रव्याद्यभेदाभावात् पदार्थत्वसामानाधिकरण्येनैव द्रव्याद्यभेदस्य विधेयतयाऽधिकपदार्थनिषेधो न स्यात्, अतो द्रव्यादिसप्तानुगतं द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावान्यतमत्वस्यैव विधेयत्वं वाच्यम् । तथा च पदार्थाः तादृशान्यतमत्ववन्तः इत्युद्देश्यविधेयभावो जातः । तत्र च असति बाधके विधेये विधेयसंसर्गे वा उद्देश्यतावच्छेदकव्यापकत्वं अवच्छेदावच्छेदेन विशिष्टबुद्धौ भासते इति नियमबलेन पदार्थत्व-

व्यापकत्वं तादृशान्यतमत्वे यथा भासते तथा तुल्यवित्तिवेद्यतया पदार्थत्वे तादृशान्यतमत्वव्याप्यत्वमपि भासते। तथा च पदार्थत्वं तादृशान्यतमत्वव्याप्यमिति व्याप्तिलाभः। एवं चाऽष्टौ पदार्था न सन्तीति सिद्धम्। अन्यथा पदार्थत्वस्याऽष्टमपदार्थेपि सत्त्वेन तादृशान्यतमत्वव्याप्तिविरोधापत्तेः। तथा च पदार्थाः "द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावात्मानः" द्रव्याद्यभावान्तान्यतमत्ववन्त इत्यत्र पदार्थत्वविशेष्यकद्रव्याद्यन्यतमत्वनिरूपितव्याप्तिनिश्चयार्थकं सप्तग्रहणम्। ननु उक्तव्युत्पत्तिसहकृतेन उद्देश्यविधेयभावमहिम्नैव निरुक्तनिश्चयसंभवात्सप्तपदं व्यर्थमिति चेन्न। समानविभक्तिकस्थले उद्देश्यविधेयभावस्य विवक्षाधीनतया तादृशान्यतमत्वमुद्देश्यतावच्छेदकीकृत्य पदार्थत्वमपि विधातुं शक्यते "द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः पदार्थत्ववन्त इत्युद्देश्यविधेयभावो बोध्यः"। तथा चोक्तव्युपत्तिबलाद् द्रव्याद्यन्यतमत्वं पदार्थत्वव्याप्यमित्यपि व्याप्तिनिश्चयः स्यात्, ताद्व्यावृत्त्यर्थमेव सप्तग्रहणमित्याशयात्। न च तद्यवावृत्तिर्व्यर्थेति वाच्यम्। तथा सति अतिरिक्तशक्त्यादिपदार्थसत्त्वेपि तादृशनिश्चयोपपत्त्या द्रव्यादय एव पदार्था इति लाभो न स्यात्। तादृशान्यतमत्वस्यैव विधेयतेति बोधनायैव सप्तग्रहणमिति। सप्तग्रहणं स्पष्टार्थमिति बहवः।

ननु द्रव्याद्यन्यतमत्वं यदि द्रव्यादिवृत्तिप्रत्येकधर्मावच्छिन्नप्रतियोगिताकभेदकूटावच्छिन्नप्रतियोगिताकभेदवत्त्वं तदाऽप्रसिद्धिः, द्रव्यं न गुणो न कर्म न सामान्यं न विशेषो न समवायो न अभावो इति प्रतीतिविषयीभूतभेदकूटवतोऽप्रसिद्धेरिति चेन्न। प्रकृते द्रव्याद्यन्यतमत्वं–द्रव्यादिभेदसप्तकाभाववत्त्वम्। तथा च द्रव्यादिभेदानां प्रत्येकं प्रसिद्धानां सप्तानां कुत्राप्यसत्त्वेन तादृशभेदसप्तकत्वावच्छिन्नाभावस्य सर्वत्र सत्त्वान्नाप्रसिद्धिः।

ननु तथापि कथं सप्त पदार्था इति गुणादिषु सप्तत्वसंख्याविरहात्, गुणे गुणानङ्गीकारादिति चेन्न। अपेक्षाबुद्धिविशेषविषयत्वरूपस्य सप्तत्वस्य सर्वत्र संभवादिति ध्येयम्।

पदार्थान् विभजते इति द्वितीयार्थो विशेष्यकत्वम्, तस्य धात्वर्थैकदेशे ज्ञानेऽन्वयः। समभिव्याहृतपदार्थतावच्छेदकीभूतधर्मावान्तरधर्म[1]प्रकारकज्ञानानुकूलो

---

१ अत्रेदं बोध्यम्। धर्मे तद्धर्मावान्तरत्वं च तद्धर्मव्याप्यत्वम्। तच्च न तदभाववदवृत्तित्वरूपं-पदार्थत्वावान्तरत्वाप्रसिद्धेः, किन्तु पदार्थत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वम्। पदार्थत्वाधिकरणगुणवृत्तिभेदप्रतियोगितावच्छेदकत्वाद्द्रव्यत्वस्य पदार्थत्वावान्तरत्वमुपपन्नम्। एवं गुणत्वादिषु अपि बोध्यम्। न च पृथिवीत्वमादाय अष्टौ पदार्था इति प्रयोगापत्तिः। तद्धर्मावान्तरत्वं हि तद्धर्मसाक्षाद्व्याप्यत्वम्, तच्च तद्धर्मव्याप्यत्वे सति तद्धर्मव्याप्याऽव्याप्यत्वम् तथा च पृथिवीत्वस्य पदार्थत्वसाक्षाद्व्याप्यत्वाभावेन तदापत्तिविरहात्। पदार्थत्ववारणाय सत्यन्तं-तच्चोक्तं न्यूनवृत्तित्वरूपं ग्राह्यम्। पृथिवीत्वादिवारणाय विशेष्यदलम्! तत्रापि प्रथमव्याप्यत्वं न्यूनवृत्तित्वरूपं, तेन नाऽप्रसिद्धिः। अव्याप्यत्वघटकद्वितीयव्याप्यत्वमपि

अत्र सप्तमस्याऽभावत्वकथनादेव षण्णां भावत्वे प्राप्ते तेन भावत्वेन पृथगुपन्यासो न कृतः। एते च पदार्था वैशेषिके प्रसिद्धा नैयायिकानामप्यविरुद्धाः। प्रतिपादितं चैवमेव भाष्ये। अत एवोपमानचिन्तामणौ सप्तपदार्थभिन्नतया शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वमाशंकितम्।

प्रश्न—"पदार्थो द्विविधः—भावोऽभावश्च" अर्थात् पदार्थ दो प्रकार के हैं—भाव और अभाव। उसमें द्रव्यादि ६ भाव पदार्थ हैं—सप्तम अभाव है। इस रीति से पदार्थ-निरूपण क्यों नहीं किया। उत्तर—सप्तमपदार्थ को अभाव कहने से ही ६ पदार्थ स्वयं भाव सिद्ध हो जाते हैं—अतः ६ भाव पदार्थों का भावत्वेन अलग उपन्यास नहीं किया। प्रश्न—गौतमतन्त्र में १६ पदार्थों का निरूपण किया है—वे भी यहाँ निरूपणीय हैं तो सातवीं क्यों कहे। उत्तर ये ७ पदार्थ वैशेषिक लोग मानते हैं इसीलिये वैशेषिकशास्त्र में प्रसिद्ध हैं, परन्तु गौतमानुयायिओं को भी पदार्थों के विषय में कोई विरोध नहीं है—अर्थात् १६ पदार्थों का इन सात ही पदार्थों में अन्तर्भाव है। इसमें भाष्य सम्मति बतला रहे हैं—"प्रतिपादितञ्चेति" अर्थात् भाष्य में ऐसा ही प्रतिपादन किया है कि ७ ही पदार्थ हैं—१६ पदार्थों का इन्हीं ७ में अन्तर्भाव है। इसीलिये उपमान-चिन्तामणि ग्रन्थ में सात ही पदार्थ क्यों? जब कि शक्ति-सादृश्य भी उनसे अतिरिक्त पदार्थ हो सकते हैं ऐसी आशंका की है।

व्यापारो विपूर्वकभजधातोरर्थः। कृतिश्चाऽऽख्यातार्थः। तथा च पदार्थविशेष्यकपदार्थत्वावान्तरधर्मप्रकारकज्ञानानुकूलव्यापारानुकूलकृतिमान् मूलकार इति बोधः। तादृशज्ञानं द्रव्यं गुण इत्याद्याकारकम्। तदनुकूलव्यापारो द्रव्यं गुणस्तथाकर्मेत्यादिपद्यात्मकः।

ननु सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासां प्रति हेतुतया लक्षणात्मकसाधारणधर्मप्रकारकज्ञानाभावात् कियन्तः पदार्था इति जिज्ञासानुत्पत्त्या विभागकरणमनुचितमिति चेन्न। पदार्था इति समाख्या लक्ष्यपरम्। तन्निर्वचनं लक्षणं पदस्य अर्थ इति तन्निर्वचनात्। ईदृशनिर्वचनेन पदसंबन्ध्यभिधाविषयत्वस्य लाभः।

न्यूनवृत्तित्वरूपमेव, अन्यथा पदार्थत्वव्याप्यद्रव्यत्वादिव्याप्यत्वस्यैव द्रव्यत्वादौ सत्त्वादवान्तरत्वानुपपत्तेः। विशेष्यदलघटकस्वव्याप्यत्वं स्वाश्रयवृत्तित्व-स्वानाश्रयवृत्तित्वोभयसंबन्धेन द्रव्यत्वादिविशिष्टान्यत्वेन विशेषणीम्। तेन पदार्थत्वव्याप्यद्रव्यगुणान्यतरत्वव्याप्यत्वस्यैव द्रव्यत्वादौ सत्त्वेपि न क्षतिः। स्वपदं द्रव्यत्वादिपरम्। तथाचोक्तोभयसंबन्धेन द्रव्यत्वादिविशिष्टत्वस्य तादृशान्यतरत्वे सत्त्वात् स्वव्याप्यपदेन तदग्रहणान्नोक्तदोषः। तथा च पदार्थत्वविशिष्टधर्मप्रकारकज्ञानानुकूलव्यापारो धात्वर्थः, धर्मे पदार्थत्ववै० स्वव्याप्यत्व-स्वविशिष्टविशिष्टभिन्नत्वोभयसंबन्धेन। स्वद्वयं पदार्थत्वपरम्। स्ववै० स्वव्याप्यत्व-स्वसमानाधिकरणद्रव्यत्वादिमदन्यत्वोभयसं०। स्वद्वयं पूर्ववद्। द्रव्यत्वादिमत्ता च स्वाश्रयवृत्तित्व-स्वानाश्रयवृत्तित्वोभयसं०। स्वद्वयं प्रथमात्वादिपरम्। विशिष्टवै० स्वव्याप्यत्वसंबन्धेनेति संक्षेपः। स्वपदं विशिष्टपरम्।

ननु कथमेत एव पदार्थाः, शक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वात्। तथाहि—मण्यादिसमवहितेन वह्निना दाहो न जन्यते, तच्छून्येन तु जन्यते तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते, उत्तेजकेन मण्याद्यपसारणेन च जन्यते इति कल्प्यते।

आशंका ग्रन्थ—ये ही ७ पदार्थ क्यों मानें जब कि शक्ति-सादृश्य भी अतिरिक्त पदार्थ सम्भव हैं। शक्ति को अतिरिक्त पदार्थ सिद्ध करते हैं। तथाहि—प्रश्न—मीमांसक नैयायिक से पूछता है कि यदि वन्हि दाह के प्रति कारण है तो जहाँ वन्हि तथा चन्द्रकान्तमणि दोनों हैं—वहाँ दाह क्यों नहीं होता है— क्योंकि "कारणसत्त्वे कार्यसत्त्वम्" कारण के रहने पर कार्य अवश्य ही होता है—अतः केवल वन्हि दाह के प्रति कारण नहीं है—अपितु "शक्ति-विशिष्टवन्हि" दाह के प्रति कारण है—ऐसा तुम्हें (नैयायिक को) मानना चाहिए। चन्द्र-कान्तमणि का सन्निधान होने से वन्हि में दाह नहीं होता है—चन्द्रकान्त के शून्यकाल में दाह होता है। वहाँ चन्द्रकान्तमणि से वन्हि की दाहकारणीभूत शक्ति नष्ट हो जाती है—और दोनों के रहते हुए सूर्यकान्तमणि को ले आवें, या दोनों में से चन्द्रकान्तमणि का अपसारण कर लें तो दाह अवश्य ही होता है ऐसी कल्पना की जाती है। अतः शक्ति अतिरिक्त पदार्थ है यह सिद्ध हुआ।

तत्रापि पदसंबन्धित्वांशस्याऽव्यावर्त्तकत्वादभिधेयत्वं पदार्थसामान्यलक्षणं लभ्यते। **अर्थोऽभिधेय** इति कोषेनाऽर्थपदस्याऽभिधेयत्वावच्छिन्ने शक्तिप्रतिपादनात्। एवं ऋगतावित्यनुशासनाद् गत्यर्थको धातुः, तस्य गुणे कृते अरिति धातुनिष्पत्तिः। ततो विषयार्थकथप्रत्यये अर्थ इति शब्दो निष्पन्नः। तथा च गत्यर्थकधातूनां ज्ञानार्थकत्वनियमेन ज्ञेयत्वं-प्रमेयत्वमित्यपि पदार्थसामान्यलक्षणं बोध्यम्।

ननु ग्रन्थान्तरे "पदार्थो द्विविधो भावोऽभावश्च-तत्र द्रव्यगुणकर्मसामान्यविशेषसमवायाः षड् भावाः, सप्तमस्त्वभाव इति क्रमेण" विभागो दृष्टः, तथैवाऽत्रापि विभागः कुतो न कृतः।

"ग्रन्थान्तरीयविभागपक्षे पदार्थविभाजकं भावत्वं अभावत्वं चेति धर्मद्वयमेव। द्रव्यत्वादीनां षण्णां पदार्थविभाजकीभूतभावत्वविभाजकत्वमेव। सन्ति तत्पक्षेपि सप्तपदार्था एव। एतद्ग्रन्थरीत्या तु द्रव्यत्वगुणत्वादयः सप्त धर्मा एव साक्षात्पदार्थविभाजका इति विशेषः" इत्यत आह **अत्रेति**। पद्ये इत्यर्थः। **सप्तमस्य**=अभावस्य। अभावत्वकथनादेवेति। अभावत्वप्रकारकबोधजनकादेवेत्यर्थः। "तथाऽभाव" इत्यनेन सप्तमस्यैवाऽभावत्वबोधनादिति यावत्। **षण्णां**=द्रव्यगुणकर्मसामान्यविशेषसमवायानाम्। **अर्थात्प्राप्तं**=अनुमानात्प्राप्तम्। तथा च वाचकपदं विनापि भावत्वमुपस्थितमिति यावत्। यद्यपि सप्तमस्याऽभावत्वकथनात्तदितरेषां भावत्वं दुर्लभमेव, न ह्येकस्य ब्राह्मणत्वे प्रतिपादिते तदितरेषां सर्वेषामब्राह्मणत्वं प्रतिपादितं

भवति। तथाप्येतस्य विभागवाक्यतया परस्परमसङ्कीर्णव्याप्यधर्मस्यैव विभाजकतया द्रव्यादीनामभावत्ववत्त्वेऽभावत्वं विभाजकमेव न स्यात्। "द्रव्यादीनामभावत्ववत्त्वे द्रव्यत्वादीनां पदार्थत्वसाक्षाद्व्याप्यत्वविरहापत्त्या द्रव्यत्वादिकं वा विभाजकं न स्यात् इति द्रव्यादीनामभावभिन्नत्वात्परिशेषाद्भावत्वं प्राप्तमिति भावः। अनुमानं च द्रव्यादयो भावाः अभावत्वविरुद्धधर्मवत्त्वादित्याकारकं बोध्यम्। **तेन** = प्राप्तत्वेन, उपस्थितत्वेनेति यावत्। **भावत्वेन पृथगुपन्यासो न कृत इति**। तेषामिति शेषः। "पदार्थो द्विविधः—भावोऽभावश्च" द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः इत्यादिशब्देन पृथगुपन्यासो न कृत इत्यर्थः।

ननु अन्ये पदार्थाः कुतो न सन्ति न्यायसूत्रे षोड़शपदार्थनिरूपणादित्याशङ्कायामाह **एते च पदार्था** इति। द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावा इत्यर्थः। **प्रसिद्धा** इति। प्रमाविषया इत्यर्थः। **अविरुद्धा** इति। न भ्रमज्ञानविषया इत्यर्थः। उक्तार्थे भाष्यसम्मतिमाह **प्रतिपादितं** चेति। **एवमेव** = द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्त पदार्थाः, षोडशानामत्रैवाऽन्तर्भावादिति प्रतिपादितमित्यर्थः। **भाष्ये** = वात्स्यायनभाष्ये। अयमभिप्रायः। **आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति** सूत्रप्रतिपादितद्वादशप्रमेयान्तर्गताऽर्थनिरूपणप्रस्तावे परमकारुणिकेन भगवता वात्स्यायनाचार्येण द्रव्यगुणकर्मसामान्यविशेषसमवायाः प्रमेयमित्युक्तम्।

भाष्यकृतां सम्मतिमुक्त्वा मणिकृतां सम्मतिमाह **अत एवेति**। भ्रमाविषयत्वादेवेत्यर्थः। **उपमानचिन्तामणौ**-तत्त्वचिन्तामणिग्रन्थस्योपमानखण्डे। **आशङ्कितमिति**। शक्तिसादृश्यादयः अतिरिक्ताः पदार्थाः सप्तपदार्थभिन्नत्वादित्यनुमानेनाऽतिरिक्तत्वं साधितमिति भावः।

वस्तुतस्तु **सप्तपदार्थभिन्नतयेति,** द्रव्यत्व-गुणत्व-कर्मत्व-सामान्यत्व-विशेषत्व-समवायत्वाऽ-भावत्वान्यतमभिन्नतयेत्यर्थः। **शक्तिसादृश्यादीनामिति**। शक्तित्व-सादृश्यत्वयोरित्यर्थः। **अतिरिक्तपदार्थत्वमिति**।

पदार्थविभाजकधर्मत्वमित्यर्थः। तथा च शक्तित्वं-सादृश्यत्वं वा पदार्थविभाजकं तादृशान्यतमप्रतियोगिकभेदवत्त्वात् यन्नैवं तन्नैवं यथा पृथिवीत्वमित्यनुमानेन पदार्थविभाजिकत्वमाशंकितम्। **तत्रापि** शक्तित्वसादृश्यत्वयोःप्रमाणत्वादिपदार्थविभाजकप्रतियोगिकभेदवत्त्वहेतुना पदार्थविभाजकत्वस्य शंकामकृत्वा द्रव्यत्वादिपदार्थविभाजकप्रतियोगिकभेदवत्त्वहेतुना पदार्थविभाजकत्वशंकया द्रव्यत्वादीनामेव पदार्थविभाजकत्वं चिन्तामणिकृदनुमतमिति लभ्यते। अथवा शक्तिसादृश्यादिकं पदार्थान्तरं सप्तपदार्थभिन्नत्वादिति यथाश्रुतानुमाने प्रमाणादिषोड़शपदार्थभिन्नत्वरूपहेत्वननुसरणेन ज्ञायते यद्द्रव्यत्वादीनामेव पदार्थविभाजकत्वं चिन्तामणिकृदनुमतमिति भावः।

एवं सादृश्यमप्यतिरिक्तः पदार्थः, तद्धि न षट्सु भावपदार्थेषु अन्तर्भवति सामान्येऽपि सत्त्वात्। यथा गोत्वं नित्यं तथाऽश्वत्वमपि नित्यमिति सादृश्यप्रतीतेः।

ऐसे ही सादृश्य भी अतिरिक्त पदार्थ है—क्योंकि सादृश्य का ५ भाव पदार्थों में तो अन्तर्भाव है नहीं—कारण कि सादृश्य सामान्य में भीरहता है—जैसे गोत्व नित्य है वैसे अश्वत्व भी नित्य है—इस प्रकार अश्वत्व जाति में गोत्वजाति के सादृश्य की नित्यत्वेन प्रतीति होती है। इससे यह सिद्ध हुआ कि जो वस्तु सामान्य में रहती है—उसका ६ भाव पदार्थों में अन्तर्भाव नहीं हो सकता है।

शक्तिसादृश्ययोरुपस्थितत्वादाशंकते **नन्विति**। तथा च पदार्थत्वं द्रव्याद्यन्यतमत्वव्याप्यं नवेति विप्रतिपत्तिर्बोध्या[1]। एते एव[2] पदार्थाः कथमित्यन्वयः। **एत एवेति।**

---

१ विप्रतिपत्तेराकारस्तु द्रव्याद्यन्यतमत्वं पदार्थवृत्तिभेदप्रतियोगितावच्छेदकं न वेत्ति बोध्यः। तेन निषेधकोटेरप्रसिद्धावपि न क्षतिः।

२ एवकारार्थस्त्वनेकप्रकारः क्वचिदत्यन्ताऽयोगव्यवच्छेदः क्वचिदन्ययोगव्यवच्छेदः। तत्र क्रियासमभिव्याहारस्थले आद्यः। यथा नीलं सरोजं भवत्येवेत्यादौ। अत्यन्ताऽयोगः-अत्यन्तयोगाभावः। व्यवच्छेदोऽभावः योगाभावश्च प्रकृते नीलाभावः। तत्राऽत्यन्तत्वं -व्यापकत्वम्। तथा च सरोजत्वव्यापकीभूतो यो नीलाभावस्तदभाववत्सरोजमिति बोधः। तथा च सरोजत्वव्यापकनीलाभावस्याऽभावः एवकारेण प्रत्याय्यते। न च नीलाभावे सरोजत्वव्यापकत्वमप्रसिद्धमिति वाच्यम्। सरोजत्वव्यापकत्वाभाववन्नीलाभाववत्सरोजमिति बोधस्वीकारात्। न च नीलं सरोजं भवत्येवेत्यत्राऽभावान्वयस्यापि प्रामाणिकत्वेन सरोजत्वविशिष्टे नीलाभाववत्ताग्रहे कथं सरोजत्वविशिष्टे नीलत्वविशिष्टबुद्धिरिति वाच्यम्। सरोजत्वसामानाधिकरण्येन तादृशाभावनीलिमयोर्बोध इति न दोषः।

विशेष्यसंगतैवकारस्थले द्वितीयः। यथा पार्थ एव धनुर्धर इत्यादौ। अन्यस्मिन्-पार्थान्यस्मिन्-योगव्यवच्छेदः-धनुर्धरत्वाभावः, तथा च पार्थान्यवृत्त्यत्यन्ताभावप्रतियोगिधनुर्धरत्ववान्पार्थः। पार्थान्यस्मिन्धनुर्धरत्वाभावः। पार्थान्यो धनुर्धरभिन्न इति वा बोधः। न च प्रथमे धनुर्धरपदस्य धनुर्धरत्वपरतया धनुर्धरत्वलाभेपि नामार्थयोरभेदातिरिक्तसंबन्धेनाऽन्वयबोधस्याऽव्युत्पन्नत्वात्कथं धनुर्धरत्वलक्षणनामार्थस्य नामार्थेन पार्थेनाऽन्वय इति चेत्, सत्यम्। पार्थान्यवृत्त्यन्योन्याभावप्रतियोगिधनुर्धराभिन्नः पार्थ इत्यन्वयबोधस्वीकारेण न दोषः।

विशेषणसमभिव्याहृतैवकारस्थले तृतीयः। यथा शंखः पाण्डुर एवेत्यादौ। अयोगस्य-तादात्म्याभावस्य व्यवच्छेदोऽभावः। तथा च पाण्डुरतादात्म्याभावाभाववान्शंख इति बोधः।

परन्तु एते एव कथं पदार्था इत्यत्र यद्यपि नैवकारस्याऽत्यन्तायोगाऽन्ययोगाऽयोगव्यवच्छेदाः संभवन्त्यर्थाः। क्रियासमभिव्याहाराभावेन प्रथमार्थासंभवात्। सप्तान्यस्य सप्ततादात्म्यभावस्य चाऽप्रसिद्धया चरमयोरर्थयोरप्यसंभवात्। तथापि एवकारेणैतच्छब्दार्थे द्रव्यादिसप्तस्वरूपे पदार्थव्यापकत्वं बोध्यते। तथा चैते न पदार्थव्यापका इति शंकितुराशयः।

द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावा एव कथं पदार्था इत्यर्थः। तत्र हेतुमाह शक्तिसादृश्यादीनामिति। तत्तत्पदवाच्यानामित्यर्थः। आदिना स्वत्वाधारत्वपरिग्रहः। **अतिरिक्तपदार्थत्वादिति**। द्रव्यत्वादिसंबन्धकल्पने प्रमाणाभावेन प्रत्येकं द्रव्यत्वाद्यभाववत्त्वादित्यर्थः।

द्रव्यादिसप्तान्यतमत्वं न पदार्थत्वव्यापकं द्रव्यत्वाद्यभाववत्'सप्तपदार्थातिरिक्त'पदार्थवृत्त्यभावप्रतियोगित्वात् घटत्वादिवत्, तुल्यवित्तिवेद्यतया पदार्थत्वं न द्रव्यादिसप्तान्यतमत्वव्याप्यं तादृशान्यतमत्वाभाववत्"सप्तपदार्थभिन्न"पदार्थवृत्तित्वात् यन्नैवं तन्नैवं घटः इत्यनुमानं फलितं, तत्रादौ शक्तेरतिरिक्तपदार्थत्वं साधयति **तथाहीत्यादिना**। अत्र वह्निर्दाहानुकूलाऽदृष्टाऽतीन्द्रियधर्मसमवायी न वेत्याकारिका विप्रतिपत्तिर्बोध्या। प्रत्यक्षाभावाद् युक्तिं दृढयति **मण्यादिसमवहितेनेति**। मण्यादिविशिष्टेनेत्यर्थः। आदिना मन्त्रौषध्यादिपरिग्रहः। वह्निनेति। अनेन वह्नित्वरूपकारणतावच्छेदकविशिष्टस्य "कारणीभूत"वह्नेः सत्त्वं सूचितम्। **दाहः** = पूर्वरूपध्वंसः, रूपान्तरोत्पत्तिर्वा। **तच्छून्येन** = मण्यादिशून्येन। वह्निनेति पूर्वेणान्वयः। **जन्यते** इति। दाह इत्यादिः। तथा च वह्नित्वमिवाऽन्योपि "वह्निनिष्ठ" कारणतावच्छेदकधर्मो वाच्यः स एव शक्तिरिति भावः। अथ वह्नित्वेनैव शक्तिमत्त्वेन कारणत्वसिद्धावपि अन्वयव्यभिचारो दुर्वार इत्यत आह **तत्रेति**। पूर्वोक्तयुक्त्या शक्तिसिद्धावित्यर्थः। **वह्नौ** = वह्निनिष्ठा। **दाहानुकूला** = दाहजनकतावच्छेदिका। एतन्मते शक्तिमद्वह्नित्वेनैव हेतुत्वात्। इत्थं च दाहत्वावच्छिन्ने संयोगेन शक्तिमद्वह्नित्वेन स्वाश्रयसंयोगेन स्वातन्त्र्येण शक्तित्वेन हेतुत्वकल्पनाद्वा शक्तिसिद्धिरित्यर्थः। नाश्यते इति। यद्यपि मण्यादिना शक्तिरभिभूयते इत्यपि मीमांसकमतं—तथापि कल्पनागौरवभियैतदपहाय निष्कृष्टमतमेवाभिहितम्। नाश्यते इत्यस्य इतिकल्प्यते इत्यनेनाऽन्वयः। तथा च वह्निवृत्तिशक्तिं प्रति मणित्वेन "मणेः" नाशकतास्वीकारेण मण्यादिसत्त्वे शक्तेरभावान्न दाहापत्तिरिति भावः।

अयं भावः। शक्तिस्वीकर्तृप्रभाकरमते कारणीभूताभावप्रतियोगित्वं न प्रतिबन्धकत्वं, दाहं प्रति मण्यभावानामपि हेतुत्वापत्त्या गौरवात्, किन्तु कारणतावच्छेदकविघटकत्वमेव तत्, तथा च वह्निनिष्ठः कश्चिदतीन्द्रियधर्मः शक्त्याख्यः स्वीकार्यः। मण्यादिसमवधानकाले वह्निनिष्ठतादृशशक्तेर्नाशेन कारणतावच्छेदकीभूतशक्तिविशिष्टकारणाभावान्न दाहापत्तिरिति भावः। ननु मास्तु मण्यादिसमवधानदशायां दाहजनकीभूतशक्त्यभावेन दाहोत्पादः, शक्तिजनकोत्पादनियामकहेतुसत्त्वदशायां शक्त्युत्पादः स्यादेवेत्यत आह **उत्तेजकेनेति**। अस्य जन्यते इत्यनेनान्वयः। उत्तेजकेन शक्तिर्जन्यते इति यावत्। **मण्याद्यपसारणेन चेति**। अस्याप्यन्वयः पूर्ववत्। अत्र चकारो वाकारार्थे, न तु समुच्चयार्थे, उत्तेजकमण्याद्यपसारणयोरेकसत्त्वे-

पि दाहोत्पत्तेः समुच्चितयोर्दाहकारणत्वाऽसंभवात्। तथाचोत्तेजकाभावविशिष्टमण्यभावादेरेव शक्तिनियामकत्वादिति भावः।

न चोत्तेजकस्य मण्याद्यभावस्य वा दाहं प्रत्येव हेतुतास्तु, तावतापि मणिसमवधानकाले न दाहापत्तिः, तथाचाऽनन्तशक्तिपदार्थकल्पनमयुक्तमेवेति वाच्यम्। मण्यभावत्वेन रूपेण स्वातन्त्र्येण हेतुताकल्पने गौरवात्। वस्तुतो मीमांसकैर्घटादिकं प्रति तत्तत्कारणेषु घटाद्यनुकूलां शक्तिं कल्पयित्वा तादृशविलक्षणशक्तिमत्त्वेनैव कारणत्वस्याङ्गीकाराद्दण्डचक्रादिभेदेन न कारणताबाहुल्यमित्यपि लाघवं बोध्यम्।

कल्प्यते इति। वह्निर्दाहानुकूला[1]ऽदृष्ठाऽतीन्द्रियधर्मसमवायी दाहजनकत्वाददृष्टविशेषवदात्मवदित्यनुमानेन शक्तिसिद्धिरिति भावः। अनुकूलत्वं च जनकतावच्छेदकसाधारणम्। तच्च कारणतावच्छेदकाऽवृत्ति अन्यथासिद्धिचतुष्टयशून्यत्वे सति कार्यनियतपूर्ववर्त्तित्वम्। नातः शक्तेर्जनकतावच्छेदकत्वाददृष्टस्य तु जनकत्वेपि न क्षतिः। कार्यमात्रं प्रति अदृष्टवदात्मन एव तथात्वमित्यपरे।

ननु अनया युक्त्या न शक्तिसिद्धिः, बन्ध्यास्त्रीसंप्रयोगादौ दृष्टसाद्गुण्येपि-अदृष्टविलंबात्फलविलंब इतिवदत्रापि तद्विलंबाद्विलम्ब इति चेत्। नहि दृष्टसामग्रीसंपत्तौ अदृष्टविलंबात्कार्यविलंबो दृष्टः। बन्ध्यास्त्रीसंप्रयोगादौ विजातीयसंयोगरूपदृष्टहेत्वभावेन फलानुत्पादः, इतरथाऽदृष्टविलंबादेव कार्यविलंबे दृष्टकार्यकारणकथा विलीयेत, तस्मात्संभवति दृष्टसाद्गुण्ये तथाकल्पनाया न्याय्यत्वाच्छक्तिसिद्धिरिति।

नन्वेवं शक्तिसिद्धावपि तस्या अतिरिक्तत्वे किं मानमिति चेन्न। शक्तिः अतिरिक्तः पदार्थः क्लृप्तपदार्थानन्तर्भूतत्वादित्यनुमानेनाऽतिरिक्तत्वसिद्धिः। क्लृप्तपदार्थानन्तर्भावश्चेत्थम्–शक्तिर्न द्रव्यात्मिका गुणवृत्तित्वात् गुणत्ववत्। न च स्वरूपासिद्धिः। गुणस्यापि शक्तिमत्त्वेनैव हेतुत्वात्।

अत्र पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यता, तेन प्रत्याश्रयं शक्तेर्भिन्नत्वे हेतूनां भागासिद्धत्वेऽपि न दोषः। पक्षतावच्छेदकं चोभयसाधारणं शक्तिपदवाच्यत्वं, शक्तिमात्रस्यैव द्रव्यरूपत्वाङ्गीकर्त्रा समं विवादे एवानुमानम्, तेन शक्तिषु चालनीन्यायेन द्रव्यादिभेदमादाय नांशतः सिद्धसाधनावकाशः। यद्वा भागासिद्धिर्न दोषायेति नव्यमतेनेदमनुमानम्, तथाच पक्षतावच्छेदकावच्छेदेनैव साध्यसिद्धिरुद्देश्येति न काप्यनुपपत्तिरिति ध्येयम्। शक्तिर्गुणकर्मभिन्ना गुणकर्मवृत्तित्वादेव। न च सामान्याद्यन्यतमरूपा उत्पत्तिमत्त्वे सति विनाशित्वादिति।

विभागव्याघाताय सादृश्यमपि व्यवस्थापयति **एवमिति**। अतिरिक्तशक्तिसिद्धिरिवेत्यर्थः। नहि शक्तिवत्सादृश्येऽप्यनुमानाऽपेक्षा तस्य प्रत्यक्षसिद्धत्वात्,

---

१ भर्जनकपालस्थवह्निनिष्ठानुद्भूतरूपमादाय सिद्धसाधनवारणाय दाहानुकूलेति। अदृष्टवदात्मसंयोगमादाय सिद्धसाधनवारणायाऽदृष्ठेति। उष्णस्पर्शमादाय सिद्धसाधनवारणायाऽतीन्द्रियेति।

किन्त्वनुमानेन तस्याऽतिरिक्तत्वं साधयति **अतिरिक्तः पदार्थ इति**। षड्भावानन्तर्भूतत्वे सति अभावानन्तर्भूतत्वादिति हेतुः पूरणीयः। तथाच सादृश्यं क्लृप्तसप्तपदार्थातिरिक्तं षड्भावानन्तर्भूतत्वे सति अभावानन्तर्भूतत्वादित्यनुमानं फलितम्। तत्र विशेषणासिद्धिं निरस्यति **तद्धीति**। हि- यतः, तत्- सादृश्यम्। न षट्सु पदार्थेषु **अन्तर्भवतीति**। षड्भावानन्तर्भूतमित्यर्थः। षट्सु अनन्तर्भावे एकोक्तिमाह **सामान्येपि सत्त्वादिति**। अपिना सामान्येतरपरिग्रहः। तथाच सादृश्यं षड्भावानन्तर्भूतं सामान्यवृत्तित्वे सति सामान्येतरवृत्तित्वादिति फलितम्। अत्राऽऽकाशाभावो दृष्टान्तः। वृत्तित्वं च सामानाधिकरण्यान्य"स्वरूप"सम्बन्धेन, षड्भावानां तेन संबन्धेन सामान्येऽसत्त्वादिति भावः। ननु सामान्ये सादृश्यधीरेव नास्तीति न तत्र सादृश्यं तथाच स्वरूपासिद्धिरत आह **यथेति**। अश्वत्वमपीत्यपिना आकाशादिपरिग्रहः। एवं च यथा गोत्वं नित्यं तथा अश्वत्वं नित्यं तथाऽऽकाशादिकं नित्यमिति सादृश्यप्रतीतेरित्यर्थः। तादृशप्रतीत्या गोत्वनिरूपितसादृश्यस्य अश्वत्वे आकाशादौ च सिद्धत्वेन तत्र निरुक्तहेतोरक्षतत्वादिति भावः।

अत्र घटत्वादौ व्यभिचारवारणाय विशेष्यदलम्। **सत्यन्तम्** सामान्यत्वे व्यभिचारवारणाय। अथ सामान्यत्वमनेकसमवेतत्वे सति नित्यत्वं, तच्च ध्वंसप्रागभावाऽप्रतियोगित्वम्, अप्रतियोगित्वं प्रतियोगित्वाभावः, एवं सामान्यत्वमभावस्वरूपमेवेति कथं व्यभिचारः, अभावस्य षड्भावानन्तर्भूतत्वात्। न च विनिगमनाविरहेण नित्यत्वे सति अनेकसमवेतत्वस्यापि सामान्यत्वरूपतया व्यभिचारः, अनेकसमवेतत्वस्य अनेकानुयोगिकसमवायप्रतियोगित्वरूपतया प्रतियोगित्वस्य स्वरूपसंबन्धविशेषरूपस्य सामान्यात्मकत्वादिति वाच्यम्। तथाप्यभेदे आधाराधेयभावानुपगमेन सामान्ये सामान्यवृत्तित्वासंभवेन व्यभिचाराऽसंभवादिति चेन्न। सामान्यं सामान्यत्ववदिति प्रतीत्या स्वस्यापि स्वरूपसंबन्धेन स्ववृत्तित्वमवश्यमङ्गीकरणीयम्। अभावाधिकरणकाभावस्थले सर्वैरपि तथा स्वीकारादिति सामान्यत्वे व्यभिचारो बोध्य इति ध्येयम्।

अथ सामान्यतदितरोभयसाधारणस्य एकस्य सादृश्यस्याभावेन स्वरूपासिद्धिः। न च सादृश्यमेकमेवेति वाच्यम्। तथासति गवयनिष्ठगोसादृश्यस्य खरनिष्ठाश्वसादृश्याभिन्नतया अश्वसदृशो गवय इति व्यवहारापत्तेः, किंबहुना सर्वस्य सर्वसदृशत्वापत्तेः। न च सादृश्यस्य ऐक्येऽपि अश्वनिरूपितत्वविशिष्टसादृश्याधिकरणतायाः गवये बाधान्न तथा व्यवहारः, अश्वसादृश्यं गवयवृत्तीति व्यवहारस्येष्टत्वादिति वाच्यम्। सुसदृशमन्दसदृशव्यवहारस्य तदेकत्वेऽनुपपत्तेः। तथाहि- तद्गतभूयोधर्मवति (यत्सादृश्यं सुसादृश्यं-तद्गताऽल्पधर्मवति) यत्सादृश्यं यथा तन्मन्दसादृश्यं गोसदृशो गवयः अश्वसदृशः पीतगौरित्यादौ। सादृश्यस्यैकत्वे तन्नोपपद्यते विरुद्धयोः शोभनत्वमन्दत्वयोरेकत्राऽसंभवादिति, सत्यम्। सादृश्यमेकमेवेत्यालङ्कारिकसिद्धान्तानुरोधेन सामान्येपि सत्त्वादिति हेतुप्रतिपादनात्।

नाप्यभावे सत्त्वेन प्रतीयमानत्वादिति चेन्न ।

मण्याद्यभावविशिष्टवन्ह्यादेर्दाहादिकं प्रति स्वातन्त्र्येण मण्यभावादेरेव वा हेतुत्वं कल्प्यते, अनेनैव सामञ्जस्ये अनन्तशक्तितत्प्रागभावध्वंसकल्पनाऽनौचित्यात् । न चोत्तेजके सति प्रतिबन्धकसद्भावेऽपि कथं दाह इति वाच्यम् ।

अभाव में भी अन्तर्भाव सादृश्य का नहीं हो सकता है—क्योंकि अभाव में अन्तर्भाव होने से सादृश्यं असत् ऐसी प्रतीति होनी चाहिये। इस पूर्वोक्त प्रकार से मीमांसक ने शक्ति-सादृश्य अतिरिक्त पदार्थ सिद्ध कर दिये।

"मण्याद्यभावविशिष्टवन्ह्यादेः इत्यादि ग्रन्थ से खण्डनात्मक उत्तर—नैयायिक कहता है कि कोई भी कारण स्वतन्त्र होकर किसी कार्य को उत्पन्न नहीं कर सकता है अपितु सहकारी कारण से युक्त होकर ही उत्पन्न करता है)। प्रकृत में मण्यभावविशिष्ट वन्हि ही दाह के प्रति कारण है। (न कि केवल वन्हि)। अथवा मण्यभाव भी स्वतंत्र कारण मान लिया जाय। (मणिसमवधानस्थल में मणि के अभाव से विशिष्ट वन्हि नहीं है—अपितु मणि से विशिष्ट ही वन्हि है—अतः "मण्यभावविशिष्टवन्हि" रूप दाह का कारण वहाँ नहीं है अतः वहाँ दाह नहीं होता है। अथवा स्वतंत्र रूप से मण्यभाव रूप कारण नहीं है अपितु मणि ही है, इसलिये भी दाह नहीं होता है ऐसा मानने से ही जब कि सामञ्जस्य (निर्वाह) हो सकता है तो अनन्तशक्ति—उनका ध्वंस तथा प्रागाव—की कल्पना करना अनुचित है। प्रश्न—यदि मण्यभावविशिष्टवन्हि—अथवा स्वतंत्र मण्यभाव दाह के प्रति कारण है तो चन्द्रकान्त सूर्यकान्त (उत्तेजक) तथा वन्हि तीनों मोजूद हैं वहाँ दाह कैसे हुआ—(वहाँ न तो मण्यभाव विशिष्ट वन्हि है क्योंकि मणिविशिष्ट ही वन्हि है, और न स्वतंत्र मण्यभाव ही है—क्योंकि वहाँ मणि ही है)। यही कहा है "न चोत्तेजके सति" इत्यादि।

उक्तसिद्धान्तानादरे तु सादृश्यस्य षड्भावानन्तर्भावश्चेत्थम्-सादृश्यं न द्रव्यगुणकर्मात्मकं गुणवृत्तित्वात्। अत एव न विशेषसमवायात्मकमित्यपि द्रष्टव्यम्। नापि सामान्यात्मकं प्रत्याश्रयभिन्नत्वाद्, अन्यथा सुसदृशमन्दसदृशव्यवहारानुपपत्तेः। एवं सप्रतियोगिकत्वादित्यपि हेतुर्बोध्यः। इदमनेन सदृशमिति सादृश्यानुभवात्प्रतियोगिज्ञानं विना सादृश्याऽज्ञानात्, प्रतियोगिज्ञानस्य तद्धीहेतुत्वान्निष्प्रतियोगिकसामान्यं न सादृश्यमिति भावः।

विशेष्यासिद्धिं निरस्यति **नापीति**। **अभावे इति**। अभावत्वशून्यमित्यर्थः। **सत्त्वेन प्रतीयमानत्वादिति**। भावत्वेन प्रमीयमानत्वादित्यर्थः। तथा च सादृश्यं अभावत्वशून्यं भावत्वेन प्रमीयमानत्वादिति फलितम्।

यद्यपि मणिसमवधानकाले दाहजनकवह्नेरेव नाशाभ्युपगमान्न दाहोत्पादः अतिरिक्तशक्तिकल्पनातः क्लृप्ते तत्कल्पनाया एव न्याय्यत्वादिति न्यायेन सुकरमेव समाधानं तथापि वस्तुतो नाशकल्पनागौरवेण तदपहाय निष्कृष्टं समाधानमाह

मण्यभावविशिष्टवन्ह्यादेरिति । अस्य दाहादिकं प्रति हेतुत्वं कल्प्यते इत्यन्वयः। तथाच दाहं प्रति मण्यभावविशिष्टवह्नेर्हेतुत्वस्वीकारेणैव मण्यादिसमवधाने दाहापत्तिवारणेऽलं शक्तिस्वीकारेणेति भावः। ननु विशेष्यविशेषणभावे कामचाराद्दाहं प्रति मण्याद्यभावविशिष्टवन्हित्वेन वह्निविशिष्टमण्याद्यभावत्वेन वा विनिगमनाविरहाद् गुरुतरकार्यकारणभावद्वयकल्पनापत्तिभिया वन्हेः शक्तिमत्वेन हेतुत्वमेवोचितमित्यत आह **स्वातन्त्र्येणेति** । वह्नेः कारणतावच्छेदककोटावनिवेशेनेत्यर्थः। **मण्यभावादेरेवेति** । एवकारेण वन्हेः कारणतावच्छेदककोटौ निवेशविशिष्टव्यावृत्तिः। आदिना मन्त्राभावौषध्यभावयोः परिग्रहः। **हेतुत्वं कल्प्यते इति** । तथा च स्वरूपसंबन्धेन दाहं प्रति स्वरूपसंबन्धेन मण्यभावस्य[1] कारणत्वम् । अयं च कार्यकारणभावस्तवापि आवश्यक इति भावः। तथा च प्रतिबन्धकत्वं न कार्यानुकूलधर्मविघटकत्वं, बाधसत्प्रतिपक्षनिश्चयस्य प्रतिबन्धकत्वानुपपत्तेः, किन्तु कारणीभूताभावप्रतियोगित्वं; तच्च मण्यभावस्य हेतुत्वे एवोपपद्यते इति भावः। यत्तु मण्यादिना दाहविरोध्यदृष्टं जायते इत्युक्तम् । तन्न । मानाभावात् । अविहितक्रियातोऽदृष्टायोगाच्च ।

ननु वन्हेः मण्यभावादीनां च हेतुत्वापेक्षया एकस्य वह्नेः शक्तिमत्त्वेन हेतुत्वमेवोचितमित्यत आह **अनेनैवेति** । दाहादिकं प्रति मण्यभावादेर्हेतुत्वेनैवे-

१ अथ मण्यभावस्य केन रूपेण कारणत्वत्! न तावत्प्रतिबन्धकाभावत्वेन, अन्योन्याश्रयप्रसंगात् । तथाहि—प्रतिबन्धकत्वं हि कारणीभूताभावप्रतियोगित्वं, तच्च कारणत्वग्रहाधीनग्रहम् , कारणत्वं च तद्ग्रहाधीनग्रहमिति । नापि मण्याद्यभावत्वेन, मणिसमवधानेपि तदन्योन्याभावरूपाऽभावमादाय दाहप्रसंगात् । नापि मणिप्रागभावत्वेन, उत्पन्नविनष्टे मणौ दाहानुत्पादप्रसंगात्। नापि तद्ध्वंसत्वेन, अनुत्पन्ने मणौ दाहानुत्पादप्रसंगात् । नापि मण्यत्यन्ताभावत्वेन, उत्पन्नध्वस्ते मणौ दाहानुत्पादप्रसंगात् , अत्यन्ताभावस्य तदाऽभावात् । नापि मण्यादिसंसर्गाभावत्वेन, अन्योन्याभावातिरिक्तस्य संसर्गाभावस्य वक्तुमशक्यत्वात् , तथाहि—संसर्गाभावत्वं संसर्गप्रतियोगिकाभावत्वं तादात्म्यातिरिक्तप्रतियोगिकाभावत्वं वा ! नाद्यः, संसर्गान्योन्याभावेऽतिप्रसंगात् । न द्वितीयः, तादात्म्यात्यन्ताभावेऽप्रसंगात् इति चेन्न । मणिसंसर्गाभावत्वेनैव कारणत्वात् । न चान्योन्याभावसंसर्गाभावयोरभेदः । आपाततः संसर्गावच्छिन्नप्रतियोगिताकाभावप्रतियोग्यवृत्तिसदातनाभावत्वयोर्व्यावर्त्तकयोर्विद्यमानत्वात् । न च संसर्गावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावविशेषेऽतिप्रसक्तम् , तथाहि—गृहधृतबहुघटमध्यादेकस्मिन् बहिरानीते घटे अधुना गृहसंसर्गिघटभिन्नोयं घट इति व्यवहारोऽस्ति। न चैतद्घटवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकं घटत्वं, घटत्वस्य तत्राप्यनुयोगिनि वृत्तेः, तस्मादवश्यं संसर्गस्तदन्योन्याभावस्य प्रतियोगितावच्छेदक इति स्वीकर्त्तव्यमिति वाच्यम् । स्वप्रतियोगितावच्छेदकसंबन्धेन प्रतियोग्याधेयजन्यप्रतीतिविषयाभावस्य संसर्गाभावत्वादित्यन्यत्र विस्तरः ।

उत्तेजकाभावविशिष्टमण्यभावस्य कारणत्वात् ।

उत्तर—(उत्तेजक (सूर्यकान्त) मणि के अभाव से विशिष्ट जो चन्द्रकान्त मणि वह दाह के प्रति प्रतिबन्धक है और उसका अभाव (उत्तेजका भावविशिष्ट मण्यभाव) कारण है—यही मूल में कहा है "उत्तेजकाभावविशिष्ट" इत्यादि। (तीन स्थल में दाह होता है—जहाँ केवल वन्हि है, १ जहाँ सूर्यकान्त-चन्द्रकान्त-वन्हि—ये तीनों हैं २। एवं जहाँ उत्तेजक तथा वन्हि है ३। प्रथम- स्थल में विशेष्याभावप्रयुक्तविशिष्टाभाव है। क्योंकि वहाँ उत्तेजक तो है नहीं अतः विशेष्याभाव प्रयुक्त विशिष्टाभाव है। द्वितीयस्थल में—विमेषणाभावप्रयुक्त विशिष्टाभाव है—क्योंकि वहाँ उत्तेजक मणि है अतः "उत्तेजकाभाव" रूप विशेषण नहीं है—उत्तेजकाभाव विशिष्ट मण्यभावरूप कारण विशेषणाभाव प्रयुक्त होकर बैठा है—इसलिये वहाँ भी दाह होता है। तृतीयस्थल में—उभयाभावप्रयुक्त विशिष्टाभाव है, क्योंकि वहाँ उत्तेजकाभाव रूप विशेषण भी नहीं है उत्तेजक ही है, और न विशेष्य जो चन्द्रकान्त मणि वही है—अतः घिशेषण-विशेष्य उभय का अभाव है। इस प्रकार विशिष्टाभाव तीन प्रकार का है)

त्यर्थः। **सामंजस्ये इति।** मण्यादिसमवधानकाले दाहाद्यापत्तिवारणे इत्यर्थः। न च कारणत्वस्य भावधर्मतयाऽभावो न हेतुः। तथासति तुल्यन्यायेन कार्यस्यापि भावतया नाशः कार्यो न स्यात्। ननु मणेर्दाहप्रतिबन्धकत्वव्यवहारान्यथानुपपत्त्यैव शक्तिः सिद्ध्यति, कार्यानुकूलधर्मविघटकत्वस्यैव प्रतिबन्धकत्वपदार्थत्वात्। साध्यसंसृष्टत्वज्ञानमनुमितिकारणं तद्विरोधितयैव बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमिति तयोरपि कार्यानुकूलधर्मविघटकतायाः सुवचत्वादिति चेत्।

शक्तिं प्रति किं कारणम्! यदि वह्निः तर्हि मणिसमवहितेन वह्निना कुतो नोत्पद्यते। मणिना प्रतिबन्धादिति चेत्, मणिः शक्तिनाशकः शक्तिप्रतिबन्धको वा! आद्ये पूर्वशक्तेर्मणिना नाशेपि शक्त्यन्तरोत्पत्तिर्दुर्वारा। अथ शक्त्यन्तरं नाशकसमवधानान्नश्यतीति चेद्, नश्यतां तृतीयक्षणे, द्वितीयक्षणे च दाहः केन वारणीयः। द्वितीये च मणेः शक्तिप्रतिबन्धकत्वं यदि शक्त्यनुकूलधर्मविघटकत्वं तदा कोऽसौ शक्त्यनुकूलधर्मः? वह्निनिष्ठशक्त्यन्तरमिति चेत्, तदेव कुतो न। तदानीं मणिना नाशादिति चेत्, नश्यतात्पूर्वं अन्यदुत्पद्यताम्। तत्रापि मणिः प्रतिबन्धक इति चेत्तदपि प्रतिबन्धकत्वं यदि निरुक्तं तदा कोसौ शक्त्यनुकूलधर्म इति रीत्याऽनवस्थां मनसि निधायाह **अनन्तशक्तीति। तत्प्रागभावेति।** शक्तिप्रागभावेत्यर्थः। प्रागभावानंगीकारेऽप्याह **ध्वंसेति।** शक्तिध्वंसेत्यर्थः। न च शक्तिर्नित्या मण्यादिसमवधाने उत्तेजकमण्याद्युत्सारणेन वा तस्याः कुब्जता जायते उत्तेजकेन सा नाश्यते इति वाच्यम्। एवमप्यतिरिक्तकुब्जतातद्ध्वंसादिकल्पनागौरवानपायात्। न च फलमुखगौरवं न दोषः।

कथं दाह इति। तत्र मण्यभावरूपकारणविरहादिति शेषः। **उत्तेजकाभावविशिष्टेति।** तथा च केवलं मणिर्न प्रतिबन्धकः किन्तु उत्तेजकाभावविशिष्टः

सः, तदभावश्चोत्तेजककसमवधानेपि तिष्ठतीति भावः। एवं चोत्तजकाभावविशिष्टो यो मणिस्तदभावः कारणम्। उत्तेजकत्वं 'च' प्रतिबन्धकसत्त्वे कार्यजनकत्वम्। प्रतिबन्धकतावच्छेदकीभूताभावप्रतियोगित्वमिति यावत्। अत्रेदं बोध्यम्—विशिष्टाभावः विशेषणाभावप्रयुक्तः, विशेष्याभावप्रयुक्तः—उभयाभावप्रयुक्तश्च। तथाच यत्रोत्तेजकप्रतिबन्धकयोर्द्वयोः समवधानम्, तत्र विशेषणाभावप्रयुक्तो विशिष्टाभावः। यत्र द्वयोरसमवधानं तत्र विशेष्याभावप्रयुक्तो विशिष्टाभावः, यत्र केवलमुत्तेजकं तत्रोभयाभावप्रयुक्तो विशिष्टाभावः। यत्र केवलं मणिः (प्रतिबन्धकः) तत्र 'न' विशिष्टाभावरूपं कारणम्, विशेषणविशेष्योभयस्यैव सत्त्वादिति ध्येयम्।

अथ मण्युत्तेजकाभावयोर्विशेष्यविशेषणभावे कामचार इति चेत्। तवापि शक्तिहेतुत्वेऽस्य दुर्वारत्वात्। न च मण्युत्तरदाहे उत्तेजकस्य, मण्यनुत्तरदाहे मण्यभावस्य हेतुत्वम्, कार्यकारणभावद्वयेपि अवच्छेदकलाघवादिति वाच्यम्। उत्तेजकस्याननुगतत्वात्, उत्तेजकाभावकूटस्य चाऽननुगमात्।

ननु मणिसमवधानदशायां वन्ह्यादिघटितसामान्यसामग्रीवशेन उत्तेजकाभावेऽपि दाहत्वरूपसामान्यधर्मावच्छिन्नापत्तिः। न च विशेषसामग्रीसमवहिताया एव सामान्यसामग्र्याः फलोपधायकत्वात्तावदुत्तेजकान्यतमरूपविशेषसामग्र्यभावे सामान्यसामग्र्या न फलापत्तिरिति वाच्यम्। मण्याद्यसमवधानदशायां उत्तेजकविरहेऽपि वन्ह्यादिघटितसामान्यसामग्र्याः फलोपधानेन तेषां विशेषसामग्रीत्वासंभवादिति चेन्न।

मण्यभावविशिष्टदाहं प्रति मण्यभावत्वेन कारणत्वान्तरं कल्पयित्वा वन्ह्यादिघटितसामान्यसामाग्र्या फलजनने मण्यभावतत्तदुत्तेजकान्यतमस्य विशेषसामग्रीत्वकल्पनया दोषविरहात्।

अत्र च स्वरूपसंबन्धेन दाहं प्रति उद्देश्यतादैशिकविशेषणतान्यतरसंबन्धावच्छिन्नप्रतियोगिताकानां तत्तदुत्तेजकाभावानां सामानाधिकरण्यरूपं यद्वैशिष्ट्यं तदवच्छिन्नस्य मण्यादेस्तादृशान्यतरसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य स्वरूपसंबन्धेन हेतुत्वमिति कार्यकारणभावो बोध्यः।

ननु दाहानुकूलशक्त्यस्वीकारेऽपि साहजिकशक्तिसिद्धिर्दुर्वारा। तथाहि तृणारणिमणितो वह्न्युत्पत्त्या तत्र च तृणत्वादिना हेतुत्वे व्यभिचारात्, वह्निजनकतावच्छेदकतया तृणारणिमणिसाधारणी सा अवश्यं स्वीकार्या, एतदतिरिक्तस्य जनकतावच्छेदकस्य दुर्लभत्वात्, त्रितयसाधारणशक्तिमत्त्वेन हेतुत्वमिति तत्सिद्धिरिति चेत्। न, तृणादिजन्यवह्नौ वैजात्यानुभवेन विजातीयवह्नित्वस्यैव तृणादिजन्यतावच्छेदकतया विजातीयवह्नित्वावच्छिन्नं प्रति तृणत्वेन हेतुत्वोपगमान्न व्यभिचारः। तृणत्वादेरेव जनकतावच्छेदकत्वोपगमान्न शक्तिसिद्धिः। एवमरणिमण्यादीनामपि। तृणजन्यतावच्छेदकवैजात्यावच्छिन्नं प्रति तृणफूत्कारयोः, अरणिजन्यतावच्छेदकवैजात्यावच्छिन्नं प्रति अरणिनिर्मन्थनयोः मणिजन्यतावच्छेदकवैजात्यावच्छिन्नं प्रति मणिकिरणयोगयोर्हेतुत्वात्, अन्यथा तृणनिर्मन्थनाभ्यां-अरणिफूत्काराभ्यां-मणिनिर्मन्थनाभ्यामपि तदुत्पत्त्यापत्तिः।

सादृश्यमपि न पदार्थान्तरम्, किन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। यथा चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यमिति।

इसी प्रकार सादृश्य भी अतिरिक्त पदार्थ नहीं है अपितु किसी पदार्थ से भिन्न भी हो तथा उस पदार्थ के बहुत से धर्म उसमें पाये जावें तो उसे ही सादृश्य कहते हैं। जैसे "चन्द्रवन्मुखम्" यहाँ पर मुख चन्द्र से भिन्न है और चन्द्रगत आल्हादकत्व आदि धर्म मुख में विद्यमान है यही मुख में चन्द्र का सादृश्य है।

अथ यदि तृणादिजन्यतावच्छेदकं वैजात्यमानुभविकं तदा एवं स्यात्। न च तदनभ्युपगमे फूत्कारादिजन्यतावच्छेदकानुपपत्तिः, फूत्कारादिजन्यतावच्छेदकवैजात्यत्रयाभ्युपगमात्। न च तादृशवैजात्यानामेव तृणादिजन्यतावच्छेदकत्वात्तद्सिद्धिः, तत्तद्वैजात्यावच्छिन्नकार्यतानिरूपिततत्तत्कारणतात्रयकल्पनामपेक्ष्य वह्नित्वावच्छिन्ने प्रत्येकशक्तिमत्त्वेन हेतुत्वकल्पनाया न्याय्यत्वात्। न च तृणनिर्मन्थनाभ्यां वह्न्युत्पादप्रसङ्गः, तद्वैजात्यावच्छिन्नजनकतावच्छेदकवैजात्याभ्युपगमेन तृणनिर्मन्थने तादृशवैजात्याभावात्। न च तृणादिजन्यतावच्छेदकं वैजात्यत्रयं, फूत्कारादीनां चैकशक्तिमत्त्वेन वह्नित्वावच्छिन्ने हेतुत्वमिति वैपरीत्यं किन्न स्यात्, तृणनिर्मन्थनादौ च शक्त्यभावेनाऽदोषादिति वाच्यम्। उभथापि अस्य शक्तिसिद्धावुपायत्वादिति चेन्न।

लाघवेन तृणफूत्कारसमवधानस्यैव विजातीयवह्नित्वावच्छिन्नं प्रति हेतुत्वाभ्युपगमेन क्षत्यभावात्। एवमरणिनिर्मन्थनस्य मणिरविकिरणयोगस्य च तत्तद्वैजात्यावच्छिन्नं प्रति हेतुत्वसंभवात्। न च तृणादेरहेतुत्वे प्रवृत्त्यनुपपत्तिः, प्रयोजकतयापि तदुपपत्तेः। यद्यपि तृणफूत्कारअरणिनिर्मन्थनमणिरविकरणसंयोगानामेकशक्तिमत्त्वेन हेतुत्वे एव लाघवम्, न्यायनये च वैजात्यत्रयं कल्पयित्वा कार्यकारणभावत्रयकल्पनायां गौरवात्, तथापि तृणफूत्कारसंयोग-अरणिनिर्मन्थनसंयोग-मणिरविकिरणसंयोगानामन्यतमत्वेन हेतुत्वेनैव व्यभिचारवारणाच्छक्तौ प्रमाणाभावादिति संक्षेपः।

यदाशंकितं सादृश्यमप्यतिरिक्तः पदार्थ इति तदपि निराकरोति **सादृश्यमपीति। न पदार्थान्तरमिति।** क्लृप्तपदार्थान्तर्गतमित्यर्थः। एतच्च सादृश्यस्याऽतिरिक्ततामतेपि तद्व्यञ्जकतयाऽभ्युपगन्तव्यम्, एवं चेदमेव सादृश्यप्रतीतिविषयो भवत्विति भावः। तद्गताऽऽल्हादिमत्त्वस्य तद्वृत्तित्वात्स्वस्मिन् स्वसादृश्यवारणाय सत्यन्तम्। **तद्गतेति।** भूयःपदं क्वाचित्कम्, तद्गतासाधारणधर्मपरम्। वस्तुतस्तु आलंकारिकचमत्कृतिविषयतावच्छेदकधर्मवद्भेदसमानाधिकरणोक्तविषयतावच्छेदकधर्म (साजातीयधर्म) शालित्वम्। सा च प्रकारता विशेष्यता वेत्यन्यदेतत्। न च धर्मयोरेकप्रतीतिविषयताभावान्तरत्वात् शशी आल्हादकः—मुखमाल्हादकमि-

क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः।
द्रव्याणि

द्रव्याणि विभजते क्षित्यबित्यादि। क्षितिः—पृथ्वी, आपो जलानि, तेजो वह्निः, मरुद्वायुः, व्योम आकाशः, कालः समयः, दिग् आशा, देही आत्मा, मनः एतानि नव द्रव्याणीत्यर्थः।

द्रव्यों का विभाग करते हैं—

पृथ्वी-जल-तेज-वायु-आकाश-काल-दिक्-आत्मा-मन-ये नव द्रव्य हैं।

तिसमूहालंबनप्रतीतिविषयतया तदुपपत्तेः। एतेनाऽसाधारणत्वं तदितरावृत्तित्वे सति तद्वृत्तित्वरूपं तद्व्यक्तिमात्रवृत्तिधर्मस्यैव तादृशतया मुखे तथात्वानापत्तेः। तद्व्यक्तिवृत्तिमेयत्वादिकमादायातिप्रसंगाच्च। न च मेयत्वादेरव्यतिरेकितया तद्व्यक्तिवृत्तिव्यतिरेकिधर्मत्वं तत्त्वमिति वाच्यम्। तद्वृत्तिद्रव्यत्वादिमति घटादौ अतिप्रसंगादिति निरस्तम्।

अथ "उपमानोपमेयत्वं यदैकस्यैव वस्तुतः। इन्दुरिन्दुरिव श्रीमानित्यत्र तदनन्वयः॥" इत्यादौ, "उपमानोपमेयत्वे एकस्यैवैकवाक्यगे। अनन्वय" इत्यत्र, "न केवलं भाति नितान्तकीर्तिर्नितंबिनी सैव नितंबिनी" वेत्यादौ अनन्वयालंकारस्थले एकस्यैव वस्तुन उपमानोपमेयत्वदर्शनात्, तस्य च सादृश्यघटिततया तल्लक्षणाव्याप्तिः, स्वभेदस्य स्वाऽवृत्तित्वादिति चेन्न।

अनन्वयालंकारस्थले निरुपमत्वस्य कवितात्पर्यविषयत्वात्। एकस्यैवेत्युपमाव्यवच्छेदायेति ध्येयम्

केचित्तु एकस्यैवेत्यनेन भिन्नशब्दबोध्यत्वाव्यवच्छेदो बोध्यते। मुखमिवास्याः वक्त्रमित्यादौ नानन्वयः, किन्तूपमैवेत्याहुः।

तन्न। एकस्यैवार्थस्य शब्दभेदेनाऽपाततो भेदः प्रतीयते नतु वस्तुभेद इति तदन्वय एव। अनुयोगितासंबन्धेन तद्गतधर्मवत्त्वविवक्षणे नोपादेयमेव सत्यन्तदलम्। स च धर्मः क्वचिज्जातिरूपः क्वचिदुपाधिरूप इत्यवधेयम्।

मूले क्षितिश्चापश्च तेजश्च मरुच्च व्योम च कालश्च दिक् च देही चेति द्वन्द्वः समासः, सर्वेषां प्राधान्यात्। तथाच द्रव्याणीत्यस्यैकवचनान्तत्वेन विपरिणमय्य क्षितिर्द्रव्यं, आपो द्रव्यं, तेजो द्रव्यं, मरुद् द्रव्यं, व्योम द्रव्यं, कालो द्रव्यं, दिग्द्रव्यं, देही द्रव्यं, मनो द्रव्यमिति विपरिणतेनाऽन्वयः। **द्रव्याणि विभजते इति**। द्रव्याणीत्यत्र द्वितीयार्थो विषयित्वम्, तस्य धात्वर्थैकदेशे ज्ञानेऽन्वयः। तद्धर्मावान्तरधर्मप्रकारकज्ञानानुकुलव्यापारो विपूर्वकभजधात्वर्थः। तद्धर्मपदेन विभाज्यतावच्छेदकीभूतद्रव्यत्वस्य ग्रहणम्। तथा च द्रव्यत्वावान्तरधर्मप्रकारकज्ञानानुकूलव्यापारानुकूलकृतिमान्मूलकार इति बोधः। धर्मे तद्धर्मावान्तरत्वं च तद्धर्मसाक्षाद्व्याप्यत्वम् इदमेव तद्धर्मविभाजकत्वमित्युच्यते। तद्धर्मसाक्षाद्व्याप्यत्वं च तद्धर्मव्याप्यत्वे सति तद्धर्म-

व्याप्याप्याप्यत्वम् । द्रव्यत्वप्रमेयत्वादेर्द्रव्यत्वविभाजकत्ववारणाय सत्यन्तम् । घटत्वादेस्तथात्ववारणाय विशेष्यदलम् । विशेष्यदलघटकीभूते तद्धर्मव्याप्ये पृथ्वीत्वविशिष्टान्यत्वं निवेशनीयम् । वै० पूर्ववत् । तेन पृथिवीजलान्यतरत्वमादाय न पृथिवीत्वस्य विभाजकत्वानुपपत्तिः । अन्यत्सर्वं पूर्ववत् । तथा च द्रव्यत्वविशिष्ट-"पृथिवीत्वादि" धर्मप्रकारकज्ञानानुकूलो व्यापारो विपूर्वकभजधात्वर्थः । धर्मे द्रव्यत्ववै० स्वव्याप्यत्व-स्वविशिष्टाऽव्याप्यत्वोभयसं०, स्ववै० स्वव्याप्यत्व-स्वकालीनपृथिवीत्व-विशिष्टान्यत्वोभयसं० । वै०स्वाश्रयवृत्तित्व-स्वानाश्रयवृत्तित्वोभयसं० ।

अथ द्रव्यसामान्यलक्षणमनुक्त्वा विभागकरणमनुचितं, सामान्यधर्मप्रकारक-ज्ञानस्य विशेषधर्मप्रकारकजिज्ञासां प्रति हेतुतया लक्षणात्मकसामान्यधर्मप्रकारक-ज्ञानाभावेन कियन्ति द्रव्याणीति जिज्ञासानुत्पत्तेरिति चेत् ।

सत्यम्, गुणवत्त्वं कर्मवत्त्वं वा द्रव्यसामान्यलक्षणमिति गृहाण । अत एव वक्ष्यति क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगितेति । अधिकं तत्रैव ।

क्षितिशब्दस्य क्षयवाचकत्वादाह **क्षितिः पृथिवीति** । अप्शब्दस्य देवतापर-त्वादाह **आपो जलानीति** । तेजःशब्दस्य रूपविशेषपरत्वादाह **तेजो वह्निरिति** । मरुच्छब्दस्य देवतापरत्वादाह **मरुद्वायुरिति** । व्योमशब्दस्य ब्रह्मपरत्वादाह **व्योम आकाश इति** । यमस्यापि कालशब्दवाच्यत्वादाह **कालः समय इति** । ईषत्समाप्तावपि दिक्शब्दस्य प्रयोगादाह **दिग्दिशेति** । देहिन्शब्दो देहावच्छिन्न-परो लोके दृष्टः, तथाचेश्वरपरिग्रहो न स्यादत आह **देही आत्मेति** । तथाचा-त्मत्वं द्रव्यविभाजकं न तु देहित्वमन्यथा नवत्वव्याघातापातादिति भावः । मनःशब्द-स्यान्यार्थपरत्वाभावात्तत्पर्यायो न दर्शितः । **एतानि नव द्रव्याणीति**[१] । न न्यूनानि नाप्यधिकानीति भावः । मूले **द्रव्यं गुणस्तथाकर्मेत्यत्र** द्रव्यमित्यस्य द्रव्यत्वजा-तिमदित्यर्थः । तदुत्तरसुबर्थैकत्वस्य द्रव्यत्वे एवान्वयः । द्रव्याणामनेकत्वेन तत्रै-कत्वान्वयायोगात् । तत्राशंकते **नन्विति** । **द्रव्यत्वजातौ किंमानमिति** । ननु द्रव्यं द्रव्यमित्यनुगतप्रतीतिरेव द्रव्यत्वसाधिकेत्यत आह **नहीति** । तत्र= द्रव्यत्वजातौ । **प्रत्यक्षं प्रमाणमिति** । इदं द्रव्यमित्याकारप्रत्यक्षप्रमाणमित्यर्थः । **घृतजतुप्रभृतिष्विति** । प्रभृत्यन्तं हिरण्यभिन्नमात्रोपलक्षकम् । **द्रव्यत्वाग्रहादिति** । तथाच पामराणां हिरण्यभिन्ने द्रव्यत्वप्रकारकज्ञानाभावेन प्रत्युत हिरण्यादिष्वेव लोकानां द्रव्यत्वप्रतीत्या नवद्रव्येषु नोक्तप्रतीत्या द्रव्यत्वजातिसिद्धिरिति भावः ।

---

१ अत्रापि पूर्ववद् द्रव्यत्वविशेष्यकक्षित्याद्यन्यतमत्वनिरूपितव्याप्तिनिश्चयार्थकं नवग्रहणमिति ध्येयम् ।

ननु द्रव्यत्वजातौ किं मानम्, नहि तत्र प्रत्यक्षं प्रमाणं, घृतजतु-प्रभृतिषु द्रव्यत्वाऽग्रहादिति चेन्न। कार्यसमवायिकारणव्यवच्छेदकतया संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धेः।

प्रश्न द्रव्यत्वजाति में प्रत्यक्ष प्रमाण तों है नहीं। क्यों कि घृत और जतु (लाख) आदि द्रव्यों में साधारण व्यक्तियों को यह द्रव्य है ऐसा ज्ञान नहीं होता है। (क्योंकि लोग प्रायः द्रव्य कहते रुपया पैसा ही अधिकतर समझते हैं) वही मूल में कहा है कि "घृतजतुप्रभृतिषु द्रव्यत्वाग्रहात्" इत्यादि।

अब द्रव्यत्व जाति की सिद्धि करते हैं-"कार्यसमवायिकारणतावच्छेदकतया" इत्यादि ग्रन्थ से संसार में कोई किसी का कार्य है, कोई किसी का कारण है—इस प्रकार संसार में दो पदार्थ हैं—कार्य और कारण। उसमें कार्य में कार्यता धर्म रहता है—कारण में कारणता धर्म रहता है—इनमें प्रत्येक के दो दो अवच्छेदक होते हैं-"सम्बन्धो धर्मश्च" सम्बन्ध और धर्म। अर्थात् कार्यता के भी दो अवच्छेदक होते हैं सम्बन्ध और धर्म, कारणता के भी दो अवच्छेदक हैं सम्बन्ध और धर्म। अब प्रश्न यह है कि कार्यता का अवच्छेदक सम्बन्ध कौन, एवं कार्यता का अवच्छेदक धर्म कौन। कार्य अपने कारण में जिस सम्बन्ध से हो वह कार्यतावच्छेदक सम्बन्ध कहलाता है। एवं कार्य में रहनेवाला धर्म कार्यतावच्छेदक धर्म कहलाता है। और यह नियम है कि "यो यस्या अवच्छेदको भवति सा तदवच्छिन्ना भवति" अर्थात् जो जिसका अवच्छेदक होता है वह उससे अवच्छिन्न होता है। पृथिवी-जल-आदि अवयवी द्रव्य रूप कार्य (घट-पट आदि) अपने कारण (अवयवद्रव्य) में समवाय सम्बन्ध से उत्पन्न होकर रहते हैं। अतः अवयवीद्रव्यनिष्ठ कार्यता का अवच्छेदक सम्बन्ध-समवायसम्बन्ध है इसलिये वह कार्यता समवायसम्बन्धावच्छिन्ना हो गई। एवं पृथिव्यादि कार्य द्रव्य में कार्यत्व धर्म रहता है इसलिये वह कार्यत्व धर्म पृथिव्यादि-कार्य द्रव्यनिष्ठ कार्यता का अवच्छेदक हो गया अतः वह कार्यता कार्यत्व से अवच्छिन्ना हो गयी। और यह नियम है कि समवायसम्बन्ध से कार्य के प्रति तादात्म्यसम्बन्ध से द्रव्य कारण होता है, क्योंकि समवाय सम्बन्ध से कार्यमात्र द्रव्य ही में रहता है। अतः द्रव्यनिष्ठ कारणता का अवच्छेदक सम्बन्ध तादात्म्य ही हो गया तथा द्रव्यनिष्ठ कारणता तादात्म्य सम्बन्धावच्छिन्ना हो गयी। और कार्यता-कारणता का परस्पर निरूप्यनिरूपकभाव देखा जाता है—कहीं कार्यता से निरूपित कारणता होती है कहीं कारणता से निरूपित कार्यता होती है। अब यह अनुमान द्रव्यत्व जाति का साधक हो गया कि "समवायसम्बन्धावच्छिन्ना कार्यत्वावच्छिन्ना या अवयविद्रव्यनिष्ठा कार्यता तादृशकार्यतानिरूपिता या तादात्म्यसम्बन्धावच्छिन्ना द्रव्यनिष्ठा कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् घटनिष्ठकार्यतानिरूपितकपालनिष्ठकारणतावत्। अनुमान में सर्वत्र चार बातें होती हैं—पक्ष-साध्य हेतु-दृष्टान्त। यहाँ पक्ष द्रव्यनिष्ठकारणता है—उसमें किञ्चिद्धर्मावच्छिन्नत्व-साध्य है, कारणतात्व हेतु है। अब प्रकृत में पक्ष जो द्रव्यनिष्ठकारणता है उसी में किञ्चिद्धर्माव-च्छिन्नत्व सिद्ध कर रहे हैं तो द्रव्यनिष्ठा कारणता उसी धर्म से अवच्छिन्ना होगी जो उस कारणता का अवच्छेदक होगा तो द्रव्यनिष्ठ कारणता का अवच्छेदक द्रव्यत्व ही होगा। अतः द्रव्यनिष्ठा कारणता द्रव्यत्वावच्छिन्ना होगी सो द्रव्यनिष्ठकारणता यद्धर्मावाच्छिन्ना हो उसी धर्म का नाम

है द्रव्यत्व जाति। इस प्रकार इस अनुमान से द्रव्यत्व जाति की सिद्धि हो गयी। इस अनुमान में "कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताच्छेदकतया" द्रव्यत्व जाति की सिद्धि की है। परन्तु वह ठीक नहीं है, क्योंकि कार्यत्व को कार्यता का अवच्छेदक बना रक्खा—है स्वही को स्वयं का अवच्छेदक बना दिया। कार्यत्व और कार्यता एक ही वस्तु है। अतः आत्माश्रय हो गया। इस लिये मूल में "संयोगत्वस्य" कहा। "संयोगत्वस्य" इसका "समवायिकारणतावच्छेदकता" के साथ अन्वय है—अर्थात् संयोग का समवायिकारण हुवा द्रव्य-समवायिकारणतावच्छेदक हुवा द्रव्यत्व, वही द्रव्यत्व जाती है। यहाँ भी पूर्ववत् समझना कि—'संयोग' समवाय सम्बन्ध से द्रव्य में रहेगा-अतः संयोगनिष्ठा कार्यता समवायसम्बन्धावच्छिन्ना हुवी-और संयोगनिष्ठ कार्यता का अवच्छेदक संयोगत्व हुवा अतः तन्निष्ठा कार्यता संयोगत्वावच्छिन्ना हुवी। अब यह अनुमान द्रव्यत्व जाति साधक संपन्न हुवा कि समवायसम्बन्धावच्छिन्ना अथ च संयोगत्वावच्छिन्ना या संयोगनिष्ठा कार्यता तन्निरूपिता या तादात्म्यसम्बन्धावच्छिन्ना द्रव्यनिष्ठा कारणता सा किञ्चिद्धर्मावच्छिन्ना, हेतूदाहरण पूर्ववत्। सो द्रव्यनिष्टा कारणता द्रव्यत्वावच्छिन्ना ही होगी-इससे भी द्रव्यत्व जाति की सिद्धि हो गयी, क्योंकि द्रव्यनिष्ठा कारणता यद्धर्मावच्छिन्ना हो वही धर्म द्रव्यत्व जाती है। अब इस अनुमान में भी संयोगत्वावच्छिन्न कार्यता अप्रसिद्ध है—क्योंकि संयोगत्व यदि संयोगनिष्ठ कार्यता का अवच्छेदक हो तो संयोगनिष्ठा कार्यता संयोगत्वावच्छिन्ना हो सकती है, परन्तु संयोगत्व कार्यता का अवच्छेदक हो ही नहीं सकता, क्योंकि अन्यूनातिरिक्त वृत्तिधर्म ही अवच्छेदक होता है, सो संयोगत्व नित्यसंयोग (विभुद्वय संयोग, कालाकाश संयोग) में भी रहता है अतः कार्यता के अतिरिक्त वृत्ति है। इसलिये विभागपर्यन्तानुधावन किया, "विभागस्य वा" इति। इसका भी "समवायिकारणतावच्छेदकतया" इसी के साथ अन्वय है। विभाग सब अनित्य ही होते हैं—अतः विभागत्वावच्छिन्नकार्यतानिरूपितकारणता-द्रव्यनिष्ठा-कारणता वह कारणता किञ्चिद्धर्मावच्छिन्ना है, सों यहाँ किञ्चिद्धर्मपद से द्रव्यत्व ही लेना होगा, यही मूल में कहा है कि "विभागस्य वा कार्यसमवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धेः"। अर्थात् कार्यमात्र का समवायि कारण हुआ द्रव्य-समवायिकारणतावच्छेदक-द्रव्यत्व-वही-द्रव्यत्व जाति है। द्रव्य जब कि कार्यमात्र का समवायिकारण हुआ तो संयोग-विभाग-एवं जन्य द्रव्य-इनका भी समवायिकारण हुआ—समवायिकारणतावच्छेदक द्रव्यत्व वही द्रव्यत्वजाति है। इस प्रकार द्रव्यत्वजातिसिद्धि कर लेना चाहिये।

ननु घटप्रभृतिष्वित्येव कथं नोक्तमिति चेत्, सत्यम्, अनुगतप्रतीत्यभावे बीजसूचनाय घृताद्युपादानात्। तथाहि अनुगताकृतिव्यङ्ग्या हि जातिः, नहि द्रव्येषु अनुगताकृतिः काचित्संभवति घृतादिष्वेकैकपदार्थेष्वपि सर्वदा नैकाकृतिः, कठिनद्रवत्वयोरनियतत्वात्। यद्यपि द्रव्यशब्दोल्लेखित्वाभावेपि पृथिवीजलादिष्वनुगतो जातिविशेषः प्रत्यक्षसिद्ध एव, चक्षुःसंयुक्तसमवायसत्त्वात्। तथापि तस्य पृथिवीत्वादिना सांकर्यवारणाय परमाणुद्व्यणुकसाधारण्यस्वीकारेपि गगनादिसाधारण्यं न सिद्ध्येदिति सर्वद्रव्यसाधारणद्रव्यत्वजातिसिद्ध्यर्थमनुमानप्रमाणमाह **कार्यसमवायिकारणतावच्छेदकतयेति**। अस्य द्रव्यत्वजातिसिद्धेरित्यनेनाऽन्वयः। अत्रेदं बोध्यम्।

समवायसंबन्धेन कार्यं प्रति तादात्म्यसंबन्धेन द्रव्यं कारणम्[1]। अतो द्रव्यमेव समवायिकारणशब्देन व्यवह्रियते, तथाच समवायसंबन्धावच्छिन्नकार्यत्वावच्छिन्न-कार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्, या या कारणता सा सा किञ्चिद्धर्मावच्छिन्ना घटनिष्ठकार्यतानिरूपितकपालनिष्ठ-कारणतावत् इत्यनुमानेन द्रव्यनिष्ठकारणतायां किंचिद्धर्मावच्छिन्नत्वसिद्धौ तुल्य-वित्तिवेद्यतया तादृशकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धिः। अत्रायं भावः-कारणत्वं हि कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यसमानाधिकरणात्यन्ताभावप्रति-योगितानवच्छेदक "कारणतावच्छेदकीभूत" धर्मवत्त्वम्, न तु तादृशप्रतियोगितान-वच्छेदकधर्मवत्त्वमात्रम्, तादृशप्रतियोगितानवच्छेदकीभूतप्रमेयत्वसत्त्वादिधर्ममादा-याऽकारणेऽपि कारणत्वप्रसक्तेः। कारणतावच्छेदकश्च स एव धर्मो भवति यः कारण-ताऽन्यूनानतिरिक्तवृत्तिः, तादृशधर्मो द्रव्यत्वमेव तादृशकारणत्वाऽन्यूनवृत्तित्वे सति तादृशकारणताऽनतिरिक्तवृत्तित्वात्, न तु प्रमेयत्वसत्त्वादिकं द्रव्यनिष्ठतादृशकारण-तावच्छेदकं तादृशकारणतातिरिक्तवृत्तित्वात्, तादृशकारणत्वाभाववद्वृत्तित्वादिति यावत्। नापि पृथिवीत्वघटत्वादिकं तादृशकारणतान्यूनवृत्तित्वात्, तादृशकारणता-समानाधिकरणभेदप्रतियोगितावच्छेदकत्वादिति यावत्। न च कार्यसमवायिकारण-तावच्छेदकतया द्रव्यत्वसिद्धावपि तस्य जातित्वे किं मानमिति वाच्यम्। द्रव्यत्वं जातिः नित्यत्वे सति अनेकसमवेतत्वादित्यनुमानस्य प्रमाणत्वात्।

समवायसंबन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छि-न्नद्रव्यनिष्ठकारणता किंचिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानं फलितम्।

अथात्र द्रव्यत्वावच्छिन्नस्य कार्यतावच्छेदकं न कार्यत्वं तस्य प्रागभावप्रति-योगित्वरूपतया तस्य द्रव्यकार्यत्वाभाववति ध्वंसेऽतिप्रसक्तत्वात्। एवं च सम-

---

१ न चैतादृशकार्यकारणभावे मानाभावः। समवायेन पटरूपं प्रति स्वसमवायिसम-वेतत्वसंबन्धेन तन्तुरूपं कारणम्, स्वं-तन्तुरूपम्। एवं च तन्तुत्वे तदापत्त्या तादृशकार्यकारण-भावाभ्युपगमात्। तथा च नीलत्वव्यापकीभूतकार्यत्वावच्छिन्नजनकस्य द्रव्यस्य तादात्म्येन तन्तुत्वादौ विरहान्न तदापत्तिः। गुणादीनां तादात्म्येन प्रतिबन्धकत्वे तु महागौरवम्। न च तत्तद्व्यक्तिसमवेतजन्यत्वावच्छिन्नं प्रति तादात्म्येन तत्तद्व्यक्तित्वेन हेतुत्वाद्यावद्विशेषसामग्री-विरहादेव न तन्तुत्वादौ तदापत्तिरिति वाच्यम्। कार्यकारणभावानंत्यप्रसंगेन तादृशकल्पनायां प्रमाणाभावात्। न च द्रव्यत्वविशिष्टस्वाश्रयसमवेतत्वमेव नीलादीनां जनकतावच्छेदकः संबन्ध इति वाच्यम्। अस्यापि पक्षस्य द्रव्यत्वसिद्धावुपायत्वात्, द्रव्यत्वतथाविधसमवेत-त्वयोः कामचारेण कल्पनीयस्य कार्यकारणभावचतुष्कस्यापेक्षयाऽतिरिक्ततादृशकार्यकारणभा-वकल्पनाया एव युक्तत्वात्।

ननु जलादौ नीलाद्यापत्तिवारणाय नीलत्वावच्छिन्नं प्रति पृथिवीत्वादिना समवायि-कारणताया आवश्यकतया तत एव न नीलादौ नीलस्यापत्तिरिति चेन्न। गुणादौ समवाय-संबन्धेन कार्यत्वावच्छिन्नानुत्पादे कार्यत्वव्याप्यतत्तद्धर्मावच्छिन्नजनकसामग्र्यभावकूटस्य प्रयो-जकत्वकल्पनामपेक्ष्य कारणतावच्छेदकतया सिद्धद्रव्यत्वाभावस्य प्रयोजकत्वे लाघवात्।

वायसंबन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपितेत्यादिपक्षाप्रसिद्धिः। न च सत्त्वं कार्यतावच्छेदकम्। तस्य गगनादावतिप्रसक्तत्वादिति चेन्न।

जन्यसत्त्वस्यैव कार्यतावच्छेदकत्वात्। तथा च समवायसंबन्धावच्छिन्नजन्यसत्त्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नद्रव्यनिष्ठकारणता किंचिद्धर्मावच्छिन्ना कारणतात्वादित्युक्तौ न पक्षाप्रसिद्धिः।

द्रव्यत्वसाधनायानुमानान्तरमाह **संयोगस्येति**। समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धेरित्यनेनाऽन्वयः। तथा च समवायसंबन्धावच्छिन्नसंयोगत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नद्रव्यनिष्ठकारणता किंचिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानात्तत्सिद्धिर्बोध्या।

ननु समवायसंबन्धेन संयोगं प्रति तादात्म्येन द्रव्यं कारणमिति कार्यकारणभावः किमर्थः। न च गुणादौ तदापत्तिवारणाय स आवश्यक इति वाच्यम्। द्वे हि संयोगकारणे संयोगः कर्म च, तयोश्च कार्यतावच्छेदकं विजातीयसंयोगत्वम्, एवं च संयोगत्वव्याप्यजातिद्वयावच्छिन्नकारणक्रियासंयोगयोर्गुणादावभावादेव न संयोगापत्तिरिति व्यर्थोयं कार्यकारणभाव इति चेन्न। गुणादौ संयोगत्वावच्छिन्नानुत्पादे संयोगत्वव्याप्यतत्तद्धर्मावच्छिन्नजनकसामग्र्यभावकूटस्य प्रयोजकत्वे गौरवेण तदावश्यकत्वात्।

वस्तुतो जन्यसत्त्वेन द्रव्यत्वेन हेतुहेतुमद्भावानभ्युपगमे द्रव्ये समवायिकारणतानिर्वाहाय, भावे वा कार्यमात्रवृत्तिधर्मस्य कार्यतावच्छेदकतया संयोगत्वेन द्रव्यत्वेन हेतुहेतुमद्भावावश्यकत्वमिति द्रव्यत्वसिद्धिर्निष्प्रत्यूहैवेति विदाङ्कुर्वन्तु।

नचात्र स्वाश्रयाश्रयत्वरूपपरंपरासंबन्धेन गुणत्वस्यैव तादृशकारणतावच्छेदकत्वमस्तु इति वाच्यम्। साक्षात्संबद्धधर्मबाधे सत्येवानुमितेः परंपरासंबद्धधर्मविषयकत्वादिति ध्येयम्।

अत्र च रूपरसगन्धस्पर्शानां सकलद्रव्यावृत्तितया द्रव्यकार्यत्वेनाऽनुक्तिः। संख्यापरिमाणपृथक्त्वानां सकलद्रव्यवृत्तित्वेपि गगनादिवृत्तितया नित्यत्वात्। द्वित्वसमवायिकारणतावच्छेदकतया कुतो नोक्तमिति तु विभावनीयम्।

नित्यसंयोगाङ्गीकर्तृनये संयोगत्वस्य नित्यसंयोगसाधारणतया कार्यतानवच्छेदकत्वादाह **विभागस्य वेति**। तथाच समवायसंबन्धावच्छिन्नविभागत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नद्रव्यनिष्ठकारणता किंचिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानेन द्रव्यत्वजातिसिद्धिरिति भावः।

नन्वेवमपि सत्त्वमेव जनकतावच्छेदकमस्तु, द्रव्यत्वव्यापकत्वेऽपि क्लृप्तत्वादिति चेत्। सत्यम्। तथासति गुणादिर्न विभागसमवायिकारणमिति व्यवहारविलोपापत्तेः। न च तत्फलोपधायकत्वरूपसमवायिकारणत्वाभाव एव तद्विषयः। अजनितघटे दण्डे दण्डो न घटकारणमिति व्यवहारापत्तिरित्ति द्रष्टव्यम्।

अथैवमपि यत्र घटे विभागो नोत्पन्नस्तादृशघटे द्रव्यत्वं न सिद्ध्येत्, तत्र विभागसमवायिकारणतासत्त्वे प्रमाणाभावादिति चेन्न।

ननु दशमं द्रव्यं तमः कुतो नोक्तम्, तद्धि प्रत्यक्षेण गृह्यते, तस्य च रूपवत्त्वात्कर्मवत्वाच्च द्रव्यत्वम्। तद्धि गन्धशून्यत्वान्न पृथिवी, नीलरूपवत्त्वाच्च न जलादिकम्। तत्प्रत्यक्षे चाऽऽलोकनिरपेक्षं चक्षुः कारणमिति चेत्।

तमो-निरूपयति—तम को दशम द्रव्य मानने वाला मीमांसक आशंका करता है—कि "ननु दशमं द्रव्यमि"त्यादि। तम को दशम द्रव्य क्यों नहीं माना, क्योंकि तम का प्रत्यक्ष प्रमाण (इन्द्रियादि) से "नीलं तमश्चलति" इस रूप से ज्ञान होता है। सो इस प्रतीति के अनुसार तम रूप वाला होने से तथा कर्मवाला होने से तम को द्रव्यत्व सिद्ध है (क्योंकि "गुणक्रियावत्त्वम्" यही द्रव्यसामान्य का लक्षण है) (यदि कथित नव द्रव्यों ही में तम का अन्तर्भाव करें, सो ठीक नहीं क्योंकि) तम गन्ध शून्य है अतः पृथिवी में अन्तर्भाव नहीं कर सकते, तम नील रूपवाला होने से जल आदि पद से-तेज-वायु-आकाश-काल-दिक्-आत्मा मन इनमें भी अन्तर्भूत नहीं हो सकता—(क्योंकि इनमें नील रूप नहीं है। (तम के प्रत्यक्ष में एक विशेषता यह है कि) तम के प्रत्यक्ष में आलोक निरपेक्ष (प्रकाश रहित) चक्षु कारण है।.

समवायिकारणत्वस्य समवायसंबन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणत्वरूपस्य कारणताघटितत्वेन कारणतायाश्च कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपतया तादृशधर्मवत्त्वस्य घटे सत्त्वान्नानुपपत्तिरिति ध्येयम्।

दशमं द्रव्यमिति। पृथिव्यादिनवातिरिक्तत्व-द्रव्यत्वोभयवदित्यर्थः, अतो नाऽप्रसिद्धिः। प्रत्येकाधिकरणेषु प्रसिद्धयोर्द्वयोर्द्वित्वरूपेण निरधिकरणकप्रसिद्धिसत्त्वात्। नहि विधेयतावच्छेदकावच्छिन्नस्य साधिकरणकप्रसिद्धिरेवाङ्गमिति ध्येयम्। तमः=तमःपदवाच्यम्। तद्धि=तमःपदवाच्यं हि। तस्य च=तमःपदवाच्यस्य च। तथाच तमो द्रव्यं रूपवत्त्वादुकर्मवत्त्वाच्च घटवदिति प्रयोगः। अत्र द्रव्यत्वं पृथिव्याद्यन्यतमत्वव्याप्यं नवेति विप्रतिपत्तिर्बोध्या। नन्वस्तु तमो द्रव्यं, अस्तु तस्य क्लृप्तद्रव्येष्वन्तर्भाव इत्यत आह **तद्धीति**। तमःपदवाच्यमित्यर्थः। **गन्धशून्यत्वादिति**। प्रतियोगिव्यधिकरणगन्धाभावादित्यर्थः। **जलादिकमिति**। आदिना प्रत्येकमनुमानं द्रष्टव्यम्। ननु द्रव्यचाक्षुषे आलोकसंयोगस्य हेतुतया तद्विरहे कथं चाक्षुषम्। न च चक्षुर्गोलकान्तर्वर्तिइन्द्रियान्तरात्तद्ग्रह इति वाच्यम्। इन्द्रियान्तरकल्पने गौरवादित्यत आह **तत्प्रत्यक्षे इति**। तमःप्रत्यक्षे इत्यर्थः। इत्थं चोक्तयुक्त्या तस्य द्रव्यत्वे सिद्धेऽनायत्या तमोन्यद्रव्यचाक्षुषत्वं प्रति आलोकसंयोगस्य जन्यतावच्छेदकत्वम्, भवतापि तमसोऽभावरूपत्वे तमोन्याऽभावचाक्षुषत्वं तज्जन्यतावच्छेदकं वाच्यमिति साम्यमिति भावः। **आवश्यकेति**।

न, आवश्यकतेजोभावेनैवोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात्। रूपवत्ताप्रतीस्तु भ्रमरूपा, कर्मवत्ताप्रतीतिरपि आलोकापसारणौपाधिकी भ्रान्तिरेव। तमसोऽतिरिक्तद्रव्यत्वे अनन्तावयवादिकल्पनागौरवं च स्यात्। सुवर्णस्य यथा तेजस्यन्तर्भावस्तथा वक्ष्यते।

अथ गुणा रूपं रसो गन्धस्ततः परम् ॥३॥
स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परम्।
संयोगश्च विभागश्च परत्वं चापरत्वकम् ॥४॥
बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकम्।
द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥५॥

समाधान—आवश्यक (प्रौढ़ प्रकाशक) तेजःसामान्याभाव रूप अन्धकार को मानने से ही जब कि उपपत्ति (निर्वाह) हो जाता है तो द्रव्यान्तर कल्पना (अतिरिक्त द्रव्य की कल्पना करना) अन्याय्य है।

प्रश्न—तम यदि तेजोऽभाव है तो उसमें "नीलं तमश्चलति" यह रूपवत्ता प्रतीति क्यों होती है—अभाव तो नीरूप है। उत्तर—("नीलमाकाशम्" यह प्रतीति जैसे भ्रम है—क्योंकि आकाश सर्वथा रूपशून्य है—वैसे ही) नीलं तमश्चलति" यह रूपवत्ता प्रतीति भी भ्रम है। "चलति" यह कर्मवत्ताप्रतीति भी (जब कि मनुष्य-"लालटैन" रूप प्रकाश लेकर चलता है तो उस मनुष्य की अपसारण (क्रिया) लालटैन में आकर अन्धकार में भासित होने लगती है-कि तम चल रहा है-इत्यादि) इसलिये आलोकापसारण रूप उपाधि प्रयुक्त होने से भ्रान्ति ही है। और तम को यदि अतिरिक्त द्रव्य मानते हैं तो उसके अनन्त अवयव मानने पड़ेंगे-अर्थात् सावयव द्रव्य मानना होगा—अतः अनन्त अवयव कल्पन प्रयुक्त गौरव होगा—तदपेक्षया तेजोऽभाव ही तम है सो अभाव हमारे (नैयायिक के) यहां सप्तम पदार्थ है। अत तम का उसी में अन्तर्भाव है, तम अतिरिक्त द्रव्य नहीं है। सुवर्ण का जैसे तेज में अन्तर्भाव है वह अगाड़ी (तेजोनिरूपण में) बतलायेंगे।

अतिरिक्ततमोवादिनापि "इह तेजो नास्तीति" प्रतीतिविषयतया महत्त्वसमानाधिकरणोद्भूतानभिभूतरूपवन्महातेजस्त्वावच्छिन्नसामान्याभावोऽवश्यं स्वीकार्य इत्यर्थः। एवं चातिरिक्ततमोवादिमतेपि अभावचाक्षुषत्वरूपजन्यतावच्छेदककोटौ तादृशतेजस्त्वावच्छिन्नसामान्याभावभेदोऽवश्यं निवेशनीयः, एवं द्रव्यचाक्षुषत्वकोटावपीति विपरीतगौरवमिति भावः। न च तेजोभावस्तमः, तमोभावो वा तम इत्यत्र विनिगमनाविरह इति वाच्यम्। उष्णस्पर्शाश्रयतया तेजसो द्रव्यत्वसिद्धेः। तमोभावरूपत्वे च उष्णस्पर्शाश्रयत्वस्य तत्र बाधात्, एवं आलोकस्याऽन्धकाराभावरूपत्वे द्रव्यचाक्षुषं प्रति अन्धकाराभावसंबन्धस्य हेतुत्वे गौरवादित्यपि बोध्यम्। एतत्सूचनायाऽऽवश्यकपदमिति ध्येयम्। **तेजोभावेनैवेति**। उद्भूतानभिभूतरूपव-

न्महातेजःसामान्याभावेनैवेत्यर्थः। **चक्षुरूष्मादिवारणायोद्भूतेति**। सुवर्णादिवारणायानुद्भूतेति, सुवर्णादिभिन्नार्थकम्, तेनानुद्भूतत्वस्यानुगतस्य दुर्वचत्वेपि न क्षतिः। परमाणुद्व्यणुकत्रसरेणुवारणाय महेति।

न चैतादृशतेजःसामान्याभावस्य तमोरूपत्वे आलोकसमवधानेपि घटवृत्तिरूपादौ अन्धकारप्रतीत्यापत्तिः, संयोगेन तादृशतेजःसामान्याभावस्य तत्र सत्त्वादिति वाच्यम्। द्रव्यवृत्तित्वविशिष्टतत्सामान्याभावस्य, संयोग-संयुक्तसमवायसंयुक्तसमवेतसमवायाद्यन्यतमसंबन्धेन तादृशतेजःसामान्याभावस्य वा विवक्षितत्वात्। **द्रव्यान्तरकल्पनाया अन्याय्यत्वादिति**। तमस्त्वे द्रव्यविभाजकोपाधित्वाऽकल्पनादित्यर्थः। तेन न सिद्ध्यसिद्धिभ्यां व्याघातः। उक्तानुमाने स्वरूपासिद्धिं दर्शयति **रूपवत्तेति**। भ्रान्तिरेव = भ्रमरूपैवेत्यर्थः। तथाच नीलक्रियारोपे तन्निष्ठचक्षुःसंयुक्तविशेषणत्वाऽऽलोकापसरणयोर्नियतदोषत्वमिति भावः। न च तथापि नीलं तम इति चाक्षुषी भ्रान्तिः कथं स्यात्, आलोकादिसन्निकर्षाभावेन नीलरूपस्य प्रत्यक्षाऽसंभवादिति वाच्यम्। यत्र देशान्तरे आलोकसद्भावे नीलानुभवस्तत्रानुभूयमानस्याऽऽरोपसंभवात् स्मर्यमाणारोपसंभवाच्च। ननु तथापि बहिरिन्द्रियजन्यज्ञानस्य मुख्यविशेष्यांशे लौकिकत्वनियमाद् विशेष्यांशे आलोकसन्निकर्षविरहे कथं नीलं तम इति चाक्षुषी भ्रान्तिरिति चेन्न। आलोकाभावचाक्षुषे आलोकसन्निकर्षस्याहेतुत्वात्। साधकाभावमुक्त्वा बाधकमाह **तमसोऽतिरिक्तत्वे इति**। **अनन्तावयवादीति**। आदिनाऽवयवसंयोग-तद्ध्वंसादिपरिग्रहः।

अथ तमो द्रव्यमेव अन्यथा नीलं तमश्चलतीतिप्रत्ययानुपपत्तेः। न चायं भ्रमः, भ्रमत्वे साधकाभावात्, इतरथा तमो न नीलमितिविपरीतप्रत्ययप्रसंगाच्च। नचैवं तमसः पृथिवीत्वं स्यात्, नीलत्वावच्छिन्नं प्रति पृथिवीत्वेन समवायिकारणत्वादिति वाच्यम्। तादृशकार्यकारणभावे मानाभावात्। विलक्षणतेजःसंयोगा-ऽवयवनीलात्मकविशेषकारणद्वयविरहादेव जलादौ तदुत्पादवारणसंभवात्, तेजसि पाकजनीलाद्युत्पादस्य विद्यमानरूपव्यक्तेः प्रतिबन्धकत्वादेव वारणसंभवाच्च। न च नीलत्वस्य कार्यमात्रवृत्तिजातेः कार्यतावच्छेदकत्वस्यावश्यकत्वेन तदवच्छिन्नं प्रति पृथिवीत्वेन समवायिकारणत्वमावश्यकम्, द्रव्यत्वादेर्व्यापकधर्मत्वेनान्यथासिद्धत्वादिति वाच्यम्। तमसो नित्यतया तद्वृत्तिनीलस्यापि नित्यत्वाभ्युपगमेन तस्य कार्यमात्रवृत्तित्वासिद्धेः। न च तमसो नित्यत्वेऽन्धकारो नष्टः उत्पन्नोन्धकार इति प्रतीतिव्याघात इति वाच्यम्। तादृशप्रतीतेर्न्यायमतेपि भ्रमत्वात्। अस्तु वा तादृशकार्यकारणभावः, तथापि तमोवृत्तिनीलस्य नित्यत्वाभ्युपगमेन तस्य पृथिवीत्वसाधकत्वादिति ध्येयम्।

नापि चलतीतिप्रतीतिर्भ्रमः, बाधकाभावात्। न च क्रियात्वावच्छिन्नं प्रति मूर्तत्वेन समवायिकारणतया क्रियावत्त्वान्मूर्त्तत्वमायाति तमसः, तस्य द्रव्यत्वे किं मानमिति वाच्यम्। मूर्तत्वस्य द्रव्यत्वव्याप्यत्वात्, अन्यथा द्रव्यत्वमूर्तत्वयोः

गुणान् विभजते– अथ गुणा इति। एते गुणाश्चतुर्विंशतिसंख्याकाः कणादेन कण्ठतश्चशब्देन च दर्शिताः। तत्र गुणत्वजातिसिद्धिरग्रे वक्ष्यते ॥३–५॥

उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा।
प्रसारणं च गमनं कर्माण्येतानि पञ्च च ॥६॥
भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च।
तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ॥७॥

गुणों का विभाग करते हैं—रूप-रस-आदि—२२—और अदृष्ट से धर्म-अधर्म २ ये-इस प्रकार इन २४ गुणों को महर्षिकणाद ने अपने सूत्रों में कण्ठ से पढ़े हैं–तथा च शब्द से दिखलाये हैं। गुणत्व जाति सिद्धि अगाड़ी गुणनिरूपण में कहेंगे।

सांकर्यापत्तेः। तमस्येव द्रव्यत्वस्य मूर्तत्वव्यभिचारित्वादिति भावः। न च तस्याऽतिरिक्तत्वकल्पनागौरवेणेदृशप्रतीतीनां भ्रमत्वमेव कल्प्यम्, गौरवस्य साहजिकप्रतीतौ भ्रमत्वासाधकत्वात्, अन्यथा नानाघटकल्पनागौरवेण जगत्येकैव घटव्यक्तिः कल्प्येत। तत्र तेजोभावत्वकल्पनातो द्रव्यत्वकल्पनायामेव लाघवाच्च। किंच तमसस्तेजोभावत्वकल्पनावत् तेजसि तदभावत्वं किं न कल्प्यते। उष्णस्पर्शस्य द्रव्यत्वसाधकस्य सत्त्वात्तत्कल्पनमयुक्तमिति चेत्। उपदर्शितदिशा तत्साधकयोः रूपक्रिययोः सत्त्वात्। अपि च तस्य तथात्वे "नष्टमुत्पन्नं तम" इत्याकारकप्रत्ययायोगः। न ह्यनेकप्रतीतिभ्रमत्वसाधकं तस्याऽभावत्वसाधकं च प्रमाणमस्ति, येन तथा कल्पनं युज्येत इति चेत्।

तमसो नीलरूपवत्त्व उक्तहेतुहेतुमद्भावे व्यभिचारवारणाय तत्तद्व्याप्यजातयः स्वीकार्याः। न हीदृशजातिकल्पनायामनुभवोस्ति, नापि तत्र नीलत्वव्याप्यजातिकल्पने नीलं तम इति प्रत्ययातिरिक्तं मानमस्ति। तस्मादुक्तप्रतीतीनां भ्रमत्वमेव। नहि प्रतीतिमात्रेण विषयसत्त्वं संभवति, अन्यथा शुक्तिविशेष्यकरजतप्रकारकज्ञानादप्यनिर्वचनीयरजतसिद्ध्यापत्त्या संभविष्यत्यौपनिषदपक्ष एव श्रेयान्। यच्चोक्तं जगति एकैव घटव्यक्तिः स्यादिति। तन्न, नहि तत्र नानाव्यक्तिकल्पनायां बाधकमस्ति प्रत्युत साधिका प्रतीतिरिति तत्कल्पनं युज्यते। यदप्युक्तं–विपरीतप्रत्ययप्रसंग इति। तदपि न, निरस्तसमस्तविषयाज्ञानकलापस्य विदुषो नोदेतीति कथं निश्चयः। यदपि तमोऽभाव एव तेजः किन्न कल्प्यते इति। तदयुक्तं—तत्रोक्तप्रतीतेरन्यथा नेतुं शक्यत्वात्, इह च पृथिवीगतनीलाद्यारोप इति सुकरं वक्तुम्। नष्टोत्पन्नत्वव्यवहारः कथमिति चेत्, इत्थम्–नष्ट इति व्यवहारस्तूक्तप्रागभावनाशं गोचरयति, उत्पन्न इति व्यवहारश्च नीलारोपोत्पत्तिगोचर इति संक्षेपः।

ननु गन्धाभावविशिष्टपीतत्वेन क्लृप्तद्रव्यान्तर्भावाऽसत्त्वाद्द्रव्यान्तरसिद्धिरित्यत आह **सुवर्णस्येति**।

कण्ठतश्चशब्देन चेति। तत्र रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाऽपरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्चेति सूत्रे कण्ठतः सप्तदश, गुरुत्वद्रवत्वस्नेहसंस्काराऽदृष्टशब्दाः सप्त चशब्देनोक्ता इत्यर्थः। ननु चशब्देन षडेव समुच्चिता इति चतुर्विंशतित्वव्याघातः। न चाऽदृष्टशब्देन धर्माधर्मयोरभिधानाच्चतुर्विंशतित्वोपपत्तिरिति वाच्यम्। एवंसति अदृष्टपदे लक्षणापत्तिः, धर्माधर्मोभयसाधारणाऽदृष्टत्वजातेरेव तत्प्रवृत्तिनिमित्तत्वात्। तथाचाऽदृष्टत्वजातेर्गुणविभाजकतानवच्छेदकत्वे गुणत्वसाक्षाद्व्याप्यजातेर्गुणविभाजकोपाधित्वनियमभंगः स्यात्, अन्यथा शुक्लत्वादिभेदेन गुणानामानन्त्यापत्तेरिति चेन्न।

अदृष्टत्वस्य जातित्वे मानाभावात्। न च भावकार्यसामान्यजनकतावच्छेदकतयाऽदृष्टत्वजातिसिद्धिरिति वाच्यम्। तादृशसामान्यकार्यकारणभावे मानाभावात्। अथ तथापि अदृष्टाऽपूर्वादिशक्यतावच्छेदकतयाऽदृष्टत्वजातिसिद्धिः, धर्मत्वाऽधर्मत्वयोर्द्वयोः शक्यतावच्छेदकत्वे गौरवात्। न च पदशक्यतावच्छेदकत्वेनापि जातिसिद्धौ गगनादिचतुष्टयसाधारणजातिसिद्ध्यापत्तिरिति वाच्यम्। भूतपदशक्यतावच्छेदकत्वेनापि पृथिव्यादिपंचकसाधारणजातिसिद्ध्या सांकर्यापत्त्या विनिगमनाविरहेण भूतत्वविभुत्वयोरुभयोरेवाऽजातित्वात्। न च तथापि हर्यादिपदशक्यतावच्छेदकत्वेनानुगतसिद्ध्यापत्तिर्दुर्वारैवेति वाच्यम्। हरिपदात् सिंहत्वविष्णुत्वादिप्रकारेणैव स्वारसिकस्य बोधस्य सर्वसिद्धत्वादिति चेन्न। अदृष्टादिपदादपि धर्मत्वाऽधर्मत्वप्रकारेणैव बोधस्य स्वारसिकतायाः सर्वसिद्धत्वात्। वस्तुतस्तु मुक्तिवादोक्तरीत्या मुक्तिं प्रति अदृष्टस्य प्रतिबन्धकत्वमावश्यकम्, तथाच मुक्तिप्रतिबन्धकतावच्छेदकतयैवाऽदृष्टत्वजातिसिद्धिः। न चाऽदृष्टत्वस्य जातित्वे गुणविभाजकत्वापत्तिः, गुणत्वसाक्षाद्व्याप्यजातेरेव गुणविभाजकत्वनियमादिति वाच्यम्। तादृशनियमस्याऽप्रयोजकत्वात्। स्वतन्त्रेच्छस्येति न्यायेन ग्रन्थकर्तुरिच्छाया एव वा नियामकत्वादित्यन्यत्र विस्तरः।

ननु गुणेषु कथं चतुर्विंशतित्वव्यवहारः, चतुर्विंशतित्वस्य संख्यारूपतया गुणे तदसंभवादिति चेन्न। रूपादि "चतुर्विंशतिमात्र" विशेष्यकसमूहालंबनरूपापेक्षाबुद्धिविशेष्यत्वरूपचतुर्विंशतित्वस्य विवक्षितत्वात्। संख्याया गुणावृत्तित्वं चाग्रे वक्ष्यते। **अग्रे वक्ष्यते इति**। गुणनिरूपणे इत्यर्थः। द्रव्यकर्मभिन्नसामान्यवृत्तिकारणतावच्छेदकतया गुणत्वजातिसिद्धिः, तत्रावच्छेदकं न सत्तारूपत्वादि अधिकन्यूनदेशवृत्तित्वादित्यग्रे वक्ष्यते इति भावः। वस्तुतस्तु कार्यतावच्छेदकानुगतधर्माभावेन नेदृशरीत्या जातिसिद्धिः, तथा च रूपान्यद्रव्यकर्मभिन्नसामान्यवद्वृत्तिकारणतावच्छेदकतयापि जातिसिद्धिः स्यात्। न चेष्टापत्तिः, ईदृशजात्या गुणत्वसांकर्यप्रसंगात्, किन्तु गुणपदशक्यतावच्छेदकतया गुणत्वजातिसिद्धिर्बोध्या। एवं च गुणत्वजातिमत्त्वं गुणस्य लक्षणम् नातो न्यूनता।

कर्माणि विभजते-उत्क्षेपणमिति । कर्मत्वजातिस्तु प्रत्यक्षसिद्धा । एवमुत्क्षेपणत्वादिकमपि ॥६॥

ननु भ्रमणादिकमपि पञ्चकर्माधिकतया कुतो नोक्तमत आह भ्रमणमित्यादि ॥७॥

सामान्यं द्विविधं प्रोक्तं परं चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥८॥
परभिन्ना च या जातिः सैवापरतयोच्यते ।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥९॥
व्यापकत्वात्पराऽपि स्याद्व्याप्यत्वादपराऽपि च ।

कर्मों का विभाग करते हैं—उत्क्षेपण (ऊपर को फेंकना) अपक्षेपण (नीचे को फेंकना) आकुञ्चन (सिकोड़ना) प्रसारण (फैलाना) गमन—ये पाँच प्रकार के कर्म हैं ।

प्रश्न—जब कि भ्रमणादि भी पाँच कर्मों से अधिक मौजूद हैं तो उन्हें क्यों नहीं कहा—अर्थात् १० कर्म कहने चाहिये थे ।

उत्तर—उन अतिरिक्त भ्रमण आदि पाँच कर्मों का गमन में ही अन्तर्भाव है। भ्रमण-(घूमना-फिरना) रेचन (किसी वस्तु का बाहर निकलना) जैसे शरीर से मल आदि का । स्पन्दन (बहना जैसे जल का) ऊर्ध्वज्वलन (ऊपर की ओर जलना—जैसे अग्नि का) तिर्यग्गमन (टेढ़ा चलना जैसे वायु का)

कर्माणि विभजते इति । कर्मलक्षणं तु विभागाऽसमवायिकारणत्वे सति संयोगाऽसमवायिकारणत्वम् । कपालाकाशसंयोगादावतिप्रसंगवारणाय सत्यन्तम्, तस्य घटाकाशसंयोगासमवायिकारणत्वात् । कपालद्वयविभागेऽतिव्याप्तिवारणाय विशेष्यदलम्, तस्य कपालाकाशविभागाऽसमवायिकारणत्वात् । एवमूर्ध्वदेशाऽसमवायिकारणत्वमुत्क्षेपणत्वम् । अधोदेशसंयोगाऽसमवायिकारणत्वमपक्षेपणत्वम् । शरीरसन्निकृष्टसंयोगासमवायिकारणत्वमाकुंचनत्वम् । विप्रकृष्टसंयोगासमवायिकारणत्वं प्रसारणत्वम् । उत्क्षेपणादिचतुष्टयभिन्नत्वे सति विभागासमवायिकारणत्वे सति संयोगासमवायिकारणत्वं गमनत्वम् । **प्रत्यक्षसिद्धेति ।** संयुक्तसमवेतसमवायेनेत्यादिः। अतीन्द्रिये कर्मणि तत्सिद्धिस्तु संयोगरूपकार्येण द्रष्टव्या । **एवमुत्क्षेपणत्वादिकमपीति ।** अस्य विपरिणतेन प्रत्यक्षसिद्धमित्यनेनान्वयः ।

मूले—**भ्रमणमिति ।** भ्रमणं चक्रादेः । रेचनं मलादेः । स्यन्दनं रथादेः । ऊर्ध्वजलनं वन्ह्यादेः । तिर्यग्गमनं वाय्वयदेः । **गमनादेव लभ्यते इति ।** तथाच भ्रमणादीनां गमने एवान्तर्भाव इति भावः । यद्यपि उत्क्षेपणत्वादिजातिवद् भ्रमणत्वादीना-

सामान्यं निरूपयति-सामान्यमिति। तल्लक्षणं तु नित्यत्वे सत्यनेकसमवेतत्वम्। अनेकसमवेतत्वं संयोगादीनामप्यस्त्यत उक्तं-नित्यत्वे सतीति। नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्त्यत उक्तमने-

सामान्य का निरूपण करते हैं—सामान्य दो प्रकार का है पर तथा अपर—द्रव्यादि (द्रव्य गुण-कर्म) इन तीन पदार्थों में रहने वाली सत्ता जाति पर-जाति कही जाती है। सामान्य (जाति) का लक्षण है कि जो नित्य हो तथा अनेक में समवाय सम्बन्ध से रहे। इस लक्षण में नित्यत्व विशेषण न देगें तो संयोग में अतिव्याप्ति हो जावेगी - क्योंकि संयोग भी अनेक (एक से भिन्न- दो-में तीन) में समवेत (समवाय सम्बन्ध से वर्त्तमान) है। अतः नित्यत्व कहा तो संयोग नित्य नहीं है। एवं अनेक पद न देगें तो गगन परिमाण में अतिव्याप्ति हो जावेगी—क्योंकि गगन-परिमाण नित्य भी है समवेत भी है गगन में। अतः अनेक पद दिया तो गगनपरिमाण अनेक

मपि जातित्वाविशेषेण पार्थक्येनैव निर्देश उचितः। स्वतन्त्रेच्छस्य मुनेरिच्छैव नियामिका, अत एव गुरुत्वद्रवत्ववेगजन्यतावच्छेदकजातयोपि सन्तीति कथमेतावानेव विभाग इति निरस्तम्। यत्तु गमनत्वजातेर्भ्रमणादिषु प्रत्ययादुत्क्षेपणादौ च तदप्रत्ययादेवमभिहितमिति। तन्न, उत्क्षेपणादावपि ऊर्ध्वं गच्छतीत्यादिप्रयोगात्तत्रापि गमनत्वसिद्धेः। वस्तुतस्तु गमनादेव लभ्यते इत्यनेन भ्रमणादीनां गमनेऽन्तर्भाव इति पक्षान्तरमुक्तम्, उत्क्षेपणमितिश्लोके चरमचकारेणाऽनुक्तपंचकर्मणां समुच्चयाभिधानान्न न्यूनतेति द्रष्टव्यम्।

तल्लक्षणं तु=सामान्य लक्षणं तु। **संयोगादीनामिति**। आदिना अनेकसंख्या-अनेकपृथक्त्व-विभागानां कार्यद्रव्यस्य च संग्रहः। नित्यत्वं च प्रागभावाऽप्रतियोगित्वं ध्वंसाप्रतियोगित्वं वा। सामान्यस्य जन्यत्वे व्यक्तेस्तत्र समवायिकारणत्वं वाच्यम्, एवं च घटोत्पत्तेः पूर्वमपरत्र घटत्वविशिष्टप्रत्ययानुपपत्तिः, तस्य नानात्वे तु गौरवम्, तदंगीकारे प्रमाणाभावश्च स्यात्। एवं च प्रागभावाप्रतियोगित्वे सिद्धे तद्विशिष्टाभावत्वेन लाघवसहकृतेन ध्वंसाप्रतियोगित्वं तस्य सिद्ध्यति। न च ध्वंसप्रतियोगित्वाभावकल्पना तवापि तुल्येति वाच्यम्। अभावज्ञानस्य प्रतियोगिज्ञानसापेक्षतया तत्र प्रतियोगिज्ञानाभावे ध्वंसप्रतियोगित्वाभावस्याऽर्थसिद्धत्वात्। नित्यद्रव्य-नित्यगुणविशेषेषु चाऽतिव्याप्तिवारणाय विशेष्यदलम्। समवेतत्वसंबन्धेन व्यक्तिद्वयवत्त्वं तदर्थः।

गगनपरिमाणादीनामिति। आदिना जलपरमाणुरूपादेः परिग्रहः। **अत्यन्ताभावेऽप्यस्तीति**। अत्यन्ताभावस्य स्वरूपसंबन्धेनाऽनेकवृत्तित्वात्। नित्यद्रव्यादेरपि कालिकेनाऽनेकवृत्तित्वादित्यपि बोध्यम्।

केति । नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ताभावेऽप्यस्त्यतो वृत्तित्वसामान्यं विहाय समवेतत्वमित्युक्तम् । एकव्यक्तिमात्रवृत्तिस्तु न जातिः । तथा चोक्तम्—

"व्यक्तेरभेदस्तुल्यत्वं संकरोऽथाऽनवस्थितिः ।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः" ॥

नहीं है—अपितु एक ही है नातिव्याप्तिः । "समवेतत्व" शब्द का अर्थ है "समवाय सम्बन्ध से रहना" (समवायसम्बन्धेन वृत्तित्व)—सो यहाँ वृत्तित्व मात्र का ही निवेश कर दीजिये "समवाय सम्बन्ध" का निवेश क्यों किया—तथा सति अत्यन्ताभाव में अति व्याप्ति हो जावेगी—क्योंकि अत्यन्ताभाव नित्य है और सर्वत्र रहने के नाते अनेक में भी रहता है । "समवायसम्बन्ध" का निवेश किया तो अत्यन्ताभाव समवायसम्बन्ध से नहीं रहता है (अपितु स्वरूपसम्बन्ध से रहता है) यहाँ पर "समवेतत्व" की व्यावृति से समवाय सम्बन्ध की व्यावृत्ति में ही तात्पर्य है।

जाति के बाधकों को बतलाते हैं—"व्यक्तेरभेदः इत्यादि से—

एक व्यक्ति (आकाश आदि) में आकाशत्व आदि जाति नहीं है । क्योंकि अनेक व्यक्तियों का एक रूप से बोध करने के लिये जाति मानते हैं—जैसे संपूर्ण घटों का एक रूप से बोध करने के लिये उसमें घटत्व जाति मानते हैं । आकाशत्व-कालत्व-दिकत्व ये उपाधियाँ हैं । जाति से भिन्न धर्म को उपाधि कहते हैं । तुल्यत्व अन्यूनानतिरिक्तव्यक्तिकत्व तुल्यत्व है—वह घटत्व-कलशत्व दोनों को जातित्व का बाधक है । अर्थात् घटकलश दोनों पर्यायवाचक हैं अतः इन दोनों का बोध जब कि एक रूप से घटत्व रूप से हो सकता है तो प्रसिद्धत्वात् घटत्व को ही केवल जाति मान लिया जाय—घटत्व कलशत्व दोनों को नहीं । सङ्करः परस्परात्यन्ताभावसमानाधिकरणयोरेकत्र समावेशः । वह भूतत्व-मूर्त्तत्व को जातित्व का बाधक है । अर्थात्-पृथ्वी-जल-तेज वायु-आकाश-ये पांच भूत पदार्थ हैं- इनमें भूतत्व धर्म रहता है । इन पाचों में आकाश के स्थान में मन को जोड़ दीजिये तो ये ही पांच मूर्त्त पदार्थ हो जावेंगें । मन में मूर्त्तत्व है वहीं भूतत्वात्यन्ताभाव-आकाश में भूतत्व है वहां मूर्त्तत्वात्यन्ताभाव है । इस रीति से परस्परात्यन्ताभाव समानाधिकरण हैं, और पृथिवी-जल तेज-वायु-इन चार में भूतत्व-मूर्त्तत्व-दोनों हैं—अतः सांकर्य दोष भय से भूतत्व-मूर्त्तत्व दोनों जाति नहीं हैं किन्तु उपाधि हैं । क्रियासमवायिकारणतावच्छेदकतया मूर्त्तत्व को जाति मानते हैं । अनवस्थिति-अप्रामाणिक अनन्त पदार्थ कल्पना अविश्रान्तिः अनवस्था । जैसे—अनेक व्यक्तियों का एकरूप से बोध करने के लिये जाति मानते हैं । सकल घटों का एक रूप से बोध करने के लिये उनमें घटत्व जाति मानी जाती है । परन्तु सकल घट और घटत्व इन दोनों का एकरूप से बोध करने के लिये इन दोनों में एक घटत्वत्व जाति और मानिए । एवं सकल घट-घटत्व एक श्रेणी में घटत्वत्व ये अलग श्रेणी इन दोनों में फिर एक जाति "घटत्वत्वत्व" मानिये तो इस प्रकार अप्रामाणिक रूप से अनन्त पदार्थों की कल्पना प्रयुक्त अनवस्था हो जावेगी । क्योंकि इसी प्रकार फिर अगाड़ी बढ़ते जाइये । रूपहानि-घट-पट-रूप अवयवियों का परस्पर अवयव भेद प्रयुक्त भेद करते चले

जाइये - घट-पट-इन दोनों के द्वयणुकों का भेदक तो दोनों के परमाणु हो गये-दोनों के परमाणुवों का भेदक हुआ विशेष परंन्तु उन दोनों घटपरमाणु-पटपरमाणु में रहने वाले जो अलग २ विशेष हैं– उनका भेदक कौन है। अर्थात् घट परमाणु में रहने वाले विशेष से पट परमाणु में रहने वाला विशेष भिन्न है इसमें क्या प्रमाण है ! यदि दोनों विशेषों में कोई अन्तर नहीं तो परमाणुवों में अभेद हो जावेगा—इस प्रकार घट-पट को ऐक्य हो जावेगा। यदि उन दोनों विशेषो के परस्पर भेद का साधक उनमें एक विशेषत्व जाति मानी जाय तो इस शंका में कहते हैं कि "रूपहानि" हो जावेगी। अर्थात विशेष नित्यद्रव्यों का परस्पर भेद करता हुवा अपना व्यावर्त्तक स्वयं है –अत: विशेषों में यदि विशेषत्व जाति मान ली जाती है तब तो वही भेदक हो जावेगी—विशेष का स्वतोव्यावर्त्तकत्व जो रूप है उसकी हानि हो जावेगी। अतः विशेष में विशेषत्व जाति नहीं मानना "रूपहानि" भयात्। असम्बन्ध —प्रतियोगिता-अनुयोगितान्यतर सम्बन्धेन समवायाभावः। यह असम्बन्ध समवाय तथा अभाव के जातिमत्त्व का बाधक है— अर्थात् समवाय में समवायत्व-अभाव में अभावत्व यदि जाति मानी जाय तो उसका विरोधी असम्बन्ध है। लक्षण समन्वय-समवाय तथा अभाव ये समवायसम्बन्ध से यदि कहीं रहते तो समवाय सम्बन्ध के प्रतियोगी होते तब प्रतियोगिता सम्बन्ध से समवायवान् होते - परन्तु सो बात नहीं। अथवा समवाय-अभाव में समवाय सम्बन्ध से कोई रहता तो सयवायसन्बन्ध के अनुयोगी ये दोनों होते तब अनुयोगितासम्बन्ध से समवायवान् होते परन्तु समवाय और अभाव में समवाय सम्बन्ध से कोई नहीं रहता है। अतः यह सिद्ध हुआ कि न तो समवाय अभाव कहीं समवाय सम्बन्ध से रहते हैं और न इन्हीं में कोई समवाय सम्बन्ध से रहता है। इसलिये प्रतियोगिता-अनुयोगिताऽन्यतर सम्बन्ध से समवायाभाव रूप असम्बन्ध समवाय-अभाव में समवायत्व-अभावत्व रूप जाति का बाधक हो गया। घट-पट आदि अन्यतर सम्बन्धान्तर्गत अनुयोगिता सम्बन्ध से समवायवान् हैं समवायाभाव रूप असम्बन्ध जाति का बाधक उनमें नहीं है—अतः उनमें घटत्व-पटत्व रूप जाति मानते हैं।

समवेतत्वमित्युक्तमिति । यत्किंचित्संबन्धावच्छिन्नवृत्तित्वमित्यर्थः। अनेकसमवेतत्वं च स्वप्रतियोगिसमवेतत्व-स्वसामानाधिकरण्योभयसंबन्धेन भेद-विशिष्टत्वम्, तेनैकभिन्नत्वरूपानेकत्वस्याऽसिद्धावपि न क्षतिः।

ननु इदं लक्षणं गगनत्वादावव्याप्तम्, तस्याऽनेकसमवेतत्वाभावादित्यत आह **एकव्यक्तिमात्रेति** । व्यक्तेरभेदः = एकव्यक्तिमात्रवृत्तित्वम्। व्यक्तिद्वयाऽवृत्तित्वमिति यावत। यथा गगनत्वं न जातिः। तुल्यत्वं स्वभिन्नजातिसमनियतत्वम्, तज्जातिसमनियतो यो व्यक्तिसमवेतो धर्मः स न तज्जातिभिन्नजातिः इत्यर्थः, यथा घटत्वं कलशत्वं च न जातिद्वयम्। एतच्चाऽसति भेदसाधके प्रमाणे बोध्यम्। तत्सत्त्वे तु तुल्यव्यक्तिकयोर्द्वयोरपि जातिद्वयत्वमुपेयत एव। घटपरिमाण-तत्तुल्यद्रव्यपरिमाणेषु पर्वतपरिमाणावधिकापकर्ष-सर्षपतत्तुल्यद्रव्यपरिमाण्यवधिक-प्रकर्षरूपं जातिद्वयं तुल्यव्यक्तिकमपि विभिन्नं स्वीक्रियते। अत एव तुल्यव्यक्तिकयोर्जातिद्वयत्वाभ्युपगमे मानाभावो मूलमिति पक्षधरमिश्राः। **संकरः = परस्परात्य-**

द्रव्यादीति । परत्वमधिकदेशवृत्तित्वम् । अपरत्वमल्पदेशवृत्तित्वम् । सकलजात्यपेक्षयाऽधिकदेशवृत्तित्वात् सत्तायाः परत्वं, तदपेक्षया चान्यासां जातीनामपरत्वम् ॥८॥

पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिदेशवृत्तित्वाद्द्रव्यत्वादेः परत्वं, सत्ताऽपेक्षयाऽव्याप्यत्वाद् अल्पदेशवृत्तित्वाच्च द्रव्यत्वस्यापरत्वम्, तथाच धर्मद्वयसमावेशाद् उभयमविरुद्धम् ॥ ९ ॥

अधिक देश में रहने वाली जाति पर जाति कही जाती है—और जो जाति कम देश में रहती सै उसे अपर कहते हैं। समस्त जातियों की अपेक्षया अधिक देश में रहने के नाते सत्ता जाति 'पर' है। उसकी अपेक्षया अन्य जातियाँ 'अपर' हैं।

पर से भिन्न जाति अपर कही जाती हैं, द्रव्यत्व-गुणत्व आदि जातियाँ पर तथा अपर दोनों ही कही जाती हैं। जैसे पृथिवीत्व जाति की अपेक्षया द्रव्यत्व जाति व्यापक-तथा अधिक देश में रहने के नाते 'पर' है। सत्ता जाति की अपेक्षया अव्याप्त होने से तथा अल्पदेश में रहने के नाते द्रव्यत्व जाति 'अपर' है। अतः द्रव्यत्व आदि जाति में परत्व-अपरत्व दोनों धर्म विरोधी नहीं हैं।

न्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः। तत्तज्जातितत्तदभावसमानाधिकरणत्वे सति तत्तज्जातिमन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वमिति यावत्। गुणत्वस्य द्रव्यत्वस्य पृथिवीत्वादिना सांकर्यवारणाय जातिसामानाधिकरण्यं सत्यन्तघटकम्। विशेष्यदलं च पृथिवीत्वस्य द्रव्यत्वादिना सांकर्यवारणाय तत्तज्जात्रसामानाधिकरण्यत्वे सतीति। अत एव पृथिव्यादिपंचकसाधारणं भूतपदप्रवृत्तिनिमित्तं न जातिः मूर्त्तत्वजात्या सांकर्यादित्यनुमानम्। स्वसामानाधिकरण्यस्वाभावसामानाधिकरण्योभयसंबन्धेन जातिविशिष्टजातित्वावच्छेदेन स्वसमानाधिकरणाभावप्रतियोगित्वाभाव इति नियम एव सांकर्यस्य जातिबाधकत्वे मूलम्। अनवस्थितिः = स्वाधिकरणे स्वस्याभावः। अव्याप्यवृत्तित्वमित्यर्थः। आंशिकत्वमिति यावत्। यथोपेक्षात्वादि। वस्तुतोऽनवस्थितिः = अनवस्था—यथा क्लृप्तनिनिखिलजातिनिष्ठं वैजात्यं-तादृशवैजात्यतदाश्रयनिष्ठं वैजात्यान्तरं ततश्च तादृशवैजात्यतदाश्रयनिष्ठमपरं वैजात्यमित्येवं क्रमेणानवस्था बोध्या। एवं च जातिषु न जातिकल्पनेति ध्येयम्। रूपहानिः=स्वतोव्यावर्त्तकत्वहानिः। यथा विशेषत्वं न जातिः। तस्य जातित्वे विशेषपदार्थस्य स्वतोव्यावर्तकत्वहानिः स्यात्। जातिमत्पदार्थस्य जातेरेव व्यावर्तकत्वात्। असंबन्धः=समवेतत्वाभावः। समवायाभावयोरभावत्वस्य च जातित्वे बाधकः। **जातिबाधकसंग्रह इति।** जातित्वाभावनियतत्वेन प्रामाणिकैः कथित इत्यर्थः। अत्र व्यक्त्यभेदादिज्ञानानां सामान्यज्ञाने प्रतिबन्धकत्वम्। यत्र यत्किंचिदेकबाधकज्ञानेन जातिज्ञानप्रतिबन्धस्तत्र तदेव जातिबाधकम्, न तु

अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः ॥ १० ॥

विशेषं निरूपयति—अन्त्य इति। अन्तेऽवसाने वर्त्तत इत्यन्त्यः, यदपेक्षया विशेषो नास्तीत्यर्थः। घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात्परस्परं भेदः, परमाणूनां परस्परभेदको विशेष एव स तु स्वतएव व्यावृत्तः, तेन तत्र विशेषान्तरापेक्षा नास्तीति भावः ॥ ६ ॥ १० ॥

विशेष पदार्थ का निरूपण करते हैं—जो अन्त्य हो नित्यद्रव्यवृत्ति हो उसे विशेष कहते हैं। अन्त्य शब्द का अर्थ है कि जो सबके अन्त में हो और उसमें जो रहे - जैसे सबके अन्त में परमाणु है और उसमें विशेष रहता है, (क्योंकि विशेष नित्यद्रव्यों में रहता है सो परमाणु भी नित्यद्रव्य हैं)। प्रश्न—विशेषपदार्थ को मानने की आवश्यकता ही क्या है। उत्तर—हम जब आपसे पूछेंगे कि घट-पट आदि में क्या भेद है तो आप यही कहेंगे कि अवयव भेद प्रयुक्त भेद है—सो द्व्यणुकपर्यन्त घट-पट आदि पदार्थों का तो अवयव भेद प्रयुक्त भेद हो जावेगा—अर्थात् परमाणुवों के भेद प्रयुक्त द्व्यणुकों का भी भेद हो जावेगा-परन्तु वे दोनों परमाणु परस्पर में भिन्न हैं—इसमें क्या प्रमाण है। तो उन परमाणुवों का भेदक विशेष ही को कहना होगा। अब उन दोनों परमाणुवों में रहने वाले जो अलग २ विशेष हैं उनका परस्पर भेदक कौन इस प्रश्न का उत्तर किया कि विशेष स्वतः ही व्यावृत्त (भिन्न) है - विशेष को भिन्न करने के लिये विशेषान्तर या (विशेषत्व) जाति की अपेक्षा नहीं है।

स्वरूपसत्, तेनाऽत्र परिगणितेषु न कस्यापि वैयर्थ्यम्। अत्र व्यक्त्यभेदतुल्यत्वसंकराऽनवस्थितिरूपहानिज्ञानानां स्वातन्त्र्येण समवेतत्वाभावरूपाऽसंबन्धस्य च ग्राह्याभावावगाहितया प्रतिबन्धकता बोध्या।

परं चाऽपरमेव चेति मूलम्। ननु परत्वापरत्वे गुणविशेषौ कथं सामान्ये इत्यत आह परत्वमिति। व्यापकरूपत्वे गौरवादाह अधिकदेशवृत्तित्वमिति। स्वाभाववद्वृत्तित्वमित्यर्थः। यद्यपि विरुद्धघटत्वपटत्वयोरप्येवमस्ति, तथापि स्वाधिकरणवृत्तित्वविशेषितं तथा, स्वं—व्याप्यत्वेनाभिमतम्, स्वाभावश्च समवायसंबन्धावच्छिन्नप्रतियोगिताकः, नातः पृथिवीत्वाद्यपेक्षया घटत्वादेः परत्वम्, संयोगसंबंधावच्छिन्नप्रतियोगिताकपृथिवीत्वाद्यभाववति तस्य वृत्तित्वात्। वृत्तिद्वयमेकसंबंधावच्छिन्नं समवायसंबन्धावच्छिन्नं वा ग्राह्यम्, तेन समवायसंबन्धावच्छिन्नप्रतियोगिताकाभाववति संबन्धान्तरेण वर्तमाने तस्मिन्नातिप्रसंगः। न वा पटत्वावच्छिन्नप्रतियोगिताकाभाववति वर्तमाने संबन्धान्तरेण स्वाधिकरणे वर्तमाने तस्मिन्नातिप्रसंगः। अपरत्वं विवृणोति अल्पदेशवृत्तित्वमिति। स्वभिन्नत्वे सति स्वाभाववदवृत्तित्वमित्यर्थः। स्वपदद्वयं परत्वेनाभिमतसामान्यपरम्। पर्यवसितमुक्तप्रायम्। सकलजात्यपेक्षयेति। समावेतापेक्षयेत्यर्थः। अधिकदेशवृत्तित्वात्=व्यापकत्वात्। परत्वमिति। समवेतवन्निष्ठान्योन्याभावप्रतियोगितान-

वच्छेदकत्वमित्यर्थः। प्रतियोगितावच्छेदकता च समवायसंबन्धावच्छिन्ना ग्राह्या, अन्यथा सत्ताया अपि विषयितासंबन्धेन तादृशान्योन्याभावप्रतियोगितावच्छेदकत्वादसंभवापत्तेः। अवच्छेदकता च किंचिद्धर्मानवच्छिन्नापि, अन्यथा द्रव्यगुणादावतिव्याप्तिः। जात्यखण्डोपाध्यतिरिक्तस्य पदार्थस्य स्वरूपतोऽवच्छेदकत्वविरहान्नातिप्रसंगः। तदपेक्षया=सत्तापेक्षया। **अन्यासामिति**। सत्ताभिन्नानामित्यर्थः। **अपरत्वमिति**। समवेतसामान्यमपेक्ष्याऽव्यापकत्वमित्यर्थः। समवेतवन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वमिति यावत्। उभयं=व्याप्यत्वव्यापकत्वोभयम्। **अविरुद्धमिति**। तथाच प्राचां परापरत्वविभागो व्यर्थ इति भावः।

सत्ताजातिसिद्धिस्तु सत्पदशक्यतावच्छेदकतया, एवं च द्रव्यं सत् गुणः सन्-कर्म सदितिव्यवहारोऽप्युपपद्यते। इत्थंच द्रव्यं सत् गुणः सन् कर्म सदिति-प्रतीतेः समवायसबन्धेन एकधर्मप्रकारकत्वस्यानुभवसिद्धतया द्रव्यादित्रितयसाधारणजातिसिद्धिः।

अथ ज्ञेयत्वमेव सत्पदप्रवृत्तिनिमित्तमस्तु किं सत्ताजातेस्तथात्वेन। ज्ञेयत्वं च ज्ञानविषयत्वम्। न च सत्पदशक्यत्वं यदि सत्ताभिन्नधर्मावच्छिन्नं स्यात्तदा जातिमद्भिन्नवृत्तिः स्यात्, सत्ताभिन्नेत्यत्र सत्तापदं जातिमन्मात्रवृत्तिधर्मपरम्, तेन सत्ताया असिद्धावपि न क्षतिरिति वाच्यम्। इष्टापत्तेः। सामान्यं सत्, विशेषः सन्, समवायः सन्नित्यादिव्यवहारस्य सर्वसिद्धत्वादिति चेन्न।

एकार्थसमवायेन सत्तावत्तया तादृशव्यवहारोपपत्तेः। न चाऽभावः सन्निति-व्यवहारानुपपत्तिः। स्वसमवायिविशेषणतया तदुपपादनात्। एकार्थसमवायश्च स्वप्रतियोगिकसमवायप्रतियोगित्व-स्वप्रतियोगिकसमवायतादात्म्यान्यतररूपः, स्वं सत्तेत्यलम्।

नन्वेवं नित्यसंयोगे सामान्यलक्षणातिव्याप्तिरिति चेन्न। अनेकसमवेतत्वमित्यनेन बहुसमवेतत्वस्य विवक्षितत्वादित्यन्यत्र विस्तरः।

मूले-**अन्त्यो नित्यद्रव्यवृत्तिरिति** स्वरूपकथनम्। लक्षणन्तु निःसामान्यत्वे सति सामान्यभिन्नत्वे सति समवेतत्वम्। मूलस्थमन्त्यपदं व्याचष्टे। **अन्त्य इति**। परमाणुनिष्ठरूपादिकं व्यावर्त्तयितुमाह **यदपेक्षयेति**। तदपेक्षया तु रूपत्वादिसामान्यमेव विशेषोस्तीति भावः। **द्व्यणुकपर्यन्तानामिति**। न च द्व्यणुके एव तत्कल्पनाऽस्तु विशेषवत्परमाणुसमवेतत्वाद्द्व्यणुकभेद इव विशेषवद्द्व्यणुकजनकत्वादेव परमाणूनां भेदोपपत्तेरिति वाच्यम्। परमाणुद्वयसमवेतानन्तद्व्यणुकभेदेन तद्भेदकल्पनापातात् तत्परमाणुद्वयसमवेतानन्तद्व्यणुकमात्रवृत्त्येककल्पने भाविद्व्यणुकाद् विद्यमानद्व्यणुकभेदो न स्यात्, तथात्वे जातित्वापाताच्च। एतत्कपालसमवेतत्वेन हेतुना एतद्घटे घटान्तरभेदः साधनीयः। एवं द्व्यणुकमिदं द्व्यणुकान्त-एतत्परमाणुसमवेतत्वादित्यनुमानतो भेदः साधनीयः। एवमयं परमाणुः परमाण्व-

घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः ॥ ११ ॥

समवायं दर्शयति—घटादीनामिति । अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः ।

समवाय का निरूपण करते हैं—घटादि का कपालादि में (घट अवयवी है—कपाल अवयव है) अवयवी अपने अवयव में, जाति व्यक्ति में, गुण-गुणी में, विशेष-नित्यद्रव्यों में जिस सम्बन्ध से रहे उसे ही समवाय कहते हैं ।

न्तराद्भिन्नः विशेषादित्यनुमानात् भेदसिद्धिः । तदेवाह विशेष एवेति । अथवा भेदात् = भेदज्ञानात् । भेदः = भेदज्ञानम् । परमाणूनां=एकजातीयरूपवताम् । एतेन परमाणूनामपि नीलपीतादिरूपभेदेन भेदसंभवाद् विशेषांगीकारो व्यर्थ इति परास्तम् । एकजातीयरूपवतां तेषां तदनभ्युपगमे भेदानुपपत्तेः । परमाणुपदमवयवशून्यतां बोधयति । तथा चैतत्परमाणुनिष्ठपरमाण्वन्तरप्रतियोगिकभेदबुद्धिः एतत्परमाणुनिष्ठयत्किंचिद्धर्मज्ञानसाध्या तद्बुद्धित्वात् । यद्यत्प्रतियोगिकयन्निष्ठभेदबुद्धिर्भवति सा तन्निष्ठयत्किंचिद्धर्मज्ञानसाध्या, यथा पटप्रतियोगिकघटनिष्ठभेदबुद्धिरिति सामान्यव्याप्तिज्ञानादितरबाधसहकृताद्विशेषसिद्धिरिति भावः ।

ननु विशेषाणामपि परस्परव्यावर्त्तनाय विशेषान्तरमुपगन्तव्यम्, एवं चानवस्थेत्यत आह स त्विति । इत्थं चेतरव्यावर्त्तनाय कल्प्यमानानां तेषां स्वव्यावर्त्तकनिरपेक्षाणामेव कल्पनान्नानुपपत्तिरिति भावः । स्वतोव्यावृत्तत्वं च स्वभिन्नलिंगकस्वविशेष्यकस्वसजातीयेतरभेदानुमित्यविषयत्वम् ।

नव्यास्तु विना व्यावर्त्तकं परेषां विशेषाणामिव नित्यानामपि द्रव्याणां स्वत एव व्यावृत्तत्वान्न विशेषापेक्षेत्याहुः ।

केचित्तु शब्दसमवायिकारणतावच्छेदकतया तत्कल्पनमावश्यकम्, अनेकशब्दादौ तत्कल्पने गौरवात् । न च तत्परिमाणव्यक्तिस्तथास्तु, तदैकत्वादिना विनिगमनाविरहात् । न चाऽक्लृप्ते विनिगमनाविरहः संभवतीति तत्सिद्धौ मानमाचक्षते । अत्रेदं बोध्यम् । यत्राननुगतानि कारणानि तत्रापेक्ष्यते कारणतावच्छेदकोऽनुगतो धर्मः कारणतायाः, प्रकृते तु कारणाननुगमाभावान्नापेक्षणीयोनुगतो धर्मः कारणतायाः । न च कारणता सावच्छिन्नेति नियमः, प्रमाणाभावादिति चिन्तनीयम् ।

मूले-घटादीनामिति । आदिना पटादिपरिग्रहः । कपालादाविति । आदिना तंत्वादिपरिग्रहः । मूले-जातेश्चेत्यत्र चकारेण विशेषनित्यद्रव्ययोर्ग्रहणमिति दर्शयति-अवयवावयविनोरिति । सामान्यतोऽवयवत्वं जन्यद्रव्यसमवायिकारणतावच्छेदकधर्मवत्त्वम् । विशेषतश्च तत्तत्समवायिकारणत्वम् ।

समवायत्वं नित्यसम्बन्धत्वम्। तत्र प्रमाणं तु गुणक्रियादिविशिष्टबुद्धि-र्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वाद् दण्डी पुरुष इति विशिष्टबुद्धि-वद् इत्यनुमानम्। अनेन संयोगादिबाधात् समवायसिद्धिः। न च स्वरूपस-म्बन्धेन सिद्धसाधनम् अर्थान्तरं वा ?, अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवाल्लाघवादेकसमवायसिद्धिः। न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धि-प्रसङ्गः, तत्र रूपसमवायसत्त्वे-ऽपि रूपाभावात्।

नित्यसम्बन्ध को समवाय कहते हैं—इस दृष्टि से समवायत्व नित्यसम्बन्धत्व रूप हुवा। समवाय में अनुमानप्रमाण है कि "दण्डी पुरुषः" यह दण्ड से विशिष्ट पुरुष की बुद्धि जैसे विशेषण जो दण्ड और विशेष्य जो पुरुष इन दोनों के सन्बन्ध (संयोग) को विषय (अवगाहन) करती है—ऐसे ही "रूपवान् घटः" "कर्मवान् घटः" यह गुण एवं क्रिया से विशिष्ट घट बुद्धि भी विशेषण जो रूप तथा कर्म हैं और विशेष्य जो घट इन दोनों के सम्बन्ध को अवगाहन करती है। सो इस विशिष्ट बुद्धि का जो भी सम्बन्ध विषय हो—वही समवाय है। गुण-क्रियादि विशिष्ट बुद्धि स्थल में गुण द्रव्य का क्रियाद्रव्य आदि के संयोग सम्बन्ध का बाध है—क्योंकि "द्रव्यद्रव्ययोरेव संयोगः" इस न्याय से। अतः समवाय की सिद्धि हो गयी। स्वरूप सन्बन्ध वादी मीमांसक शंका करता है कि अयुतसिद्ध गुण द्रव्य का तो स्वरूप सम्बन्ध प्रत्यक्ष सिद्ध ही है फिर उसी को "गुणक्रियादिविशिष्टबुद्धिः" इस विशिष्ट बुद्धि पक्षक अनुमान के द्वारा सिद्ध करना यह नैयायिक के अनुमान में सिद्धसाधन दोष हो जाता है। और नैयायिक के मत से नैयायिक के अनुमान में अर्थान्तर भी हो जाता है। क्योंकि समवाय की सिद्धि उक्तानुमान से नैयायिक करने चला था स्वरूपसम्बन्ध की सिद्धि हो गयी—प्रकृत अर्थ से भिन्न अर्थ की सिद्धि हो जाना यहाँ अर्थान्तर नामक निग्रह स्थान कहलाता है "न च स्वरूपसम्बधेन सिद्ध साधन मित्यादि"। नैयायिक उत्तर करता है कि "रूपवान् घटः" "रूपवान् पटः" "रूपवान् मठः" इत्यादि स्थल में वस्तुवों के अनन्त स्वरूप होने से स्वरूप सम्बन्ध अनन्त मानने पड़ेंगे और उक्त स्थलों में समयाय एक ही मानना पड़ता है क्योंकि समवाय एक है—अतः एक समवाय की सिद्धि हो गई। मीमांसक प्रश्न करता है कि यदि समवाय एक है तो (वायू रूपवान्) यह वायू में रूपवत्ताबुद्धि होनी चाहिये। क्योंकि वायु में स्पर्श का समवाय है जो स्पर्श का समवाय है वही तो रूप का भी है—क्योंकि समवाय आपके (नैयायिक) यहाँ एक है—अथ च "सम्बन्ध सत्ता सम्बन्धिसत्ता नियामिका' जहाँ सम्बन्ध रहता है वहीं उस सम्बन्ध से सम्बन्धी रहता है—ऐसा नियम है—सो वायु में रूप का समवाय स्पर्श को लेकर बैठा है तो समवाय सम्बन्ध से सम्बन्धी रूप की भी प्रतीति अवश्य भी होनी चाहिये। उत्तर नैयायिक करता है कि वायु में रूप का समवाय है—परन्तु सम्बन्धी जो रूप वह वहाँ नही है क्योंकि सम्बन्ध-और सम्बन्धी इन दोनों की सत्ता भी सम्बन्धी की प्रतीति की नियामिका है) अर्थात् जहाँ सम्बन्ध और सम्बन्धी दोनों रहते हैं वहीं तेन सम्बन्धेन सम्बन्धी की प्रतीति होती है। वायु में रूप का सम्बन्ध समवाय अवश्य है परन्तु सम्बन्धी नहीं है। अतः "रूपवान् वायुः" यह प्रतीति नहीं होती है—वही मूल में कहा है कि "नच रूपसमवायसत्त्वेऽपि" इत्यादि।

नित्यसंबन्धत्वमिति। संयोगवारणाय **नित्येति**। आकाशादिवारणाय **संबन्धत्वमिति**। तच्चेहेतिप्रतीतिनियामकत्वम्। अथाऽत्यन्ताभावस्वरूपेऽतिव्याप्तिः, अधिकरणाभावयोः स्वरूपातिरिक्तसंबन्धानभ्युपगमात्। न च संबन्धत्वं संयोगसमवायान्यतरत्वरूपमत्र प्रविष्टमिति नाभावस्वरूपेऽतिव्याप्तिरिति वाच्यम्। घटकीभूतसंबन्धत्वज्ञानं विना लक्षणज्ञानाऽसंभवात्, घटकज्ञानं च समवायज्ञानाधीनमित्यन्योन्याश्रयात् इति चेन्न। संबन्धिभिन्नत्वेनापि विशेषणीयत्वात्। वस्तुतः संबन्धपदं भावविभाजकोपाधिपरम्। नित्यपदं च स्वाश्रयप्रतियोगिकान्योन्याभावासमानाधिकरणधर्मपरम्। स्वाश्रयप्रतियोगिकान्योन्याभावासमानाधिकरणैतद्व्यक्तित्वशालिनि घटादौ विशेष्यविरहान्नातिप्रसंगः। इत्थं च स्वाश्रयप्रतियोगिकान्योन्याभावासमानाधिकरणभावविभाजकोपाधिमत्त्वं नित्यसंबन्धत्वं फलितम्। एतेन संबन्धत्वस्योक्तान्यतरत्वरूपत्वेऽन्योन्याश्रयः, अखण्डोपाधिरूपत्वे समवायत्वस्यैव लाघवेन तथात्वौचित्यादिति निरस्तम्। एवं च संबन्धिभिन्नत्वमनुपादेयमिति ध्येयम्। विशिष्टबुद्धित्वावच्छेदेन साध्यसिद्धिरुद्देश्या, सामानाधिकरण्येन तथात्वे तु संयोगविषयताशालिबुद्धिमादाय सिद्धसाधनप्रसंगात्। गुणक्रियेति स्वरूपकथनम्। गुणादिप्रकारताशालिप्रमेत्यर्थः। विशेष्यविशेषणसंबन्धविषया=विशेष्यवृत्तिगुणादिप्रकारतावच्छेदकसंबन्धविषया, नातो घटो रूपवान् चैत्रश्चलति दण्डी पुरुष इति संमूहालंवनविशिष्टबुद्ध्याद्यादाय सिद्धसाधनम्। वस्तुतो रूपत्वप्रकारकप्रमाविशेष्यत्वं घटवृत्तिरूपे इति ज्ञानमादाय सिद्धसाधनं दुर्वारं तथापि गुणक्रियादिविशिष्टबुद्धित्वावच्छेदेन तथात्वं साध्यमित्यदोषः।

विशिष्टबुद्धित्वादिति। विशिष्टविषयताशालिबुद्धित्वादित्यर्थः। निर्विकल्पकव्यावृत्तविषयताशालिप्रमात्वादिति परमार्थः। अनेन=अनुमानेन। समवायसिद्धिरित्यनेनान्वयः। संयोगादिबाधेन=संयोगसमवायिकारणतावच्छेदकद्रव्यत्वाभावेन, गुणादौ तदसिद्धेरिति भावः। **अर्थान्तरं वेति**। प्रकृतानुपयुक्तसिद्धिविषयोऽर्थस्तदित्यर्थः। तथा च मां प्रति साधनं व्यर्थम्—तव च नेष्टसिद्धिरनेनानुमानेनेति पर्यवसितोऽर्थः।

अनन्तस्वरूपाणामिति। गुणगुण्यादिस्वरूपाणामित्यर्थः। इदमुपलक्षणम्-संबन्धत्वमुक्तस्वरूपद्वये कल्पनीयमतिरिक्ते वेत्यत्र विनिगमकाभावेनापि तत्सिद्धेः। किं च समवायेन जन्यभावत्वावच्छिन्नं प्रति संयोगत्वावच्छिन्नं प्रति वा तादात्म्येन द्रव्यत्वेन हेतुतया तत्सिद्धिः। स्वरूपसंबन्धेन तथात्वोक्तौ तु कालिकादिस्वरूपसंबन्धेन क्रियादेरपि जन्यभावाश्रयतया व्यभिचारः स्यात्।

अथ कालिकादिसंबन्धव्यावृत्तः भावाभावसाधारणः पदार्थमात्रस्याधारतानियामकः कश्चित्संबन्धोऽस्तु-स एव च वैशिष्ट्यम्, अन्यथा तवापि मण्यभावस्य कारणत्वेऽतिप्रसंगस्य दुर्वारत्वात्, तेन च संबन्धेन जन्यभावादेः कार्यत्वान्न प्रागुक्तो दोष इति चेत्। तथापि प्रतियोगितासंबन्धेन घटादिसमवेतरूपादिनाशे स्वप्रतियो-

गिसमवेतत्वसंबन्धेन घटादिनाशत्वेन हेतुतया तत्सिद्धिः। भावाभावसाधारणसंबन्धावच्छिन्नवृत्तित्वस्य समवेतत्वस्थाने निवेशे घटादिवृत्त्यभावादेरपि नाशापत्तेः।

ननु घटादिवृत्तिद्वित्वादिनाशे व्यभिचारवारणाय कालिकादिसंबन्धेन घटनाशविशिष्टघटसमवेतनाशत्वं जन्यतावच्छेदकं वाच्यम्, एवं च घटनाशविशिष्टनाशत्वमेव तथास्तु न तु घटादिसमवेतत्वस्यापि निवेशः। अत्र कार्यतावच्छेदकस्तद्घटकश्च संबन्धः कालिको ग्राह्यः। कारणतावच्छेदकसबन्धोपि तथा। न च घटनाशात्पटनाशं विनापि पटसमवेतरूपादेर्नाशापत्तिः। पटनाशवत्तत्समवेतनाशत्वावच्छिन्नं प्रति पटनाशत्वेनापि हेतुतया तदापत्त्यसंभवादिति चेन्न। ईदृशनानाकार्यकारणभावकल्पनापेक्षया स्वप्रतियोगिसमवेतत्व-कालिकोभयसम्बन्धेन नाशवद्वृत्तिप्रतियोगितासंबन्धेन नाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसमवेतत्वसंबन्धेन नाशत्वेन हेतुताया एव युक्तत्वात्। अथैवमपि मास्तु ध्वंससाधारणः, अत्यन्ताभावान्योन्याभावसाधारणस्तु स्यात् लाघवादिति चेन्न। उक्ताभावयोः समवायांगीकारे चक्षुःसंयुक्तसमवायेनैव तद्ग्रहो वाच्यः। एवं च चक्षुःसंयुक्तविशेषणतायाः कार्यतावच्छेदकमत्यन्ताभावान्योन्याभावभिन्नाभावत्वं वाच्यमिति गौरवम्। ननु ध्वंसचाक्षुषत्वमेव कार्यतावच्छेदकं वाच्यम्। प्रागभावे मानाभावेन तत्संग्रहस्यानुपयोगात्। ध्वंसत्वं चाखण्डोपाधिः। एवं च भावाभावसाधारणसंबन्धाङ्गीकारान्महदुद्भूतरूपवत्समवेतचाक्षुषत्वावच्छिन्नं प्रति महदुद्भूतरूपवच्चक्षुःसंयुक्तःसमवायस्य हेतुत्वे न किंचिद्बाधकम्। एवं गुणादिवृत्तिजात्यभावयोः प्रत्यक्षे एक एव सन्निकर्षो वाच्यः इति चेत्। तथापि परमाणौ महत्त्वाभावादिचाक्षुषोदयेन महत्त्वाभावान्यद्रव्यवृत्त्यभावचाक्षुषे चक्षुःसंयुक्तमहत्त्ववद्विशेषणतायाः रूपाभावान्यद्रव्यवृत्त्यभावचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तोद्भूतरूपवद्विशेषणतायाः हेतुत्वात्, महत्समवेतचाक्षुषे चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवायत्वेन हेतुतयोभयसाधारणवैशिष्ट्यसिद्धौ मानाभावात्। ननु कार्यकारणभावद्वयेपि अभावत्वनिवेशे गौरवात्, लाघवेन तत्तदन्यद्रव्यवृत्तिचाक्षुषत्वं कार्यतावच्छेदकमतो रूपादिप्रत्यक्षमपि वैशिष्ट्येनैवेति चेन्न। द्व्यणुकवृत्तिरूपादौ विषयतया चाक्षुषापत्तिवारणाय संयुक्तांशे महत्त्वनिवेशनमावश्यकम्। एवं च परमाणौ महत्त्वाभावप्रत्यक्षानापत्तिः, महत्संयुक्तवैशिष्ट्यस्याभावात्। तस्मादुक्तकार्यकारणभावद्वयेपि जन्यतावच्छेदककोटौ अभावत्वनिवेशनस्यावश्यकतया न गुणकर्माऽभावप्रत्यक्षसाधारणं तज्जन्यतावच्छेदकं संभवतीति संक्षेपः।

ननु स्वरूपाणामनन्तानामपि तथात्वकल्पनं युक्तम्, अतिरिक्तनानासमवाये तथात्वकल्पनातः क्लृप्ते तत्कल्पनाया एव न्याय्यत्वादित्यत आह **लाघवादिति। एकसमवायसिद्धिरिति।** एकत्वे नित्यत्वं तस्यार्थसिद्धमिति तन्नोक्तम्। **समवायस्यैकत्वे इति।** स्पर्शसमवायरूपसमवायोरेकत्वे इत्यर्थः। तत्र = वायौ। **रूपाभावादिति।** संबन्धिसंबन्धोभयसत्त्वे प्रतीतिसत्त्वमिति

न चैवमभावस्यापि वैशिष्ट्यं सम्बन्धान्तरं सिद्ध्येदिति वाच्यम्, तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गाद्, घटाभावस्य तत्र सत्त्वात्, तस्य च नित्यत्वात्। अन्यथा देशान्तरेऽपि तत्प्रतीतिर्न स्याद्, वैशिष्ट्यस्य च तत्र सत्त्वात्। मम तु घटे पाकरक्ततादशायां श्यामरूपस्य

मीमांसक प्रश्न करता है कि जब अनन्त स्वरूप सम्बन्ध के भय से एक समवाय सम्बन्ध आपने माना तो "घटाभाववद् भूतलम्" इत्यादि घटाभाव स्थल में भी अभाव के अनन्त स्वरूप सम्बन्ध के भय से एक वैशिष्ट्य नामक संबन्धान्तर मान लिया जाय। नैयायिक कहता है कि जिस वैशिष्ट्य नामक संबन्ध को आप हमें मनवाना चाहते हैं वह नित्य है कि अनित्य। यदि नित्य है तो (पहिले भूतल में घट नहीं था बाद में घट ले आये तो) भूतल में घट लाने के बाद भी (अर्थात घटवद् भूतल में भी) "घटाभाववाद् भूतलम्" यह घटाभावबुद्धि होनी चाहिये। (क्योंकि भूतल में घट लाने के बाद भी) घटाभाव वहाँ मौजूद है—(कारण कि) घटाभाव नित्य है। यदि अन्यथा (घटात्यन्ताभाव को अनित्य मानते हो तो) देशान्तर (घटशून्य देश) में भी घटाभाव की प्रतीति नहीं होनी चाहिये। (क्योंकि सामान्यधर्मावच्छिन्नप्रतियोगिता का-भाव एक होता है।) घट लाने पर सर्वत्र भूतल में घटाभाव नष्ट हो गया—अतः घट शून्य-देश में भी घटाभाव प्रतीति नहीं होगी। (प्रत्युत घटाभाव के नाश हो जाने से सर्वत्र भूतल में घटवत्-घटवत्-इत्यादि ही प्रतीति होनी चाहिये) प्रश्न—प्रागुक्तस्थल में घटाभाव के रहने पर भी प्रतियोगि दशा में प्रतियोगी (घट) का वैशिष्ट्य है भूतल में, न कि घटाभाव का—अतः भूतल में घटाभाव बुद्धि नहीं होती है—इस अभिप्राय से कहते हैं कि—"वैशिष्ट्यस्य च तत्र सत्त्वात"। मीमांसक—(जैसे तुम्हारी सिद्धान्ती के (नैयायिक के) मत में भी जहाँ पाक से घट रक्त हो गया, उस स्थल में घट में श्यामरूप का समवाय है, परन्तु श्यामरूपवत्ता बुद्धि नहीं होती है, वैसे ही मेरे (मीमांसक के) मत में भी वैशिष्ट्य के नित्य होने पर भी घटसत्त्व दशा में घटाभावबुद्धि नहीं होती है—अतः हम और तुम दोनों समान हैं फिर हमको तुम क्या उपालंभ देते हो। नैयायिक —(तुममें और हममें यह अन्तर है कि तुम्हारे यहाँ वैशिष्ट्य भी नित्य है—और संबन्धी जो घटाभाव वह भी नित्य है—घट के लाने पर भी दोनों (संबन्ध-संबन्धी) बने हुये हैं अतः घट लाने पर भी तुम्हारे (मीमांसक के) यहाँ "घटाभाववद् भूतलम्" यह प्रतीति होनी चाहिये, और "मम तु घटे पाकरक्ततादशायां" अर्थात् मेरे मत में तो ऐसा है कि घट जब पाक में रक्त हो गया तो श्यामरूप नष्ट हो गया उस काल में श्यामरूपवत्ता बुद्धि नहीं होती है। (क्योंकि संबन्धी की प्रतीति की नियामिका संबन्ध संबन्धी इन दोनों की सत्ता मानी गयी है, सो पाक से जब घट रक्त हो गया तो उस समय घट में श्यामरूप का समवाय है—क्योंकि समवाय एक है घट में जो रक्त का समवाय है वही श्यामरूप का समवाय है—परन्तु सम्बन्धी श्यामरूप नहीं है अतः हमारे मत में "श्यामो घटः" यह प्रतीति नहीं होती है।)

नियमादिति भावः। न च तत्संबन्धसत्त्वे तदसत्त्वमनुपपन्नम्, बाधकाभावात्। रूपवानितिप्रतीत्या रूपत्वावच्छिन्नप्रतियोगिकसमवायाधारताया एव विषयीकर-

णाद्वायौ च विशिष्टाधारताया अनभ्युपगमात्। गुणे गुणान्यत्वविशिष्टसत्तायाः शुद्धसत्तातोऽनतिरिक्तायाः सत्त्वेपि गुणान्यविशिष्टसत्तात्वावच्छिन्नाधारतायास्तत्रानभ्युपगमात्।

ननु घटो रूपवानितिबुद्धौ यथा भासमानविशेषणविशेष्यसंबन्धोऽतिरिक्तोभ्युपेयते तथा घटाभाववद्भूतलमित्यादिप्रतीतावपि विशेषणविशेष्ययोः संबन्धोभ्युपगन्तव्यः, तथा च कथमभावाधिकरणयोः स्वरूपसंबन्ध इति राद्धान्त इत्याशंकते **नचेति**।

एवं = अनन्ताधिकरणानां संबन्धत्वकल्पनागौरवभियाऽतिरिक्तसंबन्धांगीकारे। **संबन्धान्तरमिति** स्वरूपसंबन्धव्यवच्छेदाय। वैशिष्टयमेकमनेकं वा। एकमपि नित्यमनित्यं वा। तत्र आद्ये आह **तस्य नित्यत्वे इति**। तस्य=वैशिष्ट्यस्य, तस्येत्मकवचनेन वैशिष्ट्यस्यैकत्वमुक्तम्। विषयसत्त्वमुपपादयति **घटाभावस्येति**। तत्र= भूतले। तस्य = घटाभावस्य। अन्यथा=घटाभावस्याऽनित्यत्वे। घटानयनेन घटात्यन्ताभावस्य नाशे इति यावत्। देशान्तरेपि=घटदेशभिन्नदेशेपि। तत्प्रतीतिः=घटाभावबुद्धिः। **न स्यादिति**। घटत्वावच्छिन्नात्यन्ताभावस्यैकत्वादिति भावः। ननु तत्र घटाभावसत्त्वेपि प्रतियोगिदशायां न वैशिष्ट्यमिति नाभावप्रत्यय इत्यत आह **वैशिष्टयस्येति**। तत्र=पूर्वं। घटात्यन्ताभावप्रतीतिनियामके घटवति भूतले। **सत्त्वादिति**। अन्यथा घटानयनात्पुरापि तत्प्रत्ययो न स्यात्, तत्स्वीकारेऽन्यदापि तत्प्रत्ययापत्तिरिति भावः। ननु तत्रात्यन्ताभाववैशिष्ट्ययोरुभयोः सत्त्वेपि घटवत्ताज्ञानेन प्रतिबन्धान्नात्यन्ताभावप्रत्यय इति चेन्न। एवमपि घटज्ञानविरहकाले तत्र घटात्यन्ताभावबुद्ध्यापत्तेर्दुर्वारत्वात्। न चेष्टापत्तिः। तदानीं घटाभावबुद्धेः प्रमात्वापत्तेः, तत्रापीष्टापत्तौ तत्र घटाभावव्यवहारकर्तुरनाप्तत्वापत्तेः। अथ चक्षुःसंयुक्तविशेषणतायास्तत्तद्भावस्वरूपाया अननुगततया एककार्यकारणभावानुपपत्तेः, लाघवेन संबन्धान्तरं सर्वाऽभावसाधारणमस्तु। न च घटकाले पटाभावसन्निकर्षदशायां पटाभावचाक्षुषवद् घटाभावस्यापि चाक्षुषापत्तिरिति वाच्यम्। केवलमभावचाक्षुषस्यालीकतया आपादनाऽसंभवात्। घटाभावचाक्षुषस्यापि नापत्तिः संभवति, भवदुक्तस्वरूपसंबन्धेन घटाभावस्य तत्राभावेन स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकघटाभावाभाववत्ताधिय एव तद्बुद्धौ प्रतिबन्धकत्वात्। न चैतादृशबुद्ध्यभावदशायां तदापत्तिः, इष्टापत्तौ तद्ज्ञानस्य प्रमात्वापत्तिरिति वाच्यम्। तत्कालावच्छेदेन विशिष्टबुद्धिनियामकसंबन्धेन तद्वति तत्कालावच्छेदेन तेन संबन्धेन तदवगाहिज्ञानस्य प्रमात्वेनोक्तज्ञानस्य प्रमात्वाऽसंभवादिति चेन्न। संबन्धान्तरकल्पनायां मानाभावात्। तत्तदभावरूपस्वरूपसंबन्धस्य भेदेपि सम्बन्धतावच्छेदकीभूतस्याऽभावत्वस्यैकत्वेनैककार्यकारणभावोपपत्तेः। न चैवमभाववानितिशाब्दप्रतीतिविषयतायाः कारणतावच्छेदकसंबन्धत्वस्यैकनिष्ठत्वकल्पनायाश्च लाघवेनैकसंबन्धसिद्धिरिति वाच्यम्। ईदृशसंबन्धसिद्धावप्यस्माकमाग्रहाभावात्, घटत्वावच्छिन्नप्रतियोगिताकाभावप्रकारकप्रतीतिनियामकसंबन्धस्यैवाऽतिरिक्ततानिरासादित्यलम्।

नष्टत्वान्न तद्वत्ताबुद्धिः । वैशिष्ट्यस्यानित्यत्वे त्वनन्तवैशिष्ट्यकल्पने तवैव गौरवम् । इत्थं च तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां सम्बन्धः ॥११॥

अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥ १२ ॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ।

वैशिष्ट्य को यदि अनित्य मानते हो तो (इससे भूतल में घट लाने के बाद घटाभावबुद्धि क्यों नहीं होती है यह पूर्वदोष तो वारित हो जायगा—क्योंकि घट लाने पर घट का सम्बन्ध भूतल में हो गया—घटाभाव का संबन्ध नहीं रहा सो संबन्ध के विना संबन्धी जो घटाभाव उसकी प्रतीति कैसे होगी । परन्तु अनन्त वैशिष्ट्य की कल्पना करने में तुम्हें ही गौरव होगा । इस प्रकार जिस २ वस्तुवों का अभाव जिस काल में जिस भूतल में है—तत्तत्कालीन जो तत्तद्-भूतल वही अभाव का संबन्ध है—(इसी को स्वरूप संबन्ध कहते हैं, नैयायिक लोग अभाव का स्वरूप संबन्ध ही मानते हैं) ।

अभाव का विभाग करते हैं—"अभावस्तु" इत्यादि ग्रन्थ से । अभाव दो प्रकार का है संसर्गाभाव—अन्योन्याभाव भेद से । संसर्गाभाव तीन प्रकार है—प्रागभाव—ध्वंस—अत्यन्ताभाव, यह कारिका का अर्थ हुआ । द्रव्यं न, गुणो न, कर्म न, सामान्यं न, विशेषो न,

---

ननु समवायस्यैकस्य नित्यस्याभ्युपगमे घटस्य रक्तादशायामपि श्याम-रूपवानिति प्रत्ययप्रसंगः, तत्समवायस्य सत्त्वात् । असत्त्वे घटो रक्तरूपवानिति प्रत्ययानापत्तेः । स च समवायो नाना, तथात्वेपि तत्समवायस्य सत्त्वेनापत्ते-र्दुर्वारत्वात् । न च पाकाच्छ्यामनाशकाल एव तत्समवायोपि नश्यतीति वाच्यम् । अपसिद्धान्तात् । अतिरिक्तनानासंबन्धकल्पनातः क्लृप्तस्वरूपसंबन्धेन निर्वाहे समवायोच्छेदप्रसंगात् । न च विजातीयरूपप्रतियोगिका एव समवाया नाना कल्प्यन्ते, तत्तत्सजातीयनानारूपाणां तथात्वकल्पनायां गौरवमिति वाच्यम् । यत्र पाकाद् घटे पूर्वश्यामरूपनाशे श्यामरूपोत्पत्तिः तत्रैतत्श्यामरूपसमवायस्य नष्ट-श्यामरूपसमवायादभिन्नतया तत्तद्दशायामपि तच्छ्यामरूपवानितिप्रत्ययापत्तेर्दुर्वा-रत्वादित्यत आह **मम त्विति** । न तद्वत्ताबुद्धिः=न श्यामरूपवत्ताबुद्धिः, प्रत्यये विषयस्य हेतुत्वादिति भावः । अयं भावः—रक्तसमवायश्यामसमवाययोर्भेदे "रक्त-घटे श्यामरूपवानिति" प्रत्ययापादनम्, अभेदे वा ! आद्ये श्याम इति प्रत्ययो नासिद्धः इदानीं श्याम इति प्रत्ययस्य श्यामरूपनाशात् श्यामे एतत्कालावच्छेदेन घटवृत्तित्वाभावेनाऽसंभवात् । द्वितीये श्यामसमवायस्यापि कालिकाव्याप्यवृत्तित्वे बाधकाभावेन इदानीं श्याम इति प्रत्ययापादनाऽसभवात् । तव तु वैशिष्ट्यात्यन्ता-भावयोर्नित्ययोर्घटकालावच्छेदेनापि भूतलवृत्तितया घटात्यन्ताभावप्रत्ययापत्तेर्दुर्वा-

अभावं विभजते-अभावस्त्विति। अभावत्वं द्रव्यादिषट्काऽन्योन्याभाववत्त्वम्। संसर्गेति। संसर्गाभावान्योन्याभावभेदादित्यर्थः। अन्योन्याभावस्यैकविधत्वात्तद्विभागाभावात्संसर्गाभावं विभजते—प्रागभाव इति। संसर्गाभावत्वम् अन्योन्याभावभिन्नाभावत्वम्। अन्योन्याभावत्वं तादात्म्यसम्ब-

समवायो न, इत्यादि जो द्रव्यादिषट्क का अन्योन्याभाव, अभाव हुवा और तादृशान्योन्याभावत्व अभावत्वरूप हुआ। (मूल कारिका में अभावपद का संसर्ग के साथ भी अन्वय है—इसी अन्वय के बल से संसर्गाभाव यह अर्थ निकला) वही मुक्तावली में लिखा है कि संसर्गाभाव—अन्योन्याभाव के भेद से (अभाव दो प्रकार का है)। अन्योन्याभाव एक ही प्रकार का है अतः उसका विभाग नहीं किया। संसर्गाभाव का विभाग करते हैं "प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च" इस ग्रन्थ से। अन्योन्याभाव से भिन्न जो अभाव वह तो संसर्गाभावरूप हुआ और तादृशाभावत्व संसर्गाभावत्वरूप हुवा। जिस अभाव की प्रतियोगिता तादात्म्य संबन्ध (अभेद संबन्ध) से अवच्छिन्ना हो वह अन्योन्याभाव है। जैसे "घटः पटो न"। जिस

त्त्वात्। ननु घटानयनेपि मन्मते न तदानीं घटाभावप्रत्ययः, घटकालावच्छेदेन तस्य भूतले वृत्तित्वानभ्युपगमात्, अनुभवानुरोधेन तथैव कल्पनादिति चेत्, समीहितमेतदस्माकम्—घटाकालान्यकालेपि घटात्यन्ताभावस्वरूपेणैव प्रत्ययसंभवे वैशिष्ट्यविषयतायां मानाभावात्। न च समवायेपि तुल्यम्। न तावत्तत्तद्रूपाणां संबन्धत्वेपि समवायं विना निर्वाहः, घटो नीलरूपवान् पृथिवी नीलरूपवतीत्याकारकप्रत्यक्षविषयत्वेन लाघवान्नीलत्वाद्यवच्छिन्नप्रतियोगिकैकसंबन्धसिद्धेः। यद्धर्मावच्छिन्नप्रतियोगिताकः समवायः स तद्धर्मावच्छिन्नप्रकारकबुद्धावेव नियामको नान्यबुद्धौ, तेनैतद्घटे नीलान्तरसमवायस्य सत्त्वेपि नायं घटस्तन्नीलवानिति प्रत्यय इति ध्येयम्। द्वितीये त्वाह **वैशिष्ट्यस्यानित्यत्वे इति**। तथाच स्वरूपसंबन्धकल्पनैव लघीयसीति भावः। ननु मण्यानयनेपि दाहापत्तिः, मण्यभावस्वरूपस्य प्रागिवेदानीमपि नित्यतया सत्त्वादित्यत आह **इत्थं चेति**। अभावसंबन्धसंबन्धस्य नित्यत्वानित्यत्वाभ्यामनिर्वाहे चेत्यर्थः। **तत्तत्कालीनेति**। यस्मिन्-यस्मिन् काले घटाभावबुद्धिर्जायते तत्तत्कालीनेत्यर्थः। प्रतियोगिकालान्यकालीनेत्यर्थः। प्रतियोगिकालावच्छेदेन तदधिकरणं नाभावस्य संबन्ध इति पर्यवसितोर्थः। यस्मिन् यस्मिन् भूतले घटाभावबुद्धिर्जायते तत्तद्भूतलादिकमित्यर्थः। यस्य यस्याभावस्य बुद्धिर्जायते तत्तदभावानामित्यर्थः। अत्रेदं बोध्यम्—यदधिकरणे प्रतियोगिसंबन्धस्तस्मिन्नात्यन्ताभावसंबन्धत्वं कल्प्यते, अधिकरणान्तरेपि तदभावप्रत्ययेनाधिकरणान्तरस्यापि संबन्धत्वकल्पने गौरवप्रसंगात्, तत्तदधिकरणे विशिष्टबुद्धिनियामकसंबन्धत्वं तत्तत्प्रतियोगिसंबन्धकालान्यकालावच्छेदेन तदत्यन्ताभावस्वरूपे कल्प्यते लाघवादिति विभावनीयम्।

न्धावच्छिन्नप्रतियोगिताकाभावत्वम्। विनाश्यभावत्वं प्रागभावत्वम्। जन्याभावत्वं ध्वंसत्वम्। नित्यसंसर्गाभावत्वम् अत्यन्ताभावत्वम्।

अभाव का विनाश हो जावे उसे प्रागभाव कहते हैं—जैसे "इह कपाले घटो भविष्यति"। कपाल में घट उत्पन्न होने के बाद "भविष्यति" का विनाश हो जावेगा—अर्थात् घटोत्पत्ति होने के बाद फिर "भविष्यति" यह प्रागभाव की प्रतीति कपाल में नहीं होगी। जन्य (उत्पन्न होने वाला) जो अभाव उसे ध्वंस कहते हैं। जैसे "इह कपाले घटो ध्वस्तः" घट पर मुद्गर प्रहार कर देने से घटध्वंस की उत्पत्ति हो गयी—अतः ध्वंस जन्य अभाव सिद्ध हुवा। नित्य जो संसर्गाभाव वह अत्यन्ता भाव है। (आशय यह है कि यद्यपि सम्बन्धमात्र का संसर्ग है—तथापि प्रकृत में (अत्यन्ताभाव के लक्षण में) "संसर्ग" पद से वृत्तिता नियामक सम्बन्ध को ही लेना चाहिये। वृत्तिता नियामक सम्बन्ध वह होता है, जो आधाराधेयभाव का नियामक हो जैसे 'संयोग' समवाय - आदि। अन्योन्याभाव की प्रतियोगिता तादात्म्य सम्बन्ध से अवाच्छिन्ना होती है। तादात्म्यसम्बन्ध वृत्ति नियामक नहीं है। और ध्वंस—प्रागभाव की व्यावृत्ति नित्यपद से हो गयी—क्यों कि ध्वंस-प्रागभाव-संसर्गाभाव हैं—परन्तु वे नित्य नहीं हैं। अतः नित्य जो संसर्गावच्छिन्न (वृत्तिनियामक सम्बन्धा वच्छिन्न) प्रतियोगितानिरूपक अभाव उसे अत्यन्ताभाव कहते है।

द्रव्यादिषट्केति। अथ द्रव्यादिषट्कत्वावच्छिन्नप्रतियोगिताकभेदो द्रव्यादिष्वपीत्यतिप्रसंगः। न च स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नभेदवत्त्वं द्रव्यत्वाद्यवच्छिन्नप्रतियोगिताकभेदकूटवत्त्वं वा तदिति वाच्यम्। भेदत्वस्याऽभावत्वघटितत्वेनात्माश्रयादिदोषात्। यत्तु षट्कत्वस्य ज्ञानविशेषविषयत्वरूपस्य द्वित्वादिवद्व्यासज्यवृत्तित्वाभावान्नोक्तदोष इति, तदसत्-एको न द्वाविति प्रतीतिवद् द्रव्यं न षट्-गुणो न षट् इति प्रतीतिबलेन तदभ्युपगमस्यावश्यकत्वादिति।

मैवम्। समूहालंबनविशेषविषयत्वं तद्व्यक्तित्वेनोपादाय तद्व्यक्तित्वावच्छिन्नस्वरूपसंबन्धावच्छिन्नावच्छेदकताकतादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकत्वसंबन्धेन तद्व्यक्तिमत्त्वस्यैव लक्षणत्वात्। तादृशप्रतियोगिताकवत्ता च स्वरूपेण, सप्तमपदार्थस्यैव लक्ष्यतया न स्वाभावाभावात्मके घटादावव्याप्तिः शंकनीया। न च द्रव्यादिषट्कभेदेऽव्याप्तिः, द्रव्यादिषट्कभेदो द्रव्यादिषट्कं नेति प्रतीतितस्तत्सिद्धेः। न चानवस्था दोषाय, प्रामाणिकत्वादिति दिक्। तादात्म्येन द्रव्यादिषट्कप्रतियोगिकवत्त्वं तदित्यपरे।

असमवेतासमवायिवृत्तिस्वाश्रयप्रतियोगिकभेदसमानाधिकरणधर्मवत्त्वमभावत्वम्। असमवायिवृत्तीत्यस्य समवाय्यवृत्तित्वमर्थः। विशेषाणामसमवायिवृत्तिस्वाश्रयप्रतियोगिकभेदसमानाधिकरणविशेषत्ववत्त्वेपि विशेषत्वस्याऽसमवेतवृत्तित्वाभावान्नातिप्रसंगः। परमाण्वादिलक्षणाऽसमवेतवृत्तिस्वाश्रयप्रतियोगिकभेदसमाना-

धिकरणपृथिवीत्वादिधर्मवत्त्वेपि समवाय्यवृत्तित्वाभावान्नोक्तदोषः। समवायत्वं च न स्वाश्रयप्रतियोगिकभेदसमानाधिकरणमिति न समवायातिप्रसंगः।

मूले-**संसर्गान्योन्याभावभेदत इति**। संसर्गश्चान्योन्यश्च संसर्गान्योन्यौ तयोरभावस्तस्य भेदस्तस्मात्। द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते इति न्यायलब्धमर्थमाह **संसर्गाभावान्योन्याभावभेदादिति**। भेदेतिप्रसंगवारणायाऽन्योन्याभावभिन्नेति। घटादावतिव्याप्तिवारणायाऽ**भावत्वमिति**। वस्तुतस्तु संसर्गाभावत्वमखण्डोपाधिरेव। न चान्योन्याभावभिन्नाभावत्वं तत्, अन्योन्याभावत्वस्य दुर्निरूप्यत्वात्। न च तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावत्वम्, समवायितादात्म्यस्य समवायाभिन्नतया समवायवत्प्रतियोगिकसंसर्गाभावेऽतिव्याप्तेः। न च संबन्धविधया तादात्म्यनिष्ठावच्छेदकता निवेश्या, तथापि समवायसंबन्धावच्छिन्नसमवायावच्छिन्नप्रतियोगिताकाभावेऽतिव्याप्तेर्दुर्वारत्वात्। एवमन्योन्याभावत्वमप्यखण्डोपाधिरिति ध्येयम्। **विनाशीति**। इदं च भेदध्वंसात्यन्ताभावेषु अतिप्रसंगवारणाय। जन्यभावेऽतिव्याप्तिवारणायाऽ**भावत्वमिति**। विनाशित्वविशिष्टाभावत्वमर्थः। इदं चाभावत्वं सप्तमपदार्थमात्रवृत्तिप्रविष्टम्, तेन नोक्तदोषतादवस्थ्यम्। विनाशित्वं च ध्वंसप्रतियोगित्वम्।

नव्यास्तु प्रागभावे मानाभावः। न च तत्प्रत्यक्षम्। इह घटप्रागभाव इति प्रत्ययस्य वासनाकल्पिततया तदसाधकत्वात्। भविष्यतीतिप्रत्ययस्य वर्तमानकालोत्तरकालोत्पन्नत्वविषयकतया निर्वाहेण तथात्वात्। अभावत्वं विनाशिवृत्ति पदार्थविभाजकोपाधित्वादित्यनुमानस्याऽप्रयोजकतया तदसिद्धेः। **स्यादेतत्**। उत्पन्नस्य पुनरुत्पादवारणाय तदभ्युपगमो दुर्वारः। तदानीमपि सामग्र्या अक्षतत्वात्। न च तदुत्पादोत्तरकालीनतदुत्पादरूपपुनरुत्पादस्याप्रसिद्धतयाऽऽपादनाऽसंभवः, घटाद्युत्पत्तिद्वितीयक्षणः यद्येतद्घटसामग्र्यव्यवहितोत्तरः स्यात्तदा घटाद्युत्पादवान् स्यादित्याकारकापत्तेः संभवात्। न चेहाप्रसिद्धिरिति चेत्। सत्यम्। संभवति तदेदं यदि सामग्र्यव्यवहितोत्तरत्वं तदुत्पादव्याप्यम्, तत्रैव मानाभावात्, किन्तु तद्वत्ताव्याप्यमेव। एवं चोक्तापादकेन द्वितीयादिक्षणे तद्वत्तैवापादनीया न चेयमनिष्टावहा। अथवोत्पत्त्यन्तर्भावेन व्याप्तिरस्तु-तथापि न घटोत्पत्तिक्षणे तदुत्पादः, किन्तु जन्यद्रव्यत्वावच्छिन्नं प्रति द्रव्यत्वेन प्रतिबन्धकतया प्रतिबन्धकाभावरूपहेत्वभावेनैव तदनुत्पत्तेः, अनन्तप्रागभावानां हेतुहेतुमद्भावकल्पनापेक्षया ईदृशकल्पनाया एवोचितत्वात्। न च महाघटनाशानन्तरं यत्र खण्डघट उत्पद्यते तत्र खण्डघटोत्पत्तिकाले तद्घटापत्तिः, कार्याव्यवहितप्राक्कालावच्छेदेन प्रतिबन्धकाभावहेतोः सत्त्वादिति वाच्यम्। तत्र यादृशारंभकसंयोगनाशाद् घटो नष्टः तादृक्संयोगव्यक्तेरेव हेतुत्वोपगमेन नापत्तिगन्धोपि। न च यत्र सहस्रतन्त्वारब्धपटस्य विंशतितन्तुसंयोगनाशानन्तरं खण्डपट उत्पद्यते, तत्र खण्डपटोत्पत्तिकाले तत्पटोत्पादवारणाय विंशतिसंयोगानां हेतुत्वकल्पनापेक्षया

यत्र तु भूतलादौ घटादिकमपसारितं पुनरानीतं च तत्र घटकालस्य सम्बन्धाघटकत्वादत्यन्ताभावस्य नित्यत्वेऽपि घटकाले न घटात्यन्ताभावबुद्धिः। तत्रोत्पादविनाशशाली चतुर्थोऽयमभाव इति केचित्। अत्र ध्वंसप्रागभाव-

जहां भूतल में घट को हटा लिया और फिर ले आये वहां घटकाल सम्बन्ध (घटाभाव-सम्बन्ध) का आधारक है। अभिप्राय यह है कि (जिस काल में जिस भूतल में घटाभाव बुद्धि होती है —वह जो घटाभाव कालीन भूतल वही तो घटाभाव का सम्बन्ध है। अतः उस घटा-भाव सम्बन्ध का वटाभाव काल ही घटक है—न कि घटकाल घटाभाव के सम्बन्ध का घटक है) वही कहा है कि "घटकालस्य सम्बन्धाघटकतया" अर्थात् घटकाल घटाभाव के सम्बन्ध का अघटक होने से अत्यन्ताभाव के नित्य होने पर भी घटस्थितिकाल में "अत्र भूतले घटो नास्ति" ऐसी घटात्यन्ताभाव बुद्धि नहीं होती। कोई लोग ऐसी स्थिति होने पर उत्पाद विनाशशाली सामयिक नामक चतुर्थ अभाव मानते हैं। यहां (अभावों के विषय में) प्राचीन नैयायिकों का

तत्प्रागभावहेतुत्वकल्पनमेव साधीय इति वाच्यम्। तत्र तादृशपटत्वावच्छिन्नं प्रति तत्पटनाशत्वेन प्रतिबन्धकत्वकल्पनादिति वदन्ति।

तच्चिंत्यम्। तत्पटत्वावच्छिन्नं प्रति तत्पटनाशत्वेन जन्यद्रव्यत्वावच्छिन्नं प्रति द्रव्यत्वेन च प्रतिबन्धकत्वकल्पनागौरवेण तत्पटं प्रति तत्पटप्रागभावत्वेन हेतुत्वकल्पनायां लाघवादिति ध्येयम्।

अपसारितमिति। अत्र पुनरानीतमित्येतावतैव निर्वाहेऽस्य कथनं वक्ष्यमाणसामयिकात्यन्ताभावस्योत्पादविनाशयोर्घटापसारणानयने कारणमिति बोधयितुम्। **घटकालस्य संबन्धाघटकतयेति।** अत्यन्ताभावस्य भूतले वृत्तौ घटाऽकालीनात्यन्ताभावस्वरूपस्य संबन्धतया घटकालस्य संबन्धाघटकत्वादित्यर्थः। घटकालस्य तद्भूतलेऽभाववृत्तावनवच्छेदकत्वादिति पर्यवसितोर्थः। न च तत्तत्कालानां तत्तदभावतत्तद्भूतलयोः संबन्धत्वमस्तु, किमभावादीनां संबन्धत्वकल्पनयेति वाच्यम्। भूतलं घटाभाववदित्याकारकघटाभाववन्निखिलभूतलविषयकज्ञानस्याऽनेकतत्तत्कालादिरूपसंबन्धविषयकत्वे गौरवात्, लाघवेन घटत्वावच्छिन्नप्रतियोगिताकाभावत्वविशिष्टे एव संबन्धत्वकल्पनात्। एवं चात्यन्ताभावस्य नित्यतया घटकाले भूतलं घटाभाववदितिप्रतीताविष्टापत्तावपि इदानीं भूतलं घटाभाववदिति प्रतीतिवारणाय तद्भूतले घटात्यन्ताभावस्य वृत्तौ तद्भूतलघटसंयोगान्यकालस्यावच्छेदकत्वं कल्प्यते गत्यन्तरविरहादिति। **तत्र**=यत्र भूतलादौ घटादिकमपसारितं पुनरानीतं च तत्रेत्यर्थः। **उत्पादविनाशशालीति।** प्रतियोगिसंसर्गेण प्रतियोगिसंसर्गध्वंसेन चोत्पादविनाशशालित्वमभावस्येत्यर्थः। **चतुर्थोयमिति।** चतुर्थोयं संसर्गाभाव इत्यर्थः। केचिदित्यस्वरसस्तद्बीजं तु प्रमाणाभावः। प्रसंगादाह- **अत्रेति।** अस्य

योरधिकरणे नात्यन्ताभाव इति प्राचां मतम्। श्यामघटे रक्तो नास्ति रक्तघटे श्यामो नास्तीतिधीश्च प्रागभावं चावगाहते न तु तदत्यन्ताभावं तयोर्विरोधात्। नव्यास्तु तत्र विरोधे मानाभावाद् ध्वंसादिकालावच्छेदेना-

यह सिद्धान्त है कि ध्वंस-प्रागभाव के अधिकरण में अत्यन्ताभाव नहीं रहता है। प्रश्न—तब फिर श्याम घट में "रक्तो नास्ति" रक्तघट में "श्यामो नास्ति" यह बुद्धि कैसे होती है—क्यों कि श्यामघट में रक्तरूप का प्रागभाव है, रक्तघट में श्यामरूप का ध्वंस है। उत्तर—श्यामघट में रक्तो नास्ति यह जो बुद्धि होती है इसका अर्थ है "रक्तो भविष्यति" अत यहां नास्ति का अर्थ है प्रागभाँव, और रक्तघट में जो "श्यामो नास्ति" यह बुद्धि होती है इस नास्ति का अर्थ है "श्यामो ध्वस्तः" अतः यहां नास्ति से ध्वंस का ग्रहण है—अन्यताभाव का ग्रहण नहीं है—क्योंकि अत्यन्ताभाव के साथ ध्वंस प्रागभाव का विरोध होने से वही मूल में कहा है कि "न तु तदत्यन्ताभावं तयोर्विरोधात्" इत्यादि। नवीन कहते हैं कि ध्वंस-प्रागभाव के साथ अत्यन्ताभाव के विरोध में कोई प्रमाण नहीं है—अतः ध्वंसप्रागभाव काल में भी अत्यन्ताभाव रहता है।

मतमित्यनेनाऽन्वयः। **ध्वंसप्रागभावयोरिति।** ध्वंसपदस्याल्पाच्तरत्वेन पूर्वं-मुक्तिः। ध्वंसाधिकरणे प्रागभावाधिकरणे च नात्यन्ताभाव इत्यर्थः। एतन्मतेऽत्य-न्ताभावस्य त्रितयप्रतियोगिकत्वांगीकाराद्विरोधः। न च रूपात्यन्ताभावस्य घटा-वृत्तित्वप्रसंगः। इष्टापत्तेः, वाय्वादौ तद्वृत्तित्वाभ्युपगमात्, अविरोधे प्रागभाव-ध्वंसयोरत्यन्ताभावौ पृथक् स्वीकार्यौ, विरोधे तु प्रतियोग्यत्यन्ताभावात्मकावेवेति तेषामाशयः। ननु रक्तरूपप्रागभाववति श्यामघटे कथं रक्तो नास्तीति धीः, कथं वा श्यामरूपध्वंसवति रक्तघटे श्यामो नास्तीतिधीरित्यत आह **श्यामघटे इति। रक्त इति।** "गुणे शुक्लादयः पुंसि गुणिलिंगास्तु तद्वती"त्यनुशासनात्पुंस्त्वेना-भिधानम्।

प्रतियोगिदशायां घटो नास्तीत्यप्रतीत्या प्रतियोगिनोऽत्यन्ताभावविरोधित्व-मुभयवादिसिद्धम्, प्रकृते तु ध्वंसादिकालावच्छेदेनाऽत्यन्ताभावोल्लेखिन्याः नास्तीति-प्रतीतेरन्यविषयकत्वोपपादनमशक्यम्। न च ध्वंसप्रागभावविषयकत्वसंभवः। पूर्वरक्तध्वंससमानाधिकरणभाविरक्तप्रागभावसमानाधिकरणश्यामरूपदशायां रक्तं रूपं नास्तीतिप्रतीतेर्विषयोपपादनाऽसंभवात्। न चेयं प्रतीतिः पूर्वरक्तध्वंसमव-लंबते, तथासति पूर्वापररक्तिमध्वंसप्रागभाववति इदानीमपि रक्ततादशायां रक्तं रूपं नास्तीतिप्रतीतेर्दुर्वारत्वादित्याशयेनाह **नव्यास्त्विति।** तत्र=ध्वंसप्रागभावयोः। **मानाभावादिति।** युक्तं चैतत्, अन्यथा पूर्वापररक्तरूपसमानाधिकरणविद्यमान-रक्तरूपदशायामपि रक्तो नास्तीति प्रतीत्यापत्तिः। एवं चाऽनायत्या तयोरत्यन्ताभावौ पृथगेव। लाघवेनात्यन्ताभावस्यैक्ये संयोगात्यन्ताभावादेरपि द्रव्यत्वात्यन्ताभावाऽ-भेदप्रसंगेन द्रव्ये संयोगात्यन्ताभावाऽसिद्ध्यापत्तेः, रूपत्वावच्छिन्नोत्पत्तेः पूर्वं

प्यत्यन्ताभावो वर्त्तत इति प्राहुः। नन्वस्तु अभावानामधिकरणात्मकत्वं लाघवादिति चेद्? न, अनन्ताधिकरणात्मकत्वकल्पनाऽपेक्षयाऽतिरिक्त-

प्रश्न—(वेदान्ती तथा प्रभाकर वगैरह मीमांसक लोग कहते हैं कि) अभावों को अधिकरण स्वरूप ही मान लिया जावे—लाघव होने से। (वेदान्ती वगैरह का कहना है कि अभाव अधिकरण से अतिरिक्तवस्तु नहीं है, अपितु जिस अधिकरण में अभाव की प्रतीत होती है—अर्थात् "घटवद् भूतलम्" यहां अधिकरण की सत्ता से अतिरिक्त अभाव की कोई सत्ता नहीं है—अतः भूतल का कैवल्य ही अभाव का स्वरूप है ऐसा मानने में यह लाघव भी है कि "घटाभाववद् भूतलम्" इत्यादिस्थल में अधिकरण जो भूतल आदि हैं वे तो पहिले से निश्चित ही हैं—अतः उनकी सत्ता तो माननी ही पड़ेगी - परन्तु अभाव की स्वतंत्र सत्ता नहीं माननी पड़ती है।

उत्तर—नैयायिक कहता है कि "अनन्ताधिकरणात्मकत्वकल्पनापेक्षया अतिरिक्त कल्पनाया एव लघीयस्त्वात्" अर्थात् अभाव को अनन्त अधिकरण स्वरूप मानने की अपेक्षया, अभाव को अधिकरण से अतिरिक्त मानने में ही लाघव है। क्योंकि "घटाभाववद्भूतलम्" यहां पर घटाभाव को जैसे भूतलस्वरूप माना ऐसे ही "घटाभाववान् पटः "घटाभाववान् मठः" इत्यादि स्थलों में पट मठ आदि जो अनन्त अधिकरण-तत्स्वरूप अभाव को मानना पड़ेगा इसमें महान् गौरव होगा। और दूसरी बात यह है कि घटाभाव "घटत्व" रूप जो सामान्य धर्म—तादृश सामान्यधर्मा वच्छिन्न प्रतियोगिता काभावरूप है—अथ च सामान्यधर्मावच्छिन्न प्रतियोगिताकाभावरूप है-अथ च सामान्यधर्मावच्छिन्न प्रतियोगिताकाभाव एक होता है तथा नित्य होता है। अधिकरणस्वरूप मानने से घटात्यन्ताभाव को अनन्त तथा अनित्य मानना होगा—क्योंकि अधिकरण अनित्य हैं, तथा अनन्त हैं।

रूपत्वावच्छिन्नाभावस्य प्रतिबन्धकाभावविधया हेतोः स्वीकारावश्यकतया तयोरत्यन्ताभावेन सह विरोधाऽसंभवाच्च। न च रूपप्रतियोगिकाभावत्वेन तत्र हेतुत्वम्। उभयाभावस्य तत्तद्रूपाभावस्य च रूपवति सत्त्वेन रूपोत्पादापत्तेः। न च रूपत्वावच्छिन्नप्रतियोगिताकाभावत्वेन हेतुत्वेपि रूपत्वेन घटाभावस्य तत्र सत्त्वादापत्तिः। रूपप्रतियोगिकत्वस्यापि कारणतावच्छेदककोटौ प्रवेशात्, व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावे मानाभावात्यवधेयम्।

प्राभाकरः शंकते **नन्विति। अभावानां** = ध्वंसप्रागभावात्यन्ताभावभेदानाम्। **अधिकरणात्मकत्वमिति**। न च तेषामधिकरणात्मकत्वे तत्तदभावप्रत्ययानामवैलक्षण्यापत्तिः, विषयैक्यादिति वाच्यम्। अतिरिक्तानां प्रागभावत्वादीनां कालिकाव्याप्यवृत्तितया तदधिकरणेष्वभ्युपगमेन प्रतीतिवैलक्षण्यसंभवात्। न चाऽतिरिक्ता अभावा एव कल्प्यन्ताम्। तत्कल्पनेपि सर्वध्वंसाद्यनुगतप्रत्ययोपपादनाय तत्कल्पनाया आवश्यत्वात्। एवं च धर्म्यैकल्पनाप्रयुक्तलाघवमस्मन्मते। **लाघवादिति**।

कल्पनाया लघीयस्त्वात् । एवं च आधाराधेयभावोऽप्युपपद्यते । एवं च तत्तच्छब्दगन्धरसाद्यभावानां प्रत्यक्षत्वमप्युपपद्यते । अन्यथा तत्तदधि-

"एवञ्च" इस प्रकार (अभाव को यदि अधिकरणस्वरूप नहीं मानते हैं तो घटाभाव वद् भूतलम्) यहाँ पर आधार-आधेयभाव भी उपपन्न हो जाता है (क्योंकि घटाभाव आधेय है और भूतल उसका आधार है) अन्यथा (अभाव को अधिकरण से अतिरिक्त नहीं मानेंगे तो) आधाराधेयभाव नहीं बनेगा-क्योंकि तब "घटाभावो भूतलम्" यह प्रतीति होगी यहाँ कौन आधार है, कौन आधेय है यह नहीं मालूम हो सकता है। "एवं च" और इस प्रकार (अभाव को अधिकरणस्वरूप मानने से) "तत्तत" उन-उन शब्द गन्ध-रस-इनके अभाव का प्रत्यक्ष भी उपपन्न हो जाता है-क्योंकि "यो गुणो येनेन्द्रियेण गृह्यते तन्निष्ठा जातिस्तदभावश्च तेनैवेन्द्रियेण गृह्यते" अर्थात् जिस इन्द्रिय से जिस गुण का प्रत्यक्ष होता है उस गुण में रहने वाली जाति का तथा उस गुण के अभाव का प्रत्यक्ष भी उसी इन्द्रिय से होता है। जैसे शब्द—गन्ध–रस इनका प्रत्यक्ष क्रमशः श्रोत्रेन्द्रिय-घ्राणेन्द्रिय-रसनेन्द्रिय से होता है—ऐसे ही इनमें रहने वाली शब्दत्व जाति का तथा गन्धत्व-रसत्व जाति का एवं इनके अभाव का अर्थात् शब्दाभाव—गन्धाभाव-रसाभाव का प्रत्यक्ष भी इन्हीं इन्द्रिय से होता है। और अभाव यदि अधिकरण-स्वरूप हुवा तो अधिकरण का प्रत्यक्ष तो इन इन्द्रियों से होगा नहीं। जैसे शब्दाभाव का भूतल में प्रत्यक्ष करें कि "शब्दाभाववद् भूतलम्" तो यहाँ शब्दाभाव भूतल स्वरूप होने के नाते भूतल का प्रत्यक्ष श्रोत्रेन्द्रिय से नहीं होगा—क्यों श्रोत्र द्रव्य ग्राहक नहीं हैं, अपितु गुणग्राहक है अतः शब्दाभाव का प्रत्यक्ष भी श्रोत्र से नहीं होगा। इसी प्रकार घ्राणेन्द्रिय-रसनेन्द्रिय के विषय में भी जानना क्योंकि ये गुण ग्राहक इन्द्रिय हैं-अतः इनसे भी गन्धाभाव का तथा रसाभाव का प्रत्यक्ष नहीं हो सकेगा।

वही मूल में कहा है कि "अन्यथा तत्तदधिकरणानां तत्तदिन्द्रियाग्राह्यत्वात् अप्रत्यक्षत्वं स्यात्" अन्यथा (अभाव को अधिकरण स्वरूप मानें तो) शब्दा भाव आदि भूतल आदि द्रव्य सर्वथा श्रोत्रादि इन्द्रियों से अग्राह्य होने के नाते शब्दाभावादिकों का प्रत्यक्ष नहीं हो सकेगा। प्रभाकर का ही एक यह भी मत है कि जिस अधिकरण में अभाव का ज्ञान होता है वह अभाव तादृश ज्ञानरूप ही है। एवं जिसमें अभाव का ज्ञान होवे वह अभाव तादृश

विशेषणतायाः प्रत्यासत्तित्वाकल्पनप्रयुक्तलाघवादित्यर्थः। संयोगादिनाऽभावग्रहण-संभवादिति नातिरिक्तोऽभाव इति। तदुक्तम्—

न ते तत्रालि कान्तोस्ति तदभावोपि किं सखि।
नसोस्ति पृथगेणाक्षि कुंजमात्रं विलोक्यते॥ इति।

क्लृप्तेष्वनेकेषु तत्कल्पनातोऽक्लृप्तेष्येकस्मिन् तत्कल्पनैव लघीयसीत्याह **अनन्ताधिकरणात्मकत्वकल्पनापेक्षयेति।** घटत्वाद्यवच्छिन्नप्रतियोगिताकाभाव-स्येत्यादिः। **एवं च**=अभावस्यातिरिक्तत्वे च। सामंजस्येनेति शेषः। **उपपद्यते इति।** अन्यथा भूतले भूतलमितिप्रतीतिवद्भूतले घटाभाव इति प्रत्ययो न स्यादिति भावः।

करणानां तत्तदिन्द्रियाग्राह्यत्वात् प्रत्यक्षत्वं न स्यात् । एतेन ज्ञानविशेष-कालविशेषात्मकत्वमभावस्येति प्रत्युक्तमप्रत्यक्षत्वापत्तेः ॥१२॥

सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥१३॥

काल रूप है। एतेन (इस वक्ष्यमाण अप्रत्यक्षापत्तिरूप दोष से) अभाव के ज्ञानरूपता तथा कालरूपता का पक्ष भी प्रत्युक्त (खण्डित) हो गया। क्योंकि काल सर्वथा प्रत्यक्षायोग्य है अतः अभाव को यदि काल स्वरूप मानेंगे तो अभाव का प्रत्यक्ष नहीं होगा। ऐसे ही ज्ञान का भी वहिरिन्द्रिय से प्रत्यक्ष नहीं होता अतः अभाव को यदि ज्ञानस्वरूप मानेंगे तो भी अभाव का प्रत्यक्ष नहीं हो सकेगा। अतः अप्रत्यक्षत्वापत्तिरूप दोष के कारण अभाव को-ज्ञान-या कालरूप नहीं मान सकते हैं। वही मूल में कहा है कि "एतेन ज्ञानविशेष-कालविशेषाद्यात्मकत्वमभाव-स्येति प्रत्युक्तमप्रत्यक्षत्वापत्तेः" ॥ १२ ॥

पटाभावे घटो नास्तीति प्रतीत्याऽभेदेपि आधाराधेयभावनिर्वाहेपि प्रकृते तु अतिरिक्त-कल्पनैव लघीयसीति मन्तव्यम्। अभेदेपि आधाराधेयभाव उपपद्यते इति तुष्यतु दुर्जनन्यायेनाह **एवंचेति**। केचित्तु ननु एकस्यापि रूपान्तरेणाधाराधेयभावोपि कल्प्यते अनुभवबलात्, तत्तदधिकरणमात्रवृत्तिधर्मात्मकत्वं वाऽभावानां कल्पनीय-मत आह **एवंचेतीत्याहुः**। तच्चिन्त्यम्। भूतलं अभाव इति प्रतीत्योर्वैल-क्षण्यानुपपत्तेः। **तत्तच्छब्देति**। शब्दाभाव-गन्धाभाव-रसाभावानामित्यर्थः। **अन्यथा** अभावानामधिकरणात्मकत्वे। **तत्तदधिकरणानां** = आकाशवाय्वादीनाम्। **तत्तदिन्द्रियाऽग्राह्यत्वादिति**। श्रोत्रेन्द्रियस्याकाशाऽग्राहकत्वात्, रसनाया घ्राणस्य चाऽश्रयाग्राहकत्वादित्यर्थः। तथाच तत्तच्छब्दगन्धरसाद्यभावानां अप्रत्यक्षत्वापत्तेरिति। इदमप्रयोजकम्—गगनादीनां गगनत्वादिना तत्तदिन्द्रियाऽयोग्यत्वेपि शब्दाद्यभाव-त्वेन योग्यत्वे बाधकाभावः। गुरुत्वादेर्गुरुत्वत्वादिनाऽयोग्यत्वेपि प्रमेयत्वेन योग्यत्व-वत्। न चाऽयोग्यस्य रूपान्तरेण योग्यत्वेपि विशेष्यांशे लौकिकविषयत्वाऽसंभवः। रूपाभावांशे चाक्षुषविषयतानंगीकारे वायौ रूपाभावं पश्यामीति प्रत्ययानुपपत्ति-प्रसंगात्। तदंगीकारे वायौ लौकिकविषयतासंबन्धेन चाक्षुषोत्पत्त्या समवायेन रूपहे-तुतायां व्यभिचारप्रसंगादिति वाच्यम्। शब्दं न शृणोमीति प्रतीत्या शब्दाभावत्ववि-शिष्टेप्यनेन रूपेण लौकिकविषयतासत्त्वे बाधकाभावादिति। तस्मादनन्तानामित्या-दिनाऽभिहिताया युक्तेरेव साधीयस्त्वमिति ध्येयम्।

वस्तुतस्तु द्रव्यसमवेतनाशे द्रव्यनाशस्य हेतुतया, घटसमवेतनाशे घटनाशस्य हेतुता वाच्या। घटनाशस्याऽऽरंभकसंयोगनाशजन्यस्य कपालात्मकतया कपालनाश-जन्यघटनाशस्य भूतलात्मकतया त्वन्नये नानापदार्थात्मनो घटनाशस्य हेतुत्वमिति कल्पनागौरवम्, अतिरिक्ततामते तु कारणत्वघटकीभूतपदार्थकल्पनाया एकनिष्ठत्वात्।

इदानीं पदार्थानां साधर्म्यवैधर्म्ये वक्तुमुपक्रमते सप्तानामिति। समानो धर्मो येषां ते सधर्माणः तेषां भावः साधर्म्यं, समानो धर्म इति फलितार्थः। एवं विरुद्धो धर्मो येषां ते विधर्माणः तेषां भावो वैधर्म्यं, विरुद्धो धर्म इति फलितार्थः। ज्ञेयत्वं ज्ञानविषयता सा च सर्वत्रैवास्ति, ईश्वरादिज्ञानविषयतायाः केवलान्वयित्वात्। एवमभिधेयत्वप्रमेयत्वादिकं बोध्यम् ॥१३॥

अब पदार्थों के साधर्म्य तथा वैधर्म्य बतलाते हैं।

द्रव्यादि सात पदार्थों का साधर्म्य है "ज्ञेयत्व"। आदि पद से अभिधेयत्व प्रमेयत्व भी जानना। समानधर्म को साधर्म्य कहते हैं, तथा विरुद्ध धर्म को वैधर्म्य कहते हैं। जानने योग्य जो हो उसे ज्ञेय कहते हैं। ज्ञेयता ज्ञानविषयता वह सर्वत्र रहती है—क्योंकि ईश्वरज्ञानविषयता केवलान्वयी है। ऐसे ही अभिधेयत्व-आदि भी सात पदार्थों के साधर्म्य हैं। १३।

एवं वृत्तादुरितक्षयाय गंगास्नानं करोमीति प्रतीत्या गंगास्नानस्य दुरितक्षयहेतुत्वमानुभविकं श्रौतं च। न हीदं हेतुत्वं दुरितक्षयस्याधिकरणरूपत्वे संभवितुमर्हतीत्यतोऽतिरिक्ताभावपक्ष एव श्रेयानिति। **एतेन** = उक्तदूषणेन।

ज्ञानविशेषेति। अत एव एतन्मते ज्ञानस्य स्वप्रकाशत्वं, स्वात्मकज्ञानविषयस्य स्वस्वरूपत्वात्। तदेकदेशिमतान्तरमाह **कालविशेषात्मकत्वमिति**। केवलाधिकरणज्ञानस्य=केवलाधिकरणकालस्य वा तदधिकरणवृत्त्यभावत्वं कल्प्यते लाघवात्। तत्तत्पुरुषभेदेन तत्तत्कालभेदेन च घटाभावादेर्नानात्वं तु फलमुखमतो न दोष इति प्राभाकरमतान्तरम्। **अप्रत्यक्षतापत्तेरिति**। चक्षुरादिबाह्येन्द्रियायोग्यतया प्रथमपक्षे बाह्येन्द्रियजन्यलौकिकप्रत्यक्षविषयत्वानापत्तेः। द्वितीयपक्षे तु इन्द्रियमात्रजन्यलौकिकप्रत्यक्षविषयत्वानापत्तेरित्यर्थः। यद्यप्येतेनेति ग्रन्थेनाऽप्रत्यक्षतापत्तेरिति लभ्यते एव, तथापि तत्तच्छब्दाभावादीनामप्रत्यक्षतापत्तेरित्यस्यैव लाभाद् घटाभावादीनां ज्ञानविशेष-कालविशेषांगीकारत्वपक्षे दूषणं न प्रसज्यते इत्यतोऽभिहितमप्रत्यक्षतापत्तेरिति।

इदमुपलक्षणम्—अभावस्य "घटो नास्तीति" ज्ञानरूपत्वे तादृशज्ञानविरहदशायां घटात्यन्ताभावो घटध्वंसो वा ध्वस्त इति प्रत्ययापत्तिः। स्याच्च मणिसमवधानदशायां मणिर्नास्तीति ज्ञानकाले दाहोत्पादः। तादृशज्ञानव्यक्तौ नाभावत्वकल्पनेति चेन्, मा कल्प्यताम् तथापि प्रतियोगिशून्यतादृशायां मणिर्नास्तीति ज्ञानविरहे दाहोत्पादानापत्तेः। ज्ञानस्य कार्यव्यधिकरणतया हेतुत्वासंभवाच्च। कालविशेषात्मकत्वपक्षेपि किं खण्डकालात्मकत्वं-महाकालात्मकत्वं वा! आद्ये आनन्त्यम्। द्वितीये तु आकाशात्मकत्वमीश्वरात्मकत्वं जीवात्मकत्वं वेत्यत्र विनिगमनाविरह इति विभावनीयम्।

साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं निःश्रेयसहेतुरिति श्रवणात्, आपाततो निरूपितानां पदार्थानां धर्मतया साधर्म्यवैधर्म्ययोः स्मरणाच्च साधर्म्यवैधर्म्ये निर्वक्त माह

द्रव्यादयः पञ्च भावा अनेके समवायिनः।
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः॥ १४॥

द्रव्यादय इति। द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यमनेकत्वं

द्रव्य-गुण-कर्म-सामान्य-विशेष-इन पाँच का साधर्म्य-भावत्व-अनेकत्व-समवायित्व हैं। यद्यपि भावत्व की समवाय में अतिव्याप्ति ही है—और अनेकत्व की अभाव में अतिव्याप्ति है। तथापि "अनेकत्वे सति भावत्वं" यह विशेष्य-विशेषणभावापन्न साधर्म्य कर देना। प्रश्न—"अनेकत्वे सति भावत्व" इस साधर्म्य की प्रत्येक घट में-आदिपद से काल-को भी ले लेना—इनमें अव्याप्ति हो जावेगी—क्योंकि प्रत्येक घट-तथा आकाशादि में भावत्व है, परन्तु अनेकत्व नहीं—अतः अनेकत्वे सति भावत्व नहीं रहा। अतः अनेकत्वे सति भावत्व का अर्थ करते हैं अनेक भाववृत्तिपदार्थविभाजकोपाधिमत्व—अनेक भाव हुए द्रव्य-गुण-कर्म-सामान्य-विशेष-इनमें रहनेवाली पदार्थ विभाजक उपाधि-द्रव्यत्व-गुणत्व-कर्मत्व-सामान्यत्व-विशेषत्व-तद्वत्ता निखिलद्रव्य में-निखिलगुण में-निखिलकर्म में-निखिल सामान्य में-निखिल विशेष में है—अतः द्रव्यत्वरूप जो उपाधि तद्वत्ता निखिल द्रव्य में है तो प्रत्येक घट में तथा

इदानीमिति। "सप्तानामि"त्यादिना "पंच वेगश्च मानसे" इत्यन्तेन। मूले-सप्तानामपीत्यत्राऽपिर्ज्ञेयत्वस्येतरभेदानुमानानुपयोगितया साधर्म्यमनुपयुक्तमिति कथयति। ननु किमर्थमुच्यते तत्राह उच्यते इति। सप्तपदार्थेषु ज्ञेयमिति व्यवहारोपाधितयाऽभिधीयते इत्यर्थः। सप्तानां पदार्थानां ज्ञेयत्वं न साधर्म्यम्, साधर्म्यं हि समानधमभावः, स च ज्ञेयत्वादिवृत्तिधर्म इत्यनुपपन्नमित्यपरितोषादाह समानो धर्म इति। भावार्थोऽविवक्षित इत्यभिप्रायः। एवं जलादीनां गन्धो वैधर्म्यमित्यत्रापि भावार्थो न विवक्षित इत्याह एवमिति। ईश्वरादीति। आदिना योगिपरिग्रहः। केवलान्वयित्वादिति। अत्यन्ताभावाप्रतियोगित्वादित्यर्थः। ज्ञेयत्वादिकमिति मूलोपात्तादिशब्दार्थमाह एवमिति। अभिधेयत्वं=शब्दशक्यत्वम्। प्रमेयत्वं=प्रमाविषयत्वम्। आदिना संयोगाभावादिः। यद्यपि विषयतामात्रमेव साधर्म्यं वक्तुमुचितं ज्ञानीयत्वनिवेशनमफलम्, तथापि अतिरिक्तविषयतानंगीकर्तृमते निरूपितत्वसंबन्धेन ज्ञानविशिष्टस्यैव लक्षणत्वम्, तच्चाऽतिरिक्तविषयतांगीकर्तृमतेपि न विरुद्धमिति बोधनाय तत्। तच्च ज्ञानीयं किमित्याकांक्षायां विषयत्वोपादानम्। वस्तुतो विषयतासंबन्धेन ज्ञानविशिष्टत्वमेव लक्षणम्।

द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां भावत्वं साधर्म्यम्। भावत्वं च समवाय-एकार्थसमवायान्यतरसंबन्धेन सत्तावत्त्वम्। एकार्थसमवायश्च स्वप्रतियोगिकसमवायप्रतियोगित्व-स्वप्रतियोगिकसमवायतादात्म्यान्यतररूपः। स्वद्वयं सत्तापरम्। सप्तमस्याभावत्वकथनादेव षण्णां भावत्वं साधर्म्यं स्फुटमिति षण्णां साधर्म्यमुपेक्ष्य

समवायित्वं च। यद्यप्यनेकत्वमभावेऽप्यस्ति तथाप्यनेकत्वे सति भावत्वं पञ्चानां साधर्म्यम्। तथा चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितोऽर्थः। तेन प्रत्येकं घटादावाकाशादौ च नाव्याप्तिः। समवायित्वं च समवायसंबन्धेन संबन्धित्वं, न तु समवायवत्त्वं, सामान्यादावभावात्। (तथा च समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितोर्थः। तेन

आकाशादि में भी है अतः उनमें अव्याप्ति नहीं हुई। समवायित्व भी प्रागुक्त पाँच पदार्थों का साधर्म्य है—समवायित्व के दो अर्थ हैं—"समवायसम्बन्धेन सम्बन्धित्व" अर्थात् (समवायसम्बन्ध से स्वयं रहना)। दूसरा "समवाववत्व" अर्थात् (समवायसम्बन्ध से किसी वस्तु को अपने में रखना)। इन दोनों में प्रथम अर्थ ही उचित है—द्वितीय अर्थ (समवायवत्त्व में सामान्य आदि में अव्याप्ति हो जावेगी—आदिपद से विशेष को भी ले लेना—अर्थात् समवायवत्त्व यदि समवायित्व का अर्थ करेंगे तो सामान्य तथा विशेष में अव्याप्ति हो जावेगी– क्योंकि वे समवायवान् नहीं हैं—अर्थात् उनमें समवाय सम्बन्ध से कोई नहीं रहता है। वही मूल में कहा है कि "नतु समवायवत्त्वं सामान्यादावभावात्"। प्रश्न—प्रथम अर्थ में भी तो नित्यद्रव्य जो परमाणु एवं आकाश आदि हैं उनमें अव्याप्ति हो जावेगी—वे समवायसम्बन्ध से कहीं नहीं रहते हैं। उत्तर—समवायित्व का "समवायसम्बन्धेन सम्बन्धित्व" यह अर्थ न करके "समवेतवृत्तिपदार्थ विभाजकोपाधिमत्त्व" यह अर्थ कर देना। समवेत हुवे द्रव्य-गुण-कर्म-सामान्य-विशेष-उनमें वृत्ति पदार्थ विभाजक उपाधि द्रव्यत्व-गुणत्व-कर्मत्व-सामान्यत्व-विशेषत्व-तद्वत्ता इन्हीं पाँचों में जावेगा, अतः समवायित्व का यह अर्थ पाँचों में समन्वित हो गया। और द्रव्यत्वरूप उपाधिमत्त्व निखिल द्रव्यों में है तो परमाणु-आकाश आदि नित्यद्रव्यों में भी है—अतः उनमें अव्याप्ति अब नहीं हुवी – क्योंकि एतादृश समवायित्व परमाण्वादि नित्यद्रव्यों में है। वही मूल में कहा है कि "तेन नित्यद्रव्येषु नाव्याप्तिः"।

पंचानामाह मूले द्रव्यादय इति। द्रव्यमादिर्येषामिति तद्गुणसंविज्ञानो बहुव्रीहिः। पंचत्वकथनं तु तेन लक्ष्यतासूचनाय। तच्च द्रव्यगुणकर्मसामान्यविशेषान्यतमत्वम्। एतेन द्रव्यादीनामित्युक्तौ समवायोपि गृह्येत पंचानामित्युक्तौ केषामिति न ज्ञायेत तदर्थमुभयोपादानमिति व्याख्यातम्। मूले-भावा इति उद्देश्यकोटौ निविष्टमित्यभिप्रायेणाशंकते यद्यपीत्यादिना। एतेन यद्यपि भावत्वं समवायेऽप्यस्तीत्येव प्रथमं वक्तव्यं न तु अनेकत्वमभावेऽप्यस्तीत्युक्तिर्युक्तेति निरस्तम्। द्रव्यादयः पंच भावा इत्यत्र भावत्वं नोद्देश्यतावच्छेदकं किन्तु भावा अनेके इति विधेयपरमित्याशयेन समाधत्ते तथापीत्यादिना। तथाच सामानाधिकरण्येनाऽनेकत्वविशिष्टभावत्वं फलितोर्थः। विशिष्टस्यानतिरिक्तत्वेपि विशिष्टाधिकरणत्वमेव तथेति न दोषः। समवायवारणाय विशिष्टान्तम्। यद्यपि अनेकत्वं न संख्या गुणादावभावात्। नापि

नित्यद्रव्येषु नाव्याप्तिः)। सत्तावन्त इति। द्रव्यगुणकर्मणां सत्तावत्त्वमित्यर्थः। गुणादिरिति। यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तं क्रियाशून्यत्वं च गगनादावतिव्याप्तम् तथापि गुणवदवृत्तिधर्मवत्त्वं कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वं तदर्थः। नहि घटत्वादिकं द्रव्यत्वं वा गुणवदवृत्ति कर्मवदवृत्ति वा, किं तु गुणत्वादिकम्, आकाशत्वादिकं तु न पदार्थविभाजकोपाधिः ॥ १४ ॥

सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः ॥
पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ॥१५॥

"सत्तावन्त-त्रयस्त्वाद्याः"

आद्य तीन (द्रव्य-गुण-कर्म) का सत्तावत्त्व साधर्म्य है। (क्योंकि ये तीन ही सत्तावान् हैं)। गुणादि (गुण से लेकर अभावपर्यन्त) का निर्गुणत्व (गुणरहितत्व) निष्क्रियत्व (क्रियाशून्यत्व) साधर्म्य है। प्रश्न—निर्गुणत्व तथा निष्क्रियत्व इन दोनों साधर्म्यों की आद्यक्षणावच्छिन्न (उत्पत्तिक्षणावछिन्न) घटादि में अतिव्याप्ति है (क्योंकि "उत्पन्नं द्रव्यं क्षणमगुणं क्षणं निष्क्रियञ्च तिष्ठति इस नियम से आद्यक्षणावच्छिन्न घट में निर्गुणत्व तथा निष्क्रियत्व सिद्ध हो रहा है)। तथा निष्क्रियत्व साधर्म्य की गगन आदि में अतिव्याप्ति है (आदि पद से काल-दिशा को लेना क्योंकि वे भी निष्क्रिय हैं) अतः निष्क्रियत्व साधर्म्य की "आकाश-काल दिशा "इन तीन में अतिव्याप्ति है)। उत्तर—निर्गुणत्व का "गुणवदवृत्ति धर्मवत्त्व" यह अर्थ है। एतादृश निर्गुणत्व गुण से लेकर अभाव पर्यन्त ही में जावेगा द्रव्य में नहीं जावेगा—क्योंकि गुणवान् द्रव्य ही होगा—आद्यक्षणावच्छिन्न घट न हो, द्वितीय क्षणावच्छिन्न घट होगा—उसमें घटत्व-द्रव्यत्व तो वृत्ति ही हैं—अवृत्ति धर्म गुणत्व-कर्मत्व-सामान्यत्वविशेषत्व-समवायत्व-अभावत्व-ये छ ही हैं तद्वत्त्व इन्हीं छः में जावेगा अतः गुण से लेकर अभाव पर्यन्त का अर्थात् गुण-कर्म-सामान्य-विशेष-समवाय-अभाव-इन छः का निर्गुणत्वसाधर्म्य संपन्न हो गया।

ऐसे ही निष्क्रियत्व का भी क्रियाशून्यत्व यह अर्थ न करके "कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्व" यही अर्थ करना। (यह अर्थ करने से गगन आदि में अतिव्याप्ति नहीं हुई—तथाहि कर्मवान् हुवा द्रव्य उसमें अवृत्ति पदार्थविभाजक उपाधि गुणत्व-कर्मत्व-सामान्यत्व-विशेषत्वसमवायत्व-अभावत्व, तादृशोपाधिमत्त्व-रूपनिष्क्रियत्व-गुण-कर्म-सामान्य-विशेष समवाय-अभाव इन छः पदार्थों ही में जावेगा-गगनादि में नहीं-क्योंकि गगनत्वादि यद्यपि कर्मवान् में अवृत्ति धर्म अवश्य हैं—परन्तु पदार्थ विभाजक उपाधि नहीं हैं-अपितु द्रव्य का विभाजक उपाधि है—अतः गगनादि में अतिव्याप्ति नहीं है।

सामान्यपरिहीनास्त्विति।

सब जाति आदि का अर्थात् सामान्य-विशेष-समवाय-अभाव इन चार का सामान्यपरिहीनत्व (सामान्यशून्यत्व) अर्थात् सामान्यानधिकरणत्व साधर्म्य है। एवं परिमाण्डल्य से भिन्न

सामान्यतोऽपेक्षाबुद्धिविशेषविषयत्वम्, समवायेतिव्याप्तितादवस्थ्यात्। समवायव्यावृत्तबुद्धिग्रहणे तु अभावव्यावृत्तबुद्धिग्रहणस्याप्यौचित्येन भावत्वोपादानवैयर्थ्यात्। तथापि द्रव्याणि गुणाः कर्माणि सामान्यं विशेषा इति बुद्धिविषयत्वं तद्ग्राह्यमित्यदोषः। वक्ष्यमाणदोषादाह **तथाचेति**। समवायत्ववारणाय **अनेकभाववृत्तीति**। ननु भावेऽनेकत्वं नैकभिन्नत्वम्, एकत्वस्य केवलान्वयितया एकभिन्नत्वस्याप्रसिद्धेरिति चेत्। स्वप्रतियोगिभाववृत्तित्व-स्वसामानाधिकरण्योभयसंबन्धेन भेदविशिष्टत्वमनेकभाववृत्तित्वमिति नाऽप्रसिद्धिः। समवायाभावयोरपि अनेकभाववृत्तिद्रव्यादिपंचसमवायान्यतरत्व-उक्तपंचाऽभावान्यतरत्वशालितया चाऽन्ततस्तथाविधप्रमेयत्वादिमत्तया चातिप्रसंग इति **पदार्थविभाजकेति** यद्यपि भावत्वमपि पदार्थविभाजकोपाधिः, पदार्थों द्विविधो भावोऽभावश्चेत्येवमपि निरूपणात्। तथापि प्रकृते तथाऽनिरूपणात्। भावत्वान्यत्वेन विशेषणीयत्वादित्यपि केचित्। **प्रत्येकमिति**। एतच्चापाततः, अनेकत्वस्य पर्याप्तिविवक्षायां बीजाभावात्। समवायित्वं यदि समवायिकारणत्वं तदा गुणादावव्याप्तिरित्यत आह **समवायित्वं चेति**। **समवायसम्बन्धेनेति** षष्ठ्यर्थे तृतीया। समवायसंबन्धस्येति यावत्। **संबन्धित्व-मिति**। प्रतियोगिताऽनुयोगितान्यतरसंबन्धेन समवायवत्त्वमिति फलितम्। **अत्रेदं बोध्यम्**-प्रतियोगितासंबन्धेन समवायवत्त्वविवक्षणे नित्यद्रव्येऽव्याप्तिः–समवायेऽतिव्याप्तिश्च, समवायस्य समवायात्मकस्वरूपेणैव वर्तमानत्वात्। नाप्यनुयोगितासंबन्धेन समवायवत्त्वं तत्, सामान्यादावव्याप्तेः, तयोः समवेतधर्माभावात्। इत्थं च समवायान्यप्रतियोगिता-अनुयोगितान्यतरसंबन्धेन समवायवत्त्वं पंचानां साधर्म्यं फलितम्। न तु **समवायवत्त्वं**=समवायाधारत्वम्। **सामान्यादाविति** आदिना विशेषपरिग्रहः। **अभावादिति**। अनुयोगिन्येव संबन्धसत्त्वादिति भावः।

समवायित्वमात्रं न साधर्म्यम्, येनोक्तरीत्या समवायेऽतिप्रसंगः स्यात्, किन्तु अनेकत्वविशिष्टसमवायित्वम्। न चोद्देश्यतावच्छेदककोटौ भावत्वनिवेशे प्रयोजनाभावः, तस्य विधेयत्वे च समवायेऽतिप्रसंग इति वाच्यम्। तथासति अनेकपदं काकाक्षिगोलकन्यायेनोभयत्रान्वयि अनेकत्वविशिष्टभावत्वम्, अनेकत्वविशिष्टसमवायित्वमिति युक्तमुत्पश्यामः। प्रकाशकृन्मतमाह **तथाचेति**। अत्र समवेतत्वं स्वातिरिक्तसमवायसंबन्धेन वृत्तित्वमतो न समवायेऽतिव्याप्तिः।

समवेतसमवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वं द्रव्यगुणकर्मसामान्यानां चतुर्णां साधर्म्यम्। क्रमप्राप्तं त्रयाणां साधर्म्यमाह **सत्तावत्त्वमिति**। सत्तावत्त्वं च समवायेन बोध्यम्। एवं द्रव्यगुणान्यतरत्वं द्वयोः साधर्म्यम्। द्रव्यस्य तु क्षित्यादीनां नवानां त्वित्यादिना वक्ष्यते। गुणवद्वृत्तिधर्मवत्त्वं च गुणवद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभाववद्धर्मवत्त्वम्, तेन घटत्वादेर्यत्किंचिद्गुणवद्वृत्तित्वेपि न क्षतिः। अत्र च येन संबन्धेन गुणवद्वृत्तित्वं तेन संबन्धेन धर्मवत्ता बोध्या, नातः संयोगेन

सामान्येति । सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः । **पारि-माण्डल्येति** । पारिमाण्डल्यमणुपरिमाणं-कारणत्वं तद्भिन्नानां साधर्म्यमित्यर्थः ।

पदार्थों का "कारणत्व" साधर्म्य है । प्रश्न—(पारिमाण्डल्य क्या वस्तु है) । उत्तर – अणु-परिमाणको पारिमाण्डल्य कहते हैं—

जैसे परमाणु का परिमाण-द्व्यणुक का परिमाण-मन का परिमाण-अणुपरिमाण कहा गया है सो वह किसी का कारण नहीं होता है अतः उससे भिन्न पदार्थों का कारणत्व साधर्म्य है)

गुणवदवृत्तिनो द्रव्यत्वादेः समवायेन द्रव्यवृत्तावप्यनिष्टसिद्धिः । न वा समवायेन गुणवदवृत्तिनो गुणत्वादेः कालिकेन द्रव्यवृत्तित्वेपि क्षतिः । अथवा स्वरूपेण गुण-वदवृत्तित्वं धर्मवत्त्वं च वाच्यम्, सर्वत्र गुणत्वकर्मत्वसामान्यत्वविशेषत्वसमवाय-त्वाऽभावत्वप्रकारकप्रमाविशेष्यत्वादिकमादाव लक्षणसमन्वयः । न चाभावत्वस्य तत्प्रकारकप्रमाविशेष्यत्वस्य वा न गुणवदवृत्तित्वम्, घटाभावाभावात्मके गुणवति तस्य वृत्तित्वात् । गुणवन्मात्रावृत्तिधर्मवत्त्वोक्तौ तु गुणत्वप्रकारकप्रमाविशेष्य-द्रव्यत्वप्रकारकप्रमाविशेष्यान्यतर शालिनि द्रव्येऽतिप्रसंगः, तादृशान्यतरत्वस्य गुणवन्मात्रावृत्तित्वादिति वाच्यम् । अभावत्वस्य गुणवद्वृत्तित्वेपि क्षतिविरहात् । सर्वत्राभावादौ घटत्वपटत्वाद्यवच्छिन्नप्रतियोगिताकाभावत्वादिना लक्षणसमन्वय-संभवात् । गगनत्वादेर्गुणवदवृत्तिधर्मत्वाभावेन निर्गुणत्वनिरुक्तिघटकधर्मे पदार्थ-विभाजकोपाधित्वनिवेशे प्रयोजनविरहो मन्तव्यः । पदार्थविभाजकोपाधिपदस्य कृत्य-माह **आकाशत्वादिकमिति** । आदिना दिक्त्वादेः परिग्रहः । येन रूपेण विभागस्तद्रूपस्यैव विभाजकोपाधितयाऽऽकाशत्वस्य द्रव्यविभाजकोपाधित्वेपि पदार्थ-विभाजकोपाधित्वाभावादिति भावः । **सामान्यानधिकरणत्वमिति** । स्वप्रतियो-ग्यनधिकरणत्वस्वप्रतियोगिताविरोध्यनुयोगित्वोभयसंबन्धेन गुणाभाववत्त्वं कर्मादीनां साधर्म्यं संभवत्येवेत्यतः सामान्यमारभ्यैव साधर्म्यमभिहितम् । मूले **जात्यादय** इत्यत्राऽतद्गुणसंविज्ञानबहुव्रीहिभ्रमवारणाय सर्वशब्दप्रयोगः । जातावेकार्थसमवायेन सामान्यसत्त्वादुक्तं परीति । एतदर्थश्चाधिकरणत्वम् । अत एवोक्तं **सामान्यानधि-करणत्वमिति** । एकार्थसमवायश्च नाधिकरणतानियामकः, तेन संबन्धेन प्रतीत्य-भावात् । समवायसंबन्धावच्छिन्नप्रतियोगिताकसामान्याभाववत्त्वं साधर्म्यमिति तु फलितोर्थः । तादृशाभाववत्वमपि स्वरूपेण, नातः संयोगसंबन्धावच्छिन्नप्रतियोगि-ताकसामान्याभावस्य समवायसंबन्धावच्छिन्नप्रतियोगिताकतदभावस्य स्वरूपसंबन्धेन कालिकेन च द्रव्यवृत्तित्वेपि क्षतिः । एवं समवेताऽसमवेतवृत्तिपदार्थविभाजकोपा-धिमत्त्वं विशेषादीनां—असमवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वं समवायाभावयोः असमवेतजन्यवृत्तिपदार्थविभाजकोपाधिमत्त्वमभावस्य च साधर्म्यं द्रष्टव्यम्, तेन न न्यूनताप्रसक्तिः । उभयत्राऽसमवेतवृत्तित्वं च स्वरूपेणैवेति ।

अणुपरिमाणं तु न कस्यापि कारणम्। तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत्। तच्च न संभवति, परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाण-

प्रश्न—अणुपरिमाण कारण क्यों नहीं होता हैं? उत्तर—अणुपरिमाण यदि कारण होगा तो स्वाश्रय से आरब्ध जो द्रव्य उसके परिमाण का आरंभक हो सकेगा—(अर्थात् स्वपद से परमाणु का अणुपरिमाण उसका आश्रय परमाणु-उससे आरब्ध (उत्पन्न) द्रव्य द्व्यणुक-उसके परिमाण का आरंभक (उत्पादक) अणुपरिमाण हो सकेगा) परन्तु वह संभव नहीं। क्योंकि परिमाण का स्वभाव है कि वह अपने समान जातीय तथा उत्कृष्ट परिमाण का जनक होता है (उत्कृष्टता तरप्-तमप् प्रत्यय प्रयुक्त होती है) जैसे कपाल के महत्परिमाण से आरब्ध जो घट का परिमाण-वह महत्तर होता है—वैसे ही (परमाणु के) अणुपरिमाण से जन्य (द्व्यणुक का परिमाण) अणुतर हो जायगा। (और द्व्यणुक के अणुतर परिमाण से जन्य जो त्रसरेणु का परिमाण-वह अणुतम हो जायगा-तो त्रसरेणु का प्रत्यक्ष नहीं हो सकेगा-इसी प्रकार अगाड़ी घट का प्रत्यक्ष नहीं होगा।

अणुपरिमाणमिति। परमाणुपरिमाणं द्व्यणुकपरिमाणं चेत्यर्थः।

तद्धि=अणुपरिमाणं हि। **स्वाश्रयेति**। स्वं- परमाणुपरिमाणं-द्व्यणुकपरिमाणं च-तदाश्रयः परमाणुः-द्व्यणुकं च-तदारब्धं (तज्जन्यं) द्रव्यं द्व्यणुकं त्र्यणुकं च तत्परिमाणारंभकं तत्समवेतपरिमाणजनकम्। **भवेदिति**। तथाच परमाणुपरिमाणं द्व्यणुकपरिमाणजनकं भवेत्, द्व्यणुकपरिमाणं च त्र्यणुकपरिमाणजनकं भवेत् अवयवपरिमाणस्य अवयविपरिमाणजनकत्वादिति भावः। **तच्चेति**।आरंभकं-चेत्यर्थः,अणुपरिमाणमिति शेषः। **जनकत्वनियमादिति**। भवति च कपालपरिमाणं स्वसमानजातीयस्य स्वोत्कृष्टस्य घटपरिमाणस्य जनकम्। एवं यदि परमाणुपरिमाणं द्व्यणुकपरिमाणजनकं तदा स्वसमानजातीयोत्कृष्टमणुतरमेव **जन्येत**, एवं द्व्यणुकपरिमाणमपि यदि त्र्यणुकपरिमाणस्य जनकं तदा स्वसमानजातीयोत्कृष्टाऽणुतममेव जन्येत इति त्र्यणुकपरिमाणतदाश्रययोः प्रत्यक्षाविषयता भज्येत। तस्माद् द्व्यणुकपरिमाणत्र्यणुकपरिमाणयोः परमाणुद्व्यणुकसमवेतद्वित्वबहुत्वजन्यत्वमुपपादयिष्यते। कपालपरिमाणस्य परमाणुनिष्ठोत्कृष्टाणुतरपरिमाणजनकत्वेनार्थान्तरव्युदासाय **स्वसमानजातीयेति**। एवमपि स्ववृत्तिपरिमाणत्वजात्या परमाणुपरिमाणस्य कपालपरिमाणसजातीयत्वेपि परिमाणत्वव्याप्यजात्या तथात्वं विवक्षणीयम्। कपालपरिमाणजन्यघटपरिमाणस्य तत्समानपरिमाणजनकत्वेनाऽर्थान्तरं माभूदत **उत्कृष्टेति**। एवं च त्र्यणुकपरिमाणं न द्व्यणुकपरिमाणजन्यं प्रत्यक्षविषयत्वात्, महत्परिमाणत्वाद्वेति फलितम्। न च परिमाणत्वावच्छिन्नं प्रति परिमाणत्वेन हेतुहेतुमद्भावे व्यभिचारः, त्र्यणुकपरिमाणत्वस्य जन्यतावच्छेदकाक्रान्ततया स्वाश्रयसमवेतत्वप्रत्यासत्त्या परिमाणस्याऽहेतुत्वादिति वाच्यम्।

जनकत्वनियमात्, महदारब्धस्य महत्तरत्ववदणुजन्यस्याणुतरत्वप्रसङ्गात्। एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्च बोध्याः। इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वम्। ज्ञायमानं सामान्यं न प्रत्यासत्तिः। ज्ञाय-

इसी प्रकार परममहत्परिमाण—अतीन्द्रियसामान्य और विशेष ये भी किसी के कारण नहीं होते हैं। (अर्थात् पारिमाण्डल्य की तरह इनका भी अकारणत्व साधर्म्य है) प्रश्न—(योगी लोगों को अपने योगबल के द्वारा परमाणु का तथा आकाश-काल आदि का प्रत्यक्ष जब कि होता है तो परमाणु के अणुपरिमाण का तथा आकाश आदि के परममहत् परिमाण का भी प्रत्यक्ष अवश्य ही होगा—तो विषय के प्रत्यक्ष के प्रति विषय कारण होता है अतः अणु परिमाणविषयकप्रत्यक्ष एवं परममहत् परिमाण विषयक प्रत्यक्ष के प्रति तादृश प्रत्यक्ष का विषय जो अणुपरिमाण—एवं परममहत्परिमाण उसको कारणता बन गयी— तब कैसे कहा कि ये किसी के भी कारण नहीं होते हैं—अर्थात् पारिमाण्डल्य एवं परममहत्परिमाण किसी के कारण नहीं होते हैं) उत्तर—(हमने जो यह कहा कि परिमाण्डल्य किसी का कारण नहीं होता है) सो यह भी "योगियों के प्रत्यक्ष में विषय कारण नहीं हैं—इस अभिप्राय से। (क्योंकि योगियों को अपने योगबल के द्वारा भूत–भविष्यत्- वर्तमान–त्रिकालस्थ वस्तु का प्रत्यक्ष होता रहता है—सो भूतकालीन एवं भविष्यत्कालीन वस्तु विषयक प्रत्यक्ष के प्रति भूतकालीनवस्तुरूप विषय को एवं भविष्यत्कालीन वस्तु रूप विषय को कारण कहेंगे—वह कारण नहीं हो सकेगा–क्योंकि भूतकालीन वस्तुरूप विषय तो है भी नहीं वह तो नष्ट हो चुका—एवं भविष्यत्कालीनवस्तु रूप विषय अभी तक उत्पन्न भी नहीं हुवा—उसे भी कारणता नहीं बन सकती है—इसी प्रकार पारिमाडल्य के प्रत्यक्ष में योगियों को पारिमाण्डल्यरूप विषय की सत्ता अपेक्षित नहीं है]

वही मूल में कहा है कि "इदमपि योगिप्रत्यक्षे" इत्यादि ग्रन्थ से। प्रश्न-घटत्वरूप जो सामान्यलक्षणा अलौकिक सन्निकर्ष उससे घटत्वाश्रय सकल घट का जैसे "सर्वे घटाः" इत्याकारक अलौकिक प्रत्यक्ष होता है—वैसे ही अणुपरिमाणवत्त्वेन रूपेण अणुपरिमाणाश्रय निखिल परमाणु तथा द्व्यणुक आदि का भी अलौकिक प्रत्यक्ष या अलौकिक मानस प्रत्यक्ष में इन्द्रिय जन्यत्व या लौकिक सान्निकर्ष की अपेक्षा नहीं है। मानसात्मक प्रत्यक्ष "सर्वेऽणवः" इत्याकारक होता है, सो इस अलौकिक प्रत्यक्ष के प्रति कारणीभूत जो अणुपरिमाणरूप ज्ञायमान सामान्य उसे कारणता स्पष्ट ही है। एवं "पारिमाण्डल्यं स्वेतरभिन्नं पारिमाण्डल्यात्" इस स्वेतरभेदानुमिति में पारिमाण्डल्य को तादात्म्येन कारणता है - सो कैसे कहा कि पारिमाण्डल्य कारण नहीं है। उत्तर—अलौकिक प्रत्यक्ष में ज्ञायमान सामान्य प्रत्यासत्ति (सन्निकर्ष) विधया कारण नहीं है—अपितु सामान्यज्ञान कारण है। इसी अभिप्राय से हमने कहा कि "ज्ञायमान सामान्य कारण नहीं हैं। ऐसे ही इतरभेदानुमिति में पारिमाण्डल्यज्ञान ही विषयतासम्बन्ध से कारण है-न कि पारिमाण्डल्य। प्रश्न—आपने कहा कि "विशेषाश्च बोध्याः" विशेष भी किसी का कारण नहीं है–ऐसा जानना चाहिये। (अर्थात् पारिमाण्डल्य की तरह विशेष का भी "अकारणत्व" साधर्म्य,है–सो यह आपका कथन कैसे संगत हो सकता है क्योंकि "घटपरमाणुः पटपरमाणुतो भिन्नः विशेषात्" यहाँ पर जब घटपरमाणु में पट परमाणु का भेद सिद्ध करनेवाला कारण विशेष ही है

मानं लिङ्गं नानुमितिकरणमित्यभिप्रायेणोक्तम्। आत्ममानसप्रत्यक्षे आत्मपरममहत्त्वस्य कारणत्वान्महत्परिमाणमाकाशादेर्बोध्यम्। तस्यापि न कारणत्वमित्याचार्याणामाशय इत्यन्ये। तन्न, ज्ञानतिरिक्तं प्रत्येवाकारणताया आचार्यैरुक्तत्वात् ॥ १५ ॥

अतः विशेष भी परमाणुद्रव्य के भेद साधन में कारण है ही। उत्तर—ज्ञायमानलिङ्ग अनुमिति का कारण नहीं है (अपितु लिङ्गज्ञान अनुमिति का करण है) इस अभिप्राय से (हमने कहा कि विशेष किसी का कारण नहीं है-अर्थात् परमाणुद्रय के भेद का कारण नहीं अपितु विशेषज्ञान है) प्रश्न—आपने कहा कि परममहत्परिमाण किसी का कारण नहीं है—यह ठीक नहीं—आत्मा के मानसप्रत्यक्ष में आत्मा का परममहत् परिमाण कारण है जैसे घट के प्रत्यक्ष में घट का महत्-परिमाण कारण होता है)। उत्तर-(हमने जो कहा कि परममहत्परिमाण कारण नहीं है—वह अकारणीभूत परममहत्परिमाण) आकाश—काल—दिशा का लेना चाहिये। वही मूल में कहा है कि "परममहत्परिमाणमाकाशादेर्बोध्यम्"। अन्य लोगों का कहना है कि आत्मा का परम-महत्परिमाण भी कारण नहीं है—यह आचार्य (उदनाचार्य) का आशय है। सो ठीक नहीं है—उदयनाचार्य ने आत्मा के परममहत् परिमाण को जो अकारणत्व कहा है वह केवल ज्ञानाति-रिक्त के प्रति और आत्मा का जो मानस प्रत्यक्षात्मक ज्ञान उसके प्रति तो आत्मा के परममहत् परिमाण को कारणता है ही। वही मूल में कहा है कि—"ज्ञानातिरिक्तं प्रत्येवाकारणतायाः" इत्यादि से।१५।

नित्यपरिमाणस्य कार्यतावच्छेदकवत्तया व्यभिचारेण तथा वक्तुमशक्यत्वात्, जन्यत्वप्रवेशे गौरवात्, लाघवाय सामानाधिकरण्यसंबन्धेन महत्समवेतवृत्तित्वविशिष्टपरिमाणत्वस्य जन्यतावच्छेदकत्वोक्त्या त्र्यणुकपरिमाणत्वस्य जन्यतावच्छेदकत्वात्। वस्तुतस्तु उत्कृष्टानुत्कृष्टपरिमाणोत्पत्त्या तत्तत्परिमाणविशेषे तत्तत्परिमाणत्वेन हेतुतया सामान्यहेतुतायां मानाभावात्। विशेषश्च परिमाणनिरूपणे वक्ष्यामः। पारिमाण्डल्यशब्द उपलक्षणमित्याह। **एवमिति**। ननु त्रयाणामपि विषयविधया योगिप्रत्यक्षे कारणत्वमस्त्येवेत्यत आह **इदमपीति** इत्यभिप्रायेणेत्यत्रान्वेति। वस्तुतोऽहेतुत्वं युक्तमेव, प्रत्यक्षे विषयस्य हेतुत्वमते अतीतघटादौ विषयतया प्रत्यक्षोत्पादेन व्यभिचाराल्लौकिकविषयतासंबन्धस्य कार्यतावच्छेदकत्वमुपगन्तव्यम्। तथाच योगिनः परममहत्परिमाणप्रत्यक्षेपि परममहत्परिमाणस्य न कारणत्वम्, लौकिकविषयत्वविरहादिति भावः। ननु गुरुत्वादेः स्वाश्रयसकलगुरुत्वादिमानसे हेतुत्वादतीन्द्रियसामान्यं न कारणमिति न युक्तमित्यत आह **ज्ञायमानं** सामान्यं न प्रत्यासत्तिरिति। वक्ष्यमाणयुक्तेरिति भावः। ननु विशेषाणां स्वाश्रये व्यावृत्तिबुद्धिजनकत्वाद्विशेषाश्चेति न युक्तमित्यत आह **ज्ञायमानं लिंगमिति**। वक्ष्यमाणदोषादिति भावः। **आत्ममानसप्रत्यक्षे इति**। सामान्यतो द्रव्यप्रत्यक्षे महत्परिमाणत्वेन हेतु-

अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम् ॥ १६ ॥
समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम्।
एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम् ॥ १७ ॥

ननु कारणत्वं किम्? अत आह-अन्यथासिद्धीति। तस्य कारणत्वस्य। १६—१७ ॥

"अन्यथासिद्धिशून्यस्य"

प्रश्न—पूर्वकारिका में जो आपने कहा कि पारिमाण्डल्य से भिन्नों का कारणत्व साधर्म्य है—वह कारणत्व क्या वस्तु है। तथा कितने प्रकार का है। उत्तर—अन्यथासिद्धि शून्य पदार्थ का जो नियम से कार्य के पूर्व में रहना यही कारणत्व है। और वह कारणता तीन प्रकार की है—समवायिकरणत्व–असमवायिकरणत्व–और तृतीय न्यायमत को जाननेवालों ने 'निमित्तकारणत्व' बतलाया है। यह कारिका का अर्थ हुवा। १६–१७।

तया आत्ममानसप्रत्यक्षेपि परममहत्परिणामस्य हेतुत्वादिति भावः। आकाशादेरित्यादिना कालदिशोः परिग्रहः। तस्यापि = परममहत्परिमाणस्यापि। **ज्ञानातिरिक्तं प्रत्येवाऽकारणताया इति।** तथा च ज्ञानातिरिक्तकार्यं प्रत्यकारणत्वं वदद्भिराचार्यैर्ज्ञानं प्रति तस्य कारणत्वाभ्युपगमादिति भावः।

मूले-अन्यथासिद्धिशून्यस्येति षष्ठ्यर्थो निष्ठत्वम्। नियता=व्यापिका। धूमनियता वह्निरित्यादौ व्यापकत्वविशिष्टे एव तत्प्रयोगात्। पूर्ववर्त्तिता=कार्याव्यवहितपूर्वकालवृत्तित्वम्। कारणत्वं=कारणत्वशब्दव्यवहार्यम्। कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकान्यथासिद्ध्यनिरूपकतावच्छेदकधर्मवत्त्वमिति पर्यवसितोऽर्थः। अत्र च प्रतियोगिता कारणतावच्छेदकसंबन्धावच्छिन्ना ग्राह्या, नातः कार्याधिकरणनिष्ठसमवायसंबन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकधर्मवत्त्वाद् दण्डादावव्याप्तिः। कार्याधिकरणमपि कार्यतावच्छेदकसंबन्धेन ग्राह्यम्, नातः संयोगेन कार्याधिकरणपटनिष्ठाभावीयसंयोगसंबन्धावच्छिन्नप्रतियोगितावच्छेदकधर्मवत्त्वाद् दण्डादेरव्याप्तितादवस्थ्यम्।

न च कार्याव्यवहितप्राक्कालावच्छेदेनेत्यस्य कार्याव्यवहितकार्यप्रागभावावच्छिन्नसमयावच्छेदेनेत्यर्थो वाच्यः, तथासति घटादिप्रागभावस्य घटाद्यहेतुत्वापत्तेः, घटादिप्रागभावस्य घटप्रागभावावच्छिन्नसमयावच्छेदेन कार्याधिकरणावृत्तितया कार्यप्रागभावावच्छिन्नसमयावच्छेदेन कार्याधिकरणनिष्ठाभावप्रतियोगितावच्छेदक-

घटप्रागभावत्ववत्त्वादिति वाच्यम्। समये प्रागभावावच्छिन्नत्वस्यानिवेशात, किन्तु प्रागभावोपलक्षितत्वस्यैवेति नानुपपत्तिः।

न चैवमनवच्छेदकधर्मवत्त्वरूपस्य कारणत्वस्यांगीकारे कार्यकारणभावग्रहोत्तरकालं कारणतावच्छेदको धर्मः कल्प्यते इति मिश्रोक्तिरयुक्ता स्यादिति वाच्यम्। सामान्यतोऽनवच्छेदकधर्मवत्त्वग्रहस्य प्रथमतो विधिवशादुत्पत्तौ बाधकाभावात्, स्ववृत्तिविजातीयस्वर्गत्वावच्छिन्नाधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकविजातीययागत्ववत्त्वरूपकारणत्वसंबन्धेन स्वर्गस्य यागे प्रकारतयाऽन्वये बाधकाभावाच्च। न च सहस्रादितन्तुकपटादौ चरमतन्तुसंयोगस्य तद्व्यक्तित्वेन कारणत्वानुपपत्तिः, तद्व्यक्तित्वस्य पटाधिकरणतत्वन्तरनिष्ठाभावप्रतियोगितानवच्छेदकतया तथाविधानवच्छेदकधर्मवत्त्वाभावादिति वाच्यम्। तत्र कार्याधिकरणस्थूलकालनिष्ठतदव्यवहितपूर्वक्षणावच्छिन्नाभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपकारणत्वस्य सत्त्वात्। न च यागादौ स्वर्गकारणतायाः स्वर्गाव्यवहितपूर्वक्षणावच्छिन्नत्वघटितत्वे एवाऽपूर्वकल्पनं प्रसज्यते, तस्याः स्वर्गाधिकरणस्थूलकालनिष्ठाभावप्रतियोगितानवच्छेदकविजातीययागत्ववत्त्वरूपत्वे तु बाधकाभावादपूर्वकल्पनं मुधेति वाच्यम्। अव्यवहितपूर्वक्षणावच्छिन्नाभावप्रतियोगिनि नेदं कारणमित्यबाधितप्रतीतेः कारणतायास्तद्घटितत्वात्। अत एव कारणत्वं नातिरिक्तम्, अपूर्वकल्पनोच्छेदापत्तेः। न चास्तां तदुच्छेदः, अतिरिक्तकारणतायां उक्तधर्मस्यैतद्व्यंजकतायां च गौरवप्रसंगात्। किंचातिरिक्तकारणत्ववादिनां मतेऽनवच्छेदकत्वग्रहप्रतिबध्यतानिरूपितप्रतिबन्धकताशालिनि तथाविधावच्छेदकत्वज्ञाने कारणत्वग्रहप्रतिबध्यतानिरूपितप्रतिबन्धकत्वं कल्पनीयमित्यधिकं गौरवम्। न च तवाप्यन्वयज्ञानस्य कथं कारणताग्रहप्रतिबन्धकतेति वाच्यम्। वक्ष्यमाणानन्यथासिद्धत्वग्रहं प्रत्युक्तव्यभिचारज्ञानाभावस्योपयोगात्। अथ यादृशदण्डो भ्रमिमुत्पाद्य विनष्टः, तत्र कार्याधिकरणनिष्ठाभावीयकारणतावच्छेदकसंयोगसंबन्धावच्छिन्नप्रतियोगितावच्छेदकधर्मवत्त्वाद्दण्डादेरव्याप्तिस्तदवस्था। न च स्वजन्यभ्रमिवत्तासंबन्धेन दण्डस्य हेतुतया तत्संबन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेदकदण्डत्ववत्त्वं दण्डादौ सुलभमेवेति वाच्यम्। अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तत्कार्यं प्रति तदन्यथासिद्धमिति दण्डादेरन्यथासिद्ध्यापत्तेरिति चेत्। मैवम्। अन्यं प्रतीत्यस्य फलाननुगुणमन्यं प्रतीति वक्तव्यम्। अनुगुणत्वं चात्र प्रयोजकत्वम्। तच्च कारणतावच्छेदकसबन्धस्याप्यक्षतमिति। तेन स्वजन्यभ्रमिवत्तासंबन्धेन दण्डादेर्हेतुत्वनये स्वातन्त्र्येण भ्रमेरहेतुत्वेपि न क्षतिः। आकाशस्य तु फलाननुगुणशब्दं प्रति पूर्ववर्तित्वं गृहीत्वैवाकाशत्वेन घटहेतुत्वं ग्राह्यमिति भवत्यन्यथासिद्धिः। यदा तु पञ्चमान्यथासिद्धिवाद एव श्रेयान् तेन परेषां चरितार्थत्वादिति मतमनुमन्यते, तदा तु न दोषलेशोपीति मन्तव्यम्।

वस्तुतस्तु कार्याव्यवहितप्राक्कालावच्छेदेन कार्याधिकरणनिष्ठाभावप्रतियोगितानवच्छेदकस्व-स्वव्यापारान्यतरत्ववत्त्वमेव कारणत्वपदार्थः, न चात्र दोषोस्तीत्यनवद्यम्।

यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनकं तत् ।
तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् ॥ १८ ॥

तत्रेति । समवायिकारणे आसन्नं प्रत्यासन्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः । अत्र यद्यपि तुरीतन्तुसंयोगानां पटासमवायिकारणत्वं स्यात्, एवं वेगादीनामभिघाताद्यसमवायिकारणत्वं स्यात् । तथापि पटासमवायि-

"यत्समवेतं कार्यं भवति"

जिसमें समवायसम्बन्ध से कार्य उत्पन्न हो वह उस कार्य का ,समवायिकारण कहलाता है । (जैसे घटकार्य कपाल में समवायसम्बन्ध से उत्पन्न होता है—अतः कपाल घट का समवायिकारण हुवा) । तथा जो समवाय सम्बन्ध से समवायिकरण में रहता हो–अथ च उस कार्य का जनक हो वह असमवायिकारण होता है । (जैसे कपालद्वयसंयोग घट के समवायिकरण कपाल में रहता भी है अथच घट का कारण भी है अतः कपालद्वयसंयोग घट का असमवायिकारण हुवा, एवं घटरूप के प्रति कपालरूप असमवायिकारण है) । इन दोनों से भिन्न हो–अथ च कारण हो–वह निमित्तकारण होता है । प्रश्न—यद्यपि यहाँ असमवायिकारण लक्षणानुसार तुरीतन्तुसंयोग पट का असमवायिकरण हो जावेगा–(क्योंकि तुरीतन्तुसंयोग पट का समवायिकारण जो तन्तु उसमें रहता भी है–और पट का कारण भी है । एवं वेग भी अभिघाताख्य संयोगका असमवायिकरण हो जायगा । क्योंकि वेग अभिघाताख्यसंयोग के समवायिकारण में समवायसम्बन्ध से रहता है तथा अभिघातका कारण भी है—अर्थात् जिस द्रव्य में वेग उत्पन्न होगा वह वेग उसी द्रव्य में अभिघाताख्य संयोग को उत्पन्न करेगा । जैसे दो मेंढों के वेग से आकर मिलने (संयोग होने) पर जो शब्द होता है वही अभिघाताख्य संयोग है ।

ऐसे ही ज्ञान इच्छा का–इच्छा प्रवृत्ति का–असमवायिकरण हो जायगा । (क्योंकि ज्ञान इच्छा के समवायिकारण आत्मा में समवायसम्बन्ध से रहता भी है–और इच्छा का कारण भी है–क्योंकि ज्ञान होने पर ही इच्छा होती है । आदि पद से प्रयत्न को ले लेना–सिद्धान्त में ऐसा है कि आत्मा के विशेषगुण कहीं भी असमवायिकारण नहीं होते हैं–इससे यही निष्कर्ष निकला कि पूर्वोक्त असमवायिकारण लक्षण की पूर्वोक्त तत्तत्स्थलों में अतिव्याप्ति हो जावेगी । जैसे पट असमवायिकारण लक्षण की तुरीतन्तुसंयोग में । अभिघात के असमवायिकारण लक्षण की वेग में । अगाड़ी भी ऐसे ही समझ लेना ।

तस्येत्यनेनान्यथासिद्धिशून्यस्येति भ्रमो माभूदित्यतो व्याचष्टे तस्य = कारणत्वस्येति । मूले **यत्समवेतमिति** । तथाच समवायसंबन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणताशालित्वं समवायिकारणलक्षणमिति भावः । द्रव्यत्वमेव समवायिकारणत्वमिति तु परमार्थः । अत्र च सर्वत्र कारणत्वस्वरूपकथनं कारणानां लक्षणं द्रष्टव्यम्, अत एव समवायिजनकमित्यादिशब्दाः साधु संगच्छन्ते, इतरथा उदक्षरतापत्तेरिति बोध्यम् ।

कारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयम्। तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव। एवं वेगादिकमपि वेगस्पन्दाद्यसमवायिकारणं भवत्येवेति तत्तत्कार्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं देयम्। आत्मविशेषगुणानां तु कुत्राप्यसमवायिकारणत्वं नास्ति, तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव।

उत्तर—उन-उन कार्यों के असमवायिकारण के लक्षणों में "तत्तद्भिन्नत्व" विशेषण दे देना। जैसे पट के असमवायिकारण के लक्षण में "तुरीतन्तुसंयोगभिन्नत्व" विशेषण दे देना। अब निष्कृष्ट लक्षण—तुरीतन्तु संयोग भिन्नत्वे सति पटसमवायिकारणे प्रत्यासन्नत्वे सति पटकार्यजनकत्वं पटासमवायिकारणत्वम्-यह हुवा) तुरीतन्तु संयोग तुरीपटसंयोग के प्रति असमवायिकारण होता ही है। ऐसे ही वेग भी वेग तथा स्पन्द के प्रति असमवायिकारण होता ही है। आत्मा के विशेषगुण कहीं भी असमवायिकारण नहीं होते हैं। (और असमवायिकारण का लक्षण आत्मा के ज्ञान-इच्छा-वगैरह विशेषगुणों में जा रहा है-अतः उस के गमनप्रयुक्त अतिव्याप्ति वारणार्थ) ज्ञानादिभिन्नत्व विशेषण असमवायिकारण के सामान्य लक्षणमे अवश्य ही दे देना चाहिये।

कारणमिति। अन्यथासिद्धस्य कपालत्वादेर्निरासायेयमुक्तिः। **स्यादिति**। पटसमवायिकारणे तन्तौ तुरीतन्तुसंयोगस्य वर्त्तमानत्वादिति भावः। अत्रापीष्टापत्तौ तुरीतन्तुसंयोगनाशात्पटनाशापत्तिः, असमवायिकारणनाशात्कार्यद्रव्यनाश इति सिद्धान्तात्। तन्तुसंयोगानां पटाऽसमवायिकारणत्वस्येष्टत्वादाह **तुरीति**। अत्र न तुरीतन्तुसंयोगत्वेन हेतुत्वम्, समवायेन पटत्वावच्छिन्नं प्रति तुरीसंयोगत्वेनैव हेतुत्वात्, तथाप्यनेन रूपेण तुरीतन्तुसंयोगस्य हेतुत्वं निष्प्रत्यूहम्। ननु समवायिकारणमात्रे आसन्न इत्युक्तौ न दोष इत्यत आह **एवमिति**। वस्तुतो न तुरीतन्तुसंयोगे पटासमवायिकारणत्वापादनं युक्तम्, तुरीशून्यदशायां पटोत्पादवारणाय संयोगेन तुरीत्वेनैव हेतुत्वम्। तुरीसंयोगत्वापेक्षया तुरीत्वस्य कारणतावच्छेदकत्वे लाघवात्। नचैवं संयोगेन चक्षुरादीनामेव हेतुतया निर्वाहेण चक्षुरादिसंयोगत्वेन हेतुता विलीयेतेति वाच्यम्। तत्र प्रमाणत्वानुरोधेन तत्कल्पनाया आवश्यकत्वात्। न चैवं तुरीतन्तुसंयोगादेस्तन्त्वभावेपि तुर्यादेर्हेतुतया तस्यैवाऽसमवायिकारणत्वापत्तिरिति वाच्यम्। अत्र प्रत्यासन्नत्वस्य समवायसंबन्धावच्छिन्नवृत्तित्वपरतया तत्र दोषाभावात्, अन्यथा तन्त्वादीनां तादात्म्येन समवायिकारणे प्रत्यासन्नतया हेतुतया चातिप्रसंगादित्यस्वरसादाह **एवमिती**त्यस्मद्गुरुचरणाः।

यत्तु संयोगेन तुरीत्वेन हेतुत्वे कारणतावच्छेदकसंबन्धत्वकल्पनाया अनेकनिष्ठतया गौरवेण लाघवात्समवायेन तुरीसंयोगत्वेन हेतुत्वम्, गुरुभूतेप्येकस्मिन् कारणतावच्छेदकत्वकल्पनातोऽनेकत्र कारणतावच्छेदकत्वकल्पनाया गरीयस्त्वात्,

अत्र समवायिकारणे प्रत्यासन्नं द्विविधं-कार्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या च । आद्यं यथा—घटादिकं प्रति कपालसंयोगादिकमसमवायिकारणम् । तत्र कार्येण घटेन सह कारणस्य कपालसंयोगस्यैकस्मिन्कपाले प्रत्यासत्तिरस्ति । द्वितीयं यथा—घटरूपम् प्रतिकपालरूपमसमवायिकारणं स्वगतरूपादिकं प्रति समवायिकारणं घटः, तेन सह कपालरूपस्यैकस्मिन्कपाले प्रत्यासत्तिरस्ति । तथा च क्वचित्समवायसम्बन्धेन क्वचित्स्वसमवायिसमवायसम्बन्धेनेति फलितोऽर्थः ।

(समवायिकारण में रहने वाला जो कारण वही तो असमवायिकारण होता है) सो असमवायिकारण का समवायिकारण में रहना दो प्रकार से होता है । प्रथम जैसे "कार्यैकार्थप्रत्यासत्त्या" कार्य के साथ एक अर्थ (अधिकरण में रहना जैसे कार्य जो घट उसके साथ कारण कपाल संयोग एक (अर्थ) कपाल में रहता है । अर्थात् घटात्मक कार्य भी अपने समवायिकारण कपाल में है—और वहाँ कपाल संयोग भी है अतः कपालसंयोग घटकार्य के प्रति "कार्यैकार्थ प्रत्यासत्ति" द्वारा

अतस्तुरीतन्तुसंयोगे पटासमवायिकारणत्वापादनं युक्तमेवेति । तन्न । कारणतावच्छेदकग्रहस्य प्राथमिकतया प्रथमग्रहे लघुभूतधर्मे कारणतावच्छेदकत्वग्रहे तदुत्तरकल्पनाया फलमुखतयाऽदोषादिति । **वेगादीनामिति।** आदिना वाय्वाकाशसंयोगपरिग्रहः । **अभिघातादीत्या**दिना शब्दपरिग्रहः । अभिघातत्वं च संयोगत्वव्याप्यो जातिविशेषः । तदवच्छिन्ने च क्रियाया एवाऽसमवायिकरणत्वं न वेगस्य, सामान्यतः संयोगत्वावच्छिन्नं प्रति क्रियात्वेनाऽसमवायिहेतुत्वात् । वेगस्य तु निमित्तमात्रत्वात्तत्रातिव्याप्तिः । ननु वेगस्य न साक्षादभिघातजनकत्वं किन्तु स्पन्दजननद्वारा, तत्रापि वेगजन्यतावच्छेदकं न स्पन्दत्वं, विनापि क्रियोत्पादात्, अपि तु वेगजन्यतावच्छेदकतया सिद्धा क्रियात्वव्याप्या जातिरेवाभ्युपेया, तथाच तादृशजात्यवच्छिन्नं प्रति वेगत्वेन हेतुत्वम्, तादृशविजातीयक्रियात्वेन अभिघातत्वावच्छिन्ने च हेतुत्वमुपगम्यते इति वेगस्याभिघातहेतुतायां मानाभाव इति चेन्न । अभिघातत्वावच्छिन्नं प्रति विजातीयक्रियात्वेन वेगत्वेन वा हेतुहेतुमद्भाव इत्यत्र नियामकाभावेन वेगहेतुताया अपि सिद्धेः ।

वस्तुतो विजातीयक्रियात्वेनैवाभिघातहेतुत्वं वेगनाशेपि क्रिययाऽभिघातजननादव्यभिचारेण वेगत्वेन हेतुत्वाभावो निर्व्यूढ इति चिन्तनीयम् । एतदस्वरसादेव वाह **ज्ञानादिकमिति** । गुरवस्तु स्वकार्य-स्वाश्रयसमवेतानपेक्षकं यत् यत्समवायिकारणे प्रत्यासन्नं कारणं तत् तदसमवायिकारणमित्युक्तौ दोषाभावादाह **ज्ञानादिकमितीति वदन्ति । स्यादिति ।** ज्ञानस्य इच्छासमवायिकारणे प्रत्यासन्नत्वादिति

इत्थं च कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्या समवायिकारणे प्रत्यासन्नं कारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यलक्षणं पर्यवसन्नम्। आभ्यां = समवायिकारणासमवायिकारणाभ्यां, परं = भिन्नं, कारणं तृतीयं = निमित्तकारणमित्यर्थः ॥१८॥

येन सह पूर्वभावः, कारणमादाय वा यस्य।
अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् ॥१९॥
जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते।
अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः ॥२०॥
एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम्।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥२१॥
तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः।
पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ ॥२२॥

असमवायि कारण हो गया। द्वितीय जैसे—घटरूप के प्रति कपालरूप असमवायिकारण होता है। यहाँ अपने रूपादि के प्रति समवायिकारण घट है, उस घट के साथ कपालरूप एक (अधिकरण) कपाल में वर्त्तमान है। (यहां प्रत्यासत्ति शब्द का अर्थ है सम्बन्ध वह सम्बन्ध बिना किसी पदार्थ के रहे बन नहीं सकता है अतः हमने प्रत्यासत्तिशब्द का "सम्बन्ध" अर्थ न करके "रहना" ही अर्थ किया) इस प्रकार कारणता के नियामक दो सम्बन्ध हैं—आद्य पक्ष में अर्थात् कार्यैकार्थप्रत्यासत्तिपक्ष में "समवाय" अर्थात् घट कार्य के साथ कपालसंयोग समवायसम्बन्ध से कपाल में है अतः कपाल संयोग की कारणता का नियामक समवाय सम्बन्ध है। द्वितीयपक्ष में "स्वसमवायिसमवेतत्व" कारणता का नियामक है—"समवेतत्व" प्रकृत में "समवाय" रूप है। जैसे घटरूप के प्रति कपालरूप "स्वसमवायि समवाय"सम्बन्ध से कारण होता है—स्वपद से कारण जो कपालरूप उसे लिया—उसका समवायी कपाल—उसका समवाय रहा घट में—इस सम्बन्ध से घटरूप के प्रति कारण जो कपालरूप वह भी घट में है—और घटरूप भी घट में—अतः घटरूप के प्रति कपालरूप असमवायि कारण हो गया।

वही मूल में कहा है कि "क्वचित्समवायसम्बन्धे"नेत्यादि। इस प्रकार कार्य के साथ या-कारण के साथ समवायिकारणरूप एक अर्थ में अन्यतर (दोनों में से एक) प्रत्यासत्ति (सम्बन्ध) से रहने वाला जो ज्ञानादिभिन्न कारण वही असमवायि कारण होता है। समवायिकारण तथा असमवायिकारण इन दोनों से भिन्न जो कारण वह निमित्तकारण तृतीय कारण है

भावः। तुरीतन्तुसंयोगभिन्नत्वमिति। समवायिकारणभिन्नसमवेतभिन्नत्वं विशेषणं देयमिति भावः, अत्रेदं संभवप्रायादुक्तम्, वस्तुतस्तु विशिष्य कार्यासमवायि-

कारणलक्षणे प्रविष्टकारणत्वं न सामान्यतः कार्याधिकरणनिष्ठाभावप्रतियोगितानवच्छेदकाऽन्यथासिद्ध्यनिरूपकतावच्छेदकधर्मवत्त्वरूपमिह विवक्षितम्, अपि तु पटासमवायिकारणलक्षणे पटसमवायिकारणनिष्ठाभावप्रतियोगितानवच्छेदकतन्तुसंयोगत्वरूपधर्मवत्त्वम्। एवं वेगादीनामपि नाऽभिघाताऽसमवायिहेतुत्वम्, तत्रापि अभिघातवन्निष्ठाभावप्रतियोगितानवच्छेदकस्पन्दत्ववत्त्वम् वक्तव्यमिति न दोषः। वस्तुतस्तु अभिघातान्तर्भावेन न निवेशो वाच्यः, किन्तु संयोगवन्निष्ठाभावप्रतियोगितानवच्छेदकस्पन्दत्ववत्त्वनिवेशेनैव संयोगसाधारण्येन स्पन्दादिहेतुत्वं निर्वहतीत्यन्यत्र विस्तरः। अत्र सामान्यलक्षणविशेषलक्षणेषु निविष्टकारणत्वघटकीभूताभावे प्रतियोगिवैयधिकरण्यं निवेशनीयम्, नातस्तन्तुसंयोगादेर्हेतुत्वानुपपत्तिः। न च तर्हि अन्यथासिद्ध्यनिरूपकतावच्छेदकत्वनिवेशो व्यर्थः, इष्टापत्तेः, तस्य सामान्यलक्षणे एव निवेशात्।

यत्तु निमित्तहेतुत्वाश्रयभिन्नवृत्तिकारणत्वस्याऽसमवायिकारणे निवेशान्नोक्तदोष इति, तन्न, वक्ष्यमाणनिमित्तहेतुत्वस्यासमवायिहेतुभेदघटितत्वेनाऽन्योन्याश्रयात्।

नन्वत्र प्रत्यासन्नत्वं समवायेन वृत्तित्वरूपमेव, तथा च समवायसंबन्धावच्छिन्नकार्यतानिरूपितसमवायसंबन्धावच्छिन्नकारणत्वमसमवायिकारणत्वं फलितम्, एवं च सति पटरूपाऽसमवायिकारणे तन्तुरूपेऽव्याप्तिः, तन्तुरूपस्य पटरूपाऽसमवायिकारणे पटे प्रत्यासन्नत्वाभावादित्यत आह **अत्रेति**।

नन्वेवं "उक्तान्यतरप्रत्यासत्त्या समवायिकारणे प्रत्यासन्नं ज्ञानादिभिन्नं कारणमसमवायिकारणमिति लक्षणं पर्यवसितम्, तच्च न संभवति, द्रव्यत्वादेः स्वप्रत्यक्षेऽसमवायिकारणत्वापत्तेः, द्रव्यत्वस्य प्रत्यक्षसमवायिकारणात्मनि प्रत्यासन्नत्वात्, विषयविधया कारणत्वाच्च। न च कारणत्वमुक्तान्यतरप्रत्यासत्त्या ग्राह्यमिति वाच्यम्। एवंसति कारणत्वमात्रस्यैव लक्षणौचित्यात्, तथैव पर्यवसितलक्षणमाह **इत्थंचेति**। तथाच समवायसंबन्धावच्छिन्नकार्यतानिरूपितसमवाय-स्वसमवायिसमवायान्यतरसंबन्धावच्छिन्नकारणताश्रयत्वमसमवायिकारणत्वं फलितम्। अत्र ज्ञानादिभिन्नत्वविशेषणमिच्छादिकं प्रति ज्ञानादिकं समवायेन हेतुरिति मत्वाभिहितम्। वस्तुतो विषयताप्रत्यासत्त्या कारणत्वान्नोपादेयमेव तत्।

निमित्तकारणमिति। तथाच समवायिकारणभिन्नत्वे सति असमवायिकारणभिन्नत्वे सति कारणत्वं निमित्तकारणत्वं फलितम्। ननु ईश्वरघटसंयोगे ईश्वरस्य निमितत्वानुपपत्तिः, तस्य द्रव्यत्वेन रूपेण संयोगहेतुत्वात् समवायिकारणभेदविरहात्, इष्टापत्तौ तु कार्यमात्रे निमित्तत्वसिद्धान्तापलापापत्तिरिति चेत्। मैवम्। यद्धर्मावच्छिन्नकार्यतानिरूपितसमवायिकारणताशून्यत्वविशिष्टयद्धर्मावच्छिन्नकार्यतानिरूपितासमवायिकारणताशून्यत्वसमानाधिकरणयद्धर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वं, तद्धर्मावच्छिन्नं प्रति तस्य निमित्तत्वम्, अस्ति चेश्वरस्य जन्यत्वावच्छि-

इदानीमन्यथासिद्धत्वमेव कियतां पदार्थानामत आह—येनेति। यत्कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते तत्कार्य्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः। यथा घटं प्रति दण्डत्वमिति। द्वितीयमन्यथासिद्धमाह—कारणमिति। यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः, किं तु कारणमादायैवान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धम्, यथा दण्डरूपम्। तृतीयमाह—

अन्यथासिद्ध बतलाते हैं—येन सह इत्यादि ग्रन्थ से-

यस्य—जिस कारण को—(जिस कार्य के प्रति) पूर्वभाव—(पूर्ववृत्तित्व) अर्थात् कारणत्व-येन सह जिसरूप से (गृहीत होता है)। वह रूप (उस कार्य के प्रति पूर्ववर्त्ती होते हुवे भी) अन्यथा सिद्ध ही है। जैसे घट के प्रति दण्डत्व। अर्थात् घट के प्रति दण्ड को दण्डत्वेन रूपेण कारणता है अतः घट के प्रति दण्ड कारण दण्डत्व अन्यथा सिद्ध है—क्योंकि घट के प्रति दण्डत्व का कोई भी उपयोग नहीं है।

द्वितीय अन्यथा सिद्ध बतलाते हैं—"कारणमादाय वा यस्य" अथवा कारण के ग्रहणपूर्वक जिसका ग्रहण हो वह भी अन्यथा सिद्ध होता है। अर्थात जिसका जिस कार्य के प्रति स्वतंत्ररूप से अन्वयव्यतिरेक नही बन सकता किन्तु कारण को लेकर ही जिसके अन्वयव्यतिरेक का निश्चय जिस कार्य के प्रति किया जावे—वह भी इस कार्य के प्रति अन्यथा सिद्ध माना गया है। जैसे घट के प्रति दण्डरूप। (दण्डरूप का घट के प्रति अन्वय व्यतिरेक अपने कारण दण्ड को लेकर ही बनता है-अतः दण्डरूप भी घट के प्रति दण्डत्व की तरह अन्यथासिद्ध ही है—क्योंकि दण्ड का रूप—दण्ड से अलग नहीं हो सकता है—जिससे कि वह

न्नकार्यतानिरूपितसमवायिकारणताशून्यत्वविशिष्टजन्यत्वावच्छिन्नकार्यतानिरूपिताऽसमवायिकारणताशून्यत्वसमानाधिकरणजन्यत्वावच्छिन्नकार्यतानिरूपितकारणताशालित्वमिति। न चैवं जन्यत्वावच्छिन्नकार्यतानिरूपितसमवायिकारणतायाः अप्रसिद्धत्वेन तच्छून्यत्वस्य सुतरामप्रसिद्धिः। एवमसमवायिकारणताशून्यत्वमपीत्यव्याप्तिः। अत्रोच्यते। यद्यद्धर्मावच्छिन्नकार्यतानिरूपितसमवायिकारणत्वं यद्यद्धर्मावच्छिन्नकार्यतानिरूपिताऽसमवायिकारणत्वं प्रत्येकं तत्तन्निष्ठाभावप्रतियोगितावच्छेदकं यद्यद्धर्मावच्छिन्नकार्यतानिरूपितयद्यद्धर्मावच्छिन्नकारणत्वत्वं तद्धर्माश्रयं प्रति तद्धर्माश्रयस्य निमित्तकारणत्वमित्युक्तौ न कोपि दोषः।

वस्तुतस्तु स्वसमवायिकारणत्वस्वाऽसमवायिकारणत्वाऽन्यतरशून्यत्वे सति कारणत्वं निमित्तकारणत्वं स्वत्वघटितं वाच्यम्, अन्यथा दण्डस्यापि स्वगतरूपसमवायिकारणत्वादसंभवापत्तेः। एवं च घटादिध्वंसनिमित्तकारणे दण्डादावव्याप्तिः घटध्वंससमवायिकारणत्वाप्रसिद्धेः। तथा च वस्तुविशिष्टत्वं निमित्तकारणत्वम्। वै० स्वकारणत्व-स्वाभाववत्त्वोभयसंबन्धेन। स्वाभावश्च समवायिकारणत्वाऽसमवायिकारणत्वाऽन्यतरसंबन्धावच्छिन्नप्रतियोगिताक इति नाप्रसिद्धिः।

यत्कार्यमिति। अत्र च कार्यकारणशब्दौ यच्छब्दार्थकौ द्रष्टव्यौ। यमवच्छेदकीकृत्य यस्यान्वयव्यतिरेकौ गृह्येते तस्यावच्छेदकस्य तेनान्यथासिद्धिरित्यर्थः। **तद्रूपमन्यथासिद्धमिति।** तेन कारणेनेति शेषः। न च कदाचिद्दण्डरूपं घटपूर्ववृत्तीति ग्रहेऽवच्छेदकदण्डस्यापि रूपेणान्यथासिद्ध्यापत्तिरिति वाच्यम्। स्वतन्त्रान्वयव्यतिरेकशालिनो यस्येति स्वतन्त्रान्वयव्यतिरेकशून्यं यमिति वा विवक्षणात्। तेन दण्डवच्चक्रं घटनियतपूर्ववर्त्तीति ग्रहेपि न दण्डस्यान्यथासिद्धिः। मूले- **येन सहपूर्वभाव** इत्येकान्यथासिद्धिः। साहित्यमत्र पूर्ववर्त्तिग्रहविषयत्वेन, विशिष्टे पूर्ववर्त्तित्वग्रहे विशेषणेपि पूर्ववर्तित्वग्रहादिति बोध्यम्।

कारणमादाय वा यस्येति मूले पूर्वभाव इत्यनुषज्यते। अत एव पूर्वभावपदस्य प्रथमवाक्यचरमावयवत्वं द्वितीयवाक्यादित्वं च चारु संगच्छते। वाशब्दः पूर्वभावपदस्याऽऽकर्षणार्थः। **कारणमितीति।** कारणं=पृथगन्वयव्यतिरेकशालिनम्, अन्यथा कारणत्वस्यान्यथासिद्धिकुक्षिनिविशिष्टत्वे आत्माश्रयापत्तेः। **यस्येति।** तथाच स्वतन्त्रान्वयव्यतिरेकशालिनिष्ठविषयतानिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यनिष्ठयद्धर्मावच्छिन्नविशेष्यताशालिनो यद्धर्मावच्छिन्नं प्रति पूर्ववृत्तित्वं गृह्यते तद्धर्मावच्छिन्नस्य तद्धर्मावच्छिन्नं प्रति स्वतन्त्रान्वयव्यतिरेकशालिना तेनान्यथासिद्धिरित्यर्थः। भवति च दण्डरूपं घटपूर्ववर्त्तीतिग्रहीयतथाविषयताशालिनो रूपस्य स्वतन्त्रान्वव्यतिरेकशालिना दण्डेनाऽन्यासिद्धिः। अत्र यन्निष्ठविषयतानिरूपितत्वमात्रनिवेशे दण्डरूपं घटपूर्ववर्त्तीतिग्रहीयरूपत्वनिष्ठविषयतानिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यनिष्ठविशेषताशालिनो रूपस्य रूपत्वेनान्यथासिद्धिप्रसंगः। न चेष्टापत्तिः, कारणेनाऽकारणस्यान्यथासिद्धेरेव तान्त्रिकसंमतत्वात्। तत्र रूपस्येव रूपत्वस्याप्यहेतुत्वात्। न च स्वतन्त्रान्वयव्यतिरेकशालिनिष्ठविषयतानिरूपितयन्निष्ठविषयताशालिनो यद्धर्मावच्छिन्नं प्रतीत्येवास्तु, किं स्वतन्त्रान्वयव्यतिरेकशून्यत्वोत्पादानेनेति वाच्यम्। यत्र दण्डचक्रयोर्घटपूर्ववर्त्तिताग्रहो 'दण्डवच्चक्रं घटपूर्ववर्त्ती-' त्याकारकः, तत्रैतद्ग्रहीयस्वतन्त्रान्वयव्यतिरेकशालिदण्डनिष्ठविषयतानिरूपितचक्रनिष्ठविशेष्यताशालिनश्चक्रादेर्दण्डेनान्यथासिद्धिप्रसंगः। युक्तं चैतत्, अन्यथाऽनेनैव दण्डत्वादेरन्यथासिद्धिसंभवे येन सह पूर्वभाव इत्यस्य वैयर्थ्यापत्तेः। अस्मन्नये तु दण्डः पूर्ववर्तीतिग्रहीयस्वतन्त्रान्वयव्यतिरेकशालिदण्डनिष्ठविषयतानिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यनिष्ठविशेष्यताशालित्वाभावाद्दण्डत्वस्येति न वैयर्थ्यम्।

अथ वह्न्यनुमितिं प्रति अप्रामाण्यग्रहाभावविशिष्टधूमपरामर्शत्वेन हेतुत्वं स्वातन्त्र्येण वाऽप्रामाण्यग्रहाभावस्य हेतुत्वम्, उभयथापि अप्रामाण्यग्रहाभावेन धूमपरामर्शस्याऽन्यथासिद्धिप्रसंगः। तत्रापि अप्रामाण्यग्रहाभावविशिष्टपरामर्शः पूर्ववर्त्तीत्याकारकग्रहीयस्वतन्त्रान्वयव्यतिरेकशाल्यप्रामाण्यग्रहाभावनिष्ठविषयतानिरूपितस्वतंत्रान्वयव्यतिरेकशून्यप्रकारकत्वनिष्ठपरामर्शत्वावच्छिन्नविशेष्यताशालिनो वन्ह्यनुमितित्वावच्छिन्नं प्रति पूर्ववर्तित्वग्रहादिति चेत्।

अन्यं प्रतीति। अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम्, यथा घटादिकं प्रत्याकाशस्य, तस्य हि घटादिकं प्रति कारणत्वमाकाशत्वेनैव स्यात्, आकाशत्वं हि शब्दसमवायिकारणत्वम्, एवं च तस्य शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धम्। ननु शब्दाश्रयत्वेन तस्य कारणत्वे काऽन्यथासिद्धिरिति चेत्? पञ्चमीति

स्वतंत्र घट के प्रति कारण बने। तृतीय अन्यथासिद्ध— अन्य कार्य के प्रति पूर्ववृत्तित्व (कारणत्व) का ग्रहण (निश्चय) करके ही जिसको जिस कार्य के प्रति पूर्ववृत्तित्व का निश्चय किया जाता है—वह उस कार्य के प्रति अन्यथासिद्ध है। जैसे घट के प्रति (आकाश नित्य एवं व्यापक होने के नाते कार्यमात्र के प्रति नियतपूर्ववर्त्ती है तो घट के प्रति भी नियतपूर्ववर्त्तित्वरूप कारणत्व सिद्ध ही है—परन्तु) आकाश को घटादि के प्रति कारणत्व आकाशत्वेन रूपेण मानना पड़ेगा— आकाशत्व है शब्दसमवायिकारणत्व (तो शब्दसमवायिकारणत्व कहने मात्र से ही आकाश शब्द का कारण है यह सिद्ध हो जाता है) इस प्रकार आकाश को शब्द के प्रति जनकत्व (कारणत्व) का निश्चय करके ही घटादि (कार्य) के प्रति जनकता का निश्चय करते हैं—(तब आकाश शब्द के प्रति ही कारण माना जावेगा—और घटादि के प्रति) अन्यथा सिद्ध ही होगा। प्रश्न— आकाशत्व यदि शब्दसमवायिकारणत्व हो तब आकाश को शब्द के प्रति कारणत्व निश्चय होने से घट के प्रति अन्यथासिद्धत्व बन जाता है—परन्तु आकाशत्व यदि शब्दाश्रयत्वरूप मान लिया जावे, तब तो शब्दाश्रयत्व से शब्द का कारण आकाश नहीं सिद्ध होता अपितु शब्द का आश्रय आकाश सिद्ध होंता है तो) शब्दाश्रयत्वेन रूपेण आकाश को (घटादिके प्रति) कारण मानने में

न। स्वतन्त्रान्वयव्यतिरेकशून्यनिष्ठाऽखण्डधर्मावच्छिन्नविषयताशालित्वस्य विवक्षितत्वात्। धूमपरामर्शत्वस्याखण्डधर्मानात्मकतया दोषाभावात्। रूपत्वस्याऽखण्डधर्मत्वात्। एतेन कुलालजनको घटपूर्ववर्त्तीतिग्रहीयस्वतन्त्रान्वयव्यतिरेकशालिनिष्ठविषयतानिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यनिष्ठयद्धर्मावच्छिन्नविषयताशालिनो घटपूर्ववर्त्तित्वग्रहात्स्वतन्त्रान्वयव्यतिरेकशालिना कुलालेनैव कुलालपितुरन्यथासिद्धिसंभवेन "जनकं प्रती"त्याद्यन्यथासिद्धिवैयर्थ्यम् इति निरस्तम। जनकत्वस्याखण्डत्वाभावात्।

यद्वा नाऽखण्डधर्मावच्छिन्नत्वस्य निवेशः, किन्तु स्वतन्त्रान्वयव्यतिरेकशून्ये स्वतन्त्रान्वयव्यतिरेकितावच्छेदकधर्मसामानाधिकरण्यस्य, धूमपरामर्शकुलालपित्रोस्तु न स्वतन्त्रान्वयव्यतिरेकितावच्छेदकाऽप्रामाण्यग्रहाभावत्वकुलालत्वसामानाधिकरण्यम्, एतेन दण्डवद्रासभो घटपूर्ववर्त्तीतिग्रहीयोक्ताखण्डधर्मावच्छिन्नविशेष्यताशालित्वादनेनैव रासभान्यथासिद्धिसंभवे पञ्चमान्यथासिद्धिवैयर्थ्यमित्यपि परास्तम्। रासभादेरुक्तावच्छेदकासामाधिकरण्यात्। न चैतत्कल्पे स्वतन्त्रान्वयव्यतिरेकिताव-

गृहाण । नन्वाकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदकमिति चेत् ? कवत्वादिकं विशेषपदार्थो वेति । चतुर्थमन्यथासिद्धमाह जनकं प्रतीति । यत्कार्यजनकं प्रति पूर्ववृतित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम् । यथा कुलालपितुर्घटं प्रति । तस्य हि कुलालपितृत्वेन घटं प्रति जनकत्वे एवान्यथासिद्धिः, कुलालत्वेन जनकत्वे त्विष्टापत्तिः, कुलालमात्रस्य घटं प्रति जनकत्वात् । पञ्चममन्यथासिद्धमाह–

कौन अन्यथासिद्ध आकाश होगा । उत्तर—पञ्चम अन्यथासिद्ध होगा । प्रश्न—(आकाश घट के प्रति कारण न हो) शब्द के प्रति तो आकाश कारण है–तब कारणतावच्छेदक कौन होगा उत्तर—कवत्त्व आदि । (आदि पद से खवत्त्व-गवत्त्व इत्यादि को ले लेना ।

मतलब यह है कि "क" यह जो वर्णात्मक शब्द तद्वान् आकाश ही होगा–अर्थात् "क" वान् हुआ आकाश-और आकाश ही शब्दमात्र का समवायिकारण है–कारणतावच्छेदक "कवत्त्व" हुवा क्योंकि कारण में रहने वाला धर्म कारणतावच्छेदक होता है । प्रश्न -(जैसे शब्दकारणता का अवच्छेदक कवत्त्व को आपने माना वैसे ही-खवत्व -गवत्व को भी कारण-तावच्छेदक क्यों न माना जाय विनिगमनाविरहात् –क्योंकि "ख" शब्दवान् भी आकाश है 'खवत्व' आकाश में रहा । ऐसे ही "ग" शब्दवान् जब कि आकाश हुवा तो "गवत्त्व" भी आकाश में रहा तो ये सब भी कारणतावच्छेदक होगें) उत्तर—(अनन्त को कारणतावच्छेदक मानने की अपेक्षया) एक विशेषपदार्थ ही को (कारणतावच्छेदक क्यों न मान लिया जावे) वही मूल में कहा है कि "विशेषपदार्थो वा" । चतुर्थ अन्यथासिद्धि—जिस कार्य के जनक के प्रति पूर्ववृत्तित्व का निश्चय करके ही जिसको जिस कार्य के प्रति पूर्ववृत्तित्व का निश्चय करते हैं—वह उस कार्य के प्रति अन्यथासिद्ध होता है । जैसे कुलालपिता घट के प्रति । कुलाल-पिताको कुलालपितृत्वेन रूपेण घट के प्रति यदि कारण मानें तो वह कुलाल (कुम्हार) पितृत्व रूप से घट के प्रति अन्यथासिद्ध है । कुलालस्वरूप से यदि कारण मानें तो कारणता में इष्टापत्ति है । (क्योंकि कुलालस्वरूप से) कुलालमात्र ही घट के प्रति कारण होते हैं । अभिप्राय यह है कि कुलालपिता को समझकर घट के प्रति कारण मानते हैं कि यह घट का कारण जो कुलाल-उसका भी कारण है –अर्थात् जब यह घट के कारण का भी कारण है तों घट का कारण तो अवश्य ही है–ऐसी परिस्थिति में कुलालपिता अन्यथासिद्ध माना गया है । और कुलालत्वरूप से यदि घट के प्रति उसे कारण मानें-अर्थात् यह कुम्हार है यह समझकर यदि हम उसे कारण मानते हैं—तब कुलालपिता घट के प्रति कारण ही माना जायगा—क्योंकि कुलालमात्र ही घट के प्रति कारण माने गये है । जिस कुलाल ने अद्यावधि घट निर्माण ही नहीं किया उसमें भी घट की स्वरूपयोग्यत्वरूपा कारणता है ।

च्छेदकसामानाधिकरण्यस्यैव निवेशोऽस्तु, तथा च स्वतन्त्रान्वयव्यतिरेकशालि-निष्ठविषयतानिरूपितस्वतन्त्रान्वयव्यतिरेकितावच्छेदकसमानाधिकरणयन्निष्ठयद्धर्मा-

अतिरिक्तमिति । अवश्यक्लृप्तनियतपूर्ववर्त्तिन एव कार्यसंभवे तद्भिन्नमन्यथासिद्धमित्यर्थः । अत एव द्रव्यप्रत्यक्षे महत्त्वं कारणम् अनेकद्रव्यवत्त्वमन्यथासिद्धम् । तत्र हि महत्त्वमवश्यक्लृप्तं तेनानेकद्रव्यवत्त्वमन्यथासिद्धम् । नच वैपरीत्ये किं विनिगमकमिति वाच्यम्, महत्त्वत्वजातेः कारणतावच्छेदकत्वे लाघवात् ॥१९॥२०॥ रासभादिरिति । यद्यपि यत्किंचिद्घटव्यक्तिं प्रति रासभस्य नियतपूर्ववर्त्तित्वमस्ति, तथापि घटजातीयं प्रति सिद्धकारणभावैर्दण्डादिभिरेव तद्व्यक्तेरपि संभवे रासभोऽन्यथासिद्ध इति भावः । एते-

पञ्चम अन्यथासिद्ध—अवश्य क्लृप्त (निश्चित) पूर्ववृत्तीपदार्थ (नियम से पूर्व में रहने वाले पदार्थ)—जैसे दण्ड-चक्र-चीवर कुलाल-मृत्तिका-इत्यादि घटोत्पत्ति में अवश्य निश्चित हैं तथा नियम से घट के पूर्व में रहने वाले हैं–इन्हीं से) घटादि कार्य यदि संभव हो तो उससे भिन्न सब अन्यथासिद्ध होते हैं। इसी लिये प्रत्यक्ष में महत्व कारण है–और अनेक द्रव्यवत्त्व अन्यथासिद्ध है। (अभिप्राय यह है कि परमाणु में तथा द्व्यणुक में न महत्त्व है–और न अनेक द्रव्यवत्त्व है–अतः इन दोनों का प्रत्यक्ष नहीं होता है। त्र्यणुक में महत्व भी है, अनेक द्रव्यवत्त्व भी है अतः उसका प्रत्यक्ष होता है–इसलिये चाक्षुषप्रत्यक्ष का अन्वयव्यतिरेक जैसे महत्व के साथ है–ऐसे ही अनेक द्रव्यवत्त्व के साथ भी—तब फिर चाक्षुषप्रत्यक्ष में महत्त्व ही कारण क्यों? अनेकद्रव्यवत्त्व कारण क्यों नहीं? इस शंका का सामाधान करते हैं कि "अतएव प्रत्यक्षे महत्त्वं कारणम्" इत्यादि) अर्थात् चाक्षुष प्रत्यक्ष के प्रति महत्त्व कारणतया अवश्य क्लृप्त है—अतः वह कारण है। और अनेक द्रव्यवत्त्व वैसा न होने से अन्यथासिद्ध है। प्रश्न—विपरीत मानने में आपके यहाँ क्या विनिगमक (युक्ति) है। (अर्थात् अनेक द्रव्यवत्त्व को कारण मानलिया जाय—और महत्त्व को अन्यथा सिद्ध) उत्तर—महत्त्व को कारण मानने में कारणतावच्छेद महत्त्वत्व जाति पड़ेगी अतः उसमें लाघव है। (अनेक द्रव्यवत्त्व को कारण मानने में कारणता वच्छेदक अनेक द्रव्यवत्त्व पड़ेगा–वह गुरुभूत है, अतः गुरुभूतधर्मावच्छिन्न को कारण मानने में गौरव होता है—और लघुभूत जो धर्म-तद्धर्मावच्छिन्न को कारण मानने में लाघव होता है यह भाव है।

कारिकार्थ—प्रथम-यस्य (जिसको) पूर्वभाव (कारणता) येन सह (जिसके साथ) (हो स्वतंत्र न हो वह उस कार्य के प्रति अन्यथासिद्ध) जैसे घट के प्रति दण्डत्व दण्ड में रहने के नाते दण्ड को लेकर ही कारण बन सकता है स्वतंत्र नहीं अतः वह अन्यथासिद्ध ही होगा।

द्वितीय—यस्य (जिसको) पूर्वभाव (कारणत्व) कारणमादायैव (कारणको लेकर ही) बने (स्वतंत्र नहीं वह भी अन्यथा सिद्ध) जैसे दण्डरूप भी अपने कारण दण्ड को लेकर ही घट के प्रति कारण बन सकता है स्वतंत्र नहीं, अतः दण्डरूप भी घट के प्रति अन्यथा सिद्ध ही है।

तृतीय—किसी अन्य के प्रति पूर्वभाव ज्ञात होने पर ही जिसके पूर्वभाव (कारणत्व)

का विज्ञान (निश्चय किया जावे वह भी अन्यथा सिद्ध होता है) जैसे घट में आकाश। आकाश को शब्द के प्रति कारणत्व ज्ञात होने पर घट के प्रति कारणत्व का निश्चय होता है अतः वह अन्यथासिद्ध।

चतुर्थ—जनक के प्रति (घटकार्यका जनक जो कुलाल उसके प्रति) पूर्ववृत्तिता (कारणत्व) का अपरिज्ञाय (निश्चय हुवे विना) यस्य (जिसको) (यत् कार्यं प्रति कारणत्वं) न गृह्यते (न निश्चय होवें) वह भी उस कार्य के प्रति अन्यथासिद्ध है, जैसे घट के प्रति कुलालपिता। पञ्चम—नियतावश्यक पूर्वभाविनं (नियतरूप से आवश्यक जो पूर्वभावी (पूर्वमें होने वाले पदार्थ) उनसे अतिरिक्त यद् भवेत् (जो भी होवें) वे सब अन्यथासिद्ध हैं। जैसे घट के प्रति रासभ, जबकि घटकार्य आवश्यक पूर्ववर्त्ती जो दण्ड-चक्र-चीवर इत्यादि उन्हीं से संपन्न हो सकता है तो रासभ को घट के प्रति कारण क्यों माना जाय अतः वह घटके प्रति अन्यथासिद्ध है। १६—२०।

ये पांच अन्यथासिद्ध हैं आदिम दण्डत्व—द्वितीय दण्डरूप-तृतीय आकाश—चतुर्थ कुलालपिता-पञ्चम रासभ आदि इनमें यह पञ्चम अन्यथासिद्ध आवश्यक है, यह कारिकार्थ हुवा। यद्यपि यत्किञ्चित् घटव्यक्ति के रासभ भी नियत पूर्ववर्त्ती है-तथापि समस्तघटों के प्रति सिद्ध है कारणभाव (कारणता) जिन्हों को ऐसे दण्ड-चक्र आदि कारणों से ही उस यत्किञ्चित् घट व्यक्ति

वच्छिन्नविषयताशालिनो यद्धर्मावच्छिन्नं प्रति पूर्ववर्त्तित्वं गृह्यते तद्धर्मावच्छिन्नस्य तद्धर्मावच्छिन्नं प्रति अन्यथासिद्धिरिति निर्गलितार्थः। चक्रत्वादेश्चोक्तविषयताशालित्वेपि न स्वतन्त्रान्वयव्यतिरेकितावच्छेदकसामानाधिकरण्यमिति वाच्यम्। समवेतत्वसंबन्धेन दधिविशिष्टं दधिपूर्ववर्त्तीतिग्रहीयस्यस्वतन्त्रान्वयव्यतिरेकशालिदधिनिष्ठविषयतानिरूपितस्वतन्त्रान्वयव्यतिरेकितावच्छेदकदधित्वसमानाधिकरणदधिनिष्ठदधित्वाच्छिन्नविशेष्यताशालिदध्नोऽन्यथासिद्ध्यापत्तेरिति रहस्यम्।

अन्यं प्रतीति। फलाननुगुणमन्यं प्रतीत्यर्थः। तेन 'स्वर्गं' प्रति यागादेर्घटं प्रति दण्डादेश्चाऽपूर्वभ्रमिपूर्ववर्त्तित्वग्रहोत्तरकालीनग्रहविषयत्वेपि नान्यथासिद्धिः। नन्वेवमाकाशादेर्घटादिकं प्रत्यहेतुत्वमिव संयोगादिकं प्रत्यपि हेतुता विलीयेत, तत्रापि शब्दं प्रति पूर्ववर्त्तित्वग्रहोत्तरमेव संयोगादिकं प्रति पूर्ववर्त्तित्वग्रहादिति चेत्। यद्धर्मे यद्धर्मावच्छिन्ननिरूपितनियतपूर्ववर्त्तितावच्छेदकत्वग्रहोत्तरकालमेव यद्धर्मावच्छिन्ननिरूपितनियतपूर्ववर्त्तितावच्छेदकत्वग्रहः, तद्धर्मावच्छिन्नस्य तद्धर्मावच्छिन्नं प्रति तेन रूपेण हेतुतायामन्यथासिद्धिरित्यर्थात्। आकाशस्याकाशत्वेन रूपेण संयोगत्वावच्छिन्नं प्रति हेतुत्वेऽन्यथासिद्धेरिष्टत्वात्। द्रव्यत्वेन रूपेण संयोगत्वावच्छिन्नं प्रति पूर्ववर्त्तित्वग्रहस्य शब्दत्वावच्छिन्ननिरूपितपूर्ववर्त्तित्वग्रहोत्तरकालीनत्वाभावेन गगनादीनां द्रव्यत्वेन रूपेण संयोगहेतुत्वं निष्प्रत्यूहम्। अथ सिद्धस्य गगनादेरष्टद्रव्यातिरिक्तद्रव्यत्वेन हेतुत्वोक्तावन्यथासिद्ध्यभावः, नहि शब्दपूर्ववर्त्तित्वग्रहोत्तरमेव तद्ग्रहः। किंच शब्दप्रत्यक्षे श्रोत्रत्वेन हेतुता विलीयेत, तत्र शब्दपूर्ववर्त्तित्वग्रहोत्तरमेव तद्ग्रहादिति चेत, तत्र पंचमान्यथासिद्धेरेव संभवात्। शब्दप्रत्यक्षस्थले

ष्विति। एतेषु पञ्चस्वन्यथासिद्धेषु मध्ये पञ्चमोऽन्यथासिद्ध आवश्यकः, तेनैव परेषां चरितार्थत्वात्। तथाहि—दण्डादिभिरवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसंभवे दण्डत्वादिकमन्यथासिद्धम्। न च वैपरीत्ये किं विनिगमकमिति

की भी उत्पत्ति हो जायेगी, रासभ अन्यथासिद्ध ही है। इन पांच अन्यथासिद्धों के मध्य में पञ्चम अन्यथासिद्ध आवश्यक है—उसी से दूसरे भी चरितार्थ हो जायेंगे। तथाहि—अवश्य क्लृप्त नियत पूर्ववर्त्ती दण्ड-चक्र आदिकों से ही जब कि घटात्मककार्य हो सकता है तो (घटकार्य

तु कर्णविवरावच्छिन्नाकाशत्वेन हेतुत्वान्नानुपपत्तिः। नचैवं कार्यमात्रे कालदिशोरहेतुत्वापत्तिः, तत्रापि कालिकदैशिकपरत्वापरत्वपूर्ववर्त्तित्वग्रहे एव तद्ग्रहादिति वाच्यम्। विनापि कालिकादिपरत्वापरत्वपूर्ववर्त्तित्वग्रहमाधारत्वेन कार्यसामान्ये हेतुत्वावधारणादिति संक्षेपः।

आकाशस्य घटादिकं प्रत्यहेतुत्वमिव शब्दं प्रत्यप्यहेतुत्वापत्तिः, तत्रापि शब्दपूर्ववर्त्तित्वग्रहाधीनत्वादित्याशयवान् शंकते **शब्दं प्रति जनकत्वे इति। कवत्वादिकमिति।** इदमुपलक्षणम्—स्वाश्रयसमवायित्वसंबन्धेन शब्दत्वव्यक्तेरवच्छेदकत्वं बोध्यम्। विनिगमकाभावादाह **विशेषपदार्थो वेति।**

पञ्चमान्यथासिद्धिं दर्शयति **अवश्यक्लृप्तेति।** अवश्यक्लृप्तत्वं च शीघ्रप्रतियोग्युपस्थित्या-शरीरलाघवेन जनकतावच्छेदकसंबन्धलाघवेन च बोध्यम्। अत एव गंधं प्रति न रूपप्रागभावस्य हेतुत्वम्, गंधरूपप्रतियोग्युपस्थितेः शीघ्रतया गंधप्रागभावस्यावश्यक्लृप्तहेतुत्वेन तेन रूपप्रागभावस्यान्यथासिद्धेः। शरीरलाघवेनावश्यक्लृप्तत्वमाह **द्रव्यप्रत्यक्षे इति।** अथ द्रव्यप्रत्यक्षत्वस्य नानेकद्रव्यवत्त्वं जन्यतावच्छेदकम्, तदवच्छिन्नस्यात्मन्यप्युत्पत्त्या व्यभिचारात्, न चात्मान्यतथाविधप्रत्यक्षत्वम्, गुरुत्वात्, अतो व्यभिचारादेव न तथाविधहेतुहेतुमद्भाव इति क शरीरनिबन्धनलाघवप्रत्याशेति चेत्। सत्यम्। व्यासज्यवृत्तिधर्मप्रत्यक्षे यावदाश्रयप्रत्यक्षत्वेन हेतुत्वे यावत्त्वादिनिवेशापत्त्या गौरवात्, लाघवेन जात्यन्यसमवेतवृत्तिविषयतासंबन्धेन चाक्षुषत्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसंबन्धेन रूपाभावस्य प्रतिबन्धकत्वोक्त्यैव घटाकाशसंयोगप्रत्यक्षापत्तेर्वारणसंभवेन रूपाभावेन यावदाश्रयप्रत्यक्षस्यान्यथासिद्धेः।

नव्यमतेनाह **तेनैवेति।** पंचमान्यथासिद्धेनैवेत्यर्थः। परेषां = चतुर्णामन्यथासिद्धानाम्। दीधितिकृतस्तु—कारणत्वं नान्यथासिद्धिशून्यत्वघटितम्, अन्यथासिद्धिकुक्षिप्रविष्टावश्यकत्वादीनां दुर्वचत्वात्, किन्तु पदार्थान्तरम्, इत्थंचाऽन्यथासिद्धयेकाऽनेकत्वविचारो दूरत एवापास्त-इत्याहुः। यत्तु—कारणत्वस्याऽतिरिक्तत्वेऽपि तदभिव्यंजकस्योक्तधर्मस्य वाच्यतया तद्घटकान्यथासिद्धयेकानेकत्व-

वाच्यम्, दण्डत्वस्य कारणत्वे दण्डघटितपरम्परायाः सम्बन्धत्वकल्पने गौरवात् । एवमन्येषामप्यनेनैव चरितार्थत्वं संभवतीति बोध्यम् ॥२१॥२२॥

समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम् ।
गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम् ॥२३॥

समवायीति । स्पष्टम् । गुणकर्मेति । असमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यं न तु गुणकर्मणोः साधर्म्यमित्यत्र तात्पर्यम् । अथवा असमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्व तदर्थः, तेन ज्ञानादीनामसमवायिकारणत्वविरहेऽपि न क्षतिः ॥२३॥

के प्रति) दण्डत्व-दण्डरूप आदि सब अन्यथासिद्ध हैं। प्रश्न— विपरीत यदि मान लिया जावे तो उसमें आपके पास क्या विनिगमक है। (दण्डत्व आदि जिन्हें आप अन्यथासिद्ध मानते हैं उन्हें तो कारण मान लिया जावे, और जिन्हें दण्ड-चक्र आदि को आप कारण मानते हैं उन्हें घटादि के प्रति अन्यथासिद्ध मान लिया जावे यह "वैपरीत्य" का अर्थ है) उत्तर— दण्डत्व (दण्डरूप-आदि अन्यथासिद्ध पदार्थों) को कारण मानने में दण्ड घटित परम्परा को (कारणतावच्छेदक) सम्बन्ध की कल्पना करने में गौरव होगा। (अर्थात् दण्ड घट के प्रति स्वजन्यभ्रमिवत्ता सम्बन्ध से कारण होता है— और दण्ड को न मानकर यदि दण्डत्व को घट के प्रति कारण मानते हैं तो स्वाश्रयजन्यभ्रमिवत्ता सम्बन्ध से कारण मानना पड़ेगा—स्वसे दण्डत्व-उसका आश्रय दण्ड तज्जन्य जो भ्रमि तादृशभ्रमिवत्ता घट में है—इस प्रकार दण्डत्व घट के प्रति कारण हो सकता है—परन्तु दण्डत्व के इस कारणतावच्छेदक सम्बन्ध में स्वाश्रयतया जब कि दण्ड प्रविष्ट ही है तो तदपेक्षया लाघवात् दण्ड ही को कारण मान लें—क्योंकि दण्ड के कारणतावच्छेदक सम्बन्ध में दण्डत्व का प्रवेश नहीं है—यह लाघव है) इसी प्रकार अन्यों की भी इसी (पञ्चम) से चरितार्थत्व संभव है। २१—२२।

"समवायिकारणत्वं द्रव्यस्यैवेति"

समवायिकारणत्व (समवायिकारण होना) यह केवल द्रव्य का साधर्म्य है (अर्थात् समवायिकारण द्रव्य होगा—द्रव्य से भिन्न कोई भी समवायिकारण नहीं हो सकता है) "असमवायिकारणत्व" यह गुण-कर्म का साधर्म्य है—(अर्थात् असमवायिकारण गुण-कर्म ही होते हैं) यह कारिकार्थ हुआ। प्रश्न—(आत्मा के विशेषगुण ज्ञानादि कहीं भी असमवायी नहीं होते हैं। इसीलिए असमवायिकारण के सामान्य लक्षण में "ज्ञानादिभिन्नत्व" विशेषण अव्याप्तिवारणार्थ दिया जा चुका है। अतः "असमवायिकारणत्व साधर्म्य की ज्ञानादि में अव्याप्ति हो गयी) उत्तर—इसके दो उत्तर हैं कि असमवायिकारणत्व गुण-कर्म का साधर्म्य है (अर्थात् गुण-कर्म-सर्वथा असमवायिकारण होते ही हैं) इसमें तात्पर्य नहीं है—अपितु असमवायिकारणत्व गुण-कर्म से भिन्नों का वैधर्म्य है (अर्थात् गुण-कर्म-से भिन्न पदार्थ असवायिकारण कदापि नहीं होते हैं इसमें तात्पर्य है) (यह प्रथम उत्तर हुवा)। प्रश्न—साधर्म्य के प्रकरण में वैधर्म्य को कहना यह सर्वथा अनुचित है। उत्तर—यह दूसरा उत्तर करते हैं कि अथवा असमवायिकारण में रहने वाली जो सत्ताभिन्न जाति तादृशजातिमत्त्व यही असमवायिकारणत्व

अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते ।
क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता ॥२४॥

का अर्थ है। (जैसे घट के प्रति कपालसंयोग–घट के प्रति तन्तुसंयोग–असमवायिकारण है–उसमें रहने वाली सत्ताभिन्न जाति-गुणत्व जाति–तद्वत्ता निखिल गुणों में है, तो ज्ञानादि में भी है–क्योंकि ज्ञानादि भी गुणत्वजातिमान् हैं) इससे ज्ञानादि के असमवायिकारण न होने पर भी (ज्ञानादि में असमवायिकारणत्व साधर्म्य की) अव्याप्ति नहीं है।२३।

"अन्यत्र नित्यद्रव्येभ्यः" नित्यद्रव्यों से भिन्न पदार्थों का "आश्रितत्व" साधर्म्य है। नित्यद्रव्य हैं पृथित्वादि चार के परमाणु–और आकाश-काल-दिक-आत्मा-मन ये पाँच—इनसे अतिरिक्त सकल पदार्थों का "आश्रितत्व" साधर्म्य है। "आश्रितत्व" का अर्थ है समवायादि सम्बन्ध से रहना–अन्यथा कालिकविशेषणता (कालिक-सम्बन्ध) से नित्यपदार्थ भी काल में रहते हैं। तब नित्यपदार्थों का भी आश्रिततत्व साधर्म्य बन जावेगा–अतः नित्यपदार्थों में इस साधर्म्य की अव्याप्ति हो जावेगी।)

अब द्रव्य ही का विशेषरूप से साधर्म्य बतलाते हैं—क्षिति (पृथिवी) आदि नव द्रव्यों का "द्रव्यत्वयोगिता" गुणयोगिता साधर्म्य है।

पृथिवी-जल-तेज-वायु-मन इन पाँच द्रव्यों का परत्ववत्त्व-अपरत्ववत्त्व-मूर्त्तत्ववत्त्व-

---

विचारो युक्त एवेति,–तन्न संभवति तदेदं यत्तद्घटकावश्यकत्वादीनां सुवचत्वम्। न चावश्यकत्वमतिरिक्तम्। आवश्यकत्वादेरतिरिक्तत्वस्यावश्यकत्वे लाघवेन तस्यैव तथात्वमुचितमित्यन्यत्र विस्तरः।

वैपरीत्ये = दण्डत्वमेव कारणं दण्डोन्यथासिद्ध इति वैपरीत्ये। दण्डघटित-परंपरायाः = स्वाश्रयदण्डजन्यभ्रमिवत्तारूपपरंपरायाः। **गौरवादिति**। दण्डस्तु स्वजन्यभ्रमिवत्तासंबन्धेन कारणमिति लाघवं बोध्यम्। अन्येषां=चतुर्णाम् ॥२१॥२२॥

ज्ञानादावव्याप्त्याऽह **गुणकर्मभिन्नानामिति**। मूलाक्षरानुसारेणाह **अथवेति**। असमवायिकारणवृत्तिसत्ताजातिमादायातिप्रसंगवारणायाह **सत्ताभिन्नेति**। द्रव्यत्वादेरसमवायिकारणवृत्तित्वाभावेन न तदादायाऽतिप्रसंगः। रूप-घटादिगतद्वित्वमादायातिप्रसंगवारणाय **जातीति**। वृत्तित्वं च समवायावच्छिन्नं ग्राह्यम्, अतः कालिकेन गुणकर्मवृत्तित्वेपि द्रव्यत्वस्य नातिप्रसंगः। जातिमत्त्वमपि तेनैव संबन्धेन, नातस्तादृशगुणत्वादेः कालिकेन द्रव्यवृत्तित्वेपि क्षतिः। एवमन्यत्रापि रीतिरनुसंधेया।

नित्यद्रव्याणि = पृथिव्यादिचतुष्टयपरमाणवः, आकाशादिपंच च। आश्रित-त्वस्य समवायेन वृत्तित्वार्थकतायां बीजमाह **विशेषणतयेति**। कालिकविशेषण-तयेत्यर्थः। **नित्यानामपि** = परमाण्वाकाशादीनामपीत्यर्थः। तथा च नित्या-

अन्यत्रेति। नित्यद्रव्याणि परमाण्वाकाशादीनि विहायाश्रितत्वं साधर्म्यमित्यर्थः। आश्रितत्वं तु समवायादिसम्बन्धेन वृत्तिमत्त्वम्, विशेषणतया नित्यानामपि कालादौ वृत्तेः।

इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुमारभते–क्षित्यादीनामिति। स्पष्टम् ॥२४॥

क्षितिर्जलं तथा तेजः पवनो मन एव च।
परापरत्वमूर्तत्वक्रियावेगाश्रया अमी ॥२५॥

क्षितिरिति। पृथिव्यप्तेजोवायुमनसां परत्वापरत्ववत्त्वं क्रियावत्त्वं वेगवत्त्वं च साधर्म्यम्। नच यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यम्, परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्वस्य विवक्षितत्वात्। मूर्त्तत्वमपकृष्टपरिमाणवत्त्वम्, तच्च तेषामेव, गगनादिपरिमाणस्य

क्रियावत्त्व-वेगवत्त्व-साधर्म्य है। इन पाँचों द्रव्यों में से प्रत्येकद्रव्य में ये परत्व-अपरत्व-आदि पाँच धर्म रहते हैं) प्रश्न—जिस (उत्पन्न विनष्ट या आद्यक्षणावच्छिन्न) घटादि में परत्वअपरत्व उत्पन्न नहीं हुवे–उसमें अव्याप्ति हो जावेगी। उत्तर—"परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्व" यह परत्वाश्रयत्वअपरत्वाश्रयत्व का अर्थ कर देंगे। (समानाधिकरण शब्द का अर्थ है "तदधिकरणवृत्ति" (उसके अधिकरण में रहने वाली) परत्व-अपरत्व दो प्रकार के हैं—कालिक-दैशिक-"ज्येष्ठत्व" ज्येष्ठ में रहनेवाला यह कालिक परत्व है–"कनिष्ठत्व" कनिष्ठ में रहनेवाला–यह कालिक अपरत्व है। दूरत्व यह दैशिक परत्व है, दूरवर्त्ती पदार्थ में रहने वाला। समीपस्थत्व यह दैशिक अपरत्व है समीपवर्त्ती पदार्थ में रहने वाला।

लक्षणसमन्वय-परत्व-अपरत्व के अधिकरण जो पृथ्वी-जल-तेज-वायु-मन उनमें रहने वाली जो द्रव्यत्व व्याप्य जाति पृथिवीत्व-जलत्व-तेजस्त्व-वायुत्व-मनस्त्व ये पाँच जाति तादृशजातिमत्त्व इन पाँच ही में जावेगा। (इससे पूर्वोक्त आद्यक्षणावच्छिन्न घटादि में अव्याप्ति नहीं हुवी) अपकृष्ट परिमाणवत्त्व मूर्त्तत्व है-अर्थात् (अपकृष्टपरिमाण छोटेपरिमाण) को मूर्त्तत्व कहते हैं। और वह इन्हीं (पाँच) का है–गगनादि का परिमाण किसी से भी

नामपि कालिकविशेषणतया वृत्तित्वेनाऽन्यत्र नित्यद्रव्येभ्य इत्यस्यानुपपत्तिरिति भावः। परमाणूनां संयोगेन वृत्तित्वात्संयोगेनाश्रितत्वस्य नित्यद्रव्यभिन्नानां साधर्म्यमित्यस्यानुपपत्तेराह आश्रितत्वं त्विति। विशेषणतया= कालिकविशेषणतया ॥२४॥

यत्र घटादाविति। परत्वापरत्वयोरपेक्षाबुद्धिजन्यतया यत्र घटादावपेक्षाबुद्धिर्नोत्पन्ना तत्र घटादावित्यर्थः। प्राचीनमतेनाह अपकृष्टपरिमाणवत्त्वमिति।

कुतोऽप्यपकृष्टत्वाभावात् । पूर्ववत् कर्मवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम्, वेगवत्त्वं वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं च बोध्यम्॥२५॥

कालखात्मदिशां सर्वगतत्वं परमं महत् ।
क्षित्यादि पञ्च भूतानि चत्वारि स्पर्शवन्ति हि ॥२६॥

अपकृष्ट नहीं है। पहिले की तरह से कर्मवत्त्व का भी अर्थ "कर्मसमानाधिकरण द्रव्यत्व व्याप्य जाति मत्त्व" (कर्म के अधिकरण में रहनेवाली जो द्रव्यत्व व्याप्य जाति-तादृशजातिमत्त्व यही अर्थ करना। वेगवत्त्व का वेगवान् में रहनेवाली जो द्रव्यत्व व्याप्य जाति तादृशजातिमत्त्व यही अर्थ करना। (ऐसा अर्थ करने से वेगवत्त्व-तथा कर्मवत्त्व की आद्यक्षणावच्छिन्न घट में अव्याप्ति नहीं हुवी) २४-२५।

नव्यास्तु क्रियासमवायिकारणतावच्छेदकतया मूर्तत्वस्य जातित्वसिद्धिः। न च भूतत्वेन सांकर्यम्, तस्य जातित्वे मानाभावात्। भूतं भूतमितिव्यवहारश्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वविषयकः। न च तथापि तथाविधकार्यकारणभावे मानाभावः। तदनभ्युपगमे गगनादावपि तदुत्पादापत्तेर्दुर्वारत्वात्। न च क्रियाहेतोरभिघातादेः सत्त्वे मानाभावेन न तदुत्पत्तिरिति वाच्यम्। तथात्वे शब्दासमवायिकारणाभावेन शब्दानुत्पादापत्तेः। निःस्पर्शे मनसि नोदनाभिघातवत् तवापि तदुत्पादे बाधकाभावेनाभिघातादौ स्पर्शहेतुत्वाकल्पनात्, तथाकल्पनायां मानाभावाच्चेत्याहुः। अत्र प्रतिभाति-क्रियासमवायिकारणतावच्छेदकतया मूर्तत्वस्य जातित्वसिद्धिरिवानुगतमत्या तस्यजातित्वसिद्धेः। न चोक्तधर्मविषयकत्वं। जातिविषयत्वकल्पने लाघवात्, बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वाज्ञानेपि तथाव्यवहाराच्च, तथा च सांकर्यस्य दुःपरिहरत्वेन न तस्य जातित्वमिति। यत्तु क्रियां प्रत्यभिघातस्य न सामान्यतोऽभिघातत्वेन हेतुत्वम्, तथात्वे पर्वतादावपि तृणाभिघातात् क्रियोत्पादापत्तेः, तथाच क्रियाजनकतावच्छेदकस्याभिघातत्वव्याप्यधर्मस्यावश्यकल्पनीयतया तादृशाभिघातस्य गगनादौ सत्त्वे प्रमाणाभावेन तदुत्पादवारणसंभवात्, क्रियात्वेन मूर्त्तत्वेन हेतुतायां मानाभावः। न च क्रियात्वस्य कार्यमात्रवृत्तिधर्मस्य कस्य चित्कार्यतावच्छेदकत्वमुपगन्तव्यम्, न च तदभिघातत्वव्याप्यजात्यवच्छिन्नस्यैवेति वाच्यम्, नोदनेनापि तदुत्पादेन व्यभिचारादिति वाच्यम्। एवमपि सिद्धद्रव्यत्वे तज्जनकतावच्छेदकत्वकल्पनायां लाघवात्। अतिप्रसंगभंगस्योक्तविशेषसामग्र्यभावेन संभवात्। सत्त्वेन विनिगमनाविरहस्य तु व्यापकतावच्छेदकधर्मेण हेतुत्वेऽन्यथासिद्धत्वापातेन निरस्तत्वादिति। तन्न, यादृशवैजात्यावच्छिन्नस्याभिघातजनकत्वं तादृशजात्यवच्छिन्नस्यैव शब्दहेतुत्वम्। अन्यथा तृणाभिघातात्तत्रापि शब्दोत्पादापत्तेः। इत्थंच शब्दासमवायिकारणस्य तस्य स्वीकारावश्यकतया तत्र क्रियोत्पत्तेर्वारणाय मूर्त्तत्वेन हेतुत्वं निष्प्रत्यूहमिति संक्षेपः।

ननूत्पत्तिक्षणे घटादौ कर्मवत्त्वं वेगवत्त्वं चाऽव्याप्तमत आह पूर्ववदिति।२५।

कालेति। कालाकाशात्मदिशां सर्वगतत्त्वं = सर्वमूर्त्तद्रव्यसंयोगित्वं, परममहत्त्वं च साधर्म्यम्। परममहत्त्वत्वं जातिविशेषः, अपकर्षानाश्रयपरिमाणत्वं वा। क्षित्यादीति। पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वं साधर्म्यम्। तच्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम्। अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यम्। तेन ज्ञातो घट इत्यादिप्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वात्तद्वत्यात्मनि नातिव्याप्तिः। न वा प्रत्यक्षाविषयरूपादिमति परमाण्वादावव्याप्तिः, तस्यापि स्वरूपयोग्यत्वात्, महत्त्व-

कालखात्मदिशाम्। काल-अकाश-आत्मा-दिशा-इन चारों का सर्वगतत्व अर्थात् सर्वमूर्त्तसंयोगित्व, एवं परममहत्त्व (परममहत्परिमाणवत्त्व) साधर्म्य है। परममहत्वत्व जाति विशेष है—अथवा अपकर्ष के अनाश्रय परिमाणत्व ही को परममहत्व समझना। क्षित्यादिपञ्चभूतानि-पृथ्वी जल-तेज-वायु-आकाश इनका भूतत्व साधर्म्य है। और वह भूतत्व है वहिरिन्द्रियग्राह्यविशेष गुणवत्त्व। यहां ग्राह्यत्व "लौकिक प्रत्यक्षस्वरूपयोग्यत्व" है। (यद्यपि सामान्यतः "ज्ञानविषयत्व" ही ग्राह्यत्व होता है। तथापि ज्ञानपद से लौकिक प्रत्यक्षात्मक ज्ञान का ग्रहण है—और विषयता पद से स्वरूपयोग्यत्वरूप विषयता का ग्रहण है।

तब प्रकृत में "ग्राह्यत्व" शब्द का यह अर्थ हुवा कि "लौकिक प्रत्यक्षस्वरूपयोग्यत्व"। अब भूतत्व का अर्थ यह हुवा कि "बहिरिन्द्रियजन्यलौकिकप्रत्यक्ष स्वरूपयोग्य विशेषगुणवत्त्व" अर्थात् वहिरिन्द्रिय से जन्य जो लौकिकप्रत्यक्ष-तादृशप्रत्यक्ष की स्वरूपयोग्यता वाला जो विशेषगुणतद्वत्त्व ही भूतत्व है) प्रश्न—(ग्राह्यत्व यहां पर ज्ञानपद से लौकिक प्रत्यक्ष का ग्रहण क्यों

सर्वमूर्त्तसंयोगित्वमिति। घटादिवारणाय सर्वेति। सर्वसंयोगित्वस्याऽसंभवापत्त्या मूर्तेति। ननु यत्र परमाणौ द्रव्यारंभानुगुणक्रिया, ततश्च पूर्वदेशविभागः ततः संयोगनाशः तत्र संयोगनाशकाले एव द्व्यणुकारंभकपरमाण्वन्तरे क्रिया-ततः परमाण्वोरारंभकसंयोगकाले तेनैव परमाणुना विभागः—ततो द्व्यणुकोत्पत्तिसमये तेनैव परमाणुनाऽऽरंभकसंयोगनाशः-ततो द्व्यणुकनाशः, तथा च क्षणमात्रस्थायिनो द्व्यणुकस्य (मूर्तस्य) सकलान्तःपातिनो विभौ संयोगासंभवेनासंभवापत्तेरिति चेन्न। आरंभकसंयोगनाशस्य कार्यसहभावेन प्रतिबन्धकतया तादृशस्थले कार्योत्पादस्यैवानभ्युपगमात्। यथाचैतत्तथा पाकजप्रक्रियायां व्युत्पादयिष्यते।

तच्चेति। भूतत्वं चेत्यर्थः। मनोरूपेन्द्रियग्राह्यसुखादिरूपविशेषगुणवत्त्वस्यात्मन्यपि सत्त्वादतिप्रसंग इति तद्व्यावृत्तये बहिरिति। बहिरिन्द्रियत्वं च तथाविधपंचान्यतमत्वम्-मनोभिन्नेन्द्रियत्वं वा। पृथिव्यादिमनोयोगे यावदाश्रयप्रत्यक्षरूपकारणाभावेन तस्याप्रत्यक्षत्वेपि वक्ष्यमाणरीत्या स्वरूपयोग्यत्वानपायेनेदृशगुणवत्त्वस्य मनस्यपि सत्त्वादतिप्रसंगः स्यादतो विशेषेति।

किया-एवं विषयतापद से स्वरूपयोग्यत्वरूप विषयता का ग्रहण क्यों किया केवल पूर्वोक्त प्रकार—"वहिरिन्द्रियजन्य जो ज्ञान-तादृशज्ञान विषयतावद्विशेषगुणवत्त्व" यही भूतत्व का अर्थ ठीक था। उत्तर–ग्राह्यत्व यहाँ पर ज्ञानपद से लौकिक प्रत्यक्षात्मक ज्ञान यदि नहीं लेते हैं तो भूतत्व साधर्म्य की आत्मा में अतिव्याप्ति हो जावेगी—क्योंकि "ज्ञातो घटः" इस प्रत्यक्षज्ञान में प्रकारीभूत जो ज्ञान उस ज्ञान का "चक्षुः संयुक्त मनः संयुक्त आत्म समवेत स्मृति विषयत्वरूप ज्ञानलक्षणा सन्निकर्ष से घट में प्रत्यक्ष होता है– सो वहिरिन्द्रिय (चक्षु) से जायमान जो ज्ञान "ज्ञातोघटः" इत्याकारकज्ञान-उसका विषय विशेषगुण जो "ज्ञान" तद्वत्ता आत्मा में है। और यदि ज्ञानपद से लौकिक प्रत्यक्षात्मक ज्ञान का ग्रहण किया तो "ज्ञातो घटः" यहाँ पर ज्ञान का ज्ञान लक्षणा-सन्निकर्ष से लौकिक प्रत्यक्ष नहीं होता है–अपितु ज्ञानलक्षणासन्निकर्ष के अलौकिक होने के नाते ज्ञान का यहाँ पर अलौकिक प्रत्यक्ष ही होता है—अतः अतिव्याप्ति नहीं है। अभिप्राय यह है कि "ज्ञातो घटः" यह ज्ञानविषयकज्ञान होने के नाते अनुव्यवसाय कहलाता है—तथा ज्ञानलक्षणा-सन्निकर्षजन्य जो ज्ञान वह उपनीत भान कहलाता है। "ज्ञातो घटः" इस ज्ञान में विशेष्य जो घट उसमें व्यवसायात्मक प्रथमज्ञान विषय होने के नाते विशेषण होकर भासता है। वहाँ घट के साथ चक्षुः संयोग लौकिकसन्निकर्ष है—और ज्ञानांश में ज्ञानलक्षणा अलौकिक सन्निकर्ष है—अतः ज्ञानमें लौकिक विषयता नहीं है अतः नातिव्याप्तिः। ऐसे ही विषयतापद से स्वरूपयोग्यत्व रूप विषयता का ग्रहण यदि नहीं करेंगे तो "वहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयतावद्विशेषगुणवत्त्व" पृथ्वी आदि चार के परमाणु भी भूतत्व साधर्म्य के लक्ष्य होने के नाते उनमें भूतत्व लक्षणा-गमनप्रयुक्त अव्याप्ति हो जावेगी। तथाहि—वहिरिन्द्रियजन्य जो लौकिक प्रत्यक्ष सो परमाणु के रूपादि का तो लौकिक प्रत्यक्ष होगा नहीं—क्योंकि परमाणु ही का जब कि लौकिक प्रत्यक्ष नहीं होता तो परमाणु के रूप का लौकिक प्रत्यक्ष कैसे होगा—अतः वहिरिन्द्रियजन्य लौकिक प्रत्यक्ष विषय विशेषगुण यदि परमाणु के विशेषगुण होते तो तादृश विशेषगुणवत्त्वरूप भूतत्व परमाणु आदि में जाता–परन्तु वे (परमाणु) सर्वथा प्रत्यक्ष के अविषय हैं—अतः प्रत्यक्षाविषय परमाणु आदि में अव्याप्ति हो गयी। यदि विषयतापद से स्वरूपयोग्यत्वरूप विषयता का ग्रहण किया तो परमाणु तथा परमाणु के रूपादि में लौकिक प्रत्यक्ष की स्वरूपयोग्यता है—अर्थात् परमाणु में चाक्षुषप्रत्यक्ष के और समस्तकारण मौजूद होने पर भी केवल महत्व के न रहने से परमाणु एवं उसके रूपादि का प्रत्यक्ष नहीं होता है, क्योंकि चाक्षुषप्रत्यक्ष के प्रति 'महत्त्वा-वच्छिन्न-उद्भूतरूपावच्छिन्न-आलोकसंयोगावच्छिन्न चक्षुः संयोग का कारणता है–सो परमाणु में महत्त्व नहीं है अतः परमाणु का तथा उसके रूपादि का प्रत्यक्ष न होने पर भी चाक्षुषप्रत्यक्ष की स्वरूपयोग्यता तो परमाणु में तथा उसके रूपादि में है ही–सो वहिरिन्द्रियजन्य लौकिक प्रत्यक्षनिरूपित स्वरूपयोग्यतावद्विशेषगुण करके परमाणु के रूपादि भी हो गये—तादृश विशेषगुणवत्व परमाणु आदि में भी है अतः परमाणु आदि में अव्याप्ति नहीं है। वही मूल में कहा है कि "तस्यापि स्वरूपयोग्यत्वात्"।

बोध्यमिति। तथाच वहिरिन्द्रियजन्यलौकिकसन्निकर्षप्रयोज्यविषयतावच्छेदकजातिमद्विशेषगुणवत्त्वमिति समुदितार्थः, तेन ज्ञातो घट इति प्रत्यक्षस्य घटांशे लौकिकत्वेपि न क्षतिः। लौकिकेत्यस्य फलमाह **तेनेति**। उक्तविवक्षणेनेत्यर्थः।

लक्षणकारणान्तरासन्निधानाच्च न प्रत्यक्षम् । अथवा आत्मावृत्तिविशेषगुणवत्त्वं तत्त्वम् । चत्वारीति । पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वम् ॥२६॥

द्रव्यारम्भश्चतुर्षु स्यादथाकाशशरीरिणाम् ।
अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते ॥२७॥

द्रव्यारम्भ इति । पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारम्भकत्वं साधर्म्यम् । न च द्रव्यानारम्भके घटादावव्याप्तिः, द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ॥

आकाशशरीरिणामिति । आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेष-

अथवा "आत्मावृत्तिविशेषगुणवत्व" यही भूतत्व कह दीजिये—अगाड़ी स्वयं लिखेंगे कि "आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः" अर्थात् आत्मा और भूतवर्ग-पृथिवी जल-तेज-वायु आकाश ये विशेषगुण वाले हैं—सो आत्मा में अवृत्ति (न रहने वाले) जो विशेषगुण पृथिवी आदि पांच के विशेषगुण-तादृशविशेषगुणवत्व इन्हीं परमाणु सहित पांचो में जावेगा-अतः इन पांच के परमाणुओं में अव्याप्ति नहीं हुवी । "चत्वारि स्पर्शवन्तिहि" पृथिवी-जल-तेज-वायु इन चार का स्पर्शवत्त्व साधर्म्य है । "द्रव्यारंभश्चतुर्षु स्यात्" पृथिवी-जल-तेज-वायु इन चार का "द्रव्यारंभकत्व" साधर्म्य है । शंका-घट किसी भी द्रव्य का आरंभक (उत्पादक) नहीं है अतः घट में द्रव्यारंभकत्व साधर्म्य के अगमनप्रयुक्त अव्याप्ति हो गयी । समाधान-द्रव्यारंभकत्व का जाति घटित अर्थ करने से कोई दोष नहीं है—तथाहि-द्रव्यसमवायिकारण में रहने वाली जो द्रव्यत्वव्याप्यजाति (पृथिवीत्वजाति) तादृशजातिमत्व पृथिवी मात्र में है सो घटादि में भी है—अतः घटादि में अव्याप्ति नहीं है ।

"अथाकाशशरीरिणाम्" आकाश-तथा शरीरी (आत्मा) का अव्याप्यवृत्ति विशेषगुणवत्त्व-क्षणिकविशेषगुणवत्त्व-साधर्म्य है । आकाश का विशेषगुण शब्द है, और वह अव्याप्यवृत्ति

ज्ञातः = ज्ञानविषयः, न तु ज्ञातताश्रयः, तस्याः निरसयिष्यमाणत्वात् । **तद्वति**= बहिरिन्द्रियजन्यालौकिकप्रत्यक्षविषयीभूतज्ञानवति । **स्वरूपयोग्यत्वस्य** फलमाह **प्रत्यक्षाविषये इति** । लौकिकप्रत्यक्षाविषये इत्यर्थः । **परमाण्वादाविति** । आदिना द्व्यणुकपरिग्रहः । विवक्षिते तु नायं दोष इत्याह **तस्यापि** = परमाण्वादिरूपस्यापि । **महत्त्वलक्षणकारणान्तरासन्निधानादिति** । लक्षणपदं स्वरूपार्थकम्, तथाच द्रव्यसमवेतवृत्तिलौकिकविषयतासंबन्धेन प्रत्यक्षं प्रति स्वाश्रयसमवेतत्वसंबन्धेन महत्त्वस्य उक्तसंबन्धेन चाक्षुषत्वावच्छिन्नं प्रति महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य वा हेतुत्वेन फलोपधानाभावेपि न स्वरूपयोग्यत्वापाय इत्यर्थः । लाघवादाह **अथवेति** । तत्त्वं = भूतत्वम् । **स्पर्शवत्त्वमिति** । अत्र स्पर्शसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः ॥२६॥

गुणवत्त्वं साधर्म्यमित्यर्थः। आकाशस्य विशेषगुणः शब्दः, स चाव्याप्यवृत्तिर्यदा किंचिदवच्छेदेन शब्द उत्पद्यते तदाऽन्यावच्छेदेन तदभावस्यापि सत्त्वात्। क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्।

है। (आकाश सर्वत्र व्यापक है—तब फिर भेरीरूपप्रदेश से भी आकाश अवच्छिन्न (युक्त) है—अर्थात् संबद्ध है) अतः जिस समय यत्किंचिदवच्छेदेन (भेरीरूपप्रदेशावच्छेदेन—अर्थात् भेरीरूपप्रदेशावच्छिन्न आकाश में) शब्द उत्पन्न होता है तब उसी समय आकाश में अन्यावच्छेदेन (घटाद्यवच्छेदेन) अर्थात्शब्दशून्य जो घटात्मक प्रदेश तदवच्छिन्न आकाश में) शब्दाभाव भी रहता है। अर्थात् शब्दाभाव की भी प्रतीति होती है। अभिप्राय यह है कि आकाश व्यापक होने के नाते समस्त प्रदेशों से सम्बद्ध है—अतः जिस (भेरीरूप प्रदेश में शब्द होता है तद्देशावच्छेदेन आकाश शब्दवान् है, और जिस घटादिरूप प्रदेश में शब्द नहीं होता तद्देशावच्छेदेन आकाश शब्दा भाववान् है—अतः एक ही आकाश रूप अधिकरण में शब्द भी है और शब्दाभाव भी है। जहाँ एक ही अधिकरण में प्रतियोगी और तदभाव दोनों रहें वे अव्याप्यवृत्ति होते हैं—जैसे कपिसंयोग तथा कपिसंयोगाभाव। तृतीयक्षण में जिसका ध्वंस हो उस ध्वंस के प्रतियोगी को क्षणिक कहते हैं—तथा तादृशप्रति-

---

द्रव्यारंभकत्वं द्रव्यसमवायिकारणत्वम्, तत्र द्रव्यसमवायिकारणतावच्छेदकं च स्पर्शवत्त्वम्। समवायेन जन्यद्रव्यत्वाच्छिन्नं प्रति तादात्म्येन स्पर्शवत्त्वेन हेतुत्वांगीकारात्, अत एव घ्राणारंभकावयवे स्पर्शसिद्धया घ्राणेपि स्पर्शसिद्धिः। तस्य चाऽनुपलब्धिस्तु अनुद्भूतत्वेनाप्युपपद्यते इति प्रांचः।

नव्यास्तु स्पर्शवत्त्वेन न कारणत्वं, कारणतावच्छेदकीभूतस्पर्शभेदेन कार्यकारणभावानन्त्यापत्तेः। न च स्वाश्रयसमवायित्वसंबन्धेन स्पर्शत्वजातिः कारणतावच्छेदिका। अनुद्भूतस्पर्शे मानाभावेन व्यभिचारात्, ईदृशकार्यकारणभावसिद्धेः पुरा स्पर्शाऽसिद्धया व्यभिचारबुद्धिसंभवात्, अतो जन्यद्रव्यत्येन भूतत्वेनैव कार्यकारणभावः कल्पनीयः। आकाशे भूतमिति व्यवहारस्तु गौणः। मूर्त्तत्वेन हेतुत्वोक्तिर्न युक्ता, क्रियासमवायिकारणतावच्छेदकतया सिद्धस्य मूर्त्तत्वस्य पंचवृत्तित्वादित्याहुः। द्रव्यत्वव्याप्यत्वं च द्रव्यत्वन्यूनवृत्तित्वरूपं, तच्च द्रव्यत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वम्, तेन द्रव्यत्वस्य द्रव्यत्वव्याप्यत्वेपि न क्षतिः। **अव्याप्यवृत्तिरिति**। सावच्छिन्नवृत्तिरित्यर्थः। अव्याप्यवृत्तित्वं च स्वाधिकरणवृत्त्यन्ताभावप्रतियोगित्यत्वम्। अत्राऽव्याप्यवृत्तित्वं दैशिकं ग्राह्यम्, तेन रूपादेः कालिकाऽव्याप्यवृत्तित्वेपि न क्षतिः। शब्दस्याव्याप्यवृत्तित्वमेवोपपादयति **यदेति**। **किंचिदवच्छेदेन**=एतद्देशावच्छेदेन, **अन्यावच्छेदेन**= देशान्तरावच्छेदेन। क्षणमात्रस्थायित्वरूपं क्षणिकत्वं नास्मन्मतसिद्धमत आह **तृतीयेति**। स्वतृतीयक्षणवृत्तिध्वंसप्रतियोगिस्वत्वमित्यर्थः, नातो ज्ञानादितृतीयक्षणवृत्तिध्वंसप्रतियोगित्वेपि

योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिविशेषगुणनाश्यत्वात्प्रथमशब्दस्य द्वितीयशब्देन नाशः । एवं ज्ञानादीनामपि, ज्ञानादिकं हि यदाऽऽत्मनि विभौ शरीराद्यवच्छेदेनोत्पद्यते तदा घटाद्यवच्छेदेन तदभावोऽस्त्येव ।

योगित्व क्षाणिकत्व रूप हुवा । प्रत्यक्षयोग्य जो आकाशादिविभुद्रव्यों के विशेषगुण उनका अपने से बाद में उत्पन्न होने वाले विशेषगुणों से नाश होता है, इस प्रकार प्रथम शब्द का द्वितीय शब्द नाशक है । इसी प्रकार ज्ञानादिकों में भी समझना (आदिपद से इच्छादि का संग्रह कर लेना) ज्ञानादिक जिस समय विभु आत्मा में शरीरावच्छेदेन उत्पन्न होते हैं - उसी समय आत्मा में घटावच्छेदेन ज्ञानाभाव भी है। (अभिप्राय यह है कि आत्मा में एक ही काल में ज्ञान और ज्ञानाभाव दोनों अवच्छेदकभेद से रहते हैं अतः ज्ञानादि भी अव्याप्यवृत्ति हैं) एवं दो क्षण

घटस्यातिप्रसंगः । अपेक्षाबुद्धेश्चतुर्थक्षणवृत्तिध्वंसप्रतियोगित्वेपि तृतीयक्षणवृत्तिध्वंसप्रतियोग्यपेक्षाबुद्धिभिन्नज्ञानादिमत्त्वस्य साधर्म्यानपायात् । ननु अपेक्षाबुद्धिभिन्नज्ञानमात्रस्य न तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्, प्रहरमात्रममुमर्थं जानन्नेवासमित्याद्यनुभवात्, ज्ञानस्य बहुक्षणावस्थायित्वम् । न चोक्तस्थले धारावाहिकज्ञानस्वीकारान्नानुभवविरोध इति वाच्यम् । ज्ञानानन्त्यकल्पने गौरवात् । यत्र तु नोक्तानुभवस्तत्राऽस्तां तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वमत आह **योग्येति** । तथाच नाशकसत्त्वान्नाशः स्यादेव, इत्थं चोक्तस्थलेऽनायत्या ज्ञानधारैव कल्पनीया । अथ स्वत्त्वाननुगमेन तत्तद्व्यक्तिविश्रान्तहेतुहेतुमद्भावस्य यत्र प्रहरमात्रं जानन्नेवासमित्यनुभवस्तत्राकल्पनादिति चेन्न । प्रतियोगितासंबन्धेन योग्यविभुविशेषगुणनाशं प्रति स्वाव्यवहितपूर्ववर्त्तित्व-स्वसामानाधिकरण्योभयसंबन्धेनोत्तरगुणत्वेन हेतुतया स्वत्त्वस्य संबन्धमर्यादया निवेशेन तत्तद्व्यक्तिविश्रान्तत्वाभावात् । न चापेक्षाबुद्धेर्द्वित्वनिर्विकल्पकक्षणे नाशापत्तिरिति वाच्यम् । तद्बुद्धेर्द्वित्वनिर्विकल्पकनाश्यतया सविकल्पकोत्पादक्षणे एव नाशो नतु निर्विकल्पकोत्पादसमयेपीत्यग्रे व्यक्तीभविष्यति ।

एवं शब्दोपि तृतीयक्षणवृत्तिध्वंसप्रतियोगी, शब्दो नष्ट इति प्रतीतेः ।

मीमांसकास्तु—शब्दो नाऽनित्यः-स एवायं गकार इति प्रत्यभिज्ञायास्तत्तद्व्यक्तित्वावच्छिन्नाभेदविषयिण्यास्तदनित्यत्वे भ्रमत्वापत्तेर्नाशादिकल्पने गौरवेण च नित्यत्वसिद्धेः । न चोत्पादविनाशप्रत्ययानुपपत्तिः, तस्य च नित्यत्वान्महदशायामुत्पादप्रतीतेः सुवचत्वात् । न च प्रतीतेः प्रमात्वानुपपत्तिः, इष्टापत्तेः । न च प्रमात्वे बाधकाभावः, प्रत्यभिज्ञाया एव बाधकत्वात् । न चोत्पादप्रतीत्या प्रत्यभिज्ञैव बाध्यताम्, वरं चोत्पादविनाशप्रतीत्योर्बाध्यत्वकल्पनामपेक्ष्यैकप्रत्यभिज्ञाया एव बाध्यत्वकल्पनाश्रयणमिति वाच्यम् । लाघवतर्कसहकारेण प्रत्यभिज्ञाया एव बाधकत्वौचित्यात् । तस्मान्नित्य एव शब्द इत्याहुः ।

एवं ज्ञानादिकमपि क्षणद्वयावस्थायि। इत्थं चाव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं चार्थः। पृथिव्यादौ रूपादिर्विशेषगुणोऽस्तीत्यतोऽव्याप्यवृत्तीत्युक्तम्। पृथिव्यादावव्याप्यवृत्तिः संयोगादिरस्तीत्यतो विशेष-

स्थायी हैं। (अतः क्षणिक हैं) इस प्रकार अव्याप्यवृत्ति विशेष गुणवत्त्व तथा क्षणिक विशेषगुणवत्त्व (आकाश तथा जीवात्मा का साधर्म्य सिद्ध हुवा) प्रश्न—(अव्याप्यवृत्तिविशेषगुणवत्त्व) यहाँ पर 'अव्याप्यवृत्ति' पद क्यों दिया केवल विशेषगुणवत्त्व ही साधर्म्य कर दिया जावे) उत्तर—पृथिवी आदि में रूपादि विशेषगुण हैं। (उनकी पृथिवी आदि में अतिव्याप्ति हो जावेगी) अतः 'अव्याप्यवृत्ति' यह पद दिया। (तो रूपादि अव्याप्यवृत्ति नहीं हैं इसलिये अतिव्याप्ति नहीं है।

प्रश्न—("अव्याप्यवृत्तिविशेषगुणवत्त्व" इस साधर्म्य में विशेषपद क्यों दिया केवल "अव्याप्य वृत्तिगुणवत्त्व" यही साधर्म्य आकाशादि का ठीक है।

तच्चिन्त्यम्-उत्पन्नो नष्ट इति प्रत्ययदशायामपि प्रत्यभिज्ञाया उत्पादान्न तस्याः पूर्वकालीनगकारव्यक्त्यभेदावगाहित्वम्, किन्तु गत्वजात्यवच्छिन्नाभेदावगाहित्वमेव। न च प्रत्यभिज्ञायास्तत्तद्व्यक्तित्वावच्छिन्नाभेद एव विषयस्तत्काले च जायमानोत्पादविनाशप्रत्ययस्त्वभिव्यंजकीभूतपवनसंयोगविषयक एवास्तु इति वाच्यम्। स्वस्वघटितोत्पत्तेरारोपाऽसंभवात्। किं चास्मन्मते पवनसंयोगजन्यतावच्छेदकं कत्वम्, भवन्मते च तत्प्रत्यक्षत्वम्। एवमस्मन्मते वायुसंयोगोऽवच्छेदकतया हेतुः, कार्यतावच्छेदकमपि तेनैव संबन्धेन स्वीयककारत्वादिकम्, भवन्मते च स्वीयककारप्रत्यक्षत्वावच्छिन्नं प्रति स्वीयकर्णावच्छिन्नविजातीयसंयोगः कारणमिति गुरुतरकल्पना स्यादिति ध्येयम्। अव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं न साधर्म्यं वैयर्थ्यादत आह **इत्थं चेति**। **चतुःक्षणवृतीति**। इदं च जन्यविशेषणम्, त्रिक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वमेव सम्यक्, रूपादेस्त्रिक्षणवृत्तिजन्यावृत्तिजातिमत्त्वाभावान्न तदादायातिप्रसंगः, अतोऽधिकक्षणनिवेशवैफल्यमित्याशंकामपाकर्तुमाह **अपेक्षाबुद्धिरिति**। **क्षणचतुष्टयमिति**। तथाच तादृशविवक्षायां ज्ञानादेरप्यसंग्रहापत्तेरिति भावः। **न देयमिति**। तथाच लक्षणद्वयम्—जन्यपदघटितं तदघटितं च, प्रथमपक्षाभिप्रायेणाह **परममहत्त्वस्येति**। **तादृशगुणत्वादिति**। चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्गुणत्वादित्यर्थः। अस्य च तद्वारणायेत्यनेनान्वयः। द्वितीयपक्षाभिप्रायेणाह **चतुर्थक्षणे इति**। **तथात्वादिति**। चतुःक्षणवृत्त्यवृत्तिजातिमत्त्वादित्यर्थः। इदमुपलक्षणम्—प्रथमपक्षेप्ययं दोषो बोध्यः। लाघवादाकाशेश्वरजीवसाधारणमिच्छाशब्दाभ्यां संगमनप्रकारमाह **त्रिक्षणवृत्तित्वं चेति**। अत्रापि जन्यपदोपादानमावश्यकमेव, इतरथा इच्छात्वस्यापि त्रिक्षणवृत्त्यवृत्तित्वाऽसंभवेनाऽप्रसंगात्॥२७॥

गुणेत्युक्तम्। न च रूपादीनामपि कदाचित्तृतीयक्षणे नाशसंभवात्क्षणिक-विशेषगुणवत्त्वं क्षित्यादावतिव्याप्तमिति वाच्यम्, चतुःक्षणवृत्ति-जन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वात्। अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति, क्षणचतुष्टयं तु न किमपि जन्यज्ञानादिकं तिष्ठति, रूपत्वादिकं तु क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्त्तत इति तद्व्युदासः। ईश्वरज्ञानस्य चतुःक्षणवृत्तित्वाज्ज्ञानत्वस्य तद्वृत्तित्वाज्जन्येत्युक्तम्। यद्याकाशजीवात्मनोः साधर्म्यं तदाजन्येति न देयम्, द्वेषत्वादिकमादाय लक्षणसमन्वयात्। परममहत्त्वस्य तादृशगुणत्वात् चतुर्थक्षणे द्वित्वादीनामपि नाशाभ्युपग-

उत्तर—पृथिवी आदि में संयोगादि अव्याप्यवृत्तिगुण हैं—अतः 'अव्याप्यवृत्तिगुणवत्त्व' साधर्म्य की पृथिवी आदि में अतिव्याप्ति हो जावेगी—विशेषपद दिया तो संयोगादि विशेषगुण नहीं हैं। प्रश्न जहाँ प्रथमक्षण में घट के ऊपर मुद्गर प्रहार हुवा—द्वितीयक्षण में घटनाश हुवा-तृतीयक्षण में घटनाशाधीन रूप का नाश हुवा—तो तृतीयक्षणवृत्ति जो ध्वंस रूप का ध्वंस तत्प्रतियोगित्वरूप क्षणिकत्व रूप में आ गया—अतः रूप भी क्षणिक विशेषगुण हो गया—और रूपवत्ता पृथिव्यादिद्रव्यों में है—अतः क्षणिकविशेषगुणवत्व साधर्म्य की पृथिव्यादि में अति-व्याप्ति हो गयी। उत्तर—"चतुःक्षणवृत्तिजन्यावृत्ति जातिमद् विशेषगुणवत्त्व" यह अर्थ क्षणिकत्व का कर देने से अतिव्याप्ति नहीं हुवी, (क्योंकि चार क्षण में रहने वाला जो जन्य पदार्थ सो रूपादि भी हुवे-उनमें रूपत्वादिजाति तो रहती ही है अवृत्ति जाति ज्ञानत्व शब्द-त्वादि जाति ही होगी—तादृशजातिमान् विशेषगुण शब्द ज्ञानादि-तद्वत्ता आकाश तथा आत्मा ही जावेगा—अतः पृथिव्यादि में अतिव्याप्ति नहीं हुवी) चार क्षण कोई भी जन्यज्ञान नहीं रहता है। अपेक्षा बुद्धि तीनक्षण ही रहती है। और रूपत्वादिक जाति चार क्षण रहनेवाले रूपादिकों में रहती है। (अतः रूपत्वादि जाति को लेकर पृथिव्यादि में अतिव्याप्ति नहीं) प्रश्न—"चतुःक्षण वृत्तिजन्यावृत्ति" इत्यादि क्षणिकत्व के लक्षण में जन्य पद क्यों दिया—केवल चतुःक्षणवृत्ति जो उसमें अवृत्ति जो जाति तादृश जातिमद्विशेष गुणवत्त्व यही लक्षण क्यों न किया) उत्तर — चतुःक्षण में रहने वाला ईश्वरज्ञान भी हुवा—उसमें ज्ञानत्व जाति तो वृत्ति ही है—यदि ज्ञानत्व जाति चतुःक्षणवृत्ति ईश्वर ज्ञान में अवृत्ति होती—तब तादृश जातिमान् विशेषगुण ज्ञान होता—तब ज्ञानवत्ता आत्मा में जाती—और आत्मा में लक्षणसमन्वय होता—परन्तु ऐसा न होने से आत्मा में अव्याप्ति हो गयी। और चतुःक्षणवृत्ति ईश्वर ज्ञान में अवृत्ति जाति रूपत्वजाति को लेकर पूर्वोक्त रीति से पृथिव्यादि में अतिव्याप्ति भी हो जायगी—वीप्सा देने से गौरव होगा - अतः लक्षण में जन्य कहा—तो चतुःक्षण वृत्ति जो जन्य-सो रूपादि ही होंगे—उनमें अवृत्ति जाति ज्ञानत्वादि जाति को लेकर आत्मा में लक्षण समन्वय हो जायगा — अतः आत्मा में अव्याप्ति नहीं—एवं पृथिव्यादि में अतिव्याप्ति भी नहीं है। "क्षणिकविशेष गुणवत्त्व" यह साधर्म्य यदि आकाश-जीवात्मा का विवक्षित है—तब क्षणिकत्व के "चतुःक्षण वृत्तिजन्यावृत्ति" इस अर्थ में जन्य पद नहीं देना—("चतुःक्षणवृत्त्यवृत्तिजातिमद् विशेषगुणवत्त्व"

माद् द्वित्वादीनामपि तथात्वात्तद्वारणाय विशेषेति । त्रिक्षणवृत्तित्वं वा वक्तव्यम् । इच्छात्वादिकमादायात्मनिलक्षणसमन्वयः ॥२७॥

एतावन्मात्र ही क्षणिकत्व अर्थ उचित होगा) द्वेषत्वादि जाति को लेकर जीवात्मा में लक्षण-समन्वय कर लेना । (तथाहि चतु क्षणवृत्ति करके यदि रूपादि लिये जायें तो द्वेषत्वजाति उनमें सुतरां अवृत्ति है - और यदि ईश्वर के विशेष गुणों को भी चतुःक्षणवृत्ति करके लें— तो भी द्वेष को तो ले नहीं सकते क्योंकि द्वेष ईश्वर में नहीं रहता—अतः ईश्वर का ज्ञान-या ईश्वर की इच्छा वगैरह ही को लेना होगा—उनमें अवृत्ति जाति द्वेषत्वजाति तादृश जातिमान् विशेषगुण हुवा द्वेष तादृश द्वेषवत्ताजीवात्मा ही जावेगी— अतः जीवात्मा में क्षणिकत्व का "चतुःक्षण वृत्ति" इत्यादि जो लक्षण है वह समन्वित हो गया । अब क्षणिकत्व के दो लक्षण हो गये—एक जन्यपद घटित दूसरा जन्यपदाघटित । जब कि आकाश और जीवात्मा का क्षणिकत्व साधर्म्य करना हो, तब क्षणिकत्व का "चतुक्षणवृत्त्यवृत्तिजातिमद्विशेषगुणवत्त्व" यह जन्यपदाघटित अर्थ कर देना चाहिये । और जब आत्मा करके दोनों (जीवात्मा-परमात्मा) का संग्रह करना हो तब "चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्व" यही अर्थ क्षणिकत्व का उचित है) अब जन्यपदघटित-तथा जन्यपदाघटित—इन दोनों लक्षणों में विशेष पद का सार्थक्य बतलाते हैं । जन्यपद घटित लक्षण में विशेष पद न देने पर "चतुःक्षणवृत्ति जन्या वृत्ति जातिमद् गुणवत्त्व" यह क्षणिकत्व का अर्थ होगा—सो इसकी कालादि में अतिव्याप्ति हो जायेगी । तथाहि-चतुःक्षणवृत्ति जो जन्य सो परममहत्त्व तो होगा नहीं—क्योंकि वह नित्य है—रूपादि ही होंगे —उनमें अवृत्ति जाति परममहत्त्वत्व जाति-तादृशजातिमान् गुण परममहत्त्व-तद्वत्त्व कालादि में है—वही मूल में कहा है—"परममहत्त्वस्य तादृशगुणत्वात्" अर्थात् परम-महत्त्व चतुःक्षणवृत्ति जन्यावृत्ति जातिमद गुण है । विशेषपद दिया तो तादृशजातिमान् विशेष-गुण होना चाहिये —सो परममहत्त्व विशेषगुण नहीं है—अतः अतिव्याप्ति नहीं हुवी । जन्य-पदाघटित लक्षण में विशेष पद न देने पर घटादि में अतिव्याप्ति हो जायगी—तथाहि-चतुःक्षण वृत्ति द्वित्व संख्या तो होगी नहीं—क्योंकि द्वित्वोत्पत्ति से चतुर्थक्षण में द्वित्व संख्या का नाश हो जाता है । अतः चतुःक्षणवृत्ति जैसे रूपादि हैं वैसे ही परममहत्व परिमाण भी है—उसमें परममहत्त्वत्व जाति तो वृत्ति है—अवृत्ति जाति द्वित्वत्वजाति—तादृशजातिमान् गुण द्वित्वसंख्या तद्वत्ता घटादि में हैं—अतः घटादि में अतिव्याप्ति हो गयी । विशेषपद देने पर यह अर्थ होगा कि तादृशजातिमान् जो विशेषगुण-सो द्वित्वसंख्या विशेषगुण नहीं—अपितु सामान्यगुण है—अतः अतिव्याप्ति नहीं हुवी । वही मूल में कहा है "चतुर्थक्षणे द्वित्वादीनामपि नाशाभ्युपगमात्" अर्थात् द्वित्वोत्पत्ति से चतुर्थक्षण में द्वित्व संख्या का नाश हो जाता है । अथवा "चतुःक्षण-वृत्तिजन्यावृत्तिजातिमद् विशेषगुणवत्त्वं" यहाँ पर चतु क्षणवृत्ति न कहकर "त्रिक्षणवृत्तित्व" कह दीजिये—त्रिक्षणवृत्तित्व कह देने पर जन्यपद देने की कोई आवश्यकता नहीं । अब क्षणिकत्त्व का "त्रिक्षणवृत्त्यवृत्तिजातिमद्विशेषगुणवत्त्व" एतावन्मात्र ही अर्थ पर्याप्त होगा—सो द्वेष दो क्षण ही रहता है—त्रिक्षणवृत्ति रूपादि ही लेने होंगे—उनमें अवृत्तिजाति-द्वेषत्वजाति-तादृश-जातिमान् विशेषगुण-द्वेष तद्वत्ता जीवात्मा में है, अतः द्वेषत्वजाति को लेकर जीवात्मा में यह साधर्म्य समन्वित हो गया ॥ २७ ॥

रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः ॥
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः ॥ २८ ॥

पृथिव्यप्तेजसां रूपवत्त्वं द्रवत्ववत्त्वं प्रत्यक्षविषयत्वं च साधर्म्यमित्यर्थः। न च चक्षुरादीनां भर्जनकपालस्थवन्हेरूष्मणश्च रूपवत्त्वे किं मानमिति वाच्यम्, तत्रापि तेजस्त्वादिना रूपानुमानात्। एवं वाय्वानीतपृथिवीजलतेजोभागानामपि पृथिवीत्वादिना रूपानुमानं बोध्यम्। न च घटादौ द्रुतसुवर्णादिभिन्ने तेजसि च द्रवत्ववत्त्वमव्याप्तमिति वाच्यम्। द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। घृतजतुप्रभृतिषु पृथिवीषु, जलेषु, द्रुतसुवर्णादौ तेजसि च द्रवत्वसत्त्वातत्र च पृथिवीत्वादिसत्त्वात्तदादाय सर्वत्र लक्षणसमन्वयः। न च प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तमतिव्याप्तं च रूपादाविति वाच्यम्। चाक्षुषलौकिकप्रत्यक्षविषयवृत्ति-

"रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः"—

पृथिवी-जल-तेज—इन आद्य तीन द्रव्यों का रूपवत्त्व (रूपवाला) द्रवत्ववत्त्व (द्रवत्ववाला) प्रत्यक्षविषयत्व (प्रत्यक्ष का विषय) यह साधर्म्य है। प्रश्न—चक्षु आदि—तथा भर्जनकपाल (भाड़) में स्थित जो वन्हि—तथा ऊष्मा (गर्मी) इनके रूपवत्त्व में क्या प्रमाण है—(क्योंकि—इनके रूप का प्रत्यक्ष नहीं होता है) उत्तर—वहाँ पर (चक्षु आदि पूर्वस्थल में) तेजस्त्व हेतु से रूप का अनुमान कर लिया जावेगा। अर्थात् चक्षुः रूपवत् तेजस्त्वात्—भर्जनकपालस्थवन्हिः रूपवान् तेजस्त्वात्—ऊष्मा रूपवान् तेजस्त्वात्। इसी प्रकार वायु से आनीत जो देशान्तरस्थ पृथिवी–जल–तथा अग्नि के जो भाग हैं उनमें भी पृथिवीत्व आदि, आदि पद से जलत्व–तेजस्त्व–हेतुवों के द्वारा रूपानुमान कर लेना चाहिये। प्रश्न—घट आदि (पृथिवी) में द्रुत जो सुवर्ण आदि उनसे भिन्न जो (रसोई निर्माण करनेवाला अग्निरूप तेज) उसमें "द्रवत्ववत्त्व" इस साधर्म्य की न जाने प्रयुक्त अव्याप्ति हो जावेगी। उत्तर—(जातिघटित लक्षण कर देना) अर्थात् "द्रवत्ववत्त्व" इससे द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्व" इस अर्थ की विवक्षा करने पर अव्याप्ति नहीं क्योंकि द्रवत्ववान् हुवा घृत–जतु–प्रभृति पृथिवी–जल–तथा द्रुतसुवर्णादिरूप तेज —इनमें वृत्ति जो द्रव्यत्वव्याप्य जाति क्रमशः पृथिवीत्व–जलत्व–तेजस्त्व जाति —तादृशजात्यन्तर्गतपृथिवीत्वजातिमत्त्व घटादिरूप पृथिवी में—तथा तेजस्त्वजातिमत्व द्रुतसुवर्णादिभिन्न जो वन्हिरूप तेज उसमें भी है—अतः अव्याप्ति नहीं है। इस प्रकार पृथिवीत्व जाति को लेकर सर्वत्र पूर्वोक्तस्थलों में लक्षण समन्वय कर लेना। प्रश्न—प्रत्यक्षविषयत्व इस साधर्म्य की पृथिवी-जल आदि के परमाणुवों में अव्याप्ति हो जायेगी—क्योंकि परमाणु प्रत्यक्ष का अविषय होने के कारण प्रत्यक्षविषयत्व उनमें नहीं गया। और अलक्ष्यरूप आदि में अतिव्याप्ति भी हो गयी—क्योंकि रूप आदि का प्रत्यक्ष होता है, अतः प्रत्यक्षविषयत्व उनमें चला गया। उत्तर—चाक्षुषप्रत्यक्ष के विषय में रहनेवाली जो द्रव्यत्व व्याप्य जाति तादृशजातिमत्त्व—

द्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति । गुरुणी इति । गुरुत्ववत्त्वं रसवत्त्वं च पृथिवीजलयोरित्यर्थः । न च घ्राणेन्द्रियादीनां वाय्वानीतपार्थिवादिभागानां च रसादिमत्त्वे किं मानमिति वाच्यम् । तत्रापि पृथिवीत्वादिना तदनुमानात् । द्वयोरिति । पृथिवीतेजसोरित्यर्थः । न च नैमित्तिकद्रवत्ववत्त्वं घटादौ वह्न्यादौ चाव्याप्तमिति वाच्यम् । नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ॥ २८ ॥

आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः ।
यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् ॥ २९ ॥

यह प्रत्यक्षविषयत्व का अर्थ कर देना । चाक्षुषप्रत्यक्ष का विषय हुवा घट उसमें रहनेवाली द्रव्यत्वव्याप्य जाति–पृथिवीत्व-जलत्व–तेजस्त्व–जाति–तादृशजातिमान् पृथिवी आदि के परमाणु भी हैं अतः तादृशजातिमत्त्वरूप प्रत्यक्ष विषयत्व की परमाणुवों में अव्याप्ति नहीं है और रूप आदि में तादृश द्रव्यत्वव्याप्य जाति नहीं है अतः उनमें अतिव्याप्ति नहीं है । शंका—प्रत्यक्ष-विषयत्व का "चाक्षुषलौकिकप्रत्यक्षविषय" इत्यादि जो पहिले अर्थ किया है वहाँ चाक्षुषपद न देने पर आत्मा में अतिव्याप्ति हो जावेगी—क्योंकि आत्मा भी लौकिक मानसप्रत्यक्ष का विषय है अतः लौकिक प्रत्यक्ष (मानस) का विषय जो आत्मा उसमें वृत्ति द्रव्यत्वव्याप्य जाति आत्मत्वजाति तद्वत्ता आत्मा में है । समाधान–इसीलिये चाक्षुषपद दिया–तो आत्मा चाक्षुष प्रत्यक्ष का विषय नहीं है–क्योंकि आत्मा का चाक्षुष प्रत्यक्ष नहीं होता है अतः आत्मा में अतिव्याप्ति नहीं । पृथिवी-जल का गुरुत्ववत्व-रसवत्त्व साधर्म्य है । प्रश्न–घ्राणेन्द्रिय के तथा वायुवेग द्वारा देशान्तर से आनीत पार्थिवादि भाग के रसादिमत्त्व में क्या प्रमाण है । उत्तर–वहाँ भी पृथिवीत्व हेतु से रसादिमत्त्व का अनुमान कर लेना । (अर्थात् घ्राणेन्द्रियं रसवत् पृथिवीत्वात्) पृथिवी–तेज–इन दोनों का नैमित्तिकद्रवत्ववत्त्व साधर्म्य है । (जिसद्रव्य में किसी निमित्त (कारण) से द्रवत्व होता है वह द्रव्य नैमित्तिकद्रवत्ववान् कहलाता है) प्रश्न–नैमित्तिकद्रवत्ववत्त्व साधर्म्य की घटादि में तथा वन्ह्यादि में अव्याप्ति है । उत्तर–नैतित्तिक-द्रवत्वसमानाधिकरण द्रव्यत्वव्याप्यजातिमत्त्व" अर्थ की विवक्षा कर देना । समानाधिकरण शब्द का अर्थ होता हैं–"तदधिकरणवृत्ति" अर्थात् नैमित्तिकद्रवत्व के अधिकरण में रहने वाली जो द्रव्यत्व की व्याप्यजाति-तादृशजातिमत्त्व, प्रकृत में नैमित्तिकद्रवत्व का अधिकरण घटादि न हो–एवं वह्नि न हो परन्तु घृतरूपापृथिवी-तथा द्रुतसुवर्णादि रूप तेज तो अवश्य ही है–उसमें वृत्ति द्रव्यत्वव्याप्यजाति क्रमशः पृथिवीत्व–तथा तेजस्त्वजाति तद्वत्ता सकलपृथिवी और सब तेजों में है । अतः तादृशजात्यन्तर्गत पृथिवीत्वजातिमान् घटादिरूपापृथिवी भी है–और तादृशतेजस्त्वजातिमान् वह्निरूपतेज भी हैं अतः उनमें अव्याप्ति नहीं ॥ २८ ॥

"आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः" आत्मा तथा भूतवर्ग (पृथिवी–) जल तेज-वायु-आकाश इनका विशेषगुणवत्त्व साधर्म्य है । (अर्थात् इन्हीं छः द्रव्यों में विशेषगुण

पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वमित्यर्थः । यदुक्तमिति । ज्ञेयत्वादिकं विहायेति बोध्यम् । तत्तु न कस्यापि वैधर्म्यम्, केवलान्वयित्वात् ॥ २९ ॥

स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः ।
स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः ॥ ३० ॥
स्पर्शादयोऽष्टौ वेगश्च गुरुत्वं च द्रवत्वकम् ।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥ ३१ ॥
स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश ।
बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा ॥ ३२ ॥
धर्माधर्मौ गुणा एते ह्यात्मनः स्युश्चतुर्दश ।
संख्यादिपञ्चकं कालदिशोः, शब्दश्च ते च खे ॥ ३३ ॥
संख्यादयः पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे ।
परापरत्वे संख्याद्याः पञ्च वेगश्च मानसे ॥ ३४ ॥
ते च, खे = आकाशे ॥ ३०–३४ ॥

रहते हैं) अब साधर्म्य समाप्त कर—वैधर्म्य बतलाते हैं "यदुक्तम्" इत्यादिग्रन्थ से हमने जो जिसका साधर्म्य बतला दिया है उसे उससे दूसरे का वैधर्म्य समझना । (जैसे कि "सत्तावत्त्व" द्रव्य-गुण-कर्म—इन तीन का साधर्म्य कहा है—सो यह इन तीन से भिन्न सामान्यादि का वैधर्म्य है) केवल ज्ञेयत्व-अभिधेयत्व—इन केवलान्वयीधर्मों को छोड़कर, ये किसी के भी वैधर्म्य नहीं होते हैं—(क्योंकि ये सब पदार्थों के समानधर्म हैं) ॥ २९ ॥

अब साधर्म्य तथा वैधर्म्य प्रकरण समाप्त करके किस द्रव्य में कितने तथा कौन २ गुण रहते हैं । "वायोर्नवैकादश तेजसो गुणाः—जलक्षितिप्राणभृतां चतुर्दश । दिक्कालयोः पञ्च षडेव चाम्बरे महेश्वरेऽष्टौ मनसस्तथैवच" अर्थात् वायु में नव गुण रहते हैं—और तेज में ११—जल-पृथिवी जीवात्मा में १४, दिशा तथा काल में ५ अम्बर (आकाश) में ६ ईश्वर में ८ और ८ ही मन में ।

किस द्रव्य में कितने और कौन गुण रहते हैं अब यह बतलाते हैं—"स्पर्शादयोऽष्टौ" इत्यादि ग्रन्थ से । १—स्पर्श २—संख्या ३—परिमाण ४—पृथक्त्व ५- संयोग ६—विभाग ७—परत्व ८—अपरत्व—तथा ९—वेगाख्यसंस्कार-ये ९ गुण वायु के हैं । तेज में ११ गुण रहते हैं—पूर्वोक्त स्पर्शादि ८ औररूप - वेग-द्रव्यत्व ३ । स्पर्शादि ८—वेग—गुरुत्व—द्रवत्व—रूप—रस-स्नेह—ये १४ गुण जल में रहते हैं । और इन्हीं १४ गुणों में से स्नेह को निकालकर उनमें गन्ध को मिला दें तो ये १४ गुण पृथिवी के हो जावेंगे । १—बुद्धि २—सुख ३—दुःख ४—इच्छा ५—द्वेष ६—प्रयत्न और १—संख्या २—परिमाण ३—पृथक्त्व ४—संयोग ५—विभाग—ये पाँच । भावनाख्य संस्कार—धर्माधर्म

तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता ।
षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ॥ ३५ ॥

साधर्म्यवैधर्म्ये निरूप्य संप्रति प्रत्येकं पृथिव्यादिकं निरूपयति-तत्रेति । गन्धहेतुरिति । गन्धसमवायिकारणमित्यर्थः । यद्यपि गन्धवत्त्वमात्रं लक्षणमुचितम्, तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तम्, तथा हि पृथिवीत्वं हि गन्धसमवायिकारणतावच्छेदकतया सिद्धयति, अन्यथा गन्धत्वावच्छिन्नस्याकस्मिकत्वापत्तेः । न च पाषाणादौ

ये आत्मा के १४ गुण हैं । १-संख्या २-परिमाण ३-पृथक्त्व ४-संयोग ५-विभाग-ये पाँच-काल दिशा के गुण है । और संख्यादिपूर्वोक्त पाँच तथा शब्द ये छः आकाश के गुण हैं । संख्यादिपूर्वोक्त ५-बुद्धि-इच्छा-यत्न ये ८ ईश्वर के गुण हैं । परत्व-अपरत्व-संख्यादि ५ और वेगाख्य संस्कार ये ८ मन के गुण हैं ।

अब साधर्म्य-वैधर्म्य का निरूपण करके "तत्र क्षितिः" इत्यादि ग्रन्थ से प्रत्येक पृथिव्यादि का निरूपण करते हैं । क्षिति (पृथिवी) गन्ध का हेतु (समवायिकारण है । प्रश्न—जो गन्धवाला होता है उसे पृथिवी कहते हैं इससे गन्धवत्त्व मात्र ही पृथिवी का लक्षण उचित है-फिर "गन्धहेतु" यहां पृथिवी के लक्षण में हेतु पद क्यों दिया । उत्तर—तथापि पृथिवीत्व जाति में प्रमाणोपन्यास के लिये कारणत्व का उपन्यास किया है—अभिप्राय यह है कि गन्धसमवायिकारणतावच्छेदकतया पृथिवीत्व जाति की सिद्धि होती है—(अर्थात् जो गन्ध का समवायिकारणतावच्छेदक

मूले-**तत्र** = द्रव्येषु मध्ये । गन्धहेतुत्वं कालादावतिव्याप्तमत उक्तं **गन्धसमवायीति । उचितमिति** । अथ गन्धवत्त्वमात्रस्य लक्षणत्वे सुरभ्यसुरभिकपालारब्धेघटेऽव्याप्तिः, तत्र गन्धविरहात्, तथाहि तत्र प्रत्येकगन्धसत्त्वे विनिगमनाविरहः, गन्धमात्रस्य व्याप्यवृत्तित्वेनैकत्र द्वयोरसंभवात् । चित्ररूपवच्चित्रगन्धोत्पत्तिरेवास्तु, इति चेन्न । दृष्टान्तवैषम्यात् । द्रव्यचाक्षुषप्रत्यक्षे उद्भूतरूपस्य कारणत्वेन पटे च रूपाभावे तस्याऽप्रत्यक्षत्ववारणाय नानारूपवत्तन्त्वारब्धे पटे चित्ररूपाङ्गीकारात्, अत्र तु अवयवगन्धस्यैव प्रत्यक्षोत्पत्त्या चित्रगन्धानङ्गीकारादिति चेत्, न, गन्धसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वे तात्पर्यात् । **प्रमाणोपन्यासायेति** । अनुमानरूपप्रमाणोपन्यासायेत्यर्थः । न च पृथिवी-पृथिवीत्यनुगतचाक्षुषप्रतीतिबलात्पृथिवीत्वजातिसिद्धिः, संयुक्तसमवायेन तत्प्रत्यक्षसंभवात्प्रत्यक्षमेव प्रमाणमिति वाच्यम्, अतीन्द्रियपृथिव्यां तत्प्रत्यक्षाऽसंभवात् । इदमुपलक्षणम्—घृतादौ पृथिवीति प्रत्ययाभावेन तत्रापि पृथिवीत्वसाधनायानुमानस्यैवाऽवश्यकत्वादिति । **सिद्धयतीति । तथाच** समवायसंबन्धावच्छिन्नगन्धत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणता किंचिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानम् ।

गन्धाभावाद् गन्धवत्त्वमव्याप्तमिति वाच्यम्, तत्रापि गन्धसत्त्वात्, अनुपलब्धिस्त्वनुत्कटत्वेनाप्युपपद्यते, कथमन्यथा तद्भस्मनि गन्ध उपलभ्यते ?

हो उसी का नाम पृथिवीत्व जाती है। कारण यह न देने से गन्धसमवायिकारणतावच्छेदकतया पृथिवीत्व जाति की सिद्धि न हो सकेगी। पृथिवी गन्ध का कारण है यह सूचनार्थ यदि कारणत्व का उपन्यास नहीं करेंगे तो दूसरा दोष यह भी हो जावेगा कि गन्धत्वावाच्छिन्न (गन्धमात्र) कार्य को आकस्मिकत्व की आपत्ति लग जावेगी—(अर्थात् गन्ध) का पृथिवी से अतिरिक्त को तो कारण मान नहीं सकते—पृथिवी को गन्धकारणता का सूचक जो लक्षण में कारणत्वपद है उसका उपन्यास नहीं करते तो पृथिवी में भी गन्धकारणता नहीं सिद्ध होगी – इससे गन्ध अकस्मात् होता है– यह आकस्मिकत्व की आपत्ति लग जायगी, अतः "गन्धहेतुत्वम्" यह जो पृथिवी का लक्षण किया है इसमें हेतुत्व (कारणत्व) का उपन्यास किया, करने पर कारणतावच्छेदकतया पृथिवीत्व जाति की भी सिद्धि हो जाती है और गन्ध अकस्मात् होता है—आकस्मिकत्व की आपत्ति भी वारित हो गयी– कि गन्ध अकस्मात् नहीं होता है अपितु अपने कारण पृथिवी से होता है—यह इस ग्रन्थ का अभिप्राय है)। प्रश्न—गन्धसमवायिकारणत्व इस लक्षण की पाषाणरूपा पृथिवी में अव्याप्ति हो जावेगी—क्योंकि पाषाण में गन्ध नहीं है। उत्तर—पाषाण रूपा पृथिवी में भी गन्ध है। प्रश्न—तब फिर उसका प्रत्यक्ष क्यों नहीं होता है। उत्तर—उत्कट उद्भूत, गन्ध का प्रत्यक्ष होता है, और अनुत्कट (अनुद्भूत) का रहते हुवे भी प्रत्यक्ष नहीं होता है सो पाषाण में गन्ध की अनुपलब्धि का कारण गन्ध की अनुत्कटता ही है अतः प्रत्यक्ष नहीं होता है—वही कहा है कि "अनु-

न च समवायेन गन्धत्वावच्छिन्नं प्रति तादात्म्येन पृथिवीत्वेन कारणत्वे मानाभावः, सामान्यतो जन्यसत्त्वावच्छिन्नं प्रति द्रव्यत्वेनैव समवायिकारणत्वात्, विलक्षणतेजःसंयोगाऽवयवगन्धात्मकाऽसमवायिकारणविरहेणैव जलादौ गन्धापादनाऽसंभवादिति वाच्यम्। विलक्षणतेजःसंयोगस्य द्विनिष्ठतया तेजसि पाकजगन्धोत्पत्तिवारणायोक्तकार्यकारणभावस्यावश्यकत्वात्। अथ घटीयगन्धत्वावच्छिन्नं प्रति घटत्वेन पटीयगन्धत्वावच्छिन्नं प्रति पटत्वेन च कार्यकारणभावानामावश्यकत्वे गन्धत्वावच्छिन्नं प्रति पृथिवीत्वेन कारणत्वे मानाभावः। न च गौरवाद्विशेषकार्यकारणभावे एव मानाभाव इति सामान्यकार्यकारणभावो निष्प्रत्यूह एवेति वाच्यम्। घटे पटीयगन्धापत्तिवारणाय विशेषकार्यकारणभावस्यावश्यकत्वात्। न च गन्धत्वावच्छिन्नं प्रति पृथिवीत्वेनैव कार्यकारणभावस्वीकारान्न घटे पटीयगन्धापत्तिः, गन्धत्वावच्छिन्नस्य तु तत्रोत्पत्तेर्जायमानत्वात्, नहि वयं पटीयगन्धत्वावच्छिन्नं प्रति पृथिवीत्वेन कारणत्वं वदाम इति वाच्यम्। यो यद्धर्माश्रयनिष्ठकार्यतानिरूपितयावत्कारणतावच्छेदकावच्छिन्नजन्यः स तद्धर्मवानितिव्याप्तिबलेन पटीयगन्धस्यैव घटे आपाद्यमानत्वादिति चेत्, न। "यद्विशेषयोरिति" न्यायेन सामान्यकार्यकारणभावस्यावश्यकत्वात्। कार्यसामान्याभावे तत्तत्कारणाभावकूटस्य प्रयोजकत्वे गौरवम्, पृथिवीत्वाभावस्यैकस्य तथात्वे लाघवम्, तच्च पृथिवीत्वस्य कारणतावच्छेदकत्वमन्तरा न संभवतीति तदावश्यकं इति संक्षेपः।

भस्मनो हि पाषाणध्वंसजन्यत्वात्पाषाणोपादानोपादेयत्वं सिद्धयति। यद्‌द्रव्यं यद्‌द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेः, दृष्टं चैतत्खण्डपटे

पलब्धिस्त्वनुत्कटत्वेनाप्युपपद्यते"। प्रश्न—पाषाण में उद्‌भूत-अनुद्‌भूत कोई भी गन्ध नहीं है—यही क्यों न मान लिया जावे। उत्तर—अन्यथा (पाषाण में यदि कोई भी गन्ध नहीं मानेंगे तो) पाषाण भस्म में गन्ध का प्रत्यक्ष कैसे होता है। क्योंकि पाषाण भस्म पाषाणध्वंस से जन्य है—अतः पाषाण भस्म पाषाण का उपादान (समवायिकारण) जो पाषाणपरमाणु उसका उपादेय (कार्य) है यह सिद्ध है। यह नियम है कि जो द्रव्य जिस द्रव्य के ध्वंस से उत्पन्न होता है वह द्रव्य उस द्रव्य के उपादान का उपादेय होता है। यह नियम वहाँ देखा गया है - जहाँ (थान) इत्यादि महापट को फाड़कर कई टुकड़े (उन टुकड़ों को ही खण्डपट

अत्रेदं बोध्यम्—लक्षणस्य प्रयोजनमितरभेदसिद्धिः व्यवहारसिद्धिश्च। "व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजन"मित्यभियुक्तोक्तेः। तथा च प्रकृते पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात्, यन्नैवं, तन्नैवं यथा जलमित्यनुमानं फलितम्। एवं पृथिवी "पृथिवी" इति व्यवहर्तव्या गन्धवत्त्वाद्, यन्नैवं तन्नैवं यथा जलमिति व्यवहारसिद्धिश्च भवति इति।

अन्यथा=गन्धत्वावच्छिन्नं प्रति हेतुत्वानंगीकारे। **आकस्मिकत्वापत्तेरिति।** गन्धत्वस्य जन्यतानवच्छेदकत्वापत्तेरित्यर्थः। तथा च जलादावपि गन्धोत्पादः स्यादिति भावः।

अथात्र किमिदमाकस्मिकत्वं गन्धत्वावच्छिन्नोत्पादनियामकसमवायिकत्वाभावो-गन्धत्वावच्छिन्नोत्पादकसामग्र्यभावकत्वं वा! नाद्यः, पृथिव्या एव "रूपान्तरेण" द्रव्यत्वेन हेतुतायाः क्लृप्तत्वात्, तत्साधकमानस्याधस्तादावेदितत्वात्। नान्त्यः, विजातीयगन्धत्वावच्छिन्ने गन्धादिघटितसामग्र्याः, विजातीयगन्धत्वावच्छिन्ने च तेजःसंयोगलक्षणपाकादिघटितसामग्र्याः क्लृप्तत्वेन तादृशसामग्र्यभावकत्वरूपाकस्मिकत्वसंभावनाया अप्यसंभवात् इति चेत्।

स्वमात्रवृत्तिजातिनिष्ठस्वहेतुवृत्तिहेतुतानिरूपितजन्यतानवच्छेदकत्वाश्रयवत्त्वं हि तत्, स्वपदद्वयं चाऽऽकस्मिकत्वेनाभिमतगन्धादिपरम्। जातिनिष्ठेत्यस्याऽनवच्छेदकत्वेन सहान्वयः। न च पृथिवीत्वेन हेतुत्वाभ्युपगमेपि ईदृशाकस्मिकत्वं गन्धादौ तदवस्थमेवेति वाच्यम्। "स्वहेतुवृत्ती"त्यनेन यावन्तः स्वहेतवः प्रत्येकं तद्वृत्तिहेतुतानिरूपितजन्यतानवच्छेदकत्वाश्रयवत्त्वस्य निर्गलितत्वात्। तादृशहेतुहेतुमद्भावाभ्युपगमे तु गन्धत्वस्य यावत्स्वहेतुमध्यनिविष्टपृथिवीवृत्तिहेतुतानिरूपितजन्यतावच्छेदकत्वेन नाकस्मिकत्वप्रसंगः। इत्थं च कार्यमात्रवृत्तिजातेः कार्यतावच्छेदकत्वनियमवादोपि सूपपाद इति।

शंकते **नचेति।** **तत्रापि**=पाषाणेपि। ननु पाषाणे गन्धसत्त्वे उपलब्धिः कथं नेत्यत आह **अनुपलब्धिस्त्विति।** **अनुत्कटत्वेन**=अनुद्भूतत्वेन। ननु

महापटध्वंसजन्ये, इत्थं च पाषाणपरमाणोः पृथिवीत्वात्तज्जन्यस्य पाषाणस्यापि पृथिवीत्वम्, तथा च तस्यापि गन्धसत्त्वे बाधकाभावः। नानारूपेति। शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्त्तते न तु जलादौ, तत्र शुक्लस्यैव सत्त्वात्, पृथिव्यां तु एकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसंभवात्। नच यत्र नानारूपं नोत्पन्नं तत्राव्याप्तिरिति

कहते हैं) वहाँ वह खण्डपट रूपी द्रव्य महापट रूपी द्रव्य के ध्वंस से जन्य है—अतः वह खण्डपट महापट के उपादान जो परमाणु उनका ही उपादेय है। अर्थात महापट के उपादान भूत परमाणु के दोनों कार्य हैं—महापट और खण्डपट। वैसे ही प्रकृत में भी पाषाण के उपादान जो पाषाणपरमाणु—उसके कार्य पाषाण—पाषाणभस्म जब कि दोनों हैं तब फिर पाषाणभस्म में गन्ध रहे और पाषाण में न रहे यह कैसे हो सकता है—अतः पाषाण में भी गन्ध अवश्य मानना होगा, रहा कि उसका प्रत्यक्ष नहीं होता है—सो प्रत्यक्ष न होने में कारण है गन्ध की अनुत्कटता, सो यह हम पहिले कह चुके हैं। उपसंहार करते हैं—"इत्थञ्च" अर्थात् पाषाण के परमाणु पृथिवी हैं अतः उनसे उत्पन्न पाषाण भी पृथिवी है—तब पाषाण के गन्धवान् होने में कोई बाधक नहीं। "नानारूपेति।" नानारूपवत्त्व" यह भी पृथिवी का लक्षण है। क्योंकि शुक्लनीलादिभेद से सातों प्रकार के रूप पृथिवी ही में रहते हैं। जल तथा तेज में शुक्ल ही रूप रहता है। और पृथिवी में तो एक धर्मी (घटादि) में पाक (अग्निसंयोग) से नानारूप उत्पन्न हो जाते हैं। प्रश्न—जिस पृथिवी (पटादि) में नानारूप उत्पन्न नहीं हुवे उसमें (नानारूपवत्त्व) इस लक्षण की अव्याप्ति हो जायेगी। क्योंकि पटादिरूप पृथिवी में यदि पाक करेंगे तो पट ही जलकर नष्ट हो जावेगा—तो नानारूप पट में उत्पन्न होगा कहाँ से। और नानारूप पाक

पाषाणस्य पृथिवीत्वे एव किं मानमित्यतः पृथिवीत्वसाधनायोपक्रमते-अन्यथा = पाषाणे पृथिवीत्वाभावे। तद्भस्मनि = पाषाणभस्मनि। पाषाणभस्मनि गन्धः प्रत्यक्षसिद्धः, ततश्च पाषाणभस्मारंभकपरमाणुषु गन्धः स्वीकार्यः। "कारणगुणाः कार्यगुणानारभन्ते" इति न्यायात, ततश्च पाषाणारंभकपरमाणुष्वपि गन्धः स्वीकार्यः, भस्मारंभकपरमाणूनां पाषाणारंभकपरमाणूनां चैक्यात्, तथा च पाषाणपरमाणवः पृथिवीत्ववन्तः गन्धवद्भस्मोपादानत्वादित्यनुमानं फलितम्। ततश्च पृथिवीत्वेन पाषाणपरमाणुषु गन्धवत्त्वसिद्धिः। ततश्च पाषाणं पृथिवी गन्धवद्भस्मोपादानोपादेयत्वादित्यनुमानसहायेन पाषाणं गन्धवत् पृथिवीत्वादित्यनुमानेन पाषाणे गन्धवत्त्वसिद्धिरिति तत्त्वम्। तदेव दर्शयति **भस्मनो हीति**। तथाच पाषाणभस्म पाषाणोपादानोपादेयं पाषाणध्वंसजन्यत्वात् महापटध्वंसजन्यखण्डपटवत्। सामान्यव्याप्तिमाह **यद्द्रव्यमिति**। घटनाशजन्यघटरूपनाशस्य घटोपादानोपादेयत्वविरहेण व्यभिचारवारणाय प्रथमं द्रव्यपदम्। द्वितीयं द्रव्यपदं संपातायातम्। मिथ्याज्ञाननाशजन्यकायव्यूहस्य मिथ्याज्ञानोपादानोपादेयत्वविरहाद् व्यभिचारवारणाय द्वितीयद्रव्यपदम्। वक्ष्यमाणजन्यत्वविशेषस्य तत्राभावेन द्रव्यपदनिवेशे

वाच्यम्, रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य, रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा वाच्यत्वात्, वैशेषिकनये पृथिवीपरमाणौ रूपनाशस्य रूपान्तरस्य च सत्त्वात्, न्यायनये घटादावपि तत्सत्त्वाल्लक्षणसमन्वयः।

से ही होता है। उत्तर–नानारूपवत्त्व का "रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्व" अथवा "रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्व" यह जातिघटित अर्थ करने से दोष नहीं। तथाहि–वैशेषिकमतमे रूपद्वयवान् हुवा पृथिवीपरमाणु-और न्यायमत में घट–उसमें वृत्ति जो द्रव्यत्व-व्याप्यजाति (पृथिवीत्वजाति) तादृशजातिमान् होगी सम्पूर्णपृथिवी–तो वह भी पृथिवी होगी जिसमें नानारूप उत्पन्न नहीं हुवे। एवं रूपनाशवान् वैशेषिकमत में पृथिवीपरमाणु और न्यायमत में घट उसमें वृत्ति द्रव्यत्वव्याप्यजाति पृथिवीत्वजाति तादृशपृथिवीत्वजातिमान् समस्त-पृथिवी हुवी तो वह भी पृथिवी हुवी कि जिसमें अर्थात् पटादिरूपापृथिवी में पाक से रूपनाश नहीं हुवा-अतः जातिघटितलक्षणपृथिवीमात्र में चला गया। वैशेषिकमत में पृथिवीपरमाणुयें-और न्यायमत (गौतममत) में घट में पूर्वरूपनाश-रूपान्तरोत्पत्ति मानते हैं। षड्विध इति-

---

प्रयोजनाभावादिति ध्येयम्। मण्यभावजन्यवह्न्यादौ व्यभिचारवारणाय ध्वंसपदम्। द्रव्यध्वंसत्वावच्छिन्नकारणतानिरूपितकार्यताशालित्वमर्थः। इतरथा प्रतिबन्धकीभूतमणिध्वंसजन्यवह्न्यादेः मण्युपादानोपादेयत्वविरहेण व्यभिचारतादवस्थ्यात्, तत्र मणिसंसर्गाभावत्वेन हेतुत्वात्। न च प्रकृते महापटस्य प्रतिबन्धकतया तत्संसर्गाभावत्वेन हेतुत्वं संभाव्यते इति वाच्यम्। महापटोत्पत्तेः पूर्वमपि तदुत्पादापत्तेर्दुर्वारत्वात्। अदृष्टाऽद्वारा द्रव्यध्वंसजन्यत्वमिह विवक्षणीयम्, तेन शालिग्रामध्वंसजन्यनारकीयशरीरस्य शालिग्रामशिलोपादानोपादेयत्वविरहेपि न व्यभिचारः।

इत्थंचेति। गन्धवद्भस्मोपादानत्वे चेत्यर्थः। तथा च पाषाणपरमाणवः पृथिवीत्ववन्तः गन्धवद्भस्मोपादानत्वादित्यनुमानं फलितम्। तज्जन्यस्य = पाषाणपरमाणुजन्यस्य, गन्धवद्भस्मोपादानोपादेयस्येति यावत्। पृथिवीत्वमिति। तथा च पाषाणं पृथिवी गन्धवद्भस्मोपादानोपादेयत्वादित्यनुमानं बोध्यम्। तस्यापि=पाषाणस्यापि। पाषाणं गन्धवत् पृथिवीत्वादिति गन्धसिद्धिर्बोध्या। वस्तुतस्तु समवायेन गन्धं प्रति स्वाश्रयसमवेतत्वसंबन्धेनाऽवयवगन्धस्य हेतुतया भस्मनि गन्धोपलंभेन पाषाणारंभकेषु गन्धः कल्प्यः, सिद्धे च तत्र गन्धे स्वाश्रयसमवेतत्वलक्षणप्रत्यासत्त्या हेतोर्गन्धस्य सत्त्वात्पाषाणेपि तदुत्पादो दुर्वार एवेति बोध्यम्। रूपद्वयवद्वृत्तीति। रूपद्वयवदवयववृत्तीत्यर्थः। तेनावयविनि रूपद्वयाऽसत्त्वेपि न क्षतिः। पार्थिवपरमाणोः पाकजक्रमिकरूपद्वयवत्तामादायैव पृथिव्यां लक्षणसमन्वयः। अतएव वक्ष्यति 'वैशेषिकनये इति।' रूपनिष्ठं द्वित्वं न संख्यारूपं गुणे गुणानंगीकारात, अपि तु रूपद्वयविषयकापेक्षाबुद्धिविशेषविषयत्वरूपं तन्निवेशनीयमिति गौरवमतो रूपनाशघटितलक्षणमाह रूपनाशवद्वृत्तीति। रूपवद्वृत्तित्वेपि जलत्वतेजस्त्वयोर्न

षड्विध इति। मधुरादिभेदेन यः षड्विधो रसः स पृथिव्यामेव, जले च मधुर एव रसः। अत्रापि पूर्ववद्–'रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं' लक्षणार्थोऽवसेयः॥ गन्धस्त्विति। द्विविध–इति वस्तुस्थितिमात्रं, न तु द्विविधगन्धवत्त्वं लक्षणम् द्विविधत्वस्य व्यर्थत्वात्। द्वैविध्यं च सौरभासौरभभेदेन बोध्यम्॥ ३५॥

स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः।

नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा॥ ३६॥

स्पर्श इति। तस्याः = पृथिव्याः। अनुष्णाशीतस्पर्शवत्त्वं वायोरपि वर्त्तत इत्युक्तं पाकज इति। इत्थं च पृथिव्याः स्पर्शोऽनुष्णाशीत इति ज्ञापनार्थं तदुक्तम्। वस्तुतस्तु पाकजस्पर्शवत्त्वमात्रं लक्षणम्, अधिकस्य वैयर्थ्यात्। यद्यपि पाकजस्पर्शः पटादौ नास्ति तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः॥ नित्येति॥ सा पृथिवी द्विविधा, नित्या अनित्या चेत्यर्थः। अणुलक्षणा=परमाणुरूपा पृथिवी नित्या॥३६॥

मधुर-आम्ल-इत्यादिभेद से जो छः प्रकार का रस वह पृथिवी ही में रहता है। (अतः "षड्विधरसवत्त्व" यह भी पृथिवी का लक्षण हो जाता है। जल में मधुर ही रस है। यहाँ भी पहिले की तरह "रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्व"? यह षड्विधरसवत्त्व का अर्थ कर देना चाहिये। अन्यथा जिस पृथिवी में छः प्रकार का रस उत्पन्न नहीं हुवा-उसमें अव्याप्ति हो जावेगी। "गन्धस्तु द्विविधो मतः" यहाँ पर द्विविधपदवस्तुस्थिति को बतलाता है-अर्थात् गन्ध दो प्रकार का है। द्विविधगन्धवत्त्व यह पृथिवी का लक्षण नहीं है-क्यों कि इस लक्षण में द्विविधपद को वैयर्थ्य है-गन्धवत्त्वमात्र ही लक्षण उचित है। गन्ध सुरभि (सुगन्ध) असुरभि (दुर्गन्ध) इस भेद से दो प्रकार का है। "स्पर्शस्तस्यास्तु" पृथिवी का पाकजअनुष्णाशीतस्पर्श जानना चाहिये। अतः पाकजअनुष्णाशीतस्पर्शवत्त्व यह भी पृथिवी का लक्षण है। प्रश्न–अनुष्णाशीतस्पर्शवत्त्वमात्र ही पृथिवी का लक्षण क्यों नहीं कर दिया। उत्तर-वायु में अतिव्याति हो जावेगी। "पाकज" विशेषण देने से वारण हो गया कि वायु का स्पर्श पाकज नहीं। पृथिवी के ही रूप-रस-गन्ध-स्पर्श ये चार पाकज होते हैं। प्रश्न–"स्पर्शस्तस्यास्तु"

रूपनाशवद्वृत्तित्वम्, एवं रूपाभाववद्वृत्तित्वेपि मनस्त्वाऽऽत्मत्वादीनां न रूपनाशवद्वृत्तित्वमिति तत्र तत्र नातिप्रसंगः।

मधुरादीति। आदिना अम्ललवणकटुकषायतिक्तानां संग्रहः। तथा च षड्विधरसवत्त्वं पृथिव्या लक्षणं बोध्यम्। यत्र षड्विधा रसा नोत्पन्नास्तत्राव्याप्तिरत आह अत्रापीति। अवसेय इति। एवं रसनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं

अनित्या तु तदन्या स्यात्सैवावयवयोगिनी ।
सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ॥ ३७ ॥

अनित्येति। तदन्या=परमाणुभिन्ना, पृथिवी द्व्यणुकादिरूपा सर्वाऽप्यनित्येत्यर्थः ।

सैव अनित्या पृथिव्येवावयववतीत्यर्थः ॥ नन्ववयविनि किं मानम्, परमाणुपुञ्जैरेवोपपत्तेः । न च परमाणूनामतीन्द्रियत्वाद्घटादेः प्रत्यक्षं न स्यादिति वाच्यम् । एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वात्, यथैक-

यह ग्रन्थ क्या पृथिवी लक्षण के अभिप्राय से कहा है-उत्तर-नहीं-किन्तु पृथिवी का स्पर्श अनुष्णाशीत है यह बोधनार्थ कहा है। प्रश्न-पाकजस्पर्शवत्त्व यही पृथिवी का लक्षण क्यों नहीं कर दिया। उत्तर-इस लक्षण की पटादिरूपापृथिवी में अव्याप्ति हो जायगी क्योंकि घट में पाक नहीं होता है यह हम पहिले कह चुके हैं। दूसरा उत्तर यह है कि यदि पाकजस्पर्शवत्त्व आपको लक्षण ही अभीष्ट हो तो पाकजस्पर्शवत्त्व का जातिघटित अर्थ कर देना-"पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वम्। अर्थात् पाकजस्पर्शवाला हुवा घट-उसमें वृत्ति जो द्रव्यत्वव्याप्यपृथिवीत्वजातितादृशपृथिवीत्वजातिमान् सब पृथिवी हुवी-तो पटादिरूपा पृथिवी भी है-अतः अव्याप्ति नहीं है। "नित्याऽनित्या च सा द्वेधा" पृथिवी दो प्रकार की है-नित्य और अनित्य। परमाणुरूपापृथिवी नित्य है-उससे भिन्न द्व्यणुकादिरूपा सब पृथिवी अनित्य है। और वह अनित्य पृथिवी ही अवयववती (सावयव) होती है। बौद्ध शङ्का करता है कि-अवयव से अतिरिक्त अवयवी में क्या प्रमाण ? जब कि परमाणुपुञ्ज (अवयवसमुदाय) को ही अवयवी मानकर उपपत्ति हो रही है। (अतः अवयवसमुदाय ही अवयवी है-अवयव से अतिरिक्त अवयवी नहीं है)। प्रश्न-परमाणु अतीन्द्रिय (प्रत्यक्षायोग्य) हैं-परमाणुसमुदाय ही यदि घट मान लिया जायगा तो घट का भी प्रत्यक्ष नहीं होगा। उत्तर-एक परमाणु प्रत्यक्षायोग्य होने पर भी परमाणुसमुदायभूतघटको प्रत्यक्षयोग्य मान लिया जायगा-अनुभवबलात्। जैसे एक केश दूर से प्रत्यक्षायोग्य होने पर भी केशसमूह का प्रत्यक्ष होता है। प्रश्न-"एको घटः स्थूलः" यह स्थौल्यबुद्धि घट में अनुपपन्न हो जायेगी (क्योंकि परमाणु में स्थौल्य नहीं है-अन्यथा परमाणु का प्रत्यक्ष होना चाहिये-अतः परमाणुसमुदायभूत घट में भी स्थौल्यबुद्धि नहीं बनेगी।

लक्षणं बोध्यम्। व्यर्थत्वादिति। अव्याप्तेश्चेत्यपि बोध्यम्। वस्तुतोऽव्याप्तिदूषणस्य प्रागिव गन्धसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य लक्षणकरणे परिहारसंभवे विवक्षाऽविवक्षासाधारण्येन दूषणमाह व्यर्थत्वादिति ।

बौद्धः शंकते नन्विति। किं मानमिति। न किमपि मानमित्यर्थः। अथ अयं घटः इति प्रतीतिरेव मानमित्यत आह परमाणुपुञ्जैरेवेति। परमाणुभिरेवेत्यर्थः। न च अयं घट इति प्रतीतेः परमाणुपुञ्जविषयकत्वे मृत्पिण्डेऽपि अयं

स्य केशस्य दूरेऽप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वम्। न चैको घटः स्थूल इति बुद्धेरनुपपत्तिरिति वाच्यम्। एको महान्धान्यराशिरिति वदुपपत्तेः।

मैवम्, परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षत्वाऽयोगात्। दूरस्थकेशस्तु नातीन्द्रियः, सन्निधाने तस्यैव प्रत्यक्षत्वात्। न च तदानीमदृश्यपरमाणुपुञ्जाद् दृश्यपरमाणुपुञ्जस्योत्पन्नत्वान्न प्रत्यक्षत्वे विरोध इति वाच्यम्। अदृश्यस्य दृश्यानुपादानत्वात्, अन्यथा चक्षुरूष्मादिसंततेरपि कदाचिद् दृश्यत्वप्रसङ्गात्। न चातितप्ततैलादौ कथमदृश्यदहनसंततेर्दृश्यदह-

उत्तर—प्रत्येक धान्य में महत्व (स्थौल्य) बुद्धि न होने पर भी धान्यराशि में जैसे स्थौल्यबुद्धि होती है। कि यह एक महान् धान्यराशि है वैसे ही प्रत्येक परमाणु में) स्थौल्यबुद्धि न होने पर भी परमाणुसमुदायभूतघट में स्थौल्यबुद्धि हो जावेगी। नैयायिक बोलता है—मैवम्—यह ठीक नहीं—जब कि परमाणु प्रत्यक्षायोग्य हैं तो तत्समूह (परमाणुपुञ्ज) जो घट उसका भी प्रत्यक्ष नहीं होगा। (अतः अवयव से अतिरिक्त अवयवी मानना पड़ेगा—दूरस्थकेशवाला दृष्टान्त ठीक नहीं है) क्यों कि दूरस्थकेश अतीन्द्रिय नहीं है—समीप में उसका प्रत्यक्ष होता है। प्रश्न-अदृश्यपरमाणुपुञ्ज से दृश्यपरमाणुपुञ्ज (घटात्मक)

घट इति प्रतीत्यापत्तिः। विलक्षणसंयोगविशिष्टैः परमाणुभिरेव अयं घट इति प्रतीत्युपपत्तेरिति समुदितार्थात्, तथाच घट इति प्रतीतिविषयस्य परमाणुपुञ्जात्मकतया परमाणुषु द्रव्यसमवायाभाव इति भावः। **न स्यादिति**। तथा च परमाणवो घट इति प्रतीतिविषयत्वाभाववन्तः अतीन्द्रियत्वादिति भावः। **तत्समूहस्य**=परमाणुसमूहस्य। तत्र दृष्टान्तमाह। **यथेति**। **तत्समूहस्य**=केशसमूहस्य। **प्रत्यक्षत्वं**=साक्षात्कारविषयत्वम्, परमाणुसमूहो नातीन्द्रियः समुदायत्वात् दूरस्थकेशसमूहवदित्यनुमानेन पूर्वानुमाने स्वरूपासिद्धिरिति भावः। **अनुपपत्तिरिति**। परमाणूनामनेकत्वादणुत्वाच्चेति भावः। **उपपत्तेरिति**। यथा धान्यसमूहस्यैकत्वादेक इति प्रतीतिः, एवं एकधान्यसंयुक्तापरधान्यसंयुक्तान्यधान्यसंयोगस्यैव महत्त्वात्मकतया महानिति प्रतीतिस्तथा परमाणुपुंजेष्वपीति भावः।

अथाऽस्मन्मते धान्यराशेस्तावद् धान्यानन्तसंयोगात्मकस्य सामानाधिकरण्येन महत्त्वैकत्वयोर्वर्तमानतया "एको महानिति" प्रतीत्युपपत्तिः, परमाणुपुञ्जात्मकत्वनये तु स्थौल्याऽप्रसिद्धया प्रतीतेर्भ्रमात्मकत्वमपि न संभावनाविषय इति चेत्।

सत्यम्। न वयं स्थूल इति प्रतीतेर्गौणत्वमाचक्षामः, किन्तु स्थूलत्वं फलबलात्तन्निष्ठ एव जातिविशेषः, भवन्नये परिमाणनिष्ठ इवाऽस्मन्मतेपि तथात्वे बाध-

नोत्पत्तिरिति वाच्यम् । तत्र तदन्तःपातिभिर्दृश्यदहनावयवैः स्थूलदहनोत्पत्ते-रुपगमात् । न चादृश्येन द्व्यणुकेन कथं दृश्यत्रसरेणोरुत्पत्तिरिति वाच्यम् । यतो न दृश्यत्वमदृश्यत्वं वा कस्यचित्स्वभावादाचक्ष्महे, किन्तु महत्त्वोद्भूतरूपादिकारणसमुदायवशाद् दृश्यत्वं, तदभावे चादृश्यत्वम् । तथा च त्रसरेणोर्महत्त्वात्प्रत्यक्षत्वं न तु द्व्यणुकादेस्तदभावात्, न हि त्वन्मतेऽपि सम्भवतीदं, परमाणौ महत्त्वाभावात् ।

की उत्पत्ति होती है अतः घट के प्रत्यक्ष होने में कोई बाधा नहीं है। उत्तर-अदृश्य वस्तु दृश्यवस्तु का उपादान (कारण) नहीं हो सकता है। अन्यथा (अदृश्य को दृश्य का उपादान मानेंगे तो) कदाचित् चक्षुः तथा ऊष्मा आदि अदृश्य तेजःपदार्थों का भी प्रत्यक्ष होना चाहिये-अर्थात् अदृश्य चक्षु से कदाचित दृश्य चक्षु की-एवं अदृश्य ऊष्मा से दृश्य ऊष्मा की उत्पत्ति होनी चाहिये। प्रश्न-बौद्ध नैयायिक से कहता है-कि कड़ाई में अतितप्ततैल में वर्त्तमान अदृश्य अग्नि से कभी-कभी ज्वालारूपी दृश्य-अग्नि की जैसे उत्पत्ति देखी जाती है ऐसे ही प्रकृत में भी अदृश्यपरमाणुपुञ्ज से एक दृश्यपरमाणुपुञ्ज घट भी उत्पन्न होता है। उत्तर-नैयायिक अतितप्ततैल के अन्दर विद्यमान जो अग्नि के सूक्ष्मावयव वे दृश्य ही हैं-उन्हीं से ज्वालारूपी स्थूल दहन की उत्पत्ति होती है। अतः पूर्वस्थल में दृश्य से ही दृश्य की उत्पत्ति होती है। प्रश्न-बौद्ध० अदृश्य द्वयणुक से दृश्यत्रसरेणु की उत्पत्ति कैसे आपके यहाँ होती है। उत्तर-नैया० महत्त्व-उद्भूतरूप आदि कारणसमुदायवान् दृश्य कहलाता है-और तादृशसमुदाय के अभाव वाले को अदृश्य कहते हैं। त्रसरेणु में महत्त्व होने से उसका प्रत्यक्ष होता है-द्वयणुक में महत्त्व न होने से उसका प्रत्यक्ष नहीं होता है। (दृश्यत्व-अदृश्यत्व किसी वस्तु के स्वाभाविकधर्म नहीं है-किन्तु जहाँ महत्त्व आदि कारणसमुदाय है वह दृश्य है-जहाँ नहीं है वह अदृश्य है) प्रश्न-प्रत्येक परमाणु अदृश्य हो-परन्तु परमाणुपुञ्ज घट को दृश्य मान लिया जाय। उत्तर-"नहि त्वन्मतेऽपि" अर्थात् तुम्हारे (बौद्ध) मत में भी परमाणु में दृश्यत्वोपपादन सम्भव नहीं क्योंकि परमाणु में महत्त्व नहीं है। (तब फिर लाख परमाणु क्यों न हों उनमें महत्त्व कहाँ से आजावेगा-अतः बौद्ध का जो यह कहना है कि प्रत्येक परमाणु का प्रत्यक्ष न हो-पुञ्जस्वरूप घट का प्रत्यक्ष हो जावेगा-सो यह कहना सर्वथा व्यर्थ है-क्योंकि वह पुञ्ज भी तो परमाणुवों से अतिरिक्त नहीं है-अतः परमाणुओं से द्व्यणुकादि द्वारा उत्पाद्यमान एक घटादि रूप अवयवी अतिरिक्त मानना चाहिये-इससे अतिरिक्त अवयवी की सिद्धि हो गयी।

काभावात्। तत्समूहस्यापि = परमाणुसमूहस्यापि। प्रत्यक्षत्वायोगादिति। परमाणुरूपादेर्विषयतया चाक्षुषापत्तिवारणाय द्रव्यसमवेतवृत्तिविषयतया चाक्षुषे स्वाश्रयसमवेतत्वसंबन्धेन महत्त्वस्य हेतुतायाः क्लृप्तत्वेन तथाविधपुञ्जात्मकस्य घटस्य प्रत्यक्षाऽसंभवादिति भावः। स्वभावतोऽयोग्यानां परमाणूनां परस्पर-

इत्थं चावयविसिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षसिद्धत्वादनित्यत्वम्। तेषां चावयवावयवधाराया अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः।

इस प्रकार अवयवी की सिद्धि हो जाने पर अवयवों के उत्पाद-विनाश प्रयुक्त अवयवी का उत्पाद विनाश प्रत्यक्ष सिद्ध होने से अवयवी को अनित्यत्व स्पष्ट सिद्ध है। उन अवयवियों की अवयवावयव धारा के अनन्त मानने पर (अर्थात् उनके अवयव- फिर उन अवयवों के भी अवयव फिर उनके भी-इसी प्रकार यह अवयवधारा बिना कहीं समाप्त हुवे यदि बराबर

संयोगमात्रेण योग्यत्वं न संभवतीति मन्तव्यम्। त्वदुक्तदृष्टान्तस्य वैषम्यमित्याह **दूरस्थकेशस्त्विति।** **तस्यैव** = दूरस्थकेशस्यैव। एवकारस्य सन्निधाने इत्यनेनाऽन्वयः। तथाच सन्निधानत एव तस्य प्रत्यक्षत्वादित्यर्थः। तथाच दूरत्वं प्रतिबन्धकं नातः प्रत्यक्षं तस्य, न तु स्वाभाविकमप्रत्यक्षत्वं तस्येति भावः। तथा च त्वदुक्तानुमाने बाध इति भावः। **उत्पन्नत्वादिति।** क्षणभङ्गवादिनां मते परमाणूनामुत्पत्तिस्वीकारादिति भावः, तथाच परमाणुपुञ्जो नातीन्द्रियः दृश्यत्वादित्यनुमानं फलितम्। एवं च नोक्तबाध इति ध्येयम्। **अन्यथा** = अदृश्यस्य दृश्योत्पादकत्वे। **दृश्यत्वप्रसंगादिति।** एवं च स्वरूपासिद्धिरिति भावः। **तत्र** = तादृशदहनोत्पत्तिस्थले। **तदन्तःपातिभिः** = अतितप्ततैलान्तःपातिभिः। **स्वभावात्** = कारणनैरपेक्ष्यात्। **उद्भूतरूपादीति** आलोकादिपरिग्रहः। **तदभावे** = तादृशकारणसमुदायाभावे। **तदभावात्** = महत्त्वाद्यभावात्। **त्वन्मते** = परमाणुपुञ्जात्मकत्वमते। **इदं** = दृश्यत्वम्। इदमत्रावधेयम्। सामान्यतो लौकिकप्रत्यक्षमात्रे लौकिकविषयताया हेतुत्वस्य, विशिष्य तत्तद्व्यक्तित्वेन वा हेतुत्वस्य क्लृप्ततया तादृशहेत्वभावादेव परमाणोः प्रत्यक्षवारणसंभवः, तादृशपुञ्जात्मकस्य घटस्य तु फलबलाल्लौकिकविषयत्वकल्पनात्, विशिष्य कार्यकारणभावकल्पनाद्वा प्रत्यक्षोपपत्तेः। न च फलबलाल्लौकिकविषयताया नानापरमाणुसंयोगलक्षणपुंजवृत्तित्व प्रत्येकपरमाणुद्वयसंयोगवृत्तित्वमपि स्वीकरणीयम्, अन्यथा प्रत्येकावृत्तिधर्मस्य समुदायाऽवृत्तित्वेन तादृशविषयताकल्पना कुकल्पनैव स्यात्, तथाच परमाणोः प्रत्यक्षं दुर्वारमिति वाच्यम्। घटपटोभयवृत्तिद्वित्ववत् तादृशसंयोगलक्षणपुञ्जे लौकिकविषयतायाः व्यासज्यवृत्तित्वोपगमेन तद्वारणसंभवादिति पुञ्जवादिमतमेव साधीयः। न च परमाणुपुञ्जेषु घटत्वांगीकारे कपालाद् घट इति प्रतीत्यनुपपत्तिः, परमाणूनां कपालजन्यत्वाभावादिति वाच्यम्। तन्मते कपालस्यापि परमाणुपुञ्जतया घटात्मक परमाणुपुञ्जेषु कपालात्मकपरमाणुपुञ्जजन्यत्वस्वीकारात्। "पुञ्जात्पुञ्जोत्पत्तिरि"-ति तत्सिद्धान्तादिति दिक्। **इत्थं च** = परमाणूनामदृश्यत्वे च। **अवयविसिद्धौ** = अतिरिक्तावयविसिद्धौ। घटादिपदवाच्यत्वस्य नानातादृशसंयोगेषु कल्पनायां गौरवादिति भावः। **तेषां** = अवयविनाम्।

तेषां चेति। अवयविनां चेत्यर्थः। अनन्तत्वे = समवेतद्रव्यत्वस्य

अतः क्वचिद्विश्रामो वाच्यः, यत्र तु विश्रामस्तस्याऽनित्यत्वेऽसमवेतभावकार्योत्पत्तिप्रसङ्ग इति तस्य नित्यत्वम्। महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः, न च त्रसरेणावेव विश्रामोऽस्त्विति वाच्यम्। 'त्रसरेणुः सावयवः

चलती ही रहेगी तो सुमेरु और सरसों इन दोनों में समानता हो जावेगी-क्योंकि अवयवों की न्यूनाधिक्यता प्रयुक्त ही अवयवियों में वैषम्य आता है-और यदि अवयवी मात्र ही अनन्तावयव हो गये तो वैषम्य का प्रयोजक कोई रहा ही नहीं-अतः मेरु सर्षप में साम्य प्रसङ्ग हो जावेगा। अतः कहीं पर अवयवधारा का विश्राम अवश्य करना चाहिये। और जहाँ विश्राम करेंगे उसे यदि अनित्य मानेंगे तो असमवेतभावकार्योत्पत्ति की आपत्ति लग जावेगी। (अभिप्राय यह है कि जितना भी भावकार्य है वह सब अपने अवयवों में समवाय सम्बन्ध से उत्पन्न होता है-जैसे-घट-भावकार्य है-वह अपने अवयव कपाल में समवाय सम्बन्ध से उत्पन्न होता है इसे समवेतभावकार्योत्पत्ति कहते हैं। यह उत्पत्ति तो अनुभव सिद्ध है-क्योंकि भावकार्यमात्र ही अपने अवयव में समवेत होकर उत्पन्न होता है ऐसा घट-पट-आदि भावकार्य देखा गया है। इस प्रकार जहाँ अवयवधारा की समाप्ति करेंगे-वही अन्तिम अवयव माना जायगा, वह अन्तिम अवयव होने के नाते असमवेत हुआ-क्योंकि यदि उसका भी कोई अवयव होता, तब उसमें वह समवेत होता। अब यदि उसे अनित्य मानेंगे तो वह भी अनित्य होने के नाते घट-पट-आदि की तरह भावकार्य हुवा-अतः असमवेत भावकार्य की उत्पत्ति की आपत्ति लग गयी वस्तुतः असमवेतभावकार्योत्पत्ति सर्वथा असम्भव है।

वही मूल में कहा है कि "यत्र च विश्रामस्तस्यानित्यत्वे" इत्यादि। अतः उस अन्तिम अवयव को नित्य ही मानना चाहिये। महत्परिमाण के तारतम्य की विश्रान्ति जैसे गगन आदि में हो जाती है, (कि गगन आदि से बड़ा परिमाण किसी का नहीं-क्योंकि गगन आदि का परममहत्परिमाण है) वैसे ही अणुपरिमाण के तारतम्य की भी विश्रान्ति कहीं अवश्य करनी चाहिये (कि अमुकवस्तु से छोटा परिमाण किसी वस्तु का नहीं है) सो जहाँ अणुपरिमाण के

समवेतद्रव्यजन्यत्वव्याप्यत्वे। **मेरुसर्षपयोरपीति।** अपिः साम्यप्रसंग इत्युत्तरं योजनीयः। साम्यं च परिमाणतारतम्याभावः, तथाच मेरुसर्षपयोः परिमाणतारतम्याभावप्रसंगोपीत्यर्थः। तेन द्व्यणुकस्य सावयवद्रव्यारब्धत्वे महत्त्वापत्तिश्च समुचिता, तथाच समवेतद्रव्यं "मेरुः" यदि समवेतद्रव्यजन्यं स्यात्तदा सर्षपपरिमाणतुल्यपरिमाणवत्स्यादित्यापत्तिर्बोध्या। समवेतद्रव्यत्वावच्छेदेन समवेतद्रव्यजन्यत्वमापादनीयम्। द्व्यणुकं यदि समवेतद्रव्यजन्यं महत्त्ववत्स्यादित्यपि बोध्यम्। वस्तुतोऽवयवधाराया अनन्तत्वेपि तादृशानन्तावयवारब्धानां त्रसरेणूनामेव साम्यं-युक्तम्, मेरुसर्षपयोस्तु आरम्भकत्रसरेणूनामेव संख्यातारतम्येन परिमाणतारतम्यमुपपद्यते न मेरौ सर्षपसमानतापत्तिरित्यन्यत्र विस्तरः। ननु यत्र विश्रामस्तस्य नित्यत्वे किं मानमत आह **यत्र त्विति। असमवेतेति।** "यद्यद्भावकार्यं तत्तत्समवेतमिति व्याप्तेः"। ननु तस्य नित्यत्वसिद्धावपि अणुत्वे किं मानमिति चेत्।

चाक्षुपद्रव्यत्वात्, घटवदित्यनुमानेन तदवयवसिद्धौ, त्रसरेणोरवयवाः सावयवाः महदारम्भकत्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः। न चेदमप्रयोजकम्, अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यवत्त्वस्य प्रयोजकत्वात्। न चैवं क्रमेण तदवयवधाराऽपि सिद्ध्येदिति वाच्यम्। अनवस्थाभयेन तदसिद्धेरिति। सा चेति। सा कार्यरूपा पृथिवी त्रिधेत्यर्थः। शरीरेन्द्रियविषयभेदादित्यर्थः॥ ३६॥ ३७॥

तारतम्य की विश्रान्ति है वही परमाणु है। प्रश्न–अणुपरिमाण की विश्रान्ति त्रसरेणु पर ही मान ली जाय। उत्तर-नहीं-त्रसरेणु-सावयव है-चाक्षुष द्रव्य होने के कारण-घट की तरह, इस अनुमान से त्रसरेणु के अवयव द्वयणुक की सिद्धि हो गयी। प्रश्न-अच्छा-त्रसरेणु के अवयव द्वयणुक पर ही अणुपरिमाण के तारतम्य की विश्रान्ति कर दी जाय। उत्तर-त्रसरेणु का अवयव भी सावयव है-महत का आरम्भक (उत्पादक) होने से कपाल की तरह। (जैसे कपाल अपने से महान् जो घट उसका उत्पादक होने से सावयव अर्थात् कपालिका उसका अवयव है-इस अनुमान से परमाणु की सिद्धि हो गयी) प्रश्न–"नचेदमप्रयोजकम्" अर्थात "त्रसरेणुः सावयवः" यह अनुमान अप्रयोजक है-(व्यभिचारशङ्कानिवर्त्तक तर्कशून्य अनुमान को अप्रयोजक अनुमान कहते हैं) प्रश्न-पूर्वोक्त अनुमान की तरह हम यह भी अनुमान करेंगे कि त्रसरेणु के अवयव का अवयव भी सावयव है इससे परमाणु की भी अवयवधारा सिद्ध हो जायगी। उत्तर-अनवस्था के भय से वह अवयवधारा असिद्ध है। वह पृथिवी तीन प्रकार की है—शरीर—इन्द्रिय—विषय भेद से॥ ३७॥

अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् महापरिमाणतारतम्यवदित्यनुमानस्य प्रमाणत्वात्, तदेतदाह महत्परिमाणेति। विश्रामोस्त्विति। अणुपरिमाणतारतम्यस्येति शेपः। आत्मनि व्यभिचारवारणाय चाक्षुषेति। अभावे व्यभिचारवारणाय द्रव्यत्वेति। तदवयसिद्धौ=त्रसरेण्ववयवसिद्धौ। तदवयवसिद्धेरिति। द्व्यणुकावयवसिद्धेरित्यर्थः। परमाणुसिद्धेरिति यावत्। अप्रयोजकमिति। महदारम्भकत्वमस्तु सावयवत्वं मास्तु इति व्यभिचारशङ्कानिवर्तकतर्करहितमित्यर्थः। अनेकद्रव्यवत्त्वस्येति। स्वसमवेतसमवेतत्वसंबन्धेन नानाद्रव्यवत्त्वस्येत्यर्थः। प्रयोजकत्वादिति। त्रसरेणुर्यदि सावयवारब्धो "उक्तसंबन्धेन नानाद्रव्यवान्" न स्यात्तदा महान्न स्यादिति तर्कस्य प्रयोजकत्वादित्यर्थः। एवं क्रमेण = महदारंभारंभकत्वहेतुना। तदवयवधारापि = परमाण्ववयवधारापि। तदसिद्धेः = अवयवधाराया असिद्धेरित्यर्थः।

नव्यास्तु परमाणुद्व्यणुकयोर्मानाभावः। न चोक्तानुमानं तत्साधकम्, अप्रयोजकत्वात्। न चाऽपकृष्टपरिमाणोत्पादानुपपत्तिः, तत्परिमाणव्यक्तेर्लाघवेन

योनिजादि भवेद्देहमिन्द्रियं घ्राणलक्षणम् ।
विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृतः ॥३८॥

तत्र देहमुदाहरति-योनिजमयोनिजं चेत्यर्थः । योनिजमपि द्विविधं-जरायुजमण्डजं च । जरायुजं मानुषादीनाम् । अण्डजं सर्पादीनाम् । अयोनिजं-स्वेदजोद्भिज्जादिकम् । स्वेदजाः=कृमिदंशाद्याः । उद्भिज्जास्तरुगुल्माद्याः । नारकिणां शरीरमप्ययोनिजम् । न च मानुषादिशरीराणां पार्थिवत्वे किं मानमिति वाच्यम् । गन्धादिमत्त्वस्यैव प्रमाणत्वात् । न च क्लेदोष्मादेरुपलम्भादाप्यत्वादिकमपि स्यादिति वाच्यम् । तथा सति जलत्वपृथिवीत्वादिना

"योनिजादि भवेद्देहम्" योनिज—अयोनिज—दो प्रकार का शरीर है । योनिज शरीर भी दो प्रकार का है - जरायुज—अण्डज, मनुष्य आदि का शरीर जरायुज होता है (जिस चर्मपुटक में गर्भ लिपटा रहता है उस चर्मपुटक को जरायु कहते हैं) सर्प आदि का शरीर अण्डज होता है । स्वेद से जायमान जो शरीर—एवं ऊपर को भेदन करके जायमान जो शरीर वह अयोनिज शरीर कहलाता है- जैसे कृमि (कीट) शरीर—दंश (मच्छर) शरीर-स्वेदज शरीर कहलाता है । और तरु (वृक्ष) शरीर-गुल्म (खजूर आदि) शरीर उद्भिज्ज शरीर कहलाता है । नाराकिओं का शरीर भी अयोनिज ही है । प्रश्न—मनुष्य आदि का शरीर पार्थिव है इसमें क्या प्रमाण है । उत्तर—गन्धादिमत्त्व ही प्रमाण है । प्रश्न—मनुष्य शरीर को क्लेद—एवं ऊष्मा के भी उपलंभ प्रत्यक्ष होने से जलीय-तैजस-आदिपद से वायवीय-आकाशीय ही क्यों न माना जाय । उत्तर—जलत्व-पृथिवीत्व आदि के साथ सांकर्य

नित्यत्वाभ्युपगमात् । अणुव्यवहारस्तु अपकृष्टपरिमाणनिबन्धनः, महत्त्वेऽपि महत्तरादणुव्यवहारादित्याहुः । यत्तु परमाणुद्व्यणुकयोरनभ्युपगमे त्रुटिप्रत्यक्षाय चक्षुःसंयोगस्य हेतुत्वकल्पनमावश्यकम्, अन्यथा तु चक्षुःसंयुक्तसमवेतसमवायेनैव रूपत्वप्रत्यक्षानुरोधेन क्लृप्तहेतुताकेन निर्वाहात् । एवं संयुक्तसमवायहेतुतायामपि प्रयोजनाभाव इति । तन्न । परमाण्वादिघटितसन्निकर्षात्पृथिवीत्वे प्रत्यक्षवारणाय संयुक्तांशे महत्त्वनिवेश आवश्यकः, इत्थं च त्रुटेस्तद्रूपस्य च प्रत्यक्षोपपत्तये चक्षुःसंयोग-चक्षुःसंयुक्तसमवाययोर्हेतुत्वमावश्यकमेवेत्यधिकं सन्निकर्षवादे विचारयिष्यामः ॥ ३६, ३७ ॥

शुक्रशोणितयोः परस्परसंमेलनजन्यं योनिजम् । तद्भिन्नमयोनिजम्, गर्भवेष्टनचर्मपुटकं जरायुः । कृमिदंशाद्या इति । तच्छरीरोत्पत्तेर्धर्मविशेषसहितेभ्योऽणुभ्य एव स्वीकारादिति भावः । गन्धादिमत्त्वस्यैवेति । आदिना नीलादिरूपपरिग्रहः । तथाच मानुषादिशरीरं पृथिवी गन्धवत्त्वादित्यनुमानं बोध्यम् । क्लेदः=स्वेदः । ऊष्मा=औष्ण्यम् । तेन=शरीरस्य पृथिवीत्वसाधनेन ।

संकरप्रसङ्गात् । न च तर्हि जलीयत्वादिकमेवास्तु न तु पार्थिवत्वमिति वाच्यम् । क्लेदादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानात्, गन्धाद्युपलब्धेश्च पृथिवीत्वसिद्धेः । तेन पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यम् । शरीरत्वं तु न जातिः, पृथिवीत्वादिना साङ्कर्यात्, किन्तु चेष्टाश्रयत्वम् । वृक्षादीनामपि चेष्टासत्त्वान्नाव्याप्तिः । न च वृक्षादेः शरीरत्वे किं मानमिति वाच्यम् । आध्यात्मिकवायुसम्बन्धस्य प्रमाणत्वात् । तत्रैव किंमानमिति चेद् ? भग्नक्षतसंरोहणादिना तदुन्नयनात् । यदि हस्तादौ शरीरव्यवहारो न भवति तदाऽन्त्यावयवित्वेन विशेषणीयम् । न च यत्र शरीरे चेष्टा न जाता तत्रा-

हो जावेगा । (जैसे पृथिवीत्वाभाववान् हुवा जल उसमें जलत्व है—जलत्वाभाववान् हुवा घट उसमें पृथिवीत्व है—दोनों का समावेश मनुष्य शरीर में है प्रश्न—मनुष्य शरीर को जलीय ही मान लिया जाय, पार्थिव न माना जाय (उत्तर—ऐसा नहीं क्लेदादि का विनाश होने पर भी (यह वही शरीर है) इस प्रकार शरीरत्वेन प्रत्यभिज्ञा होती है—तथा गन्ध आदि का उपलम्भ होता है अतः मनुष्य शरीर को पृथिवीत्व सिद्ध है । इस कारण से पार्थिव आदि शरीर में जलादि को निमित्तमात्र ही जानना । प्रश्न—(क्या शरीरत्व जाति है) उत्तर—(शरीर चेष्टाश्रय है) और शरीरत्व चेष्टाश्रयत्वरूप है । वृक्षादिशरीर में चेष्टा है—(अतः वे भी चेष्टाश्रय हैं) उनमें अव्याप्ति नहीं हैं । प्रश्न—वृक्षादि का शरीर होता है इसमें क्या प्रमाण है—उत्तर— आध्यात्मिकवायु (प्राणवायु) का सम्बन्ध ही प्रमाण है (प्राणवायु का नियम है कि उसका सम्बन्ध शरीर से ही होता है ।

प्रश्न—इसी में क्या प्रमाण है कि (वृक्षादिशरीर से प्राणवायु का सम्बन्ध है) । उत्तर—वृक्ष के किसी अवयव के भग्न एवं क्षत होने पर भी उस अवयव का पुनः संरोहण (संबर्धन) होता है—इससे वृक्षशरीर में आध्यात्मिकवायु के सम्बन्ध का अनुमान करते हैं । (क्योंकि उसी शरीर के अवयव का भङ्ग होने पर सम्बर्धन देखा जाता है - जिस शरीर में प्राणवायु का सम्बन्ध होता है) प्रश्न —"चेष्टाश्रयत्व" लक्षण की हस्तादि में अव्याप्ति है—क्योंकि हस्तादि भी चेष्टाश्रय हैं। उत्तर—यदि हस्तादि में शरीर व्यवहार न होता हो तो शरीर के लक्षण में अन्त्यावयवित्व विशेषण दे देना । (अर्थात् अन्त्यावयवित्वे सति चेष्टाश्रयत्वं शरीरत्वम्" यह ही लक्षण कर देना ।

इससे हस्तादि में अव्याप्ति नहीं है—क्योंकि हस्तादि में चेष्टाश्रयत्व है—परन्तु अन्त्यावयवित्व नहीं है । अन्त्यावयवित्वविशिष्ट चेष्टाश्रयत्व शरीर ही में है—क्योंकि शरीर ही अन्त्यावयवी है—हस्तादि अन्त्यावयवी नहीं ।

पृथिवीत्वादिना सांकर्यादिति । पृथिवीत्वं विहाय शरीरत्वं जलशरीरे, शरीरत्वं विहाय पृथिवीत्वं घटे उभयोः समावेशो मानुषशरीरे इत्यर्थः । चेष्टा च हिताहितप्राप्तिपरिहारार्था क्रिया, नतु क्रियामात्रं घटादावपि सत्त्वात् ।

व्याप्तिरिति वाच्यम्। तादृशे प्रमाणाभावात्। अथवा चेष्टावदन्त्यावयविवृत्ति-द्रव्यत्वव्याप्यजातिमत्त्वम्, अन्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं वा तत्। मानुषत्वचैत्रत्वादिजातिमादाय लक्षणसमन्वयः। न च नृसिंहशरीरे कथं लक्षण-समन्वयः, तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वाभावाज्जलीयतैजसशरीर-वृत्तितया देवत्वस्यापि जातित्वाभावादिति वाच्यं, कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात्। इन्द्रियमिति। घ्राणेन्द्रियं पार्थि-वमित्यर्थः। पार्थिवत्वं कथमिति चेत्? इत्थम् घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात्, कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत्। न च दृष्टान्ते

प्रश्न—जिस शरीर में चेष्टा नहीं हुवी— उसमें अव्याप्ति हो जायेगी। उत्तर—ऐसे शरीर में प्रमाण नहीं। प्रश्न—जिस शरीर में चेष्टा नहीं ऐसा मृत शरीर प्रमाण है। उत्तर—तब ऐसी स्थिति में शरीरत्व का जातिघटित लक्षण कर देना—अर्थात् चेष्टावान् जो अन्त्यावयवी उसमें वृत्ति जो द्रव्यत्व व्याप्यजाति (मानुषत्वचैत्रत्व जाति-तादृशजातिमत्त्व चैत्रीय-मृत शरीर में भी है। एवं अन्त्यावयवी मात्र में वृत्ति अथ च चेष्टावत् में वृत्ति जो जाति मानुषत्व-चैत्रत्व जाति-तादृशजातिमत्व मृत शरीर में भी है-अतः मानुषत्व चैत्रत्व जाति को लेकर शरीरमात्र में लक्षण समन्वय कर लेना। प्रश्न—नृसिंह शरीर में कैसे लक्षण समन्वय होगा। क्योंकि नृसिंहत्व एक व्यक्ति मात्रवृत्ति होने से जाति नहीं है, यदि देवत्वजाति को लेकर लक्षण समन्वय करें तो जलीय शरीरवान् जो वरुण-तैजस शरीरवान् जो सूर्य उसमें देवत्ववृत्ति होने से सांकर्य हो जाता है—अतः देवत्त्व भी जाति नहीं है। उत्तर—कल्पभेद से नृसिंहशरीर नाना हैं अतः नृसिंहत्वजाति को लेकर नृसिंह शरीर में लक्षण समन्वय हो जावेगा। इन्द्रियमिति। घ्राणेन्द्रिय पार्थिव है। प्रश्न—पार्थिव कैसे है। उत्तर—घ्राणनामक इन्द्रिय पार्थिव है यह अनुमान प्रमाण से सिद्ध होता है, कि घ्राणेन्द्रिय पार्थिव है रूप आदि के मध्य में गन्ध का ही अभिव्यंजक (प्रत्यक्षजनक) होने से, कुंकुम केसर के गन्ध का अभिव्यंजक जैसे गोघृत होता

आध्यात्मिकवायुः प्राणः। **तत्रैव** = आध्यात्मिकवायुसंबन्धे एव। **भग्नक्ष-तसंरोहणादिना,** आदिना वृद्धिपरिग्रहः। **तदुन्नयनात्** = आध्यात्मिकवायुसंब-न्धानुमानात्। अन्त्यावयवित्वं च द्रव्यत्वे सति द्रव्यानारंभकत्वम्, प्रकृते तु विशेष्यदलमेव निविष्टं न त्वधिकं गौरवात्।

अथवेति। घटत्वादिजातिव्युदासाय **चेष्टावदिति।** हस्तत्वादिव्युदा-सायाऽन्त्यावयविवृत्तीति। सत्तावारणाय **द्रव्यत्वव्याप्येति।** व्याप्यत्वं च न्यूनवृत्तित्वरूपं निवेश्यम्। पृथिवीत्वरूपतादृशजातिमति घटादावतिव्याप्तिवारणाय लक्षणान्तरमाह **अन्त्यावयविमात्रवृत्तीति।** अनेन पृथिवीत्वजातिव्युदासः। **चेष्टावद्वृत्तीत्यनेन** घटत्वादिव्युदासः। ननु शरीरत्वस्य जातित्वाभावे कां जाति-

स्वकीयरूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यं, परकीयरूपाद्यव्यञ्जकत्वस्यतदर्थत्वात् । न चैवं नवशरावगन्धव्यंजकजलेऽनैकान्तिकत्वमिति वाच्यं, तस्य सक्तुरसाभिव्यञ्जकत्वात् । यद्वा परकीयेति न देयं, वायूपनीतसुरभिभागस्य दृष्टान्तत्वसंभवात् । न च घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्रव्यञ्जकत्वात् तत्र व्यभिचार इति वाच्यं, द्रव्यत्वे सतीति विशेषणात् । विषय इति । उपभोगसाधनं विषयः । सर्वमेव हि कार्यजातमदृष्टाधीनम्, यत्कार्यं यददृष्टाधीनं तत्तदुपभोगं साक्षात्परंपरया वा जनयत्येव, न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति । तेन द्व्यणुकादि ब्रह्माण्डान्तं सर्वमेव विषयो भवति । शरीरेन्द्रिययोर्विषयित्वेऽपि प्रकारान्तरेणोपन्यासः शिष्यबुद्धिवैशद्यार्थः ॥३८॥

है। प्रश्न—दृष्टान्त में गोघृत अपने रूप का भी व्यंजक होने से "गन्धस्यैवाभिव्यंजकत्वात्" यह हेतु नहीं रहा, अतः दृष्टान्तासिद्धि ही जायेगी । उत्तर परकीयरूपाद्यव्यंजकत्व यह हेतु का अर्थ कर देना—अर्थात् परकीय रूपादि का अव्यंजक होता हुवा जो गन्ध का ही व्यंजक होता है—वह पृथिवी ही होता है सो गोघृत वैसा है ।

प्रश्न—नये मिट्टी के वर्त्तन के गन्धमात्र के अभिव्यंजक जल में यह हेतु चला गया और वहाँ साध्य (पृथिवीत्व) नहीं है—अतः व्यभिचार हो गया । उत्तर— ऐसा नहीं—उसी जल में सक्तु यदि डाल दिया जाय तो वह जल सत्तू के रस का भी अभिव्यंजक हो जाता है तो उस जल में "गन्धस्यैव अभिव्यंजकत्वात्" यह हेतु न रहने से व्यभिचार नहीं हुवा । अथवा "परकीयरूपाद्यव्यंजकत्व" यहाँ परकीय पद न देना—अथ च दृष्टान्त वायूपनीत सुरभि भाग को बना देना (कोई दोष नहीं है ।) प्रश्न - घ्राणेन्द्रियसन्निकर्ष भी गन्धमात्र का व्यंजक है अतः उसमें व्यभिचार हो जायेगा । उत्तर—द्रव्यत्वे सति यह विशेषण हेतु में दे देना-(सो घ्राणेन्द्रियसन्निकर्ष द्रव्य नहीं है—अतः व्यभिचार न हुवा) । विषय इति । उपभोग के साधन को विषय कहते हैं, सभी कार्य अदृष्ट के अधीन रहते हैं, जो कार्य जिसके अदृष्ट के अधीन रहता है वह उसके उपभोग को साक्षात्–अथवा परम्परा से उत्पन्न करता ही है । क्योंकि विना किसी बीज (कारण) के तथा प्रयोजन के किसी भी कार्य की उत्पत्ति नहीं होती है । अतः द्व्यणुक से लेकर ब्रह्माण्डपर्यन्त सभी विषय हैं । शरीर तथा इन्द्रिय भी यद्यपि विषय हैं—तथापि शिष्य बुद्धि के वैशद्य के लिये प्रकारान्तर से उपन्यास किया ॥३८॥

मादाय लक्षणं संगमनीयं ! तत्राह मानुषत्वचैत्रत्वादीति । न चोक्तजातीनां शरीरनिष्ठत्वे मानाभावः । चैत्रो जानातीति प्रतीत्याऽऽत्मनिष्ठत्वकल्पनाया एवोचितत्वात् । य एव चैत्रः कौमारेऽधितिष्ठत् स एव वार्द्धक्ये मथुरायामधिवसती"-त्यस्यानुपपत्तेश्च । एतेन चैत्रादिशब्दानां शरीरवाचित्वेपि अवच्छेदकतया ज्ञानवत्त्वस्यापि तत्र संभवान्न पूर्वप्रतीतेरनुपपत्तिरित्यपास्तमिति वाच्यम् । आत्म-

निष्ठत्वे चैत्रत्वस्य जातित्वासंभवात्। "चैत्रो रूपवानिति" प्रत्ययानुपपत्तिप्रसंगाच्च शरीरवाचित्वमेव, जानातीतिप्रतीतेस्तूक्तैव गतिः। "य एव चैत्र" इत्यादौ तु तच्छरीरोपहितात्मनि निरूढलक्षणा, इत्थं च शिवत्वविष्णुत्वादिजातयोऽपि शरीरनिष्ठा एव। एवमहमादिशब्दानामपि शरीरवाचित्वमेवेति।

इत्थम् = अनेनप्रकारेण। प्रकारमाह **घ्राणेन्द्रियमिति**। अत्र घ्राणत्वमेव पक्षतावच्छेदकमिन्द्रियत्वप्रवेशे प्रयोजनाभावात्। **पार्थिवमिति**। पृथिवीजन्यमित्यर्थः। समवायेन पृथिवीत्वं साध्यमिति तु तत्त्वम्। तेन पृथिवीजन्यत्वसिद्धावपि न पृथिवीत्वासिद्धिदोषतादवस्थ्यम्। न च पृथिवीजन्यत्वेन पृथिवीत्वानुमानम्, रूपादौ व्यभिचारात्। नवशरावगन्धव्यंजकजले मनसि च व्यभिचारवारणाय "एव"कारः, तादृशजलस्य सक्तुरसाभिव्यंजकत्वान्नोक्तदोषः। गन्धत्व-तत्समवायव्यंजके घ्राणे गन्धेतराव्यंजकत्वविशिष्टगन्धव्यंजकत्वस्य गन्धस्यैवाभिव्यंजकपदाभिधेयस्य हेतोः स्वरूपासिद्ध्यापत्त्या **रूपादिषु मध्ये** इत्यन्तम्। रसगन्धस्पर्शाः आदिपदार्थाः। तत्सहितैवकारेण च गन्धभिन्नरूपाद्यन्यतमाव्यंजकत्वे सति गन्धव्यंजकत्वादिति हेतुः फलितः। न च घ्राणस्य रूपाद्यव्यंजकत्वमसिद्धम्, घ्राणपक्षकरूपविधेयकानुमितिकारणीभूतरूपवदवयवारब्धज्ञानविषयीभूतस्य रूपवदवयवारब्धस्य तादात्म्येन हेतुविधया "घ्राणस्य" रूपव्यंजकत्वादिति वाच्यम्। तादृशरूपाद्यन्यतमविषयकलौकिकसाक्षात्काराऽजनकत्वस्य विवक्षितत्वात्। न चैवमपि पक्षस्यापि कालोपाधितया तादृशोपाधिरूपकालस्य कार्यत्वेन रूपेण रूपादिविषयकलौकिकप्रत्यक्षस्य जनकत्वादसिद्ध एव हेतुः, रूपादिग्रहत्वावच्छिन्नकार्यतानिरूपितकारणत्वाभावस्य विवक्षणे तु चक्षुरादावपि तादृशकारणत्वाभावेन रूपादिग्रहत्वावच्छिन्नकार्यतानिरूपितकारणतारूपप्रतियोग्यप्रसिद्धेः, द्रव्यसमवेतचाक्षुषत्वस्यैव तज्जन्यतावच्छेदकत्वात्। प्रत्यक्षे सामान्यतो विषयत्वेन, तत्तद्व्यक्तिप्रत्यक्षे तत्तद्व्यक्तित्वेन वा हेतुत्वान्न रूपादावपि तादृशप्रतियोगिप्रसिद्धिसंभवः, रूपादिग्रहत्वावच्छिन्नकार्यतानिरूपितकारणत्वाभाववति जन्यज्ञानत्वावच्छिन्नकार्यतानिरूपितकारणताशालिनि गन्धाभिव्यञ्जकत्वशाल्यात्मनि व्यभिचाराच्च। न च गन्धाभिव्यंजकत्वमपि गन्धलौकिकघ्राणजत्वावच्छिन्नकार्यतानिरूपितकारणताशालित्वरूपमात्मव्यावृत्तमेव वक्तव्यमिति वाच्यम्, ईदृशगन्धाभिव्यंजकत्वस्य घ्राणमात्रवृत्तितया सत्यन्तवैयर्थ्यात्, दृष्टान्ताऽसिद्धिप्रसंगाच्चेति वाच्यम्। रूपाद्यन्यतमाऽव्यंजकत्वे **सतीत्यस्य** कार्यत्वातिरिक्तधर्मावच्छिन्नरूपादिग्रहनिष्ठकार्यतानिरूपितकारणत्वाभावरूपस्य विवक्षितत्वात्। चक्षुरादेस्तु कार्यत्वातिरिक्तद्रव्यसमवेतचाक्षुषत्वावच्छिन्नरूपादिग्रहनिष्ठकार्यतानिरूपितकारणताशालित्वात्, आत्मादेरपि कार्यत्वातिरिक्तजन्यज्ञानत्वावच्छिन्नरूपादिग्रहनिष्ठकार्यतानिरूपितकारणताशालित्वान्नातिप्रसंगः। जलादावपि तादृशकारणत्वाभावस्य सत्त्वाद् व्यभिचारवारणाय गन्धव्यंजकत्वनिवेशः। तथाच कार्यत्वातिरिक्तधर्मावच्छिन्नगन्धभिन्न-

रूपाद्यन्यतमविषयकलौकिकसाक्षात्कारनिष्ठकार्यतानिरूपितकारणतानवच्छेदकत्वे सति कार्यत्वातिरिक्तधर्मावच्छिन्नगन्धग्रहवृत्तिकार्यतानिरूपितकारणतावच्छेदको यो धर्मस्तद्वत्त्वादिति हेतुः फलितः । तेन यादृशजलेन सक्तुरसो नाभिव्यंजितस्तत्रापि न व्यभिचार इति संक्षेपः ।

घृतेपि कुंकुमगन्धाभिव्यंजकत्ववत् स्वीयरूपादिव्यंजकत्वस्य सत्त्वादसिद्धो दृष्टान्त इति शंकते **नचेति** । **तस्य** = नवशरावगन्धाभिव्यंजकजलस्य । लाघवादाह **यद्वेति** । उपनीताः समानीताः ये सुरभिभागा इत्यर्थः । सुरभित्वोक्तिस्तु सौरभादेर्भानं नाश्रयं विनेति तत्कल्पना साधीयसीति प्रदर्शनाय । **घ्राणेन्द्रियसन्निकर्षस्य** = घ्राणसंयुक्तसमवायस्य । **तत्र** = घ्राणेन्द्रियसन्निकर्षे, घ्राणसंयुक्तसमवाये इति यावत् । परे तु उक्तानुमानस्याऽप्रयोजकत्वान्न पृथिवीत्वसाधकत्वम् । नापि जलत्ववत्त्वम्, सांसिद्धिकद्रवत्ववत्त्वाभावात् । नापि तेजः, उष्णस्पर्शाभावात् । नापि वायुः, सदातनगतिमत्त्वाभावात् । नाप्याकाशादिचतुष्टयं, विभुत्वाभावात् । नापि मनः, अनित्यत्वात् । गुणाश्रयत्वाच्च न गुणादिष्वपि । न च गुणाश्रयत्वमेवाऽसिद्धम् । तस्यासिद्धत्वे संयोगाभावेन संयुक्तसमवायलक्षणसन्निकर्षाऽसंभवाद्गन्धप्रत्यक्षानुपपत्तिप्रसंगात्, अतश्चाऽनायत्या पृथिव्यामेवान्तर्भाव इति प्राहुः । अनुमानाऽप्रयोजकत्वस्यावेदितत्वेन क्लृप्तपदार्थानन्तर्भावे चाऽतिरिक्तपदार्थकल्पनाया एवोचितत्वात् । अतिरिक्तपदार्थकल्पनैव गरीयसीति चेद्, भ्रान्तोसि-नहि अतिरिक्तपदार्थकल्पनायां गौरवसंभावनाऽप्यवतिष्ठते, प्रत्युत द्रव्यत्वजलत्वादिसंबन्धाकल्पनेन लाघवम्, नित्यत्वोक्तिस्तु असंप्रतिपन्ना । न च तस्य नित्यत्वे व्यपेतघ्राणस्यापि गन्धोपलंभापत्तिः । श्रोत्रशब्दस्याऽदृष्टविशेषोपगृहीतकर्णशष्कुल्यवच्छिन्ननभोवाचित्वमिव घ्राणशब्दस्यापि अदृष्टविशेषोपगृहीततादृशपदार्थवाचित्वाभ्युपगमेनोक्तस्थलेऽदृष्टविशेषाभावनिबन्धनगन्धानुपलंभसंभवादिति तु विभावनीयम् । विषयत्वं न जातिः-सामान्यादौ सत्त्वादित्यतस्तल्लक्षणमाह **उपभोगसाधनमिति** ।

सुखदुःखान्यतरसाक्षात्कार उपभोगः । तत्साधनं च साक्षात् परम्परया च, तेन द्व्यणुकादेर्नासंग्रहः । यद्यपि परम्परयोपभोगसाधनत्वं परमाणावपि तथाप्यनित्यपृथिव्या एव विभागात्कार्यरूपपृथिवी एव विषयत्वेन दर्शिता । **कार्यजातं**= कार्यसमूहः । जातपदं संपातादायातम्, सर्वमित्यनेनैवाऽशेषत्वलाभादिति भावः । **अदृष्टाधीनं** = अदृष्टजन्यं, तथाच कार्यं प्रति स्वसमवायिसंयुक्तसंयोगेनाऽदृष्टं कारणम्, तेन विभुद्वयसंयोगानङ्गीकारेपि आत्मसंयुक्तपवनसंयोगसंबन्धस्य गगनेपि सत्त्वेन शब्देऽदृष्टजन्यत्वोपपत्तिः । **यददृष्टाधीनं** = यत्पुरुषीयादृष्टाधीनम् । **तत्**= कार्यं । **तदुपभोगं** = तत्पुरुषस्य सुखदुःखान्यतरसाक्षात्कारम् । **बीजप्रयोजनाभ्यां**= कारणफलाभ्याम् । **उत्पत्तिरिति** । उत्पत्तिश्च स्वाधिकरणसमयध्वंसानधिकरणसमयसंबन्धरूपा । स्वपदमुत्पत्त्याश्रयत्वेनाभिमतघटादिपरम् । घटाद्युत्पत्तिलक्षणस्यापि

वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ ।
स्नेहस्तत्र, द्रवत्वं तु सांसिद्धिकमुदाहृतम् ॥३९॥

जलं निरूपयति—वर्णः शुक्ल इति । स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिः सिद्धयति । यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं, तथापि जन्यस्नेहत्वं तथा बोध्यम् । अथ परमाणौ जलत्वं न स्यात्तत्र जन्यस्नेहाभावात्, तस्य च नित्यस्य स्वरूपयो-

जल का निरूपण करते हैं—जल में अभास्वर शुक्लरूप है—मधुर-रस है—तथा शीतस्पर्श है—और स्नेह तथा सांसिद्धिकद्रवत्व भी जल में रहता है। स्नेह का समवायिकारण हुवा जल-समवायिकारणतावच्छेदकतया जलत्वजाति की सिद्धि हुई। यद्यपि स्नेहत्व नित्यस्नेह-तथा अनित्यस्नेह में रहने के नाते कार्यतावच्छेदक नहीं हो सकता है—तथापि जन्यस्नेहत्व को कार्यतावच्छेदक बना देना। प्रश्न—जन्यस्नेहत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया-सिद्ध जो जलत्वजाति वह परमाणु में न रहेगी—क्योंकि परमाणु में जन्यस्नेह नहीं है। यदि स्वरूपयोग्यत्वरूपा कारणता मानें तो वह भी नहीं मान सकते—क्योंकि नित्य में योग्यत्वरूपा

विषयितासंबन्धेन घटाद्यधिकरणीभूतं यत्पूर्वोत्पन्नज्ञानादिकं तद्ध्वंसाधिकरणत्वादुत्पत्तिमात्रेऽसंभवः स्यादतः कालिकसंबन्धेन स्वाधिकरणत्वलाभार्थमाद्यं समयपदम् । एवं भाविघटगोचरज्ञानस्य स्वाधिकरणसमयध्वंसानधिकरणस्य विषयतासंबन्धेऽतिप्रसंगवारणाय द्वितीयं (समय) पदम्-कालिकसंबन्धलाभाय, तथाच स्वाधिकरणसमयध्वंसाधिकरणत्वसंबन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवदनुयोगिकत्व-स्वप्रतियोगिकत्वोभयसंबन्धेन स्वविशिष्टकालिकत्वं स्वोत्पत्तित्वम् । एतच्च महाप्रलयाङ्गीकारमते चरमपदार्थध्वंसोत्पत्तावव्याप्तम्, तत्र तादृशध्वंसाधिकरणं महाकालः ध्वंसात्मकखण्डकालो वा, उभयोरपि ध्वंसाऽप्रसिद्धेः । अतो यदीययत्समयसंबन्धसामान्ये यत्समयवृत्तिध्वंसप्रतियोगित्वाभावः तस्य तत्समयसंबन्धः सा इति । यो यत्कालवृत्तिध्वंसप्रतियोग्यवृत्तिस्तस्य तद्वृत्तित्वमुत्पत्तिरित्यपरे । विस्तरस्तु ग्रन्थान्तरादवसेयः । तेन=द्व्यणुकादीनामुपभोगसाधनत्वेन । विषयत्वेपि=उपभोगसाधनत्वेपि । प्रकारान्तरेण = शरीरेन्द्रियत्वादिना । वैशद्यायेति । शरीरत्वेन्द्रियत्वेन ज्ञानसंपत्तये इत्यर्थः । तथाच शरीरेन्द्रियभिन्नत्वे सति उपभोगसाधनत्वं विषयस्य लक्षणम् ॥३८॥

लक्षणं कर्तुं लक्ष्यतावच्छेदकजलत्वजातौ मानमाह स्नेहसमवायिकारणतावच्छेदकतयेति । समवायसंबन्धावच्छिन्नस्नेहत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतयेत्यर्थः । तथा च समवायसंबन्धावच्छिन्नस्नेहत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणता किंचिद्धर्मावच्छिन्ना कारणतात्वात् इत्यनुमानेन जलत्वजातिः सिद्धयतीति भावः । जलत्वं जातिः नित्यत्वे सति

ग्यत्वे फलावश्यंभावनियमादिति चेत्। न, जन्यस्नेहजनकतावच्छेदकतया जन्यजलत्वजातेः सिद्धौ, तदवच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धेः। शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं-वर्णः शुक्ल इति, न तु शुक्लरूपवत्त्वं लक्षणम्। अथवा नैमित्तिकद्रवत्ववदवृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्, अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्या-

कारणता यदि मानें तो कभी फल अवश्य ही होना चाहिये। उत्तर—सो ठीक नहीं—जन्यस्नेहत्वावच्छिन्नजन्यतानिरूपित जनकतावच्छेदकतया जन्यजलत्वजाति की सिद्धि करके—फिर जन्यजलत्वावच्छिन्न जन्यतानिरूपितजनकतावच्छेदकतया जलत्वजाति की सिद्धि कर लेना—वह जलत्वजाति परमाणुजल में भी है।

जल में शुक्लरूप भी रहता है यह दिखलाने के लिये "वर्णः शुक्लः" कहा अर्थात् जल का वर्ण (रूप) शुक्ल होता है यही तात्पर्य है शुक्लरूपवत्त्वलक्षण नहीं। यदि वह लक्षण ही मानना अभीष्ट हो तो "नैमित्तिक द्रवत्व के अधिकरण में न रहने वाली-और रूप के अधिकरण में रहने वाली जो द्रव्यत्व साक्षात् व्याप्यजाति तादृशजातिमत्त्व यह शुक्लरूपवत्व का अर्थ कर देना -(इससे पृथिवी-तथा तेज में अतिव्याप्ति नहीं हुवी—क्योंकि पृथिवीत्व तथा तेजस्त्व जाति नैमित्तिक द्रवत्ववान् जो घृतरूपा पृथिवी तथा सुवर्णादिरूप तेज उसमें वृत्ति ही है) अथवा अभास्वरशुक्ल से इतर जो रूप उसके अधिकरण में न रहनेवाली तथा रूप के अधिकरण में रहनेवाली जो द्रव्यत्व साक्षात् व्याप्यजाति तादृशजातिमत्व यही शुक्लरूपवत्व का अर्थ कर देना—इससे स्फटिक में अतिव्याप्ति नहीं है।

अनेकसमवेतत्वात् व्यक्त्यभेदादिरूपबाधकविरहाच्चेति जलत्वे जातित्वमपि सिद्ध्यति। स्नेहत्वस्य कार्यतावच्छेदकत्वं न संभवतीत्याशंकते **यद्यपीति**। **नित्यानित्यवृत्तितया**=परमाणुस्नेहे द्व्यणुकादिस्नेहे च वृत्तितया। **न कार्यतावच्छेदकमिति**। कार्यतातिरिक्तवृत्तित्वादिति भावः। कारणं विना कार्यतावच्छेदकावच्छिन्नसत्त्वरूपव्यभिचारस्तथासति स्यादिति ध्येयम्। कारणस्य कार्यतावच्छेदकावच्छिन्नोत्पत्तेरेव व्यभिचारित्वान्नित्यवृत्तेस्तत्त्वेपि न क्षतिः, तथाच जलत्वजातिरेकैवेति नव्याः। ननु नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वे बाधकाभाव इति चेन्न। कारणत्वं यदि अनन्यथासिद्धत्वे सति कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वं तदा एकघटलक्षणकार्याव्यवहितपूर्वक्षणावच्छेदेनापरघटलक्षणकार्याधिकरणे दण्डाभावस्य सत्त्वेन दण्डत्वादेः प्रतियोगितावच्छेदकत्वाद्दण्डघटयोः कार्यकारणभावानुपपत्तिप्रसंगः। अतः कार्यतावच्छेदकावच्छिन्नयावद्व्यक्तीस्तत्तद्व्यक्तित्वेन प्रवेश्य तत्तद्व्यक्त्यव्यवहितपूर्वक्षणावच्छेदेन तत्तद्व्यक्त्यधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपमेव कारणत्वं निर्वाच्यम्, इत्थं च नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वे नित्यव्यक्तेरपि कार्यतावच्छेदकावच्छि-

प्यजातिमत्त्वं वा तदर्थः। तेन स्फटिकादौ नातिव्याप्तिः। रसस्पर्शाविति। जलस्य मधुर एव रसः, शीत एव स्पर्शः। तिक्तरसवदवृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तदर्थः। तेन शर्करादौ नातिव्याप्तिः। शीतेतरस्पर्शवदवृत्तिस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तदर्थः। ननु शुक्लरूपवत्त्वमेवेति कुतः, कालिन्दीजलादौ नीलिमोपलब्धेरिति चेत्, न, नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावाज्जले नीलरूपासंभवात्। कालिन्दीजले नीलत्वप्रतीतिस्त्वाश्रयौपाधिकी। अत एव वियति विक्षेपे धवलिमोपलब्धिः। अथ जले माधुर्ये किं मानम्, नहि प्रत्यक्षेण कोऽपि रसस्तत्रानुभूयते। न च नारिके-

जल रस मधुर ही होता है—और स्पर्श शीतल ही होता है। प्रश्न—मधुररसवत्व इसकी शर्करा में अतिव्याप्ति है। उत्तर—मधुररसवत्व का "तिक्तरसवत् में अवृत्ति मधुररसवत् में वृत्ति जो द्रव्यत्वसाक्षात् व्याप्यजाति तादृशजातिमत्त्व' यह अर्थ कर देना। एवं शीतलस्पर्शवत्व का भी "शीतेतरस्पर्शवत् में अवृत्ति स्पर्शवत् में वृत्ति जो द्रव्यत्व साक्षात् व्याप्यजाति तादृशजातिमत्व" यह अर्थ कर देना। प्रश्न—जल में शुक्ल ही रूप क्यों है—यमुना नदी आदि के जल में नीलिमा की प्रतीति होती है। उत्तर—ऐसा नहीं—नीलरूप का समवायिकारणतावच्छेदक जो पृथिवीत्वजाति वह जल में नहीं है—अतः नीलरूप भी जल में नहीं है। और यमुना के जल में नीलिमा की जो प्रतीति होती है वह आश्रयोपाधिक है—(अर्थात् उस जल का आश्रय जो पृथिवी बहनीली है अतः उस पृथिवी की नीलिमा ही उस जल में भास रही है)। इसीलिये यमुना के जल को आकाश में (ऊपर को) उछालने से उस जल की धवलिमा की उपलब्धि (प्रत्यक्ष) स्पष्टरूप से हो जाती है। प्रश्न—जल के माधुर्य में क्या प्रमाण है। क्योंकि प्रत्यक्षप्रमाण से जल में किसी भी रस का अनुभव नहीं होता है। यदि कहें कि नारियल आदि के जल में माधुर्य मालूम पड़ता है तो वह आश्रयोपाधिक है (अर्थात् आश्रय के कारण उसमें मधुरता प्रतीत होती है) अन्यथा नीबू आदि के

न्नान्तःपातितया तदव्यवहितपूर्वकालाप्रसिद्ध्या कारणत्वानुपपत्तिलक्षणबाधकसंभवादिति। परे तु कार्यतावच्छेदककारणतावच्छेदकभेदेन कार्यकारणभावभेदाद्यत्र नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वं, तत्र यासामव्यवहितपूर्वकालः प्रसिद्धः तासामेव व्यक्तीनां प्रवेशनीयतया नानुपपत्तिलेशोपीत्याहुः। एतच्च व्यामोहमात्रम्, तथाहि-स्वेच्छया व्यक्तिनिवेशे धूमपरामर्शस्य कार्यतावच्छेदककोटौ कृतं धूमलिङ्गकत्वप्रवेशनायासेन। तत्रापि यादृशव्यक्तीरादाय धूमपरामर्शेऽनवच्छेदकधर्मवत्त्वं संभाव्यते तासामेव व्यक्तीनां प्रवेशो वाच्य इत्यलं वाग्जालेन। **जन्यस्नेहत्वं =** जन्यस्नेहवृत्तिजातिविशेषः। तथाच तदवच्छिन्नाऽसमवायिकारणतावच्छेदकतया स्नेहत्वजातिरिति भावः। अत्र च कालिकसमवाययोः कार्यतावच्छेदकतावच्छेदकसंबन्धत्वमगीकृत्य स्नेहत्वस्यैव कार्यतावच्छेदकत्वमंगीकरणीयम्। एतेन जन्यत्वस्य

ध्वंसप्रतियोगित्वरूपत्वे प्रागभावप्रतियोगित्वेन विनिगमनाविरहः, तदनभ्युपगमे तु कालिकेन पटादिमत्त्वमादायापीति कार्यकारणभावानन्त्यकल्पनमापद्यते इति प्रतारणमपास्तम्। **तथा**=कार्यतावच्छेदकम्। जन्यस्नेहजनकतावच्छेदकतया सिद्धायाः जलत्वजातेः परमाण्वादिवृत्तित्वे साधकाभावं मन्वान आशङ्कते **अथेति**। **परमाणौ** = जलपरमाणौ। **तत्र** = जलपरमाणौ। जन्यस्नेहाभावात् = जन्यस्नेह-समवायिकारणत्वाभावात्। परमाणौ तत्स्वरूपयोग्यतया जलत्वमस्तु अत आह **तस्य चेति**। जलपरमाणोश्चेत्यर्थः। ननु जन्यस्नेहसमवायिकारणतावच्छेदकतया सिद्धाया अपि जलत्वजातेः परमाणुवृत्तितायां बाधकाभावेनाऽदोषात्तत्राह नित्यस्येति। इदं च कदाचिदपि सामग्रीसमवधानं भविष्यत्येवेति लाभाय। **स्वरूपयोग्यत्वे** = कारणतावच्छेदकधर्मवत्त्वे। इदमत्र तत्त्वम्—बाधकाभावेपि साधकाभावेन तत्र तादृशजातेर्वृत्तित्वे मानाभाव इत्येव वाच्यम्, न तु तत्स्वीकारे बाधकमस्ति-अनुकूलतर्काभावेन नियमस्याप्रयोजकतया बाधकत्वाऽसंभवात्। न च नियमाप्रयोजकत्वेपि आपादकस्य हेतोः सत्त्वे कार्योत्पादवारणं दुर्वारम् जन्यस्नेहत्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसंबन्धेनाऽवयवस्नेहत्वेन हेतुत्वात्तत्रापादनाऽसंभवात्, नहि एककारणसत्त्वदशायामपरकारणविरहदशायामापत्तिरस्तीति कृतं तदभ्युपगमेन। **जन्यजलत्वजातेः** = जन्यजलमात्रवृत्तिजातेः। **तदवच्छिन्नेति**। जन्यजलत्वावच्छिन्नेत्यर्थः। नन्वेवमपि जन्यस्नेह-समवायिकारणतावच्छेदकतया सिद्धाया जन्यजलत्वजातेर्यथा न परमाणुवृत्तित्वं तथा जन्यजलत्वावच्छिन्नसमवायिकारणतावच्छेदकतया सिद्धाया अपि जलत्व-जातेर्नान्त्यावयविजलवृत्तित्वं साधकाभावात्, तथाच नित्यानित्यसाधारणजलत्वजातौ मानाभाव इति चेन्न। जन्यजलत्वावच्छिन्नजनकतावच्छेदकतया सिद्धजलत्व-स्यान्त्यावयविजलवृत्तित्वानभ्युपगमे स्नेहजनकतावच्छेदकतया सिद्धजात्या सांकर्य-वारणाय तत्रापि तद्वृत्तित्वमुपगन्तव्यमिति सिद्धं सर्वजलसाधारणं जलत्वमिति। वस्तुतो जलत्वस्याऽन्त्यावयवित्वं नाभ्युपगम्यते जलमात्रे जलान्तरसंयोगेन बृहज्जल-जननादिति ध्येयम्। "वर्णः शुक्ल" इत्यस्य लक्षणत्वाऽसंभवेन वैयर्थ्यमाशंक्याह **शुक्लरूपमेवेति**। शुक्ल इति सावधारणम्। जले शुक्लरूपं नान्यरूपमिति बोधः। इत्थं च जलत्वे शुक्लेतररूपासामानाधिकरण्यं शुक्लरूपसामानाधिकरण्यं च लब्धं, तत्रैवाऽग्रशुक्लेऽभास्वरत्वविशेषणं प्रक्षिप्याऽन्त्यशुक्लरूपे शुक्लत्वं विहाय चान्त्य-लक्षणमिति सूचयितुमुक्त**मुक्त**मिति।

नत्विति। स्फटिकादिरूपक्षितौ तेजसि चातिव्याप्तेः। **अथवेति**। अवृत्त्यन्तं वृत्त्यन्तं व्याप्यान्तं च जातिविशेषणम्। पृथिवीत्वतेजस्त्ववारणायाऽवृत्त्यन्तम्। जलत्वसंग्रहाय **नैमित्तिकेति**। वायुत्वादिवारणाय वृत्त्यन्तम्। घटत्वादिवारणाय द्रव्यत्वसाक्षाद्व्याप्येति। तद्दोषतादवस्थ्यवारणाय **साक्षादिति**। द्रव्यत्वसाक्षाद्व्याप्यत्वं च द्रव्यत्वव्याप्यत्वे सति द्रव्यत्वव्याप्याव्याप्यत्वम्।

व्याप्यत्वं च सर्वत्र न्यूनवृत्तित्वरूपम्। एवमत्र सत्यन्तनिवेशे प्रयोजनाभावः, रूपत्वादीनां रूपत्वद्वृत्तित्वनिवेशेनैव वारणादिति ध्येयम्। जलवायुगतद्वित्ववारणाय जातीति। मूर्तत्वजातेरनभ्युपगमाच्च। जातिमत्ता च समवायेन, तेनान्यसंबन्धमादाय नातिप्रसंगः। तादृशजातिश्च जलत्वमेवेति लक्षणसमन्वयः। मूलाक्षरानुसारेण लक्षणमाह **अभास्वरेति**। अभास्वरशुक्लेतररूपाणि भास्वरशुक्लनीलपीतादीनि, तदसमानाधिकरणा इत्यर्थः। असमानाधिकरणान्तं वृत्त्यन्तं व्याप्यान्तं च जातिविशेषणम्। पृथिवीत्वतेजस्त्ववारणायाऽसमानाधिकरणान्तम्। असंभववारणाय रूपेति। अभास्वरशुक्लेतरेत्यपि असंभववारणाय। तेजस्त्ववारणायाऽभास्वरेति शुक्लविशेषणम्। शुक्लपदं स्पष्टार्थम्। वायुत्वादिवारणाय वृत्त्यन्तम्। शंखत्वस्फटिकत्ववारणाय द्रव्यत्वसाक्षाद्व्याप्येति। तद्दोषवारणायैव साक्षादिति। अभास्वरशुक्लेतररूपानधिकरणवृत्तित्वेपि सत्ताद्रव्यत्वयोरादायाऽतिप्रसंगभंगाय द्रव्यत्वसाक्षाद्व्याप्यत्वोपादानम्। साक्षात्पदं तूक्तदोषवारणायैवेति तु न सम्यक्। तदधिकरणावृत्तित्ववाचिनोऽसमानाधिकरणपदस्योक्ताऽनधिकरणवृत्तित्वावाचकत्वात्। भेदघटितसाक्षाद्व्याप्यत्वनिवेशे गौरवाच्चेति ध्येयम्। **तदर्थः**=वर्णः शुक्लो जले इत्यस्यार्थः। **तेन** = लक्षणद्वयकरणेन। **मधुर एवेति**। अत्रविशेषणसंगतैवकारस्य अयोगव्यवच्छेदोऽर्थः। जलीयरसत्वावच्छिन्ने मधुरत्वजात्ययोगव्यवच्छेदप्रत्यायकत्वं प्रकृते, व्यवच्छेदोऽभावः, इत्थं च रसे मधुरत्वजात्ययोगव्यवच्छेदे बाध्यमाने फलतो मधुरत्वयोगबोधे तात्पर्यं पर्यवसितम्। अतश्च मधुरत्वयोगशालिरसवत्त्वं लक्षणम्, न तु रसे जलीयत्वमपि आत्माश्रयापत्तेः। तच्च शर्करादावतिव्याप्तमत आह **तिक्तरसवदवृत्तीति**। अत्र तिक्तमधुरपदे लाघवेन तत्तज्जात्यवच्छिन्नवाचकेपि निरूढलक्षणया तद्वत्परे। अत्राऽवृत्त्यन्तं वृत्त्यन्तं व्याप्यान्तं च जातिविशेषणम्। पृथिवीत्ववारणायाऽऽद्यं विशेषणम्। तिक्तपदं मधुरान्यरसमात्रोपलक्षकम्। तेजस्त्वादिवारणाय **मधुरवद्वृत्तीति**। अत्र मधुरत्वजात्यैव मधुररसनिवेशः, मधुररसत्वेन तु मधुरत्वरसत्वयोरन्यतरवैयर्थ्यात्। रसवद्वृत्तित्वेन संभवति तेजस्त्वादिवारणे मधुरपदं रसान्तराभावप्रतिपत्त्यौपयिकमिति मान्याः। शर्करात्वादिव्युदासाय **साक्षाद्व्याप्येति**। जलशर्करोभयत्वव्युदासाय जातीति। **शीतेतरेति**। पाठोयं क्वाचित्कः। शीतस्पर्शवत्वमात्रस्य लक्षणत्वे दोषाभावात्। **कालिन्दी**=यमुना। नीलोपलब्धेरित्युक्तौ नीलरूपवद्भ्रमो माभूदित्यत आह **नीलिमोपलब्धेरिति**। **नीलजनकतावच्छेदिकाया** इति। कार्यकारणभावस्तु गन्धकार्यकारणभाववदूहनीयः। ननु तत्रापि नीलिमोपलब्ध्या विजातीयनीलत्वेन पृथिवीत्वेन, विजातीयनीलत्वेन विजातीयजलत्वेन कार्यकारणभावकल्पनान्न दोष इत्यत आह **कालिन्दीजले** इति। **नीलत्वप्रतीतिस्त्विति**। तथाच स्वाश्रयसंयुक्तत्वसंबन्धेन प्रमा, समवायेन तु भ्रमरूपेति भावः।

लजलादौ माधुर्यमुपलभ्यत एवेति वाच्यं, तस्याश्रयौपाधिकत्वात्। अन्यथा जम्बीररसादावम्लाद्युपलब्धेरम्लादिमत्त्वमपि स्यादिति चेत्? न, हरीतक्यादिभक्षणस्य जलरसव्यञ्जकत्वात्। न च हरीतक्यामेव जलोष्मसंयोगाद् रसान्तरोत्पत्तिरिति वाच्यं, कल्पनागौरवात्। पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जले नाम्लादिकम्। जम्बीररसादौ त्वाश्रयौपाधिकी तथा प्रतीतिः। एवं जन्यशीतस्पर्शजनकतावच्छेदकं जन्यजलत्वंतदवच्छिन्नजन-

रस में खट्टापन मालूम होता है अतः जल में खट्टा रस है यह भी कहा जा सकता है। उत्तर—हरीतकी (हर्रे) भक्षण जल के मधुर रस का व्यञ्जक है—प्रश्न—हर्रे में ही जल तथा गर्मी के संयोग से दूसरा रस उत्पन्न हो जाता है। उत्तर—यह तो कल्पनागौरवमात्र है। दूसरी बात यह है कि आम्ल आदि रस का जनकतावच्छेदक जो पृथिवीत्व वह जल में नहीं है अतः जल में आम्ल आदि रस भी नहीं है। और जम्बीर रस आदि में तो आश्रय के कारण वैसी प्रतीति होती है। इसी प्रकार जन्यशीतस्पर्शजनकतावच्छेदकतया जन्यजलत्व

भ्रमत्वप्रयोजकबाधमाह **अत एवेति**। आश्रयसंबन्धाभावादेवेत्यर्थः। न च धवलिमधिय एव भ्रमत्वं, विनिगमकाभावादिति वाच्यम्। आश्रयान्वयव्यतिरेकस्यैव विनिगमकत्वात्। कालिन्दीजलादौ नीलरूपसत्त्वे पुनरवश्यं तत्प्रत्यक्षं वियति विक्षेपेपि जलस्य भवेदिति। **प्रत्यक्षेण** = इन्द्रियेण, **तत्र**=जले। **तस्य**= नारिकेलजलादौ मधुररसस्य। **अन्यथा** = आश्रयानुपाधित्वे। **स्यादिति**। युक्तेस्तौल्यादितिशेषः। **हरीतक्यादीति**। आदिनाऽऽमलकीपरिग्रहः। **व्यंजकत्वादिति**। तथाच हरीतकीभक्षणोत्तरं प्रत्यक्षेण माधुर्योपलंभादिति भावः। **कल्पनागौरवादिति**। हरीतक्यां रसोत्पत्तिपूर्वरसनाशौ तत्रापि च कार्यकारणभावकल्पनेति गौरवम्। मम तु सिद्धरसव्यंजकत्वकल्पनैव हरीतक्यामिति लाघवमिति भावः। नन्वस्तु जले मधुरो रसः तथापि जंबीरजलादौ प्रत्यक्षसिद्धस्याम्लरसस्यापि स्वीकारे बाधकाभाव इत्यत आह **पृथिवीत्वस्येति**। अम्लजनकतावच्छेदकीभूतपृथिवीत्वस्य जलेऽभावान्नाम्लवत्त्वं जलस्येति भावः। नचैवं शर्करादौ मधुरजनकतावच्छेदकत्वेनापि पृथिवीत्वस्य क्लृप्ततया तदभावाज्जले मधुररसस्याऽभावप्रसंगादिति वाच्यम्। हरीतक्यादिभक्षणोत्तरं जलेपि मधुररसोपलब्धेस्तत्र मधुररसस्वीकारस्यावश्यकत्वाज्जलत्वेनापि मधुररसं प्रति हेतुत्वकल्पनात्। ननु जंबीरजलादावम्लप्रत्यक्षाज्जलत्वेनाऽम्लादिरसेपि हेतुत्वं स्यादत आह **जंबीररसादाविति**। जंबीरादाविति। शंखादिरूपपृथिव्यास्तेजसश्च संग्रहः। स्वसमवायिसंयोगेन जंबीरगताम्लरसप्रतीतिस्तद्गतजले इत्यर्थः। शुष्केपि जंबीरेऽम्लप्रतीतेस्तत्राम्लरसस्यावश्यकत्वे तस्यैव तद्गतजले परंपरया प्रतीतिः

कतावच्छेदकं तु जलत्वं बोध्यम् । घृष्टचन्दनादौ तु शैत्योपलब्धिश्चन्दनान्तर्वर्तिशीततरसलिलस्यैव । तेजःसंयोगाज्जले उष्णप्रतीतिरौपाधिकी स्फुटैव, तत्र पाकासंभवात् । स्नेहस्तत्रेति । घृतादावपि तदन्तर्वर्तिजलस्यैव स्नेहः, जलस्य स्नेहसमवायिकारणत्वात् । तेन जल एव स्नेह इति मन्तव्यम् । द्रवत्वमिति । सांसिद्धिकद्रवत्वत्वं जातिविशेषः प्रत्यक्षसिद्धः, तदवच्छिन्न-जनकतावच्छेदकमपि तदेवेति भावः । तैलादावपि जलस्य द्रवत्वं, स्नेहप्रकर्षेण च दहनानुकूल्यमिति वक्ष्यति ॥३६॥

जाति की सिद्धि—और जन्यजलत्वावच्छिन्नजनकतावच्छेदकतया जलत्वजाति की सिद्धि जानना चाहिये। घिसे हुवे चन्दन आदि में जो शैत्य का प्रत्यक्ष होता है वह उस चन्दन के अन्दर रहनेवाले अत्यन्तशीत जल के कारण ही होता है। जल में उष्णत्व की प्रतीति जो होती है वह तेजः संयोग से होती है। अतः वह उष्णत्व प्रतीति तेजः संयोगरूप उपाधिकृत है। जल में पाक नहीं होता है। घृत आदि पृथिवी में भी उसके अन्तःप्रविष्ट जल का ही स्नेह है—क्योंकि स्नेह का समवायिकारण जल है—अतः जल में ही स्नेह है ऐसा मानना चाहिये। सांसिद्धिकद्रवत्वत्व जातिविशेष है अथ च वह प्रत्यक्षप्रमाण सिद्ध है। और सांसिद्धिक-द्रवत्वत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदक भी जलत्व ही है। तैल इत्यादि में भी जल का ही द्रवत्व है—स्नेह की अधिकता के कारण तेल में जलने की अनुकूलता हो जाती है (अर्थात् तेल में स्नेहाधिक्य होने के कारण जलने-जलाने—दोनों की शक्ति है) यह अगाड़ी कहेंगे ॥ ३६ ॥

हरीतक्यान्तु मधुररसाभावान्न हरीतकीगतमाधुर्यस्य जले प्रतीतिरिति भावः। जलत्वजातावनुमानान्तरं प्रमाणमाह **एवमिति** । जन्यजलत्वेन हेतुतायां व्यभिचारमाशंक्य निराचष्टे **घृष्टे इति** । जलान्वयव्यतिरेकौ दर्शयितुं घृष्ट इत्यभिहितम् । **तत्र**= जले । **पाकासंभवादिति** । ननु असम्भवः कुतः ! विजातीय-तेजःसंयोगरूपस्य पाकस्य पृथिव्यामिवाऽत्रापि उष्णस्पर्शरूपकार्येण कल्पनायां बाधकाभावादिति चेत्, सत्यम्, गुणनिरूपणे वक्ष्यामः । **तदन्तर्वर्तिजलस्यैव स्नेह इति** । स्वाश्रयसंयोगेन प्रतीयते इति शेषः । **तेन** = घृतादौ समवायेन स्नेह-निरासेन । **तदवच्छिन्नेति** । सांसिद्धिकद्रवत्वत्वावच्छिन्नेत्यर्थः । **तदेव** = जन्य-जलत्वमेव । तदवच्छिन्नजनकतावच्छेदकं जलत्वमिति भावः । **तैलादाविति** । आदिना क्षीरपरिग्रहः, न तु घृतस्य तत्र समवायेन नैमित्तिकद्रवत्वस्य सत्त्वात् । **द्रवत्वमिति** । स्वाश्रयसंयोगेन प्रतीयते इति शेषः । **वक्ष्यति**=स्नेहनिरूपणावसरे इति शेषः ॥ ३६ ॥

नित्यतादि प्रथमवत्किन्तु देहमयोनिजम् ।
इन्द्रियं रसनं सिन्धुहिमादिर्विषयो मतः ॥४०॥

प्रथमवदिति। पृथिव्या इवेत्यर्थः। तथा हि, जलं द्विविधं-नित्यमनित्यं च, नित्यं परमाणुरूपं, द्व्यणुकादिकं सर्वमनित्यमवयवसमवेतं च। अनित्यमपि त्रिविधं शरीरेन्द्रियविषयभेदात्। पृथिवीतो यो विशेषस्तमाह-किन्त्विति। देहमयोनिजम्, अयोनिजमेवेत्यर्थः। जलीयं शरीरं वरुणलोके प्रसिद्धम्। इन्द्रियमिति। जलीयमित्यर्थः। तथाहि रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकोदकवत्। रसनेन्द्रियसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम्। विषयं दर्शयति-सिन्धुहिमादिरिति। सिन्धुः समुद्रः। हिमं तुषारः। आदिपदात्सरित्कासारकरकादिः सर्वोऽपि ग्राह्यः।

जल की नित्यता और अनित्यता पृथिवी की तरह है। तथाहि—जल—दो प्रकार का है—नित्य—और अनित्य। परमाणुरूप जल नित्य है और द्व्यणुकादिरूप सब जल अनित्य है—अवयव समवेत है। अनित्य जल तीन प्रकार का है—शरीर—इन्द्रिय-विषय भेद से। पृथिवी से जल में जो विशेषता है उसे कहते हैं "किन्तु देहमयोनिजम्" अर्थात् जलीयशरीर अयोनिज ही है। जलीय शरीर वरुणलोक में प्रसिद्ध है। जलीय इन्द्रिय रसन है। तथाहि—रसनेन्द्रिय-जलीय है—गन्धादि का अव्यञ्जक होते हुवे रस का व्यञ्जक होने से—सत्तू के रस का अभिव्यञ्जक जल जैसे होता है। रसनेन्द्रिय का रस के साथ जो सन्निकर्ष—उसमें व्यभिचार वारण के लिये हेतु कोटि में "द्रव्यत्व" विशेषण भी दे देना। (क्योंकि सन्निकर्ष में रस व्यंजकत्व हेतु है—किन्तु जलीयत्व साध्य नहीं है- अतः साध्याभाववद्वृत्तित्वरूपव्यभिचार है। द्रव्यत्वविशेषण देने पर उक्तसन्निकर्ष में द्रव्यत्व नहीं है अतः हेतु भी नहीं रहा—साध्य भी नहीं रहा व्यभिचार नहीं हुवा) विषयरूप जल को दिखाते हैं "सिन्धुः" इत्यादि। हिम

पृथिव्या इत्यस्य पंचमीषष्ठीविभक्तिसाम्येन षष्ठीभ्रमो मा भूदित्यतस्तसिल्प्रत्ययान्तप्रातिपदिकमाह **पृथिवीत इति**। योनिजायोनिजत्वेपि अयोनिजत्वानपायादाह **अयोनिजमेवेति**। एवकारः सावधारणे। ननु अवच्छेदकतया सुखदुःखान्यतरसाक्षात्कारवत्त्वरूपशरीरत्वस्य प्रत्यक्षसिद्धजलादावदर्शनात्कथं तदित्यत आह **वरुणलोके इति**। यद्यपि वरुणादेः शरीरत्वे मानाभावस्तथापि वरुणलोके प्रसिद्धजलस्य शरीरत्वबोधकश्रुतिस्मृतिभीतिसंत्रस्तरसनयाऽन्यथा वक्तुं नालमिति ध्येयम्। जलीयशरीरं च पार्थिवावयवैरुपष्टब्धं बोध्यम्, काठिन्यस्य पृथिवीत्वव्याप्यतया व्याप्यसत्त्वे व्यापकसत्त्वस्यावश्यकत्वात्, तथाच तयोः कथं जलत्वमित्याशंकते **नचेति**। **कठिनत्वात्** = कठिनस्पर्शवत्त्वात्। **अदृष्टविशेषेण** =

न च हिमकरकयोः कठिनत्वात्पार्थिवत्वमिति वाच्यम्, ऊष्मणा विलीनस्य तस्य जलत्वस्य प्रत्यक्षसिद्धत्वात्। यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः, अदृष्टविशेषेण द्रवत्वप्रतिरोधात्, करकादीनां काठिन्यप्रत्ययस्य भ्रान्तित्वात् ॥४०॥

उष्णः स्पर्शस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्।
नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत् ॥४१॥

तेजो निरूपयति-उष्ण इति। उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः। इत्थं च जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः। तस्य परमाणुवृत्तित्वं तु जलत्वस्येवानुसन्धेयम्। न चोष्णस्प-

से लेकर समुद्रपर्यन्त अर्थात् तुषार-नयी-बावड़ी—इत्यादि सब विषयरूप जल है। प्रश्न—हिम-कारका कठिन होने से पार्थिव हैं जलीय कैसे हैं। उत्तर—गर्मी से पिंघलने पर उनमें जलत्व प्रत्यक्षसिद्ध है—क्योंकि यह व्याप्ति है कि जो द्रव्य जिस द्रव्य के ध्वंस से जन्य होता है—वह द्रव्य उस द्रव्य के उपादान से उपादेय होता है। इस व्याप्ति के बल से हिम-करका-भी जल का उपादान जो जल का परमाणु उसके कार्य हैं अतः जलत्व उनमें प्रत्यक्षसिद्ध है। और उनमें द्रवत्व का प्रतिरोध अदृष्ट विशेष के कारण होता है। करकादि में काठिन्य प्रत्यय भ्रान्त है ॥४०॥

तेज का निरूपण करते हैं—तेज का स्पर्श उष्ण होता है—और रूप भास्वर शुक्ल होता है—और द्रवत्व नैमित्तिक होता है—और तेज का नित्यत्व-पृथिवी की तरह जानना। उष्णत्व स्पर्शनिष्ठ जाति विशेष है जो कि प्रत्यक्षप्रमाण सिद्ध है। इस प्रकार जन्योष्णस्पर्श समवायिकारणतावच्छेदकतया जन्यतेजस्त्व जाति की सिद्धि—और जन्यतेजस्त्वावच्छिन्न जन्यतानिरूपित-जनकतावच्छेदकतया तेजस्त्वजाति की सिद्धि कर लेना—उस तेजस्त्वजाति को जलत्व की तरह

भोजकादृष्टविशेषेण। **प्रतिरोधात्** = विद्यमानस्यापि भावप्रतिबन्धसंभवात्। नाशादित्यपि कश्चित्।

भ्रान्तित्वात् = भ्रमरूपत्वात्। अग्रे काठिन्यभ्रमस्यैव तत्र भावितया भ्रमस्य चाऽविद्यमानतया तस्याऽदृष्टजन्यत्वमेव स्वीकरणीयम् ॥४०॥

तस्य = तेजस्त्वस्य। **जलत्वस्येवेति**। यथा जन्यजलत्वावच्छिन्नजनकतावच्छेदकतया सिद्धजलत्वजातेः परमाणुवृत्तित्वं, तथैव जन्योष्णस्पर्शसमवायिकारणतावच्छेदकजन्यतेजस्त्वावच्छिन्नजनकतावच्छेदकतया सिद्धतेजस्त्वजातेः परमाणुवृत्तित्वमित्यर्थः।

अभिभवात्=स्वजातीयग्रहणप्रयुक्तप्रत्यक्षाभावात्। **तद्रूपाग्रहे**=शुक्लरूपाग्रहे। **चाक्षुषत्वं** = चाक्षुषविषयत्वम्। यद्यपि धर्मिग्रहे स्वरूपतो रूपस्य हेतुतया

शैत्वत्त्वं चन्द्रकिरणादावव्याप्तमिति वाच्यम् तत्राप्युष्णत्वस्य सत्त्वात् , किन्तु तदन्तःपातिजलस्पर्शेनाभिभवादग्रहः । एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वादग्रहः । रूपमित्यादि । वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाभिभवाच्छुक्लरूपाग्रहः । अथ तद्रूपाग्रहे धर्मिणोऽपि चाक्षुषत्वं न स्यादिति चेत् ? न, अन्यदीयरूपेणापि धर्मिणो ग्रहसंभवात् शङ्खस्येव पित्तपीतिम्ना । वन्हेस्तु शुल्करूपं नाभिभूतं किन्तु तदीयं शुल्कत्वमभिभूत-

परमाणु में वृत्ति है समझना चाहिये। (जो कि प्रकार ऊपर बतला दिया वही जलत्ववाला प्रकार है)। प्रश्न—"उष्णस्पर्शवत्व" इस तेज के लक्षण की चन्द्रकिरण में अव्याप्ति हो जायेगी। उत्तर—चन्द्रकिरण में भी उष्णस्पर्श है-किन्तु चन्द्रकिरण के अन्दर रहने वाला जो जल उसके स्पर्श से दब जाने के कारण मालूम नहीं पड़ता। इसी प्रकार रत्नकिरण आदि में पार्थिवस्पर्श से उसका उष्णस्पर्श अभिभूत हो जाने के कारण—तथा चक्षु आदि में अनुद्भुत होने के कारण मालूम नहीं पड़ता है। वैश्वानर (अग्नि) तथा मरकत किरण आदि में भी पार्थिवरूप से दब जाने के कारण उसके शुक्लरूप का ज्ञान नहीं हो पाता। प्रश्न—जब इनके रूप का ज्ञान नहीं होता है तो धर्मी जो वैश्वानर-मरकतकिरण आदि हैं उनका भी चक्षु इन्द्रिय से प्रत्यक्ष नहीं होना चाहिये। उत्तर—यह ठीक नहीं—क्योंकि अन्यदीयरूप से भी धर्मी का चाक्षुषप्रत्यक्ष होता है—जैसे पित्त की बीमारी वाले (अर्थात् पित्तदोष दूषित नेत्रोंवाले) पुरुष को शंख का शुक्लरूप पित्त के पीले रूप से दब जाने के कारण चक्षु से ज्ञात नहीं होता है-अथ च शंख का प्रत्यक्ष पित्त के पीले रूप से ही होता है। अन्य लोग ऐसा कहते हैं कि अग्नि का रूप नहीं दबता अपितु उसका शुक्लत्व दबता है-(अग्नि का प्रत्यक्ष अग्नि के रूप

तद्ग्रहस्यानुपयोगः, तथापि वस्तुतो रूपवद्द्रव्यचाक्षुषलौकिकविषयिता रूपचाक्षुषविषयिताऽव्याप्येति सिद्धान्तस्य तदग्रहेपि धर्मिचाक्षुषोपगमेऽपलापापत्तेरित्याशंकितुरभिप्रायः। **अन्यदीयरूपेण** = सम्मिश्रितपार्थिवावयवरूपेण। इत्थं च नोक्तव्याप्यव्यापकभावापलाप इत्याशयः। ननु वस्तुतो यद्रूपवद्द्रव्यं तदीयताद्दग्विषयिता तद्रूपचाक्षुषविषयिताव्याप्येति नियमो भज्यत एवेति शंकामपवदितुं दृष्टान्तमाह **शंखस्येवेति**। तथाच व्यभिचारान्न विशेषनियमः संभवतीति भावः। विशेषनियमेपि न व्यभिचार इति समाधानकर्तृणां मतमाह **वह्नेस्त्वति**। **नाभिभूतमिति**। नन्वनभिभवे तद्ग्रहापत्तिः, इष्टापत्तावनुव्यवसायापत्तिरत आह **तदीयशुक्लत्वमिति**। तथाच विशेषणस्याभिभवादेव न विशिष्टानुव्यवसायसंभव इति भावः। तदीयशुक्लत्वस्य शुक्लत्वानतिरेकेण तदभिभवे कुत्रापि तद्ग्रहो न स्यात्, मरकतकिरणग्रहस्य मरकतरूपेणैवावश्यकतया विशेषनियमे व्यभिचारो

मित्यन्ये । नैमित्तिकमिति । सुवर्णादिरूपे तेजसि तत्सत्त्वात् । न च नैमित्तिकद्रवत्वं लक्षणं दहनादावव्याप्तं घृतादावतिव्याप्तं चेति वाच्यम् । पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य विवक्षितत्वात् । पूर्ववदिति । जलस्येवेत्यर्थः । तथाहि तद्-द्विविधं-नित्यमनित्यं च । नित्यं परमाणुरूपम् । तदन्यदनित्यम्, अवयवि च । तच्च त्रिधा-शरीरेन्द्रियविषयभेदात् । शरीरमयोनिजमेव । तच्च सूर्यलोकादौ प्रसिद्धम् ॥४१॥

इन्द्रियं नयनं, वन्हिस्वर्णादिर्विषयो मतः ।

अत्र यो विशेषस्तमाह-इन्द्रियमिति । ननु चक्षुषस्तैजसत्वे किं मानमिति चेत् ? चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्य-

से ही होता है) नैमित्तिकमिति—सुवर्ण आदि रूप तेज में नैमित्तिक द्रवत्व है। प्रश्न—नैमित्तिकद्रवत्ववत्त्व इस लक्षण की वह्नि आदि तेज में अव्याप्ति है—और घृत आदि रूपा पृथिवी में अतिव्याप्ति है। उत्तर—यह ठीक नहीं है—क्योंकि पृथिवी में अवृत्ति (न रहने वाली) तथा नैमित्तिकद्रवत्व के अधिकरण में वृत्ति (रहने वाली) जो द्रव्यत्व साक्षात् व्याप्य जाति-तादृशजातिमत्त्व यह नैमित्तिकद्रवत्व का अर्थ कर देना। (ऐसी जाति केवल तेजस्त्व जाति ही मिलेगी—वह तेजस्त्वजाति वह्नि में है और घृतरूपा पृथिवी में नहीं अतः अव्याप्ति नहीं है।

तेज दो प्रकार का है नित्य और अनित्य। नित्य परमाणु रूप है— और परमाणु रूप तेज से अन्य तेज अनित्य है तथा अवयवी है। वह अनित्य तेज तीन प्रकार का है— शरीर-इन्द्रिय—विषय भेद से। तेज का शरीर अयोनिज है— तैजस शरीर सूर्य भगवान् का है और वह सूर्यलोक में प्रसिद्ध है।

चक्षु तैजस इन्द्रिय है। प्रश्न—चक्षु तैजस है इसमें क्या प्रमाण है। उत्तर—अनुमान प्रमाण है। तथाहि—चक्षु तैजस है परकीय स्पर्शादि का अव्यञ्जक होते हुवे परकीय (घटपटादि)

दुर्निवार एवेत्यस्वरसोऽन्ये इत्यनेन सूचितः। "नैमित्तिकं द्रवत्वमिति" श्लोके तेजसीत्यध्याहारः। अन्वयितावच्छेदकावच्छेदेनान्वयस्यौऽत्सर्गिकत्वेऽपि बाधात्प्रकृते सामानाधिकरण्येनान्वय इत्यभिप्रायवानाह सुवर्णादीति। एवं सति लक्षणत्वायोग इत्याशंकते नचेति। नैमित्तिकत्वं च न निमित्तजन्यत्वम्, जलीयद्रवत्वस्यापि तथात्वात्, किन्तु विजातीयतेजःसंयोगजन्यतावच्छेदकजातिमत्त्वम्। एवं सांसिद्धिकद्रवत्वत्वं जलजन्यतावच्छेदको जातिविशेषः।

नचैवमपि सर्वद्रवत्वसाधारणद्रवत्वत्वजातौ मानाभावः, अनुगतप्रतीत्या-

ञ्जकत्वात् प्रदीपवत्, प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादत्र दृष्टान्तेऽसिद्धि वारणाय प्रथमं परकीयेति। घटादेः स्वीयरूपव्यञ्जकत्वाद्व्यभिचारवारणाय द्वितीयं परकीयेति। अथवा प्रभाया दृष्टान्तत्वसंभवादाद्यं परकीयेति न देयम्, चक्षुःसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम्। विषयं दर्शयति- वह्नीति। ननु सुवर्णस्य तैजसत्वे किं मानमिति चेद्? न, सुवर्णं तेजसम्, असति प्रतिबन्धके अत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानजन्यद्रवत्ववत्त्वात्, यन्नैवं तन्नैवम्, यथा पृथिवीति। न चेदमप्रयोजकम्, पृथिवीद्रवत्वस्य जन्यजल-

के रूप का व्यञ्जक होने से प्रदीप की तरह। हेतुकोटि में प्रथम "परकीय" न देने पर दृष्टान्त में अव्याप्ति हो जावेगी—(क्योंकि दृष्टान्त में साध्य-हेतु-इन दोनों का सत्त्व अपेक्षित है—इन दोनों में से एक भी यदि दृष्टान्त में न रहे तो उसे "दृष्टान्त में अव्याप्ति" अथवा "दृष्टान्तासिद्धि" कहते हैं। पूर्वोक्तानुमान में प्रथम "परकीय" न देने पर "स्पर्शाद्यव्यञ्जकत्वेसति परकीयरूपव्यञ्जकत्वात्" एतावन्मात्र ही हेतु रह जाता है—सो यह हेतु "प्रदीप" दृष्टान्त में नहीं जा रहा है—क्योंकि प्रदीप अपने स्पर्श का व्यञ्जक ही है—अतः स्पर्शादि अव्यञ्जकत्वविशिष्ट परकीयरूपव्यञ्जकत्व रूप हेतु के प्रदीप में न रहने प्रयुक्त अव्याप्ति हो गयी। यदि प्रथम परकीय-पद दिया तो प्रदीप अपने स्पर्श का व्यञ्जक हो—किन्तु परकीय स्पर्शादि का अव्यञ्जक भी तो है—अतः परकीय स्पर्शाद्यव्यञ्जकत्वविशिष्टपरकीयरूपव्यञ्जकत्व हेतु दृष्टान्त में चला गया अव्याप्ति नहीं हुवी।

द्वितीयपरकीयपद न देने पर घट अपने रूप का व्यंजक होने से घट में व्यभिचार हो जायेगा। (क्योंकि घट में तैजसत्व साध्य नहीं है—और परकीयस्पर्शाद्यव्यंजकत्वविशिष्ट रूप व्यंजकत्व हेतु है—सो जहाँ साध्य न रहे और हेतु रह जावे उसे ही तो व्यभिचारक कहते हैं। यदि द्वितीय परकीय पद दिया तो घट में हेतु भी नहीं रहा। क्योंकि घट परकीय रूप का व्यञ्जक नहीं है) अथवा (प्रदीप को दृष्टान्त न करके) यदि प्रभा को दृष्टान्त कर दें तब प्रथम परकीय पद देने की कोई आवश्यकता नहीं। चक्षुःसन्निकर्ष में व्यभिचार वारण के लिये हेतु कोटि में द्रव्यत्व विशेषण अवश्य देना चाहिये। (अन्यथा चक्षुः का जो घट के साथ संयोग सन्निकर्ष है—उस संयोग सन्निकर्ष में तैजसत्व साध्य नहीं रहा, और हेतु है—क्योंकि संयोग सन्निकर्ष परकीय (घट-पट आदि) के स्पर्शादि का अव्यंजक है और परकीय (घट-पट

तत्सत्त्वे वा द्रवत्वत्वजातेः परमाणुद्रवत्ववृत्तित्वे साधकाभावेन सर्वसाधारण्ये प्रमाणाभावादिति वाच्यम्। इष्टत्वात्। जलत्वादिवदस्य सिद्धिसंभवाच्च।

प्रतिबन्धकदशायामत्यन्तानलसंयोगेपि अनुच्छिद्यमानद्रवत्वात्पयसि व्यभिचार इत्यत आह असतीति। प्रतिबन्धकाभावदशायां क्षुद्रसंयोगेपि अनुच्छिद्यमानद्रवत्वात्तत्र व्यभिचारतादवस्थ्यमत आह अत्यन्तेति। अप्रयोजकं=अनुमानमिति

द्रवत्वस्य चात्यन्ताग्निसंयोगनाश्यत्वात्। ननु पीतिमगुरुत्वाश्रयस्य पार्थिवभागस्यापि तदानीं द्रुतत्वात्तेन व्यभिचार इति चेत्? न, जलमध्यस्थमसीक्षोदवत्तस्याद्रुतत्त्वात्। अपरे तु पीतिमाश्रयस्य अत्यन्ताग्निसंयोगेऽपि

आदि) के रूप का व्यंजक है-अतः व्यभिचार हो जावेगा। द्रव्यत्व विशेषण हेतु कोटि में दिया तो "द्रव्यत्व" संयोग सन्निकर्ष में नहीं है-व्यभिचार नहीं हुवा) वह्नि सुवर्ण आदि तेज के विषय हैं। प्रश्न–सुवर्ण तेज है इसमें क्या प्रमाण है। उत्तर–सुवर्ण के तैजस होने में अनुमानप्रमाण है कि सुवर्ण तेज है किसी प्रतिबन्धक के न रहने पर अत्यन्त अग्नि का संयोग होने पर भी सुवर्ण के द्रवत्व का नाश नहीं होता है इस हेतु से-जो ऐसा नहीं, वह तैजस भी नहीं, जैसे पृथिवी। (अभिप्राय यह है कि जिस वस्तु का द्रवत्व अत्यन्ताग्निसंयोग होने पर भी नष्ट नहीं होता है-वही तत्त्व सुवर्ण द्रव्य है-पृथिवी और जल का द्रवत्व अत्यन्तानल संयोग होने पर नष्ट हो जाता है परन्तु सुवर्ण के द्रवत्व का ही ऐसा नियम है कि अत्यन्त अग्नि संयोग होने पर भी नष्ट नहीं होता है इसलिये पूर्वानुमान से सुवर्ण तैजस है, यह सिद्ध हो जाता है।

प्रश्न–यह अनुमान अप्रयोजक है (अर्थात् इस अनुमान में यह व्यभिचार शङ्का हो सकती है कि पक्ष में "अनुच्छिद्यमान द्रवत्वात्" इत्यादि हेतु रहे और "तैजसत्व" साध्य न रहे)। उत्तर–नहीं-प्रकृत में अनुकूल तर्क है-कि पृथिवी का द्रवत्व-और जन्यजल का द्रवत्व अत्यन्त अग्निसंयोग होने पर नष्ट हो जाता है-(अतः जिसका द्रवत्व अत्यन्ताग्नि संयोग होने पर भी नष्ट न हो उसे अवश्य ही पृथिवी-तथा जल से अतिरिक्त एक तैजस द्रव्य मानना होगा–इससे सुवर्ण तैजस द्रव्य है यह सिद्ध हो गया)। प्रश्न–(जब कि सुवर्ण के साथ अत्यन्ताग्निसंयोग हुवा तब सुवर्ण जैसे पिंघलता (द्रुत होता) है–वैसे ही सुवर्ण में मिश्रित जो) पीतिम (पीतरूप) एवं गुरुत्व का आश्रय पार्थिवभाग, उसमें भी द्रवत्व होता है–(और वह द्रवत्व भी सौवर्ण द्रवत्व की तरह अनुच्छिद्यमान है–इससे अनुच्छिद्यमानद्रवत्व हेतु उस पार्थिव भाग में है–पार्थित्व साध्य नहीं है) अतः व्यभिचार हुवा। उत्तर-ऐसा नहीं–जैसे जल के मध्य में स्थित जो मषीक्षोद (स्याहीचूर्ण) उसमें जैसे वास्तविक में द्रवत्व नहीं है-किन्तु जल का द्रवत्व ही उसमें मालूम पड़ता है, ऐसे ही सुवर्ण गत द्रवत्व ही उस पार्थिवभाग में मालूम पड़ता है-वास्तविक में पार्थिव भाग में कोई भी द्रवत्व नहीं है। अतः सुवर्णमिश्रित उस पार्थिव भाग में अनुच्छिद्यमान द्रवत्व (अनुच्छिद्यमानद्रवत्व–इस शब्द का अर्थ है कि जिसका द्रवत्व उच्छिद्यमान (नाशवान्) न हो) हेतु भी नहीं रहा-और तैजसत्व साध्य तो है ही नहीं– व्यभिचार नहीं हुवा।

शेषः। हेतोर्व्याप्यत्वेऽनुकूलतर्काभाव इत्यर्थः। जलीयमिति भ्रमनिरासायाह **पीतिमेति**। दार्ढ्यायाह **गुरुत्वाश्रयस्येति**। **तेन**=पार्थिवभागेन। **जलमध्यस्थेति**। तथाच संमिश्रितद्रव्यत्वात्तदीयद्रवत्वेनाऽत्र द्रवत्वोपचारमात्रम्। एतच्च दर्शितस्थलानुरोधेनोपगन्तव्यमिति भावः।

पूर्वरूपापरावृत्तिदर्शनात्तत्प्रतिबन्धकं विजातीयद्रवद्रव्यं कल्प्यते। तथा हि- अत्यन्ताग्निसंयोगी पीतिमगुरुत्वाश्रयः,-विजातीयरूप प्रतिबन्धकद्रवद्रव्यसंयुक्तः, अत्यन्ताग्निसंयोगे सत्यपि पूर्वरूपविजातीयरूपानधिकरणत्वात् जलमध्यस्थ- पीतपटवत्, तस्य च पृथिवीजलभिन्नस्य तेजस्त्वनियमात् ॥४१॥

कोई लोग सुवर्ण के तैजसत्व का अनुमान इस प्रकार करते हैं–उनका कहना है कि पार्थिव रूप तो अग्नि संयोग होने पर बदल जाता है जैसे घट का नीलरूप अग्निसंयोग से नष्ट होकर लाल रूप हो जाता है–परन्तु सुवर्ण के अन्दर विद्यमान जो पीतिमाश्रय पार्थिव भाग उसके पूर्वरूप (पीतरूप) की परावृत्ति (बदलना) अग्निसंयोग होने पर भी नहीं देखते हैं– अतः कोई विजातीयद्रवद्रव्य पूर्वरूप (पीतरूप) की परावृत्ति का प्रतिबन्धक अवश्य है-ऐसी कल्पना (अनुमान) करते हैं। तथाहि–अत्यन्ताग्निसंयोगी पीतिम–एवं गुरुत्व का आश्रय पार्थिव भाग–विजातीयरूप का प्रतिबन्धक जो द्रवद्रव्य उससे संयुक्त है–क्योंकि अत्यन्ताग्नि संयोग होने पर भी पूर्वरूप (पीतरूप) से विजातीय जो रूप उसका अधिकरण न होने से (अर्थात् सुवर्ण मिश्रित पार्थिव भाग का अत्यन्ताग्नि संयोग होने पर भी वही पीतरूप बना रहता है अत: वह पार्थिव भाग विजातीयरूप का अधिकरण नहीं होने पाता-इससे वह पार्थिव भाग विजातीय द्रवद्रव्य से संयुक्त है ऐसा अनुमान करते हैं) जल के बीच में स्थित पीतपट की तरह (अर्थात् जलमध्यस्थपीतपट का पीलारूप अत्यन्ताग्नि संयोग होने पर भी जैसे बदलता नहीं–वहाँ उस पीले रूप से विजातीय रूप का प्रतिबन्धक जैसे जल होता है-ऐसे ही सुवर्णमिश्रितपार्थिव भाग का पीला रूप अत्यन्ताग्निसंयोग होने पर भी बदलता नहीं–सो उस बदलने को रोकनेवाला द्रवद्रव्य कोई अवश्य ही वहाँ है–और उस द्रवद्रव्य को जल या पृथिवी नहीं कह सकते-क्योंकि जल या पृथिवी का द्रवत्व अत्यन्ताग्निसंयोग होने पर नष्ट हो जाता है) अतः उस द्रवद्रव्य को पृथिवी-जल से भिन्न तेज ही कहना होगा ॥४१॥

इतरबाधेन तेजस्त्वसाधयितॄणां मतमाह **परे त्विति**। गुरुत्वाश्रयान्तः पक्षः। द्रव्यसंयुक्तान्तं साध्यम्। हेतुघटकात्यन्तानलसंयोगस्य स्वरूपासिद्धिवारणाय पक्षेऽत्यन्ताग्निसंयोगीति। नीरूपत्वे द्रवत्वस्य प्रतिबन्धकत्वं न संभवतीत्यतः पीतिमत्त्वेन पक्षो विशेषितः। गुरुत्वाश्रय इति स्वरूपकथनम्। वस्तुतः सुवर्णा- न्तर्गतपार्थिवभागत्वेन पक्षता। एतेन सामानाधिकरण्येन साध्यतायां दृष्टान्ते न सिद्धसाधनम्, अवच्छेदकावच्छेदेन साध्यतायां तु द्रवत्ववद्द्रव्याऽसंयुक्ते घटादौ बाध इति निरस्तम्। पृथिवीजलयोर्द्रवत्ववद्द्रव्यसंयुक्तत्वेन सिद्धसाधनमतो विजातीयेति द्रवविशेषणम्। वस्तुतस्तु सर्वस्यापि द्रवस्य द्रवान्तराद्वैजात्यमस्त्येवेत्यत इतर- बाधेनैवोभयभिन्नीयो द्रव इति निर्णेयम्। तथाच वैजात्याप्रवेशेपि उपपत्तेस्तदुपा- दानमुपरंजकतयेति बोध्यम्। एवं साध्ये द्रव्यपदमपि, द्रवे रूपप्रतिबन्धकत्वमपि तथा। अनलाऽसंयुक्ते क्षुद्राऽनलसंयुक्ते व्यभिचारवारणाय सप्तम्यन्तम्, विजातीय- तेजःसंयोगपरम्। तेन जलादिपरमाणौ न व्यभिचारः। रूपानधिकरणत्वस्य

अपाकजोनुष्णाशीतः स्पर्शस्तु पवने मतः।
तिर्यग्गमनवानेम ज्ञेयः स्पर्शादिलिङ्गकः ॥ ४२ ॥

वायुं निरूपयति अपाकज इति। अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वाद्पाकज इति। अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तमनुष्णाशीतेति।

वायु का निरूपण करते हैं—अपाकज अनुष्णाशीतस्पर्श वायु में रहता है। और यह वायु टेढ़ी गति वाला है—स्पर्शादि हेतुओं से वायु का अनुमान होता है। (अपाकज अनुष्णाशीतस्पर्श वाला होना यह वायु का लक्षण हुवा)—उसमें अपाकज विशेषण न देंगे तो अनुष्णाशीतस्पर्श पृथिवी में भी है-अतः वायु के लक्षण की पृथिवी में अतिव्याप्ति हो गयी—यदि दिया तो पृथिवी का स्पर्श पाकज है-अतः अतिव्याप्ति नहीं। "अपाकजस्पर्शवाला" एतावन्मात्र वायु के

रूपसामान्याभाववतोपि संभवात् **पूर्वरूपविजातीयेति।** यद्यपि पूर्वरूपविजातीयरूपानधिकरणत्वमपि रूपसामान्याभाववतो दृष्टमेव, तथापि पूर्वरूपविजातीयरूपानधिकरणत्वविशिष्टरूपाधिकरणत्वादिति हेतुर्बोध्यः। वस्तुतो रूपसामान्याभाववतस्तथात्वेपि क्षत्यभावाद्रूपाधिकरणत्वप्रवेशे प्रयोजनाभावः। आत्मादौ हेतुसत्त्वेपि साध्यस्यापि सत्त्वेन बाधकाभावेन विजातीयसंयोगघटितहेत्वभावेन वा व्यभिचारानवकाशादिति संक्षेपः। इतरबाधं दर्शयति **तस्य चेति।** तादृशप्रतिबन्धकद्रवद्रव्यस्येत्यर्थः। **तेजस्त्वनियमादिति।** तेजस्त्ववत्त्वनियमादित्यर्थः। द्रवत्वेनेति शेषः।

अत्रेदमालोचनीयम्—उक्तानुमानेऽनुकूलतर्काभावेन द्रवत्ववद्द्रव्यसंयुक्तत्वे मानाभावः। न च रूपापरावृत्तिदर्शनात्तत्कल्पनम्। मानाभावात्। न च तदनभ्युपगमे तेजःसंयोगात्पूर्वरूपनाशे नवीनोत्पत्तिर्दुर्वारैवेति वाच्यम्। द्रवत्ववद्द्रव्यस्य द्रवत्वस्य वा प्रतिबन्धकत्वापेक्षया सुवर्णस्यैव प्रतिबन्धकत्वे लाघवात्। न च स्वतन्त्रप्रतिबन्धकत्वकल्पनापेक्षया जलमध्यस्यपीतपटे रूपान्तरोत्पादवारणाय द्रवत्ववद्द्रव्यस्य क्लृप्ततया प्रतिबन्धकतानिर्वाहादिति वाच्यम्। प्रतिबन्धकतावच्छेदकाननुगमेनैकप्रतिबध्यप्रतिबन्धकभावाऽसंभवात्। न च परंपरया द्रवत्वत्वजातिरेव प्रतिबन्धकतावच्छेदिका, यद्वा द्रवत्वत्वेन द्रवत्वस्य प्रतिबन्धकतया नाननुगम इति वाच्यम्। तथापि द्रवत्ववद्द्रव्यसंयुक्तत्वस्य सिद्धावपि द्रवत्ववद्द्रव्यस्य तेजस्त्वे साधकाभावात्। न चेतरबाधसहकृतेन पृथिवीत्वजलत्वाभावविशिष्टेन द्रवत्वेन तत्सिद्धिरिति वाच्यम्। तेजस्त्वसाधकोष्णस्पर्शाद्यभावेन तदसिद्धेरनुमानाऽप्रयोजकत्वस्याऽसकृदावेदितत्वात्। न च तेजस्त्वासिद्धौ द्रव्यान्तरकल्पनैव स्यादिति वाच्यम्। इष्टापत्तेः। न चाऽतिरिक्तत्वकल्पनायाः गरीयस्त्वमिति वाच्यम्। अतिरिक्तत्वकल्पनायां लाघवस्य विपरीतस्य पृथिवीग्रन्थे आवेदितत्वादिति ॥४१॥

जलादावपीति। आदिना तेजःपरिग्रहः। **एतेन**=अपाकजानुष्णाशीतस्पर्शकथनेन,

एतेन वायवीयो विजातीयस्पर्शः दर्शितः। तज्जनकतावच्छेदकं वायुत्वमिति भावः ॥४२॥

एषः—वायुः—स्पर्शादिलिङ्गकः—वायुर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते, विजातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कंपनेन च वायोरनुमानात्। यथा वायुर्न प्रत्यक्षस्तथाग्रे वक्ष्यते।

लक्षण की जलादि में अतिव्याप्ति है–अतः अनुष्णाशीत कहा–तो जलादि में अनुष्णाशीत स्पर्श नहीं है. अपितु शीतस्पर्श है। इससे वायु का स्पर्श सबसे विजातीय होता है यह स्पष्ट हो हो गया। (उस विजातीय स्पर्श का समवायिकारण वायु है) समवायिकारणतावच्छेदक वायुत्व है–(वही वायुत्वजाति है)। इस वायु का स्पर्शादि लिङ्ग (हेतुवों) से आनुमानिक ज्ञान होता है। इस वायु का स्पर्श–शब्द-धृति–कम्प इन हेतुवों से अनुमान होता है। अभिप्राय यह है कि नवीन नैयायिक स्पार्शन प्रत्यक्ष में स्पर्श को कारण मानते हैं अतः वे वायु का प्रत्यक्ष मानते हैं, किन्तु प्राचीन नैयायिक–वहिरिन्द्रिय से होने वाले द्रव्यप्रत्यक्ष में उद्भूत रूप को कारण मानते हैं–अतः उनके यहाँ वायु का प्रत्यक्ष नहीं होता है-अपितु वायु का स्पर्शादि चार हेतुओं से आनुमानिक ज्ञान होता है। तथाहि–पहिला हेतु स्पर्श है–सो जिस द्रव्य में रूप नहीं है-उस द्रव्य के स्पर्श का भी प्रत्यक्ष हमें त्वगिन्द्रिय से होता है अतः वह स्पर्श जिस

तथाच विजातीयस्पर्शवत्त्वं वायोर्लक्षणम्। एतेन अपाकजानुष्णाशीतस्पर्शवत्त्वं पटादावतिव्याप्तम्, अतोऽपाकजानुष्णाशीतस्पर्शवन्मात्रवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं पाकजस्पर्शवदवृत्तिअनुष्णाशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा लक्षणार्थोवसेय इति निरस्तम्। पटादौ विजातीयस्पर्शाभावादिति ध्येयम्। **तज्जनकतावच्छेदकमिति।** विजातीयस्पर्शजनकतावच्छेदकमित्यर्थः। तथाच विजातीयस्पर्शजनकतावच्छेदकतया वायुत्वजातिसिद्धिरिति भावः। अस्या परमाणुवृत्तित्वं तु जलत्वस्येवानुसन्धेयम्॥ ४२॥

स्पर्शादिलिङ्गक इति। स्पर्शादीनि लिङ्गानि यस्य स तथा। **विजातीयस्पर्शेनेति** तृतीयान्तचतुष्टयस्याऽनुमानादित्यनेनान्वयः। योयं रूपवद्द्रव्यासमवेतः स्पर्शः स क्वचिदाश्रितः स्पर्शत्वात्पृथिवीसमवेतस्पर्शवत्। एवमसति रूपवद्द्रव्याभिघाते योयं पर्णादिषु शब्दसन्तानः स स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यः अविभज्यमानावयवद्रव्यसंबन्धिशब्दसन्तानत्वात् दण्डाभिहतभेरीशब्दसन्तानवत्। एवं नभसि तृणतूलस्तनयित्नुविमानादीनां धृतिः स्पर्शवद्वेगवद्द्रव्यसंयोगजन्या अस्मदाद्यनधिष्ठितद्रव्यधृतित्वात् नौकाधृतिवत्। धृतिश्च गुरुत्ववतां पतनाभावः। एवं रूपवद्द्रव्याभिघातमन्तरेण तृणे कर्म स्पर्शवद्वेगवद्द्रव्याभिघातजन्यं विजातीयकर्मत्वात्, नदीपूराहतकाशादिकर्मवदित्यनुमितिप्रकारो वोध्यः। **वक्ष्यते इति।** "रूप

पूर्ववन्निन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् ॥४३॥

पूर्ववदिति। वायुर्द्विविधः—नित्योऽनित्यश्च। परमाणुरूपो नित्यः, तदन्योऽनित्योऽवयवसमवेतश्च। सोपि त्रिविधः—शरीरेन्द्रियविषयभेदात्। तत्र शरीरमयोनिजं पिशाचादीनाम्। परन्तु जलीयतैजस वायवीयशरीराणां पार्थिवभागोपष्टंभादुपभोगक्षमत्वम्, जलादीनां प्राधान्याज्जलीयत्वादिकमिति। अत्र यो विशेषस्तमाह देहव्यापीति। शरीरव्यापकं स्पर्शग्राहक-

रूपरहित द्रव्य के आश्रित है वही रूप रहित द्रव्य वायु है] (ऐसे ह वायु के चलने पर वृक्षों के पत्तों में जो शब्द सुनाई देता है- वह शब्द यदि किसी रूपवान् द्रव्य के अभिघात से होता तो रूपवान् द्रव्य का प्रत्यक्ष होता-अतः उस अभिघात का कारण कोई रूपरहित द्रव्य ही है सो वही रूपरहित द्रव्य वायु है) (ऐसे ही आकाश में तृण आदि पदार्थ जो उड़ते रहते हैं सो उन्हें धारण करने वाला जो रूपरहित द्रव्य है वही वायु है) (एवं जिस रूपरहित द्रव्य के अभिघात से शाखा—पत्ते इत्यादियों में कम्पन होता है वही रूपरहित द्रव्य वायु है) वायु का प्रत्यक्ष क्यों नहीं होता, यह आगे कहेंगे। वायु दो प्रकार का है—नित्य तथा अनित्य। परमाणुरूप वायु नित्य है-उससे अन्य अनित्य है—तथा अवयव में समवाय सम्बन्ध से रहता है। और वह अनित्य वायु भी तीन प्रकार का है—शरीर-इन्द्रिय-विषय-भेद से। वायवीय शरीर अयोनिज ही होता है—जैसे पिशाच आदि का। परन्तु जलीय, तैजस-तथा वायवीय शरीर पार्थिव भाग से उपष्टंभ (ढक जाने के) कारण उपभोग क्षम होते हैं-तथा जलादि के प्राधान्य से उनमें जलीयत्व आदि की व्यवस्था बनती है। इसमें जो विशेषता है उसे बतलाते हैं कि शरीर में व्यापक तथा स्पर्श का ग्राहक

मत्रापि कारणम्, द्रव्याध्यक्षे" इति कारिकाव्याख्यानवसरे इत्यर्थः। मूले—पूर्ववन्नित्यताद्युक्तमिति। पूर्ववद्=जलवदित्यर्थः। नित्यतादीत्यदिनाऽनित्यत्वपरिग्रहः। उक्तं=बोध्यम् तदेव स्पष्टयति। वायुर्द्विविध इति। अयोनिजमिति सावधारणम्। पिशाचादीनामिति। वायुलोके प्रसिद्धमिति शेषः। अत्र=त्वगिन्द्रिये। यो विशेषः=अधिष्ठानादि। शरीरव्यापकमिति। अत्र च न संयोगसंबन्धावच्छिन्न-शरीरनिष्ठव्याप्यतानिरूपितसंयोगसंबन्धावच्छिन्नव्यापकतावच्छेदकं त्वक्त्वम्, पुरीतत्यां तदसंभवात्। अत एव पुरीतत्यां मनःप्रवेशे ज्ञानानुदयात् ज्ञानसामान्ये त्वङ्मनःसंयोगस्य हेतुत्वमित्याचक्षते। नापि तादात्म्येन शरीरनिष्ठव्याप्यतानिरूपितं तत्। ईदृशव्याप्यतानिरूपितव्यापकत्वस्येन्द्रियमात्रे सत्त्वेन विशेषाभावात्। न च पुरीततिनाड्यवृत्तिसंयोगेन शरीरस्य व्याप्यत्वे बाधकाभावः। तस्यापि कदाचित् केनचिदिन्द्रियेण समं संयोगसत्त्वेनोक्ताविशेषात्। तथापि यद्यत्कालावच्छेदेन पुरीततिनाड्यवृत्तिशरीरसंयोगः, तत्तन्नाड्यवृत्तिसंयोगेन शरीरं वा तत्तत्कालावच्छेदेन त्वक्संयोगः संयोगेन त्वगेवेति कालान्तर्भावेण व्यापकत्वं त्वचो निष्प्रत्यूहम्।

मिन्द्रियं त्वक्। तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैवाऽभिव्यंजकत्वात्, अङ्गसङ्गिसलिलशैत्याभिव्यंजकव्यजनपवनवत् ॥४३॥

प्राणादिस्तु महावायुपर्यन्तो विषयो मतः।
आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ॥४४॥

विषयं दर्शयति प्राणादिरिति। यद्यप्यनित्यो वायुश्चतुर्विधः, तस्य चतुर्थी विधा प्राणादिरित्युक्तमाकरे, तथापि संक्षेपादेव त्रैविध्ययुक्तम्। प्राणस्त्वेक एव हृदादिनानास्थानवशान्मुखनिर्गमादिनानाक्रियाभेदाच्च नानासंज्ञां लभते इति।

आकाशं निरूपयति आकाशस्येति। आकाशकालदिशामेकैकव्यक्तिकत्वादाकाशत्वादिकं न जातिः; किन्तु आकाशत्वं शब्दाश्रयत्वम्। वैशेषिक इति कथनं तु विशेषगुणान्तरव्यवच्छेदाय। एतेन प्रमाणमपि दर्शितम्, तथाहि–शब्दो गुणश्चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वात्, स्पर्शवत्।

इन्द्रियं तु भवेच्छ्रोत्रमकः सन्नप्युपाधितः।

इन्द्रिय त्वक है–और वह वायवीय है। क्योंकि रूपादि के मध्य में स्पर्श का ही अभिव्यञ्जक होने से जैसे व्यजन (पंखे) का पवन शरीर के अङ्गों का सङ्गी (सम्बन्धी) जो स्वेदरूप जल उस जल के ही शैत्य का व्यंजक होता है-तद्वत् ॥ ४३ ॥

प्राणादिवायु से लेकर महावायुपर्यन्त सब वायवीय विषय है। यद्यपि अनित्य वायु चार प्रकार का है–उसका चौथा भेद प्राणादिवायु है–यह आकर (प्रशस्तपादभाष्य) में कहा है–तथापि संक्षेप से यहाँ अनित्य वायु तीन प्रकार का ही कहा है। प्राणवायु यद्यपि एक ही है–तथापि हृदयादि नानास्थानभेद से तथा मुखनिर्गमनादि नानाक्रिया के भेद से उसकी अपान-उदान-इत्यादि नाना संज्ञा (नाम) हो जाते हैं।

आकाश का निरूपण करते हैं। आकाश का शब्द ही विशेषगुण है। आकाश-काल दिशा–ये एक-एक व्यक्ति होने के कारण इनमें आकाशत्वादि जाति नहीं हैं-(क्योंकि एक व्यक्तिमात्र में वृत्ति को जातित्व का खण्डन किया है) किन्तु शब्दाश्रयत्व ही आकाशत्व है–(क्योंकि आकाश शब्दाश्रय है) वैशेषिक यह कथन इसलिये है कि आकाश में शब्द से अतिरिक्त और कोई विशेषगुण नहीं रहता है–(अपितु शब्द ही एक विशेषगुण रहता है) शब्द को आकाश का विशेषगुण कहने से (आकाश के अस्तित्व में) प्रमाण (अनुमानप्रमाण) भी दिखला दिया। तथाहि–शब्द भी स्पर्श की तरह विशेषगुण है क्योंकि चक्षु से ग्रहण के अयोग्य तथा वहिरिन्द्रिय (श्रोत्र) से ग्रहण के योग्य शब्दत्वजाति वाला होने से। (शब्द को जो गुण नहीं मानते जैसे वैयाकरण और मीमांसक-उनके मत का खण्डन करते हैं) दूसरे अनुमान से कि-शब्द किसी द्रव्य में समवायसम्बन्ध से रहता है गुण होने से संयोग की तरह, इस अनुमान से शब्द किसी द्रव्य में समवाय सम्बन्ध से रहता है यह सिद्ध हो गया। अब

एवमपि नेदं लक्षणम्, ईदृशाव्यापकत्वस्य शरीरेपि सत्त्वात्। एतद्वारणायेन्द्रियपदोपादाने च स्पर्शग्राहकत्वविशेषणं व्यर्थम्। वस्तुतस्तु शरीरव्यापकत्वविशिष्टेन्द्रियत्वं स्पर्शग्राहकत्वविशिष्टेन्द्रियत्वं चेति लक्षणद्वयं बोध्यम्। तेन कालान्तर्भावेन तादृशव्यापकत्वाभावेपि न क्षतिः। **स्पर्शग्राहत्वं**=स्पर्शविषयकलौकिकप्रत्यक्षजनकत्वम्। तेन मनसि नातिव्याप्तिः। यद्यपि जन्यविशेषगुणत्वावच्छिन्नं प्रति जन्यज्ञानत्वावच्छिन्नं प्रति वा मनस्त्वेन हेतुतया स्पर्शलौकिकप्रत्यक्षजनकत्वं दुर्वारम्, स्पर्शलौकिकप्रत्यक्षत्वाच्छिन्नकार्यतानिरूपितकारणताविवक्षणे तु असंभवः, परिमाणादिसाधारण्येन द्रव्यसमवेतवृत्तित्वविशिष्टलौकिकविषयतया स्पार्शनत्वावच्छिन्नं प्रति स्वसंयुक्तसमवायेन त्वक्त्वेन हेतुत्वात्। तथापि स्पार्शनत्वव्यापकधर्मावच्छिन्नकार्यतानिरूपितकारणताशून्यत्वे सति स्पार्शनत्वसमानाधिकरणधर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वस्य तदर्थत्वात्। न चानेनैव शरीरादेरपि वारणे कृतमिन्द्रियपदोपादानेनेति वाच्यम्। त्वक्संयोगस्य सन्निकर्षविधया द्रव्यस्पार्शनत्वावच्छिन्नं प्रति कारणत्वात्तत्रातिव्याप्तेरित्यलम्। न च केशनखलोमादीनां त्वगिन्द्रियानाधारत्वादसंभव इति वाच्यम्। तेषां संयोगिद्रव्यत्वेन शरीरत्वाभावात्। **त्वगिति।** अस्य त्वचि स्थितमित्यर्थः। एतेन स्वाभाविकाऽऽवरणरूपं चर्म नेन्द्रियं नापि वायवीयमिति प्रत्युक्तम्। शैत्याभिव्यंजकत्वस्य फलोपधायकत्वस्य सिद्धये—**अङ्गसंगीति।** **अङ्गीसङ्गिसलिलं**=स्वेदः ॥ ४३ ॥

मूले-**प्राणादि**रित्यत्रादिपदग्राह्याः अपानसमानोदानव्यानाः। **हृदादी**त्यादिना—गुद-नाभि कण्ठ-सर्वशरीरप्रतिग्रहः। **मुखनिर्गमादीति।** मुखनासिकाभ्यां निष्क्रमणप्रवेशनादीत्यर्थः। आदिना मलादीनामधोनयनस्य-आहारमाकार्यं, वन्हेरुद्दीपनस्य-उर्ध्वनयनस्य-नाड्यामन्नरसप्रसारणस्य च परिग्रहः। **लभते इति।** तथा च हृन्मात्रावच्छिन्नो वायुः प्राणसंज्ञां लभते इति भावः। एवमन्यत्रापि। न तु संज्ञाभेदेन संज्ञिभेदः—भेदकल्पनायां मानाभावादिति भावः। केचित्तु व्यानादतिरिक्तवायवीयेन्द्रिये मानाभावः, व्यानस्यापि सर्व शरीरव्यापकत्वस्य **"व्यानः-सर्वशरीरगः"** इति वाक्येन कोशकृताऽभिहितत्वात्। न च सर्वशरीरगत्वस्य व्यानेऽभिधानात्सिद्धान्तसिद्धवायवीयेन्द्रियस्य तु तत्तच्छरीरभेदेन भेदोपगमात्कथमभेद इति वाच्यम्। सर्वशरीरग इत्यत्र शरीरपदस्य शरीरावयवपरतयाऽभेदे वाधकाभावात्। तथाचेन्द्रियान्तरकल्पनं निर्युक्तिकमेवेति प्राहुः। आकाशत्वं कालत्वं दिक्त्वं च न जातिः एकव्यक्तिकत्वात्। एकैव व्यक्तिराश्रयो यस्य स एकव्यक्तिकस्तस्य भावस्तत्त्वं तस्मादित्यर्थः। एकव्यक्तिमात्राश्रितत्वादिति हेतुः फलितः। यद्यप्यत्राऽऽकाशत्वं न जातिरित्येव व क्तुमुचितं, कालत्वदिक्त्वयोस्तत्तन्निरूपणावसरे जातित्वनिषेधौचित्यात्, तथापि प्रसंगादत्रैव युगपदभिदधाति **आकाशकालदिशामिति।** प्रसंगश्च स्मृतस्योपेक्षानर्हत्वम्। एकहेतुकानुमितिविषयत्वेन तयोरपि स्मृतत्वं

शब्दो द्रव्यसमवेतः गुणत्वात्संयोगवदित्यनुमानेन शब्दस्य द्रव्यसमवेतत्वे सिद्धे-शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात्सुखवत्। पाकजरूपादौ व्यभिचा-

शब्द किस द्रव्य में समवेत है यह अगाड़ी के अनुमानों द्वारा बतलाते हैं–"शब्दो न स्पर्शवद्विशेषगुणः" इस अनुमान से यह बतलाते हैं कि "शब्द-स्पर्शवाले पृथिवी-जल-तेज-वायु–इन चार का विशेषगुण नहीं है"–इसमें हेतु है कि "अग्निसंयोगासमवायिकारणकत्वाभावेसति" इत्यादि। अर्थात् पृथिव्यादिचतुष्टय के जो विशेषगुण रूप-रसादि हैं उनमें कुछ में तो अग्निसंयोग असमवायिकारण होता है-अतः वे अंग्निसंयोगासमवायिकारणक हैं–अर्थात् पाकज हैं। पाक नाम तेजःसंयोग का है-अग्नि भी तेज ही है। अतः पृथिव्यादिचतुष्टय के रूप-रस-आदि-गुण पाक (अग्निसंयोग) से जायमान हैं–अर्थात् परिवर्त्तनशील हैं–जैसे घट के साथ अग्निसंयोग होने पर उसका पूर्वरूप (श्यामरूप) नष्ट हो जाता है–और रूपान्तर (रक्तरूप) उत्पन्न हो जाता है–अतः घट के रक्तरूप के प्रति अग्निसंयोग असमवायिकारण है। इसी प्रकार

बोध्यम् वारत्रयलेखने गौरवं च स्यादिति ध्येयम्। मूले **वैशेषिकपदस्य** वैयर्थ्यमाशंक्याह **वैशषिक इति कथनं त्विति**। इत्थं च मूले शब्द इत्यस्य सावधारणतया शब्द एवेत्यर्थो बोध्यः। **एतेन**=विशेषगुणत्वकथनेन। **प्रमाणं**=आकाशे इत्यादिः। तच्च-शब्दः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वादित्येवं रूपं बोध्यम्, एतदेव परिशेषानुमानं, **दर्शितम्**-सूचितम्।

अग्रिमानुमाने स्वरूपासिद्धयुधारायाऽऽह **तथाहीति**। बहिरिन्द्रियग्राह्यजातिमत्त्वस्य घटादौ सत्त्वाद् व्यभिचारवारणाय चक्षुर्ग्रहणायोग्येति जातिविशेषणम् अन्यथा जातिमद्विशेषणत्वे बहिरिन्द्रियग्राह्यद्रव्यत्वादिकमादायाऽऽत्मनि व्यभिचारापत्तेः। अत एव रसनाद्ययोग्येति नाभिहितं तत्रैव तद्दोषतादवस्थ्यात्। बहिःपदं चात्मनि व्यभिचारवारणाय। अत्र च चक्षुर्ग्रहणायोग्येत्यस्य चाक्षुषलौकिकप्रत्यक्षाऽविषयेत्यर्थः। तेन घटः शब्दावच्छेदक इत्यलौकिकप्रत्यक्षविषये शब्दे न स्वरूपासिद्धिः। **बहिरिन्द्रियग्राह्येत्यस्य** बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयेत्यर्थः। तेन नात्मादौ व्यभिचारतादवस्थ्यम्। यस्य घटस्य न चाक्षुषं वृत्तं अपि तु त्वाचमेव तत्रैतद्धटत्वस्य तादृशतया व्यभिचारवारणाय जातीति। एतच्चानुमानमग्रिमद्रव्यसमवेतत्वसाधकानुमाने स्वरूपासिद्धिनिरासायेति बोध्यम्। **गुणत्वादिति**। तथाचोक्तपरिशेषानुमाने हेतौ विशेष्यासिद्धिनिरासः। विशेषणासिद्धिनिरासायाह **अग्निसंयोगाऽसमवायिकारणकत्वाभावे सतीति**। अग्निसंयोगकारणत्वाभावे सतीत्येव वाच्यम्। अन्यस्य वैयर्थ्यात्। **जलपरमाणुरूपादौ**, आदिना तैजसरूपपरमाणुरूपपरिग्रहः। **प्रत्यक्षत्वा**दित्यस्य लौकिकप्रत्यक्षविषयत्वादित्यर्थः। बहिरि-

रवारणायाकारणगुणपूर्वकेति । जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति । शब्दो न दिक्कालमनसां गुणः विशेषगुणत्वात् रूपवत्, अन्यत्र भी समझ लेना । परन्तु 'शब्दगुण' ऐसा नहीं है कि पूर्व शब्द का अग्निसंयोग से नाश होकर शब्दान्तर उत्पन्न हो-इसीलिये शब्दस्पर्शवाले जो पृथिव्यादिचतुष्टय-उनका विशेषगुण नहीं है। एवं पृथिव्यादिचतुष्टय के विशेषगुण कारणगुणपूर्वक हैं "कारणगुणैः कार्ये ये गुणा उत्पद्यन्ते ते कारणगुणपूर्वकाः" अर्थात् कारण के गुणों द्वारा कार्य में जो गुण उत्पन्न होते हैं—वे कार्यगुण कारणगुणपूर्वक कहे जाते हैं—जैसे पटका रूप—पटका कारण जो तन्तु—उस तन्तु में जो रूप होगा—उसी रूप के अनुरूप होगा। परन्तु शब्द ऐसा नहीं है—अर्थात् शब्द के प्रति न तो अग्निसंयोग असमवायिकारण होता है—और न 'शब्द' कारणगुणपूर्वक ही उत्पन्न होता है। अतः शब्द में अग्निसंयोगासमवायिकारणकत्वाभावविशिष्ट—अकारणगुणपूर्वकत्वविशिष्ट—प्रत्यक्षत्व हेतु है—क्योंकि शब्द का श्रोत्र से प्रत्यक्ष होता है। दृष्टान्त के लिये सुख है—क्योंकि सुख में भी जैसे तीनों अंशों वाला हेतु विद्यमान है—ऐसे ही पक्ष में (शब्द में) भी जानना—जैसा कि पूर्व में कह चुके हैं। पाकजरूप आदि में व्यभिचारवारण के लिये सत्यन्त दल दिया। [यदि नहीं देंगे तो घट का जो पाकजरूप है वह कारण गुणपूर्वक तो है नहीं-क्योंकि कारण के गुणों द्वारा जहाँ कार्य में गुण उत्पन्न होते हैं—वे ही कारणगुणपूर्वक कहलाते हैं—सो कार्य जो घट उसके रक्तरूपादिगुणों के प्रति—घटका कारण जो कपाल—उसके गुण कारण नहीं हैं—अपितु 'पाक' कारण है। अतः पाकजरूपादि में अकारणगुणपूर्वकत्व भी है—और प्रत्यक्षत्व भी है—इससे हेतु रह गया—और साध्य नहीं है—व्यभिचार हो गया। सत्यन्त दल दिया तो-पाकजरूपादि में सत्यन्तदल नहीं है—क्योंकि वे अग्निसंयोगासमवायिकारणक ही हैं] पटरूपादि में व्यभिचारवारण के लिये—अकारणगुणपूर्वक कहा—कहने से वारण हो गया—कि पटरूप—तन्तुरूपपूर्वक है। जलपरमाणुरूप में व्यभिचारवारण के लिये 'प्रत्यक्षत्व' कहा तो परमाणु का प्रत्यक्ष नहीं होता है—अतः हेतु भी न रहा—साध्य भी न रहा—न व्यभिचारः। शब्द-दिक्-काल-मन-इन तीनों का गुण नहीं है-विशेषगुण होने से—रूप की

न्द्रिययोग्यत्वात्=बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयत्वात्। तेन नात्मविशेषगुणेषु व्यभिचारः। इत्थंच=क्लृप्तानन्तर्भावे च। अयावद्द्रव्यभावित्वेनेति। स्वाश्रयनाशजन्यनाशप्रतियोगि यद्यत्तद्भिन्नत्वेनेत्यर्थः। यावद्द्रव्यभावित्वं चाश्रयनाशनाश्यत्वम्। तथाच शब्दो न वायुगुणः आश्रयनाशानाश्यत्वात्, वायुविशेषगुणानां चाश्रयनाशनाश्यत्वदर्शनादिति भावः। दीधितिकृतस्तु क्लृप्तशब्दनिमित्तकारणभावस्येश्वरस्यैव तत्समवायित्वमात्रं कल्प्यते विशिष्टधर्मिकल्पनापेक्षया धर्मकल्पनायामेव लाघवात्। न च शब्दो जीवजन्यः जीवादृष्टजन्यत्वात् सुखवत् इत्यनुमानेन जीवोपि शब्दसमवायी स्यादिति वाच्यम्। शब्दस्याऽदृष्टजन्यत्वेपि जीवजन्यत्वे साधकाभावात्। न च विनिगमकाभावेन तत्समवायित्वप्रसंगो दुर्वारः, न च जीवानामानन्त्येन स्पष्टमेव विनिगमकमिति वाच्यम्। प्रत्येकं विनिगमकाभावस्य एवमपि दुर्वारत्वात्। न च जीवे तत्कल्पने कारणत्व-

नात्मविशेषगुणः वहिरिन्द्रियग्राह्यत्वात् रूपवत्,—इत्थं च शब्दाधिकरणं नवमं द्रव्यं गगनात्मकं सिद्ध्यति । न च वाय्ववयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्द उत्पद्यतामिति वाच्यम् । अयावद्द्रव्यभावित्वेन वायोर्विशेषगुणत्वाभावात् । तत्र च शरीरस्य विषयस्य चाऽभावादिन्द्रियं दर्शयति इन्द्रियमिति । ननु आकाशं लाघवादेकं सिद्धम्, श्रोत्रं पुनः पुरुषभेदाद्भिन्नं कथमाकाशं स्यादिति चेत्तत्राह एक इति । आकाशः एकः सन्नपि उपाधेः-कर्णशष्कुल्या भेदाद्भिन्नं श्रोत्रात्मकं भवतीत्यर्थः ।

तरह । आत्मा का भी विशेषगुण नहीं है वहिरिन्द्रिय से ग्राह्य होने से रूप की तरह । इस प्रकार शब्द का अधिकरण नवम द्रव्य गगन सिद्ध होता है । प्रश्न–शब्द को कारणगुणपूर्वक मान लिया जाय कि सूक्ष्मशब्द वायु के अवयवों में उत्पन्न होता है–और फिर स्थूल वायु में अपने अनुरूप शब्द को उत्पन्न कर देता है । उत्तर–पृथिवी आदि चतुष्टय के गुण "द्रव्यस्थितिकालपर्यन्तस्थितिमान्" होते हैं–यही यावद्द्रव्यभावित्व है–शब्द ऐसा नहीं है–अतः वायु का विशेषगुण शब्द नहीं है ॥१४४॥

समवायित्वकल्पनाद्वयापाताद् गौरवमिति वाच्यम् । कार्यतावच्छेदककारणतावच्छेदकभेदेन कार्यकारणभावभेदाच्छब्दत्वावच्छिन्नकार्यतानिरूपितकारणताया भिन्नतया ईश्वरेपि तत्कल्पनाया दुर्वारत्वात् । अत उभयोरपि कल्पनाया आवश्यकत्वेन विनिगमकाभाव इति सांप्रतम् । शब्दस्य जीवसमवेतत्वकल्पने मनःसंयुक्तसमवायस्य संन्निकर्षस्य सुखादाविव शब्देपि वृत्तेः शब्दलौकिकमानसापत्तेर्दुर्वारत्वात् । न च संस्कारादीनां प्रत्यक्षापत्तिवारणाय तादात्म्येन संस्काराणां प्रतिवन्धकत्वकल्पनमिव शब्दस्य तथा कल्पने नापत्तिरिति वाच्यम् । ईदृशकल्पनाप्रयुक्तगौरवस्यैव विनिगमकत्वात् ।

स्यादेतत्–संस्कारत्वेन धर्मत्वेनेत्यादिनानाप्रतिवध्यप्रतिवन्धकभावकल्पनापेक्षया लाघवाद्योग्यसुखादिगुणसाधारणजातिविशेषं प्रकल्प्य तादृशविजातीयगुणत्वेनैव मानसं प्रति हेतुताया एवोचितत्यात्, तादृशवैजात्यस्य शब्देऽकल्पनीयत्वेन न मानसापत्तिः । न च धर्मादौ विषयतया प्रत्यक्षापत्तिवारणाय विजातीयगुणत्वेन तादात्म्येन कारणत्वं विजातीयगुणत्वेन प्रतिवन्धकत्वं वेत्यत्रापि गमकाभावः । न च विजातीयगुणत्वेन प्रतिवन्धकत्वकल्पने विजातीयगुणभेदत्वे कारणतावच्छेदकत्वकल्पनायां गौरवम्, विजातीयगुणत्वे कारणतावच्छेदकत्वकल्पने तु लाघवसंभवेन स्पष्टमेव विनिगमकमिति वाच्यम् । विजातीयगुणत्वेन हेतुत्वोपगमे जनकतावच्छेदकलाघवसंभवेपि गुणमानसत्वस्य जन्यतावच्छेदकत्वकल्पनाया आवश्यकतया गुणत्वनिवेशप्रयुक्तगौरवस्य दुःसमाधेयत्वात् । मानसत्वस्यैव जन्यतावच्छेदकत्वोपगमे तु आत्मत्वादावपि विषयतया मानसोत्पत्त्या तादात्म्येन विजातीयगुणाभावेन व्यभिचारप्रसंगः । मानसत्वस्य गुणभेदजन्यतावच्छेदकत्व-

कल्पने तु उक्तव्यभिचाराभावात्। इयान्परं विशेषो-यदस्माकं जनकतावच्छेदके भवतश्च जन्यतावच्छेदके गौरवमिति वाच्यम्। विनिगमकाभावेन प्रतिबन्धकत्वस्य कारणत्वस्य च सिद्धावपि शब्दे प्रतिबन्धकतावच्छेदकवैजात्यस्वीकारेण कारणतावच्छेदकवैजात्यस्वीकारेण वा शब्दमानसस्योभयथापि वारणादिति चेत्। सत्यम्, उभयथा तद्वारणेपि विजातीयगुणभेदत्वेन हेतुत्वे प्रतिबन्धकतावच्छेदकवैजात्यस्य शब्दे कल्पनाया गुरुत्वाज्जीवनिष्ठत्वाभावः। न चानयैव युक्त्या मास्तु प्रतिबन्धकत्वपक्षः, हेतुतापक्षस्तु स्यादेव, तत्पक्षे कल्पनाविरहात्, अतो जीवनिष्ठत्वकल्पनेपि बाधकाभाव इति वाच्यम्। नहि गुणमानसत्वावच्छिन्नं प्रति विजातीयगुणत्वेन हेतुत्वं वक्तुं शक्यम्। गुणमानसवृत्तिजन्यतावच्छेदकवैजात्यस्य निर्विकल्पकावृत्तितया ज्ञानत्वेन सांकर्यात्। एतेन प्रतिबन्धकत्वपक्षोपि निरस्तः। अतश्च विशिष्यैव प्रतिबन्धकत्वकल्पनाया एवावश्यकतया जीवनिष्ठत्वे शब्दान्तर्भावे प्रतिबन्धकत्वकल्पनायां गौरवस्यैव विनिगमकत्वान्न तन्निष्ठत्वसिद्धिः। किं च विजातीयगुणत्वेन हेतुतापक्षे शब्दे लौकिकमानसापत्तिवारणं दुर्वारम्। आत्मसमवेतमानसापादिकायाः सामान्यसामग्र्याः आत्मत्वादाविव सत्त्वात्, आत्मत्वादिना हेतुत्वे तु शब्दस्येश्वरनिष्ठत्वसिद्धिरित्याहुः।

केचित्तु ज्ञानत्वेन सांकर्यवारणाय जनकतावच्छेदकवैजात्यस्य निर्विकल्पकेपि स्वीकारान्नानुपपत्तिः। न च निर्विकल्पकमानसापत्तिः। अनायत्या निर्विकल्पकत्वेन प्रतिबन्धकत्वाङ्गीकारात्। अनन्तप्रतिबध्यप्रतिबन्धकाभावकल्पनापेक्षया ईदृशकल्पनाया एव युक्तत्वात्।

अथवाऽस्तु रसादीनां चाक्षुषापत्तिवारणाय विषयतासंबन्धेन चाक्षुषत्वावच्छिन्नं प्रति विषयतासंबन्धेन चाक्षुषवत्त्वेन हेतुत्वस्वीकारवत्संस्कारादिप्रत्यक्षवारणाय विषयतया मानसत्वावच्छिन्नं प्रति विषयतया मानसवत्त्वेन हेतुत्वाभ्युपगमस्य सयुक्तिकतया तत एव शब्दमानसापत्तेर्वारणात्।

न च विषयस्य प्रत्यक्षे सामान्यतो लौकिकविषयतासंबन्धेन साक्षात्कारवत्त्वेनैव हेतुत्वस्य क्लृप्ततया दृष्टान्तदार्ष्टान्तिके विषयस्य प्रत्यक्षे विषयकारणत्वानुरोधेन तथाकल्पनमिति वाच्यम्। विषयविधयैव चाक्षुषवत्त्वेन हेतुताया व्यवस्थापनीयत्वात्।

अथवा न वयं विषयस्य कारणत्वानुरोधेन तथा हेतुत्वमङ्गीकुर्मः किन्तु ईदृशापत्तिवारणायैवेति नानुपपत्तिरिति शब्दस्य जीवनिष्ठत्वेपि मानसापत्त्यसंभवाद्विनिगमकाभावः। अतश्च क्लृप्तानां विनिगमनाविरहेऽक्लृप्तस्तदाश्रयः सेत्स्यतीति गगननामकं द्रव्यमित्याहुः। तदसत्। ईदृशयुक्त्या शब्दमानसवारणेपि जीवनिष्ठत्वे आत्ममनःसंयोगादीनां फलोपधायकत्वकल्पने गौरवं जागरूकमेव। तव जीवोपधायकत्वमिव ममेश्वरोपधायकत्वकल्पनं न गौरवसंपादकम्। भेर्यादिसंयोगानां तत्कल्पनं तूभयवादिसिद्धमेवेति न तत्कल्पना गौरवापादिका। न चेदृशयुक्त्या जीवनिष्ठत्वाभावेपि दिक्कालनिष्ठत्वमीश्वरनिष्ठत्वं वेत्यत्र विनिगमकाभावेनाऽतिरिक्ताकाशसिद्धिरिति वाच्यम्। दीधितिकृन्मते दिक्कालयोरीश्वरानतिरिक्तत्वात्। न

च मयापि जीवनिष्ठत्वे शब्दस्यात्ममनःसंयोगस्योपधायकत्वं न कल्प्यते इति वाच्यम्। आत्मसमवेतविशेषगुणत्वावच्छिन्नं प्रत्येव हेतुतया शब्दं प्रति तदुपधायकत्वस्यार्थसिद्धत्वात्। इत्थं च जीवनिष्ठत्वकल्पने गौरवादीश्वरे एव तत्कल्पनम्। नन्वेवमाकाशानभ्युपगमे श्रोत्रं क्वान्तर्भूतम्, तदभ्युपगमे तु कर्णविवरावच्छिन्नाकाश एवेति चेत्, अस्मन्मते तादृशविवरावच्छिन्नेश्वर एव तथा स्यादिति न काप्यनुपपत्तिः। शब्दग्रहे तादृशविवरावच्छिन्नाकाशसमवाय इवास्मन्मते तादृशविवरावच्छिन्नेश्वरसमवाय एव ग्राहक इति साम्यात्।

परे तु भेर्यादीनामेव शब्दो गुणः, भेर्यादेस्तवाप्यवच्छेदकत्वस्य भेर्यां शब्द इति प्रतीत्यनुरोधेन स्वीकार्यत्वात्। एवमवच्छेदकतासंबन्धेन शब्दत्वावच्छिन्नं प्रति समवायेन भेरीदण्डसंयोगस्य हेतुत्वकल्पनाया आवश्यकत्वाच्च। मन्मते तु समवायेन शब्दत्वावच्छिन्नं प्रति भेरीतद्दण्डसंयोगानामेव हेतुत्वकल्पनादीश्वरे गगने जीवे वा न तत्समवायित्वं कल्प्यते। न च भेर्यां शब्दसमवायित्वकल्पने भेरीसमवेतनाशत्वावच्छिन्नं प्रति भेरीनाशत्वेन हेतुतायां व्यभिचारः, विनापि भेरीनाशं शब्दनाशादिति वाच्यम्। विद्यमानायां भेर्यां तत्समवेतसंयोगादिनाशात्कालिकेन भेरीनाशविशिष्टतत्समवेतनाशत्वे जन्यतावच्छेदकताया आवश्यकतया तत एव व्यभिचारवारणसंभवात्। न च भेर्यां शब्दसमवायित्वस्वीकारे भेरीचक्षुःसंयुक्तसमवायस्य शब्देपि सत्त्वाच्चाक्षुषापत्तिः। चक्षुःसंयुक्तसमवायस्य रूपादाविव रसादावपि सत्त्वाच्चाक्षुषापत्तिवारणाय चाक्षुषत्वावच्छिन्नप्रतिबन्धकतावच्छेदकवैजात्यस्य रसादौ स्वीकारान्नापत्तिरित्यभिधीयते, तदा मयापि तादृशवैजात्यस्य शब्दे स्वीकारान्न तादृशचाक्षुषापत्तिः। न चैतादृशवैजात्यस्य शब्दे कल्पनायामेव गौरवमिति वाच्यम्। ईदृशकल्पनाया एव युक्तत्वात्, इतरथा गन्धादीनामीश्वरसमवेतत्वं पृथिव्यादेस्तु तदवच्छेदकत्ववारणं दुर्वारं स्यात्। अथवा चाक्षुषत्वावच्छिन्नं प्रति चाक्षुषवत्त्वेन हेतुत्वोपगमादेव न शब्दचाक्षुषापत्तिः। एतेन तादृशवैजात्यस्य भवतः शब्दे कल्पनं, मम तु शब्दसमवायित्वस्येश्वरे कल्पनं, विपरीतं चाऽनेकभेर्यादौ तत्कल्पनप्रयुक्तगौरवं जागरूकमिति परास्तम्। ममापि तादृशवैजात्यस्य तत्राकल्पनात्। तवानेकत्र शब्दावच्छेदकत्वकल्पनाया मम शब्दसमवायित्वकल्पनातुल्यत्वात्। चाक्षुषत्वावच्छिन्नं प्रति विजातीयगुणत्वेन हेतुतापक्षस्तु नातीव साधीयान् इति प्रागेवावेदितम्।

मम तु प्रतिभाति-मास्तु ईश्वरे जीवे वा शब्दसमवायित्वम्, न वा दर्शितदिशा भेर्यादावपि, किन्तु तत्समवायित्वं क्वापि नाभ्युपगन्तव्यम्, मानाभावात्। शब्दस्याऽसमवेतत्वकल्पनाया एव युक्तत्वात्। न च तस्य गुणत्वशालितया समवेतत्वम्, नियमे मानाभावात्। गुणत्वस्यैव तत्रानभ्युपगमाद्वा। चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वस्य गुणत्वव्याप्यत्वेऽनुकूलतर्काभावात्। इतरथा वाय्वाद्यन्यतमं द्रव्यं रूपवत् द्रव्यत्वादित्यनुमानेन रूपसिद्धिप्रसंगः। यदि पक्षान्यत्वस्य तत्रोपाधित्वमित्युच्यते-तदा तुल्यं प्रकृतेपि। न च तस्यासमवेतत्वे भेर्यां

जन्यानां जनकः कालो जगतामाश्रयो मतः।
परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः ॥ ४५ ॥

कालं निरूपयति। जन्यानामिति। तत्र प्रमाणं दर्शयितुमाह

काल का निरूपण करते हैं-जन्यमात्र (कार्यमात्र) का कारण (निमित्त कारण) काल है। काल में "जगताम्" इत्यादि ग्रन्थ से प्रमाण दिखलाते हैं कि वह काल जगत् का आधार है-तथाहि-काल जगत्मात्र का आधार कैसे है यह प्रतीतिप्रमाण

शब्द इति प्रत्ययस्य का गतिः। तत्रावच्छेदकताख्यस्वरूपसंबन्धस्यैव स्वीकरणीयतया तेन संबन्धेन तत्प्रत्ययोपपत्तेः। न चाऽवच्छेदकतासंबन्धावच्छिन्नवृत्तित्वशालिनः संबन्धान्तरावच्छिन्नवृत्तित्वमिति नियमस्य शब्दासमवेतत्वपक्षे भङ्गप्रसङ्गः। इष्टापत्तेः, तादृशनियमस्याऽप्रयोकत्वात्, असमवेतस्यापि शब्दस्य कालिकेन वृत्तित्वाभ्युपगमाच्च। तादृशसंबन्धावच्छिन्नवृत्तित्वशालिनः समवायावच्छिन्नवृत्तित्वमिति नियमस्तु अभावादौ व्यभिचारी अप्रयोजकश्चेत्यवगन्तव्यम्। इदमत्रावधेयम्—समवायेनैव शब्दस्य भेर्यादावभ्युपगमाद् भेर्यादेरेव तत्समवायित्वम्। असमवेतत्वे चाऽवच्छेदकतासंबन्धस्य कल्पनाया एवावश्यकत्वादिति युक्तमुत्पश्यामः। औपनिषदस्तु **तस्मादाकाशः संभूत** इति श्रुत्या आकाशस्येश्वरजन्यत्वमाचक्षमाणाः अनित्यत्वमाहुः। न च लाघवेन नित्यत्वस्य सिद्धतया कथं श्रुतेर्जन्यत्वबोधकत्वसंभव इति वाच्यम्। लाघवस्य प्रमाणानुग्राहकस्य प्रमाणबाधकत्वानुपपत्तेः। लाघवेन नित्यत्वे सिद्धे श्रुतेरन्यथानयनकल्पनमेव युक्तम्, तथाहि ईश्वरस्य कार्यमात्रे जनकस्य न समवायिकारणाद्यनपेक्ष्य कार्यजनकत्वमित्येतद्बोधिका। इत्थं चैवं व्याख्येया श्रुतिः—तस्मादाकाशः संभूत आकाशादिति पूर्वान्वयी। तस्मादीश्वरात्-आकाशात् = आकाशसहकृतात्। आकाशः = शब्दः। आकाशपदस्य शब्दाश्रयशक्तत्वेपि विशेष्ये बाधाद्विशेषणमात्रपर्यवसायित्वात्। संभूतः = उत्पन्नः। वायुर्वायोरित्येकान्वयः। तस्मादित्यनुषज्यते। ईश्वरसहकृताद्वायोः सकाशाद्वायुः संभूत इत्यर्थः। अग्निरग्नेरित्येकान्वयः। उभयत्रापि अग्निपदं तेजोपलक्षकम्। ईश्वरसहकृतात्तेजसस्तेजोत्पत्तिरित्यर्थः। आपोऽद्भ्यः। पूर्ववदेवार्थः। पृथिवीत्यत्रापि पृथिव्या इत्यध्याहारः। यद्वा ईश्वरस्य कार्यजनकत्वेपि निमित्तभूतसहकारेणैव तदुत्पत्तिरित्येकदेशेन बोधयति पृथिवीति। अद्भ्य इति तु काकाक्षिगोलकन्यायेन पृथिवीत्यत्रापि अन्वेति। तथा चायमर्थः—निमित्तभूतजलेभ्यः या पृथिवी संभूता सा तस्मादेव तत्सहकृतादेवेति न काप्यनुपपत्तिरिति कृतमधिकेन। तत्र चेति=आकाशे चेत्यर्थः। **भिन्नमिति**। तथाच चैत्रादिकर्णशष्कुल्यवच्छिन्नमाकाशं चैत्रादिश्रोत्रमित्यर्थः ॥१४४॥

मूले—जन्यानामिति। तथाच कालिकसंबन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नाधिकरणत्वावच्छिन्नकारणत्वं कालस्य

जगतामिति । तथाहि—"इदानीं घट" इत्यादि प्रतीतिः सूर्यपरिस्पन्दादिकं यदा विषयीकरोति, तदा सूर्यपरिस्पन्दादिना घटादेः संबन्धो वाच्यः, स च संबन्धः संयोगादिर्न संभवतीति काल एव तत्संबन्धघटकः कल्प्यते । इत्थं च तस्याश्रयत्वमपि सम्यक् ॥ ४५ ॥

से दिखलाते हैं—"इदानीं घट" "इस समय में घट है" यह प्रतीति सूर्यपरिस्पन्द को विषय करती है तब सूर्य परिस्पन्द (सूर्यगति) के साथ घट का भी कोई सम्बन्ध कहना चाहिये। वह सम्बन्ध संयोग आदि तो हो नहीं सकते (क्योंकि द्रव्यद्रव्ययोरेव संयोगः) अतः ऐसा सम्बन्ध कहना चाहिये कि जिस सम्बन्ध का घटक काल हो। (वह सम्बन्ध है "स्वाश्रयतपन संयोगि संयुक्तत्व" स्वपद से सूर्यपरिस्पन्द—उसका आश्रय तपन (सूर्य) उस सूर्य का संयोगी काल— और काल से संयुक्त हुवा घट—संयुक्तत्व घट में रहा। इस प्रकार सूर्य की क्रिया के साथ घट का सम्बन्ध काल के द्वारा ही होता है—(अतः काल का स्वीकार करना परमावश्यक है) इस प्रकार जगत् का आधार काल है यह बात भी ठीक ही है।

लक्षणम् । अथ कालस्य कार्यमात्रं प्रति निमित्तकारणत्वे किं मानमिति चेत् । "तदुत्पत्त्यधिकरणस्य तदुत्पत्तिहेतुत्वम्, तदुत्पत्तिहेतोश्च तद्धेतुत्वम्" इति नियमस्यैव प्रमाणत्वात् । कालस्य कार्योत्पत्त्यधिकरणत्वं तु अद्य कपाले घटो भविष्यतीति प्रत्ययात् । तथाहि-प्रत्ययोपस्थापितं भविष्यत्वं वर्तमानप्रागभावप्रतियोगित्वम् धात्वर्थश्चोत्पत्तिः । उत्पत्तौ च तादृशप्रतियोगित्वस्यान्वयः । अद्यादिकालस्य कपालस्य चाऽऽधेयतया उत्पत्तावन्वयः । प्राचां मते नामार्थधात्वर्थयोरपि भेदेनान्वयोपगमात् । तथाच कपाले घटो भविष्यतीत्यादौ वर्तमानप्रागभावप्रतियोगिनी या एतत्कपालवृत्तिरद्यादिकालवृत्तिरुत्पत्तिस्तदाश्रयो इति शाब्दबोधः । एवंचाऽत्र तत्तत्कार्योत्पत्त्यधिकरणत्वेन कालो विषयीक्रियते । एवं च तत्तत्कार्यविशेषं प्रति तत्तत्कालविशेषस्य हेतुत्वे सिद्धे "यद्विशेषयो"रित्यादिन्यायेन कार्यमात्रं प्रति कालस्य हेतुतासिद्धेः । **तत्र**=काले । **जगतामाश्रयो मत इति** । कालः सर्वेवानिति प्रतीत्या सर्वाधिकरणत्वेन कालः सिद्ध्यतीति भावः । ननु एतादृशप्रतीतिः दिग्विषयिण्येवास्तु अतिरिक्तकालकल्पने गौरवादिति न केवलमनया प्रतीत्या कालः सिद्ध्यति, परन्तु प्रमाणान्तरेण काले सिद्धे प्रकृतप्रतीतिबलात्सर्वाधारत्वं सिद्ध्येदित्याह **इदानीमित्यादिना** । **संभवतीति** । इतीत्यनन्तरं स्वाश्रयतपनसंयोगिसंयोग एव संबन्धो वाच्यः, तत्रेति शेषः । न चाऽऽकाशमेव तत्संबन्धघटकमास्तामिति वाच्यम् । आकाशदिगात्मनां विनिगमनाविरहेणाऽतिरिक्तकालस्य संबन्धघटकत्वात् । **कल्प्यते** इति । अनुमानं तु इदानीं घट इति प्रतीतिः परंपरासंबन्धविषया विशिष्टबुद्धित्वात् । **इत्थंचेति** । अतिरिक्तकालसिद्धौ चेत्यर्थः । **सम्यगिति** । कालः सर्वेवानिति प्रतीतेरतिरिक्तकालविषयकत्वस्योचितत्वादिति भावः ॥ ४५ ॥

प्रमाणान्तरं दर्शयति परापरत्वेति । परापरत्वबुद्धेरसाधारणं निमित्तं काल एव । परापरत्वयोरसवायिकारणसंयोगाश्रयो लाघवादतिरिक्तः काल एकः कल्प्यते इति भावः। ननु एकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदो न स्यादत आह क्षणादिरिति। कालस्त्वेकोऽप्युपाधिभेदात्

काल का साधक प्रमाणान्तर दिखलाते हैं—"परापरत्व" इत्यादि ग्रन्थ से। (यह अनुभव होता है कि "चैत्र मैत्र से बड़ा है" जब चैत्र बड़ा है तो मैत्र चैत्र से छोटा है—तो इसका यही अर्थ हुआ कि चैत्र में कालिक परत्व है—और मैत्र में कालिक अपरत्व है। वह कालिक परत्वापरत्व बुद्धि सूर्य की परिस्पन्द (क्रिया) के द्वारा ही सम्पन्न हो सकती है—क्योंकि चैत्रपिण्ड के साथ सूर्यपरिस्पन्द का सम्बन्ध अधिक है अतः चैत्र में कालिकपरत्व है (ज्येष्ठत्व है) और मैत्र के साथ कम है— अतः मैत्र में कालिक अपरत्व है (कनिष्ठत्व है) यह हम ऊपर ही कह चुके हैं कि सूर्य की परिस्पन्द का चैत्र के साथ जो सम्बन्ध (स्वाश्रयतपन संयोगी संयुक्तत्व) है—उसका घटक काल ही है। सो उस कालिक परत्वापरत्व का समवायिकारण चैत्र-मैत्र हुवे—और असमवायिकारण उनके साथ काल का संयोग हुआ—उस संयोग का आश्रय काल भी हुआ—इस प्रकार भी संयोगाश्रयतया काल की सिद्धि हो गयी।

वही मूल में कहा है कि–"परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघवादतिरिक्तः कालः कल्प्यते"। प्रश्न–काल यदि एक सिद्ध हो गया तब क्षण, दिन-मास, वर्ष आदि समय का भेद कैसे होगा। उत्तर-काल यद्यपि एक है तथापि उपाधि भेद से क्षण आदि व्यवहार काल में होता है।

परत्वापरत्वबुद्धेरिति। ज्येष्ठे परत्वप्रत्ययः, कनिष्ठेऽपरत्वप्रत्ययः, स च परत्वापरत्वगुणविशेषाधीनः, परत्वापरत्वे साऽसमवायिकारणके भावकार्यत्वात्, असमवायिकारणं च तयोः कालपिण्डसंयोग एवेति परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया कालसिद्धिरिति भावः। "परत्वापरत्वयोः" इत्यस्यैव वक्तुमुचितत्वेपि तद्बुद्धिपर्यन्तानुधावनं कालिकपरत्वापरत्वयोः प्रमाणं दर्शयितुम्। रामः परः, लक्ष्मणोऽपर इति विलक्षणप्रतीत्यैव कालिकपरत्वापरत्वयोः सिद्धिरिति भावः। ननु तथापि आकाशदिगात्ममनोभिः पिण्डसंयोगस्याऽसमवायिकारणत्वं स्यात् किं कालकल्पनयेत्यत आह लाघवादिति। आकाशदिग्भ्यां पिण्डसंयोगस्य असमवायिकारणत्वे जीवात्मभिः प्रत्येकं विनिगमनाविरहादात्ममनसोस्त्वनन्तत्वान्न तथात्वम्, किन्तु लाघवादतिरिक्तः काल एव निरुक्ताऽसमवायिकारणसंयोगाश्रयत्वेन कल्प्यते इति भावः। ननु यदि काल एकः तदा क्षणादिव्यवहारः कथं स्यादित्याशंकते नन्वेकस्येति। समयभेदः = समयभेदव्यवहारः। एकस्मिन् विरुद्धनानाव्यवहारविषयत्वाभावादिति भावः। उपाधित इति। तथाचैकस्यैव कालस्य किंचिद्धर्मविशिष्टस्य क्षणत्वम्, किंचिद्धर्मविशिष्टस्य दिनत्वम्, न तु केवलस्येति भावः।

क्षणादिव्यवहारविषयः । उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म, पूर्वसंयोगावच्छिन्नविभागो वा—पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वा, उत्तरसंयोगावच्छिन्नं कर्म वा ।

यहाँ क्षण की उपाधियाँ चार प्रकार से कही गयी हैं—तथाहि-आप अवयव नाशाधीन अवयवी का नाश करते चले जाइये—त्रसरेणु नाश के लिये द्व्यणुक नाश अपेक्षित है—अब द्व्यणुक नाश कैसे हो यह विचारणीय है। सो परमाणु का तो नाश होगा नहीं—क्योंकि वह नित्य है—अतः द्व्यणुक नाश के लिये १—प्रथम क्षण में क्रिया –२-द्वितीय क्षण में उन दोनों परमाणुओं में उस क्रिया के द्वारा विभाग हो जावेगा (अर्थात् दोनों परमाणु अलग-अलग हो जावेंगे) ३-तृतीय क्षण में विभाग से उस पूर्वसंयोग का नाश होगा—जिस परमाणुद्वय के संयोग से द्व्यणुक बना हुवा है। ४-चतुर्थक्षण में उन दोनों परमाणुवों का किसी उत्तर देश के साथ संयोग हो जावेगा—और द्व्यणुक नाश भी हो जावेगा। ५-फिर पंचम क्षण में क्रिया नाश होगा।

वही मूल में कहा है कि—"क्षणादिः स्यादुपाधितः" उपाधि बतलाते हैं—स्वजन्यविभागेत्यादि। स्वपद से क्रिया—क्रियाजन्य जो विभाग–उस विभाग का प्रागभाव, जिस काल में क्रिया है उस काल में भी है—और क्रिया के पूर्वकाल में भी है—अर्थात् विभाग प्रागभाव जिस काल में विभाग होगा उस विभाग काल से पूर्व के जितने भी काल हैं सब कालों में है—

क्षणत्वव्यवहारौपयिकानुपाधीनाह **उपाधिस्त्विति** । क्रिया—ततो विभागः—विभागात् पूर्वसंयोगनाशः—तत उत्तरदेशसंयोगः इति चत्वारः क्षणाः कल्पनीयाः । तत्र क्रिया प्रथमक्षणः, तत्परिचायकोपाधिमाह **स्वजन्येति** । स्वं क्रिया तज्जन्यो यो विभागस्तत्प्रागभावः क्रियाक्षणे तादृशप्रागभावावच्छिन्नं कर्म प्रथमक्षणव्यवहारयोग्यम्। घटगतैकक्रियानाशोत्तरोत्पन्नतत्समवेतक्रियान्तरजन्यविभागान्तरप्रागभावविशिष्टस्य प्रथमकर्मणः क्षणचतुष्टयस्थायिनः क्षणत्वापत्तिरतः स्वजन्येति। द्वितीयक्षणस्य प्रथमक्षणत्वापत्तिवारणाय प्रागभावेति। तथाच स्वजन्यविभागप्रागभावावच्छिन्नं यत्स्वं तदेव प्रथमक्षणव्यवहारौपयिकोपाधिरिति भावः। नन्वेव प्रथमक्षणे क्षणव्यवहारोपपादनेपि द्वितीयक्षणे कथं तदुपपादनीयम्, तत्र क्रियाजन्यविभागोत्पत्त्या विभागप्रागभावाऽसंभवात्। न च तत्र द्वितीयक्षणोत्पन्नक्रियान्तरस्यैव स्वजन्यविभागप्रागभावविशिष्टस्य क्षणत्वमिति वाच्यम। प्रतिक्षणं क्रियोत्पत्तौ मानाभावात्, अतस्तत्रापि क्षणव्यवहारोपपादकमुपाधिमाह **पूर्वसंयोगेति** । विभागमात्रस्योपाधित्वे विभागोत्तरकालेपि द्वितीयक्षणत्वापत्तिः, पूर्वसंयोगमात्रस्योपाधित्वे विभागपूर्वकालेपि द्वितीयक्षणत्वापत्तिरत उभयोपादानम्। स्वजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्वजन्यविभाग इत्यर्थः। स्वपदद्वयं तत्तत्क्रियापरम्। स्वजन्यविभागनाश्यत्वविशेषणेन-स्वजन्यत्वनिवेशनेन च स्वजन्यविभागस्योदासीनपूर्वसंयोगविशिष्टस्य द्वित्रिक्षणवृत्तित्वेपि, उदासीनविभागस्य स्वजन्यविभागनाश्यसंयोग-

न चोत्तरसंयोगानन्तरं क्षणव्यवहारो न स्यात् इति वाच्यम्। कर्मान्तरस्यापि सत्त्वादिति। महाप्रलये क्षणादिव्यहारो यद्यस्ति तदाऽनायत्या ध्वंसेनोपपादनीय इति। दिनादिव्यवहारस्तु तत्तत्क्षणकूटैरेवेति।

तब क्रियाकाल भी विभागकाल का पूर्वकाल है—सो क्रियाकाल में भी विभाग प्रागभाव वर्त्तमान है—"क्रियाकाल" इस शब्द का अर्थ है क्रियात्मक जो काल–अर्थात् क्रिया (कर्म) रूप जो उपाधि तादृश उपाधिरूप जो काल–सो वह कर्मात्मककाल विभाग प्रागभाव से अवच्छिन्न (युक्त) है। वह स्वजन्याविभागप्रागभावावच्छिन्नकर्मरूप उपाध्यात्मक काल वही काल है जिस काल में परमाणु में क्रिया हुयी—अतः स्वजन्यविभागप्रागभावावच्छिन्न-जो कर्म-तादृश कर्मरूप जो उपाधि-तादृश उपाधिरूप काल का नाम ही एक क्षण है।

इसी प्रकार परमाणु में क्रिया होने के बाद (द्वितीय क्षण में) परमाणुद्वय में विभाग होता है—विभाग होने के पश्चात् "पूर्वसंयोगनाश" होता है—परन्तु पूर्वसंयोगनाशकाल से पूर्वकाल में पूर्वसंयोग से अवच्छिन्न (युक्त) होकर विभाग केवल एक क्षण ही रह सकता है—अतः वह विभाग भी एक क्षण का उपाधि है। उसके बाद तृतीय क्षण में पूर्वसंयोग नाश होता है—और उसके अग्रिम क्षण में अर्थात् चतुर्थ क्षण में उन परमाणुद्वय का उत्तरदेश के साथ संयोग होता है—अर्थात् उत्तर संयोग होता है—परन्तु तृतीय क्षण में अर्थात् पूर्व संयोगनाश क्षण में उत्तरसंयोग का प्रागभाव पूर्वसंयोगनाश से अवच्छिन्न होकर बैठा है—अतः पूर्वसंयोग नाशावच्छिन्नोत्तर संयोगप्रागभाव भी एक ही क्षण हुवा–अर्थात् उसे भी क्षण का उपाधि कह सकते हैं। चतुर्थक्षण में परमाणु द्वय का उत्तर देश के साथ संयोग होता है और कर्म भी चतुर्थक्षण में है—क्योंकि क्रिया (कर्म) का नाश तो पंचमक्षण में होगा— सो चतुर्थक्षण में कर्म उत्तर संयोग से अवच्छिन्न होकर है—अतः उत्तर संयोग वच्छिन्ना कर्म भी एक क्षण का उपाधि बन गया। प्रश्न – उत्तर संयीग के बाद क्षण व्यवहार नहीं बनेगा—क्योंकि पंचमक्षण में क्रिया भी नष्ट हो जाती है। उत्तर— उस क्रिया के विनाश के बाद परमाणु में क्षणव्यवहार का नियामिका दूसरी क्रिया होगी। प्रश्न—कर्म एवं विभाग-आदि उपाधियाँ ही यदि क्षण व्यवहार नियामिका हैं तो महाप्रलय में क्षण व्यवहार न बन सकेगा—क्योंकि महाप्रलय में कोई भी क्रिया नहीं है। उत्तर–महाप्रलय में भी यदि क्षण व्यवहार होता हो तो अगत्या अनित्य पदार्थों की ध्वंसरूप उपाधि के द्वारा ही वह उत्पन्न हो सकेगा। वस्तुतः "क्षणादिव्यवहारो यद्यस्ति" यहाँ यदि पद से यह सूचित होता है कि नैयायिकों के यहाँ महाप्रलय ही नहीं होता है—यदि होवे भी तो उसमें क्षणव्यवहार नहीं होता है। दिन आदि का व्यवहार उन-उन क्षणों के समुदायविशेषों से होता है।

विशिष्टस्य तथात्वेऽपि न क्षतिः। तृतीयक्षणे तदुपपादकोपाधिमाह **पूर्वसंयोगनाशेति**। पूर्वसंयोगनाशस्योत्तरक्षणादावपि सत्त्वादुक्तं **उत्तरसंयोगप्रागभावो वेति**। उत्तरसंयोगप्रागभावस्य पूर्वपूर्वक्षणादावपि सत्त्वात्**पूर्वसंयोगनाशावच्छिन्नेति**। स्वजन्यविभागजन्यपूर्वसंयोगनाशविशिष्टस्वजन्योत्तरसंयोगप्रागभाव इति तदर्थः। स तृतीयक्षणोपाधिरित्यर्थः। न च पूर्वसंयोगनाशक्षणे एव कथं नोत्तरसंयोग इति

वाच्यम् । उत्तरसंयोगे पूर्वसंयोगस्य प्रतिबन्धकत्वात् । अथ पूर्वसंयोगोत्तरसंयोगयोः केन रूपेण प्रतिबध्यप्रतिबन्धकभावः । न चाऽवच्छेदकतासंबन्धेनोत्तरसंयोगं प्रति अवच्छेदकतासंबन्धेन पूर्वसंयोगः प्रतिबन्धकः, तेन सत्यपि पृष्ठादौ वस्त्रसंयोगे शरे च पुंखजादिसंयोगे शरीरशरकर्मणा न संयोगानुपपत्तिरिति वाच्यम् । कारणाकारणस्य-संयोगजन्ये कार्याकार्यसंयोगे व्यभिचारात्, शाखादौ यदवच्छेदेनाङ्गुल्यादिसंयोगस्त-दवच्छेदेनैव हस्तादिसंयोगोदयात् । एवमंगुल्यादौ यत्सूक्ष्मभागावच्छेदेन शाखादि-संयोगस्तदवच्छेदेनैव हस्तादावपि शाखादिसंयोगोदयाच्च । अवयवस्य वाऽवयवावय-वादेरपि अवयनिष्ठसंयोगावच्छेदकत्वात् । अथ कर्मजन्यसंयोगं प्रति उक्तप्रत्या-सत्त्या संयोगत्वेन प्रतिबंधकत्वम् । न चैवं मूलावच्छेदेन स्तंभादिसंयोगवत्त्वे दण्डादेः सत्यपि स्तंभाद्यग्रावच्छेदेन देशान्तरसंयोगापत्तिरिति वाच्यम् । मूला-वच्छेदेनैव तत्तद्देशान्तरसंयोगानभ्युपगमात्, अग्रावच्छेदेन देशान्तरसंयोगस्य सर्वसिद्धत्वादिति चेन्न । यत्र दण्डादौ पूर्वसंयोगविनाशकाले उत्तरदेशारंभकावयवेन समं संयोगोत्पत्तिः—उत्तरदेशोत्पत्तिश्च ततस्तदवयवसंयोगावच्छेदकावच्छेदेनैव दण्डादेरुत्तरदेशसंयोगस्तत्र व्यभिचारात् । न च तत्राऽवयवसंयोगज एवोत्तरसंयोगो न तु कर्मज इति वाच्यम् । स्वजन्यसंयोगस्यैव कर्मनाशकतया तत्कर्मणो यावदाश्रय-मवस्थानप्रसंगात् । किं च भूतलाद्युत्तरदेशोपरि सत्यपि गगनादिसंयोगे निष्क्रियजल-तेजोवायुघृतादिसंयोगे च घटादिसंयोगोदयाद्व्यभिचारः । अपि च यत्र पूर्वदेश-संयुक्तांगुल्यां क्रिया ततोऽङ्गुलीपूर्वदेशसंयोगनाशः हस्तपूर्वदेशसंयोगः ततोऽङ्गुल्यास्त-स्मिन्नेव पूर्वदेशेऽवच्छेदकान्तरे पुनः संयोगोऽङ्गुलीपूर्वदेशविभागात् हस्तपूर्वदेश-विभागश्च तत्राङ्गुल्याः पुनः पूर्वदेशसंयोगं प्रति हस्तपूर्वदेशसंयोगस्याङ्गुल्या यस्तत्सूक्ष्मभागावच्छेदेन पुनः पूर्वदेशसंयोगस्तत्सूक्ष्मभागावच्छेदेनैव वर्तमानस्य प्रतिबन्धकत्वापत्तौ च क्षणद्वयापलापापत्तेः ।

अथ तदीयकर्मजनितसंयोगं प्रति उक्तप्रत्यासत्त्या आरंभकसंयोगातिरिक्ततन्नि-ष्ठसंयोगत्वेन प्रतिबन्धकत्वमतो न किंचेत्याद्युक्तदोषद्वयावकाशः । आरंभकसयोगाति-रिक्तत्वविशेषणात्तन्तूनां सत्यपि आरंभकसंयोगे तदविरोधिकर्मणा अप्यन्तरे आरंभ-कसंयोगावच्छेदकावच्छेदेनैव जलालोकादिसंयोगोदयेपि न व्यभिचारः । तत्रारंभक-संयोगनाशोपगमे द्रव्यनाशप्रसंगात् इति चेन्न ।

स्तिमितवस्त्रादौ सत्यपि अभिमुखावच्छेदेन जलघृतादिसंयोगे उत्तरसंयोगेद-यात्, पृष्ठलग्नवस्त्रे चाभिमुखावच्छेदेन शरीरसंयोगे सत्त्यपि शरीरवस्त्रयोरप्यन्तरे वस्त्रकर्मणा जलालोकगगनादिना संयोगोदयाच्च । न च तत्रापि विभागात्तत्तत्संयोग-नाशः कल्प्यते इति सान्निध्यवलाच्च नोपलभ्यत इति वाच्यम् । तथासति संयुक्तद्रव्य-मात्रस्यैव देशान्तरगमनबाधापत्त्याऽनुभवविरोधप्रसंगात् । उच्यते । तदीयकर्मजनित-संयोगत्वावच्छिन्नं प्रति क्रियाविरहविशिष्टतन्निष्ठसंयोगत्वेन प्रतिबन्धकत्वम् । उत्तरदेशोपरि निष्क्रियजलालोकादिसंयोगेपि अन्यदीयकर्मणा संयोगोत्पादात्, शाखायामंगुलीसंयोगसत्वेपि अङ्गुलीसंयोगजन्यहस्तसंयोगाच्च व्यभिचारवारणाय तदीयकर्मजनतेति । स्तिमितवस्त्रादौ जलादिसंयोगः पृष्ठलग्नवस्त्रजत्वादौ शरीर-

शरादिसंयोगः न क्रियाविरहविशिष्टः वस्त्रजलादिक्रियोत्पत्तिदशायां तत्संयुक्तजलादिशरीरशरादेरपि सक्रियत्वात्। न च तदानीं तेषां सक्रियत्वेपि यदाकदाचित्क्रियाविरहसत्त्वादेव तद्विशिष्टत्वमिति वाच्यम्। क्रियाविरहविशिष्टत्वेन प्रतिबन्धकतया यदाकदाचित्क्रियाविरहसत्त्वेपि तदानीं विशिष्टाभावसत्त्वात्। संयोगस्य क्रियाविरहविशिष्टत्वं चाऽवच्छेदकताघटितसामानाधिकरण्यसंबन्धेन, तेन क्रियाया अव्याप्यवृत्तित्वेपि न क्षतिरिति।

स्वतन्त्रास्तु तदीयकर्मजनितसंयोगत्वावच्छिन्नं प्रति तन्निष्ठाऽऽत्मसंयोगत्वेनैव प्रतिबन्धकत्वम्, लाघवात्। न च गगनादिकमादाय विनिगमनाविरह इति वाच्यम्। गगनत्वादेरुपाधितया आत्मत्वस्य च जातितया लाघवस्यैव विनिगमकत्वात्। न च पृथिवीजलतेजःसंयोगमादाय विनिगमनाविरह इति वाच्यम्। स्तिमितवस्त्रादौ सत्यपि घृतजलादिसंयोगे भूतलादिसंयोगोदयात्, पृष्ठलग्नवस्त्रजलादौ सत्यपि शरीरशरादिसंयोगे कपालादौ सत्यप्यारंभककपालाद्यन्तरसंयोगे चाभ्यन्तरे जलाऽऽलोकगगनादिसंयोगोदयाच्च व्यभिचारात्, सर्वत्र पृथिव्यादिसंयोगकल्पनाप्रसंगाच्च। क्रियामात्रस्याऽऽत्मसंयोगासमवायिकारणकतया आत्मनो विभुतया चाऽऽत्मसंयोगस्य सर्वत्राऽवश्यं सत्त्वादिति प्राहुः।

अन्ये तु तदधिकरणावच्छिन्नसंयोगस्तदन्याधिकरणावच्छिन्नसंयोगं प्रति प्रतिबन्धकः, इहाऽनयोः संयोग इति प्रतीतेः संयोगाश्रयोभयाधिकरणस्यापि संयोगावच्छेदकत्वात्। समानावच्छेदकत्वं च प्रत्यासत्तिः। नचैवंसति पूर्वदेशसंयोगे तदन्याधिकरणावच्छिन्नत्वविशिष्टसंयोगो मा जावताम्, किन्तु संयोगसामान्यापत्तिर्दुर्वारैवेति वाच्यम्। तत्तत्क्रियाव्यक्तेस्तत्तद्देशावच्छिन्नसंयोगव्यक्तौ एव हेतुतया विशेषसामग्रीविरहादेवापादनाऽसंभवादित्याहुरित्यन्यत्र विस्तरः।

ननु कर्मजसंयोगं प्रति पूर्वदेशविभाग एव हेतुरस्तु किं पूर्वसंयोगस्य प्रतिबन्धकत्वेन। तदीयकर्मजनिततदवच्छिन्नसंयोगत्वावच्छिन्नं प्रति कालिकसामानाधिकरण्यप्रत्यासत्त्या क्रियाविरहविशिष्टतदवच्छिन्नतन्निष्ठसंयोगाभावत्वेन, तदवच्छिन्नतन्निष्ठात्मसंयोगाभावत्वेन वा कारणत्वमपेक्ष्य तादृशप्रत्यासत्त्या क्रियाविरहविशिष्टतदवच्छिन्नतन्निष्ठविभागत्वेन तदवच्छिन्नतन्निष्ठात्मविभागत्वेन वा कारणत्वे कारणतावच्छेदकशरीरलाघवात्, विभागस्य हेतुत्वे कालिकविशेषणतामात्रस्य संयोगाभावस्य हेतुत्वे च प्रतियोग्यनधिकरणवृत्तित्वविशिष्टकालिकविशेषणत्वस्य कारणत्वदिशि प्रत्यासत्तिघटकतया प्रत्यासत्तिलाघवाच्च। यत्र पटस्य मूलाऽग्रावच्छेदेनाऽऽत्मना क्रमिकसंयोगद्वयं- ततोऽग्रावच्छेदेन पटस्य क्रियया ऽग्रावच्छेदेन पटात्मविभागः—मूलावच्छेदेन पटे कर्मोत्पत्तिश्चेत्येकः कालः—तत्र तदग्रिमक्षणे एव मूलाग्रोभयावच्छेदेन पटस्योत्तरदेशसंयोगापत्तिः, अग्रावच्छेदेन पटे आत्मविभागसत्त्वादतस्तदवच्छिन्नेति विभागसंयोगयोर्विशेषणम्, विशिष्टान्तस्य विभागविशेषणत्वादालोकादिकर्मजनिताऽऽलोकादिविभागसत्त्वेपि निष्क्रियवृक्षादिरूपपूर्वदेशविभागोत्पत्तिसमये नोत्तरसंयोगोत्पत्तिः। न च विभागस्य हेतुत्वे पूर्वसंयोग-

नाशसमये एवोत्तरसंयोगापत्तिरिति वाच्यम्। क्षणैकविलंबस्य शपथनिर्णेयत्वादि ष्टापत्तेः सुकरत्वात्। यत्र पूर्वसंयोगनाशोत्पत्तिसमये आश्रयनाशसामग्री तत्राऽनन्तसंयोगादिकल्पनायाश्च फलमुखत्वात्।

अथ यत्र विभागमजनित्वैव क्रियया संयोगो जन्यते तत्र विभागो व्यभिचारी संयोगात्यन्ताभावस्तु तत्राप्यस्ति-तद्यथा कपालक्रियया कपालात्मविभागकाले कपाले वेगघटयोरुत्पत्तिः तदनन्तरं तेन वेगेन घटे वेगोत्पत्तिः—कपालात्मसंयोगनाशश्चेत्येकः कालः। तदानीं च कपालात्मसंयोगान्न घटात्मसंयोगः विनश्यतोऽसमवायिकारणत्वाभावात। अथ वेगाद् घटे कर्म ततस्तेन कर्मणा विनैव विभागं घटोत्तरसंयोगः, संयोगं विना विभागाऽसंभवात्। न च क्रियामात्रस्यादृष्टवदात्मसंयोगासमवायिकारणकत्वनियमात्तेन विना कथं घटे वेगात्कर्मेति वाच्यम्। तादृशनियमे मानाभावादिति चेन्न।

तावता आत्मविभागमात्रस्य कारणत्वपक्षे व्यभिचारेपि पूर्वदेशमात्रविभागस्य कारणत्वपक्षे व्यभिचाराभावात्। घटे वेगोत्पत्तिसमये अन्ततो वाय्वादिक्रियया वाय्वादिनापि संयोगसंभवात्तेन समं विभागं जनयित्वा एवोत्तरसंयोगजननात्, तदानीं वाय्वादिसंयोगविभागादिकल्पनायाश्च फलमुखत्वात्, कारणाकारणसंयोगात्मकाऽसमवायिकारणस्य कार्यसहवर्त्तितया हेतुत्वे मानाभावेन कपालात्मसंयोगनाशकाले घटात्मसंयोगोत्पत्तौ बाधकाभावेनात्मविभागपक्षेपि व्यभिचारविरहाच्च। न च कारणसंयोगस्य पूर्ववर्त्तितामात्रेण हेतुत्वे विनश्यदवस्थतज्जन्यानन्तसंयोगविभागतद्ध्वंसतत्कार्यकारणभावकल्पनापत्त्या तदपेक्ष्य कार्यसहवर्त्तितया तस्य कारणत्वमेवोचितमिति वाच्यम्। तस्य फलमुखत्वात्। मैवम्, फलमुखगौरवस्यापि दोषताया भट्टाचार्यैः स्वहस्तितत्वात्। पूर्वसंयोगनाशक्षणे एवोत्तरसंयोगाभ्युपगमे विभागस्यापि कारणत्वे मानाभावाच्च, क्षणैकविलंबस्य शपथनिर्णेयतया विभागोत्पत्तिसमये एवोत्तरसंयोगोत्पत्तौ इष्टापत्तेः सुकरत्वात्। किंच सामान्यतः क्रियाविरहविशिष्टतदवच्छिन्नतन्निष्ठविभागत्वेन हेतुत्वपक्षे कारणाकारणविभागजन्यनिष्क्रियजलालोकदादिविभागमादाय निष्क्रियवृक्षाद्यात्मकपूर्वदेशसंयोगसत्त्वेपि वेगोत्पत्तिसमये उत्तरसंयोगापत्तेः, निष्क्रियजन्यालोकाद्यात्मकपूर्वदेशसंयोगसत्त्वेपि कारणाकारणविभागजन्यनिष्क्रियजलालोकादिविभागमादाय निष्क्रियवृक्षादिविभागमादायोत्तरसंयोगापत्तेश्चेति संक्षेपः। चतुर्थक्षणोपपादकमुपाधिमाह **उत्तरसंयोगेति**। उत्तरसंयोगमात्रस्योपाधित्वे पंचमादिक्षणानामपि चतुर्थक्षणत्वापत्तिः, क्रियामात्रस्योपाधित्वे क्षणचतुष्टयस्य चतुर्थक्षणत्वापत्तिरत उभयोपादानम्। स्वजन्यसंयोगावच्छिन्नं स्वमेवोपाधिरिति भावः। **कर्मान्तरस्यापीति**। पंचमक्षणे पुनः कर्मान्तरमुत्पद्यते तदेव प्रथमक्षणोपाधिः, एवं पूर्ववच्चत्वारः क्षणाः कल्पनीया इत्याशयः। ननूक्तक्षणत्वस्य महाप्रलयेऽनुपपत्तिः, तत्र कर्मादेरभावादत आह **महाप्रलये इति**। **ध्वंसेनैवेति**। स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिक्रियावद्ध्वंस एवोपाधिः, तद्विशिष्टकाल एव क्षणव्यवहारविषय इति भावः।

दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ॥ ४६ ॥
उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक् ।

दिशं निरूपयति दूरान्तिकेति। दूरत्वमन्तिकत्वं च दैशिकं परत्वमपरत्वं बोध्यम्। तद्बुद्धेरसाधारणं बीजं दिगेव। दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया लाघवादेका दिक् सिद्ध्यतीति भावः ॥ ४६ ॥

ननु यद्येकैव दिक् तदा प्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यते इत्यत आह उपाधीति। यत्पुरुषस्योदयगिरिसन्निहिता या दिक् सा तस्य प्राची। एवमुदयगिरिव्यवहिता या दिक् सा प्रतीची। एवं यत्पुरुषस्य सुमेरुसन्निहिता या दिक् सोदीची। तद्व्यहिता या दिक् सा त्ववाची। "सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थित" इति नियमात्।

आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ॥ ४७ ॥

आत्मानं निरूपयति आत्मेन्द्रियाद्यधिष्ठातेति। आत्मत्वजातिस्तु सुखदुःखादिसमवायिकारणतावच्छेदकतया सिद्ध्यति। ईश्वरेपि सा जाति-

दिशा का निरूपण करते हैं—पदार्थों में दूर तथा समीप बुद्धि का कारण एक तथा नित्य दिशा कही है। दूरत्व और अन्तिकत्व का अर्थ है दैशिक परत्व और अपरत्व–सो उस दैशिक परत्वापरत्वबुद्धि का असाधारण कारण दिक् ही है। दैशिकपरत्वापरत्व का असमवायिकारण जो दिग्देशसंयोग उसका आश्रय दिशा है—अतः दिशा की सिद्धि हो गयी। प्रश्न—दिशा तो एक ही है तब उसमें प्राची-प्रतीची आदि व्यवहार कैसे उत्पन्न होगा। उत्तर—दिशा एक है तो भी उपाधिभेद से उसकी प्राची-प्रतीची आदि संज्ञायें हो जाती हैं। उपाधि बतलाते हैं कि जिस पुरुष की उदयाचल के पास जो दिशा हो उसके लिये वह पूर्व दिशा कहलाती है—एवं ठीक उसके व्यवहित (पीठ पीछे की) जो दिशा पश्चिम हुई। ऐसे ही जिस पुरुष की सुमेरुपर्वत के पास जो दिशा हो उसके लिये वह उत्तर दिशा हुवी—और ठीक उसके व्यवहित (पीठ पीछे की) जो दिशा वह दक्षिण हुई। क्योंकि सुमेरुपर्वत जम्बूद्वीप के जो भारत आदि ६ वर्ष (खण्ड) हैं—उन सबके हमेशा उत्तर भाग में ही रहता है।

आत्मा का निरूपण करते हैं—आत्मा इन्द्रिय–शरीर आदि का अधिष्ठाता (धारण करनेवाला–नियन्त्रण करने वाला) है। क्योंकि करण सर्वदा सकर्त्तृक होता है। सुख-दुःखादि का समवायिकारण जब कि आत्मा है –तो समवायिकारणतावच्छेदकतया आत्मत्वजाति

दैशिकपरत्वापरत्वे असमवायिकारणजन्ये भावकार्यत्वाद् घटवत्। असमवायिकारणं च दिक्पिण्डसंयोग एव तदाश्रयतया दिक् सिद्ध्यतीति भावः ॥ ४६ ॥

ननु आत्मत्वजातौ मानाभावः—मनःसंयोगादिसन्निकर्षस्य कारणतावच्छेदके आत्ममनःसंयोगनिष्ठाऽऽत्मविशेषगुणाऽसमवायिकारणतावच्छेदके चाऽऽत्मत्व-

रस्त्येव, अदृष्टादिरूपकारणाभावाच्च न सुखाद्युत्पत्तिः, नित्यस्य स्वरूपयोग्यस्य फलावश्यंभावनियम इत्यस्याप्रयोजकत्वात्।

परे तु ईश्वरे सा जातिर्नास्त्येव, प्रमाणाभावात्। न च दशमद्रव्यत्वापत्तिः, ज्ञानवत्त्वेन विभजनादित्याहुः।

की सिद्धि हो गयी। वह आत्मत्वजाति ईश्वर में भी है। प्रश्न—सुख-दुःखादि समवायिकारणतावच्छेदकतया सिद्ध जो आत्मत्वजाति वह जब कि ईश्वर में है तो ईश्वर में सुख-दुःखादि की उत्पत्ति होनी चाहिये। उत्तर—सुख-दुःख आदि का कारण जो अदृष्ट—वह ईश्वर में नहीं है—अतः ईश्वर में सुख-दुःख आदि की उत्पत्ति नहीं होती है। प्रश्न—ईश्वर में भी सुख-दुःख आदि की स्वरूपयोग्यत्वरूपा कारणता मान ली जावे—रहा यह कि ईश्वर में यदि सुख-दुःख आदि की कारणता मान ली—तो ईश्वर की स्थिति नित्य होने के नाते सर्वदा रहेगी—तब उसमें कभी सुख-दुःख आदि कार्योत्पत्ति अवश्य ही होनी चाहिये—क्योंकि "नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावः" ऐसा नियम है। उत्तर—इस नियम का जल परमाणु में व्यभिचार देखा जाता है—क्योंकि जलीयपरमाणु में स्नेह की स्वरूपयोग्यत्वरूपा कारणता होने पर भी स्नेह की उत्पत्ति परमाणु में नहीं मानते—कारण कि जलपरमाणु में स्नेह नित्य है—अतः "नित्यस्यस्वरूपयोग्यत्वे" यह नियम अप्रयोजक है। दूसरे नैयायिक लोगों का कहना है कि सुख-दुःखादि समवायिकारणतावच्छेदकतया सिद्ध जो आत्मत्वजाति—वह ईश्वर में नहीं है—क्योंकि कोई प्रमाण नहीं। प्रश्न—तब ईश्वर को दशमद्रव्य मानना होगा। उत्तर—नहीं—ज्ञानवत्त्वेन विभाग कर दिया जायगा—अर्थात् ज्ञानवान् जो होगा वही आत्मा—सो ज्ञानवान् जीवात्मा भी है और ईश्वर भी है। इस प्रकार ज्ञानवत्त्वेन दोनों आत्मा का संग्रह हो जायगा। इन्द्रियादीति—इन्द्रियों में शरीर में चैतन्य (ज्ञानवत्त्व) का सम्पादक परम्परया आत्मा ही है—(अभिप्राय यह है कि शरीर में और इन्द्रियों में वास्तविक में चैतन्य नहीं है—उनमें जो चैतन्य की प्रतीति होती है वह परम्परा से अर्थात् इन्द्रियों में करणतासम्बन्ध से और शरीर में अवच्छेदकतासम्बन्ध से होती है। क्योंकि शरीर और इन्द्रिय जड़ हैं—उनमें चैतन्य का सम्पादन आत्मा के द्वारा ही होता है।

स्याऽप्रवेशेन सन्निकर्षनिष्ठकारणतावच्छेदकतया आत्ममनःसंयोगनिष्ठाऽसमवायिकारणतावच्छेदकतया च तदसिद्धेः, तत्तदात्मत्वस्य आत्मवृत्तितत्तद्व्यक्तित्वरूपतया आत्मत्वाघटितत्वात्। आत्मतत्समवेतादिलौकिकमानसप्रत्यक्षं प्रति तादात्म्यसमवेतत्वादिसंबन्धेनात्मत्वेन सामान्यतः कारणत्वस्य सन्निकर्षविचारावसरे निराकरिष्यमाणत्वात्तादृशकारणतावच्छेदकतयापि तत्सिद्धेर्दुर्वचत्वात्। परात्मनः परस्यायोग्यतयाऽनुगतप्रत्यक्षस्यैवाऽसिद्धत्वेन ततोपि तत्सिद्धेर्दुर्वचत्वात्। वेदपुराणादौ आत्मव्यवहारस्य च ज्ञानादिमत्त्वेनैव संभवात्। न चाऽऽत्मत्वविशिष्टलौकिकविषयतासंबन्धेन अहं सुखीत्यादिमानसत्वावच्छिन्नं प्रति मनःसंयोगादिसन्निकर्षस्य हेतुतया सन्निकर्षकार्यतावच्छेदकसंबन्धघटकतया तत्सिद्धिरिति वाच्यम्।

विजातीयसंयोगत्वादिना सन्निकर्षस्य हेतुत्वनये वस्तुगत्या आत्मनिष्ठत्वोपलक्षितस्य लौकिकविषयत्वस्य कार्यतावच्छेदकसंबन्धतया आत्मत्वस्य तद्घटकत्वात्। तदितरमतेपि तत्तदात्मव्यक्तित्वविशिष्टस्य वस्तुगत्या तत्तद्व्यक्तिवृत्तित्वोपलक्षितस्य लौकिकविषयत्वस्य कार्यतावच्छेकसंबन्धतयाऽऽत्मत्वस्य तत्राऽप्रवेशात्। न चाऽऽत्मविशेषगुणत्वावच्छिन्नं प्रति आत्ममनःसंयोगस्याऽसमवायिकारणतयाऽसमवायिकारणकार्यतावच्छेदकतयैव तत्सिद्धिरिति वाच्यम्। तादृशाऽसमवायिकारणकार्यतावच्छेदकतया ज्ञानत्वादिव्यापकजातिविशेषस्यैव स्वीकारादित्यत आह **आत्मत्वजातिस्त्विति। सुखदुःखादीति।** आदिपदग्राह्याः ज्ञानेच्छाद्वेषप्रयत्नधर्माधर्मभावनाः। तथा चाऽऽत्मविशेषगुणत्वावच्छिन्नं प्रति आत्मत्वेन समवायिकारणतया समवायिकारणतावच्छेदकतयैवाऽऽत्मत्वजातिसिद्धिरिति भावः। नन्वेतादृशकार्यकारणभावे मानाभावः, ज्ञानादिकं प्रति समवायसंबन्धेन विशेषतो निमित्तकारणानामभावेनैवाऽऽत्मविशेषगुणस्याऽन्यत्रोत्पादाऽसंभवात्। चक्षुःसंयोगादिसन्निकर्षकार्यतावच्छेदकस्य तत्तत्पुरुषसमवेतत्वघटिततया निर्विकल्पकस्याप्यात्मभिन्ने आपादनाऽसंभवात्। आत्ममनःसंयोगस्य वैजात्येन तत्तदात्मनिष्ठतत्तन्मनःसंयोगत्वेन आत्मविशेषगुणं प्रति असमवायिकारणतयाऽसमवायिकारणविरहादेवान्यत्राऽऽत्मविशेषगुणोत्पादाऽसंभवाच्च। सर्वेषामेव समवायिकारणव्यक्तीनां समवायसंबन्धेन स्वसमवेतगुणादिकं प्रति तादात्म्यसंबन्धेन तत्तद्व्यक्तित्वेन समवायिकारणत्वस्यावश्यकतया यावद्विशेषसामग्रीबाधादप्यन्यत्र तदुत्पादवारणसंभवाच्च। एतेन ज्ञानादिसमवायिकारणतावच्छेदकतया तत्सिद्धिरित्यपि प्रत्युक्तमिति चेत्। न। सुखदुःखद्वेषभावनाधर्माधर्मसमवायिकारणतावच्छेदकतया आत्मत्वजातिसिद्धेः। सुखत्वाद्यवच्छिन्नं प्रति आत्मत्वेन समवायिकारणत्वात्। न च तादृशकार्यकारणभावे मानाभावः, सुखादिकं प्रति यथाक्रमं धर्मा-धर्माऽनिष्टसाधनत्वानुभवविहितनिषिद्धकर्मणां समवायसंबन्धेन निमित्तकारणत्वस्यावश्यकत्वादेवाऽतिप्रसंगभंगात्, भावकार्याणां समवायिकारणकत्वनियमस्य तु द्रव्यत्वेन सत्त्वेन तत्तद्व्यक्तिसमवेतसन्तं प्रति सत्त्वेन द्रव्यत्वेन वा क्लृप्तवैजात्येनैव कारणत्वमस्तु अदृष्टादेर्निमित्तकारणत्वादेवाऽतिप्रसंगविरहादिति वाच्यम्। क्लृप्ताऽगुरुव्याप्यधर्मसत्त्वे व्यापकधर्मेण कारणत्वाऽकल्पनवत् फलानुपधायकव्यावृत्तेन अल्पफलानुपधायकसाधारणेन वा धर्मेण कारणत्वे सुवचे बहुतरफलानुपधायकसाधारणधर्मेण न कारणत्वकल्पनेति सकलप्रामाणिकसिद्धत्वात्। एवं च चाक्षुषादिसमवायिकारणतावच्छेदकतयापि आत्मत्वजातिसिद्धिः।

नव्यास्तु आत्मत्वजातौ प्रत्यक्षमेव मानम्, सर्वेषामेव स्वस्मिन्नात्मनि आत्मत्वस्याऽहं सुखीत्यादिप्रत्यक्षसिद्धत्वात्। न च परस्य तादृशात्मत्वविषयकप्रत्यक्षसत्त्वे मानाभाव इति वाच्यम्। परेषामेव तत्र साक्षित्वात्। न च तथापि अतीतानागतशरीरिणामात्मनि तादृशात्मत्वविषयकप्रत्यक्षसत्त्वे मानाभावेन तत्राऽऽत्मत्वसत्त्वे मानाभाव इति वाच्यम्। तत्रापि **"आत्मा वारे मैत्रेयी"**त्यादिसर्वात्मविषयकश्रौतात्मव्यवहारस्यैव मानत्वात्। लाघवाद्विद्यमानशरीरिणामात्मनि

इन्द्रियाद्यधिष्ठाता=इन्द्रियाणां शरीरस्य च परंपरया चैतन्यसंपादकः। यद्यप्यात्मनि अहं जाने अहं सुखी अहं दुःखीत्यादिप्रत्यक्षविषयत्वमस्त्येव,

यद्यपि "अहं जाने, अहं सुखी" इत्यादि मानसप्रत्यक्ष आत्मा का सबको होता है तब मानसप्रत्यक्षविषयता आत्मा में है ही। तथापि विप्रतिपन्न (भ्रान्त) जो पुरुष है अर्थात् जो

प्रत्यक्षसिद्धाया आत्मत्वजातेरेवाऽऽत्मपदशक्यतावच्छेदकत्वात्। न च तत्रात्मपदं ज्ञानादिमति भाक्तमिति वाच्यम्। बाधकाभावात्। एतेन सुखादिसमवायिकारणतावच्छेदकतया सिद्धाया आत्मत्वजातेर्भगवदात्मनि सत्त्वे मानाभावः, तत्र सुखादिविरहात्, सुखाद्युपगमेपि तस्य नित्यत्वात्, भगवतः स्वात्मनि आत्मविषयकप्रत्यक्षसत्त्वे च मानाभावात्। अन्यथा भगवतः प्रत्यक्षबलेन शशविषाणादेरपि सत्त्वस्य सुवचत्वादिति प्रलपितमप्यपास्तम्। सुखादिसमवायिकारणतावच्छेदकत्वेनाऽऽत्मत्वजातेरसाधनात्। किन्तु क्वचिच्च श्रौतादिव्यवहारात्, तादृशव्यवहारस्य च भगवदात्मन्यप्यविशेषात्। सुखादिसमवायिकारणतावच्छेदकत्वेन तत्सिद्धावपि कारणतावच्छेदकातिप्रसंगस्यादोषतया श्रौतादिव्यवहारबलेन तत्र तत्सिद्धेरप्रत्यूहत्वाच्चेति प्राहुरिति संक्षेपः।

साजातिः=आत्मत्वजातिः। **अदृष्टादीति**। आदिना शरीरपरिग्रहः। समवायेन ज्ञानं प्रति स्वावच्छिन्नभोगजनकादृष्टवत्तासंबन्धेन शरीरस्य कारणत्वात् अदृष्टपदेन च धर्माधर्मौ विवक्षितौ, अदृष्टत्वेन कारणत्वाभावात्। तथाच धर्माऽधर्मरूपकारणाभावान्न सुखदुःखयोरुत्पत्तिः। मिथ्याज्ञानजन्यवासनारूपकारणाभावच्च नादृष्टोपत्तिः। मिथ्याज्ञानजन्यवासनानाशश्च तत्त्वज्ञानेन। मिथ्याज्ञानस्य मिथ्याज्ञानजन्यवासनाया वाऽहेतुत्वे जीवन्मुक्तात्मन्यपि अदृष्टोत्पत्तिप्रसंग इति ध्येयम्। समवायेन क्रियां प्रति अवच्छेदकतासम्बन्धेन कृतिः कारणम्, एवं समवायेनाऽदृष्टं प्रति स्वजनककृतिमत्त्वसंबन्धेन क्रिया कारणम्, एवं च ईश्वरकृतेः कार्यमात्रे कारणतया क्रियाजनकत्वं निर्विवादमेव- तथाचेश्वरेऽदृष्टोत्पत्त्यापत्तिरेवं चाऽदृष्टादिरूपकारणाभावादित्यसंगतम् इति चेत्। सामान्यकारणताया ईश्वरकृतौ सत्त्वेपि ईदृशविशेषकारणतायास्तत्राऽभावात्। सामान्यकार्यकारणभावश्च कालिकेन कार्यमात्रं प्रति कालिकेन कृतिः कारणमित्याकारकः, तथाच न ग्रन्थासंगतिः।

इदमत्र तत्त्वम्—जीवादृष्टवशेन ईश्वरपरिगृहीतरामकृष्णादिशरीरचेष्टायाः जीवीयकृत्यसाध्यतयाऽवच्छेदकतासंबन्धेनेश्वरकृतिजन्यत्वमावश्यकम्, किन्तु ईश्वरस्याऽशरीरत्वेपि **"एकोहं बहुस्यामिति"** संकल्पेन कस्य चिच्छरीरमित्युपगमात्, परन्तु जीवाऽसाध्यचेष्टोपपत्तये भूतावेशन्यायेन तच्छरीरेऽवच्छेदकतया ईश्वरकृतिकल्पनात्। अत एवेश्वरस्य शरीराभावेन तदीयशुभाशुभकर्माभावाददृष्टोत्पत्त्यापत्तिरयुक्तेत्याशंका समाहिता। **अप्रयोजकत्वादिति**। जलपरमाणौ स्नेहानुत्पत्त्या तादृशनियमे मानाभावादिति भावः।

तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्तत्प्रतीतिगोचर इति प्रतिपादयितुं न शक्यते, इत्यतः प्रमाणान्तरं दर्शयति करणमिति। वास्यादीनां छिदादिकरणानां कर्त्तारमन्तरेण फलानुपधानं दृष्टम्, एवं चक्षुरादीनां ज्ञानकरणानामपि फलोपधानं कर्त्तारमन्तरेण नोपपद्यते इत्यतिरिक्तः कर्ता कल्प्यते ॥ ४७ ॥

शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः।

ननु शरीरस्य कर्तृत्वमस्तु अत आह शरीरस्येति। ननु चैतन्यं

शरीर को ही आत्मा मानता हैं—उस पुरुष के प्रति सर्वप्रथम "अहं जाने" इत्यादि प्रतीति का विषय शरीरादि से भिन्न आत्मा है यह प्रतिपादन आप नहीं कर सकते हैं—(क्योंकि वह तो शरीर ही को आत्मा माने बैठा है) इसलिये शरीरादि से भिन्न आत्मा का साधक प्रमाणान्तर (अनुमान) दिखलाते हैं—करणमिति—अर्थात् जो करण होता है वह अपने कार्यसाधन में कर्त्ता से सापेक्ष होता है—जैसे छेदन क्रिया के करण कुठारादि को छेदन करने वाले किसी कर्त्ता के बिना छेदन रूप फल का उत्पादक नहीं देखा जाता है वैसे ज्ञान के करण जो चक्षुरादि हैं उन्हें भी प्रत्यक्षात्मक ज्ञान जनकता बिना किसी कर्त्ता के नहीं बन सकती—अतः शरीरादि से अतिरिक्त कर्त्ता की कल्पना करते हैं। (कि शरीरादि से अतिरिक्त कोई चक्षुरादि का कर्त्ता अवश्य है—और वही आत्मा है) प्रश्न—आपने कहा कि चक्षु आदि करणों का जो कर्त्ता है—वही आत्मा हैं—सो शरीर ही को कर्त्ता क्यों न मान लिया जाय अतः शरीर ही आत्मा सिद्ध हो गया—इससे चार्वाक की विजय हो गयी—क्योंकि चार्वाक शरीर ही को आत्मा मानता है। उत्तर—चार्वाकमत का खण्डन करते हैं कि—

परंपरया=जनकतासंबन्धेन अवच्छेदकतासंबन्धेन च। **चैतन्यसंपादकः**=ज्ञानवत्त्वसंपादकः। तथाच जनकतासंबन्धेन ज्ञानं प्रति तादात्म्यसंबन्धेनेन्द्रियं कारणम्। एवमवच्छेदकतासंबन्धेन ज्ञानं प्रति तादात्म्यसंबन्धेन शरीरं कारणमिति भावः। तथा चेन्द्रियाणि शरीरं च जनकत्वाऽवच्छेदकत्वान्यतरसंबन्धेन चेतनाधिष्ठितं अचेतनत्वे सति उक्तान्यतरसंबन्धेन ज्ञानवत्त्वाद् वास्यादिवदित्यनुमानमात्मनि प्रमाणम्। अत्राऽधिष्ठितत्वं सहकृतत्वं, तच्च स्वभिन्नत्वे सति स्वजन्यकार्योपधायकत्वम्। वस्तुतस्तु चेतनाधिष्ठितत्वं चेतनप्रयोज्यतत्तत्क्रियावत्त्वम्, तेन शरीरस्य ज्ञानाकारणत्वेपि चेतनसहकृतत्वं न दुर्घटम्। चेतनप्रयोज्यत्वं च जन्यतज्जन्यसाधारणम्। तेन च्छिदां प्रति चेतनस्याकारणत्वेपि चेतनजन्यप्रवृत्तिजन्यत्वेन न दृष्टान्तस्य साध्यवैकल्यम्। **तथापि**=प्रत्यक्षविषयत्वेपि। **विप्रतिपन्नं प्रतीति**। विप्रतिपत्तिश्च ज्ञानसमवायिकारणता शरीरवृत्तिर्न वेत्याकारिका बोध्या। **तत्प्रतीतिगोचरः**=अहंसुखीत्यादिप्रतीतिगोचरः। **कल्प्यते इति**। तथाचेन्द्रियाणि सकर्तृकाणि करणत्वात् वास्यादिवत् यद्यत्करणं तत्तत्सकर्तृकमिति व्याप्तेरिति भावः॥४७॥

ज्ञानादिकमेव, मुक्तात्मनां त्वन्मते इव मृतशरीराणामपि तदभावे का क्षतिः, प्राणाभावेन ज्ञानाभावस्य सिद्धेरिति चेन्न । शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थाविरे स्मरणानुपपत्तेः । शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात् । न च पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उत्पाद्यते

"शरीरस्य नचैतन्यम्" अर्थात् शरीर चेतन (आत्मा) नहीं हो सकता है—क्योंकि मृतशरीरों में चैतन्य का व्यभिचार पाया जाता है । प्रश्न—चार्वाक कहता है कि चैतन्य नाम है ज्ञान—इच्छादि का—सो वह जैसे तुम्हारे (नैयायिक के) मत में मुक्त आत्मा में नहीं (क्योंकि नैयायिकों के मत में मुक्त आत्मा जड़ है) वैसे ही हम (चार्वाक) भी यह कह देंगे कि मृतशरीर रूपी आत्मा में चैतन्य नहीं है । क्योंकि आप (नैयायिक) भी यही उत्तर करेंगे कि जिस आत्मा से प्राण का सम्बन्ध है—उसी से ज्ञान का सम्बन्ध है—और जिस आत्मा में प्राण नहीं उसमें ज्ञान भी नहीं है—अतः मुक्त आत्मा में प्राणाभाव से ज्ञानाभाव की सिद्धि होती है—सो वही उत्तर हम (चार्वाक) भी करेंगे कि मृतशरीररूपी आत्मा में प्राण के अभाव से ज्ञानाभाव की सिद्धि हो जायेगी अतः शरीर को आत्मा मानने में पूर्वोक्त व्यभिचार नहीं है । उत्तर—नैयायिक कहता है कि शरीर को चेतन (आत्मा) मानने में बाल्यावस्था में देखे हुवे पदार्थों का वृद्धावस्था में स्मरण नहीं बनेगा । क्योंकि शरीर अवयवों के उपचय (बढ़ने) अपचय (घटने) के कारण उत्पाद विनाश शाली है—अर्थात् बाल्यावस्था में जो शरीर था, वह युवावस्था में या वृद्धावस्था में नहीं रहा, प्रत्युत शरीरान्तर ही उत्पन्न हो गया—अतः बाल्यकाल में अनुभूत विषयों की युवावस्था में या वृद्धावस्था में स्मरण की अनुपपत्ति हो जावेगी । प्रश्न—चार्वाक पूर्वशरीरों में उत्पन्न संस्कार अगले=शरीरों में संस्कारों को उत्पन्न कर देंगे । (अर्थात् पहिले=शरीरों में उत्पन्न संस्कार अगले=शरीरों में चले जायेंगे तो इससे शरीरों के बढ़ने-घटने प्रयुक्त उत्पादविनाशशाली होने पर भी स्मरणानुपपत्तिदोष नहीं होगा—क्योंकि पूर्वानुभवजन्य संस्कार लगातार उत्तरोत्तर शरीरों में बराबर बने रहेंगे ।

पृथिव्यादीनि चत्वार्येव भूतानि तत्त्वानि । तेभ्य एव देहाकारपरिणतेभ्यः किण्वादिभ्यो मदशक्तिवच्चैतन्यमुपजायते तेषु विनष्टेषु सत्सु स्वयं विनश्यति । तदाहुः "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्ती" ति । तच्चैतन्यविशिष्टदेह एवात्मा । गौरोऽहं जनामीतिप्रतीत्या "ज्ञानगौरत्वयोः सामानाधिकरण्यानुभवेन" रूपवत्तासिद्धेरिति चार्वाकमतमुत्थापयति नन्विति । चैतन्यं=ज्ञानवत्त्वम् । तथाच समवायेन ज्ञानं प्रति तादात्म्येन शरीरं कारणम् । ईदृशकार्यकारणभावेऽन्वयव्यभिचारमाह मृतेषु व्यभिचारत इति । चार्वाकः शंकते नन्विति । त्वन्मते वेति । देहातिरिक्तात्मवादिनां मते इवेत्यर्थः । तदभावे=ज्ञानाभावे । ननु तव मते मृतशरीरे चैतन्याभावः किंनिबन्धनः, मन्मते तु प्राण-

विशिष्टाऽऽत्मनो विरह एव चैतन्याभावप्रयोजक इत्यत आह **प्राणाभावेनेति**। तथाच लाघवात्प्राणाभाव एव चैतन्यविरहे प्रयोजक इति भावः। **ज्ञानाभावस्य सिद्धेरिति**। तथाच ज्ञानादिकं प्रति प्राणस्यापि हेतुतया मुक्तात्मनि प्राणाभावप्रयुक्तज्ञानाभाववत् मृतशरीरेऽपि प्राणाभावप्रयुक्तज्ञानाभावसंभवादिति भावः। अत्रेदं बोध्यम्–"स्थूलोऽहं कृशोऽहमि"त्यादिलौकिकव्यवहारविषयता आत्मन एव स्थूलकृशादिभावेन मन्तव्या। अथ च स्थूलत्वादिधर्माः देहे प्रत्यक्षसिद्धाः, अत एव चैतन्यविशिष्टदेह एवात्मा, न तु तदतिरिक्तस्तत्र प्रामाण्याग्रहात्। एतन्मते प्रत्यक्षमेव प्रमाणम्। कामिनीसंभोगो–पादेयद्रव्यभक्षणोत्तमवस्त्रपरिधानादिसमुत्पन्नाऽऽनन्द एव मोक्षः। यद्यपि विषयोपभोगजनिते सुखे दुःखोपभोगकालीनत्वस्याऽपरिहार्यतया तत्र परमपुरुषार्थत्वं नास्ति "आत्यन्तिकदुःखध्वंसस्य परमपुरुषार्थत्वेऽविवादात्" तथापि नान्तरीयकदुःखेऽनास्थां प्रकाश्य तत्परिहारेण वा तत्तत्सुखसंभोगस्यैवोचितत्वात। पश्यतु कष्टकरैः कण्टकशल्कादिभिः परिवृत इति मत्वा मत्स्यार्थी सुस्वादुमत्स्यभक्षणात्पराङ्मुखो भवति! एवं तुषादिनिःसारसंवलित इति मत्वा कोपि पुष्टिकरान् व्रीहीन्परित्यजति। प्रत्युत सर्वे एव कण्टकतुषादिनिःसारांशमपनीय सारांशग्रहणेन तृप्तिसुखमनुभवति। पशुगणद्वारा सस्यापचयो भविष्यतीति कृत्वा को धान्यबीजं नोद्वपति, अत एव सुखानुषङ्ग्यवश्यंभाविदुःखभयेन सुखोपभोगविरतिरतिमूढतैव। एतन्मते कामार्थौ एव पुरुषार्थौ। अङ्गनाऽऽलिङ्गनादिजन्यं सुखमेव पुरुषार्थः। कण्टकादिजन्यं दुःखं नरकम्। लोकसिद्धो राजा ईश्वरः। यदि भारवहनक्लान्तस्य भाराद्यपगमे एव सुखानुभव इव दुःखिनो दुःखोच्छेदमात्रे यदि प्रवृत्तिर्भविष्यति उद्बन्धनादिना देहनाशे कृते तद्भवितुमर्हतीति न तदर्थं मुक्तिशास्त्रालोचनमावश्यकमिति संक्षेपः। चार्वाकमतमपहरति **नेति**। **बाल्ये विलोकितस्येति**। बाल्यावस्थायामनुभूतस्येत्यर्थः। **स्थाविरे स्मरणानुपपत्तेरिति**। अनुभवितुर्बाल्यशरीरस्याभावादिति भावः। न च घटानुभवे पटस्मरणादर्शनाद्विषयतासंबन्धेनानुभवस्मरणयोः कार्यकारणभाव आवश्यकः,एवंच सति बाल्यदशायामनुभूतस्यापि स्थाविरे स्मरणं नानुपपन्नमिति वाच्यम्। विषयतासंबन्धमात्रेण कार्यकारणभावे चैत्रदृष्टस्य मैत्रेण स्मरणं स्यात्, तथाच तद्वारणाय समवायघटितसामानाधिकरण्यप्रत्यासत्त्याऽनुभवस्मरणयोः कार्यकारणभावोऽवश्यं वक्तव्यः, एवं च सति कथं बाल्ये विलोकितस्य स्थाविरे स्मरणं तदानीमनुभवितुर्बाल्यशरीरस्याभावात्। ननु बाल्यस्थाविरशरीरयोरेकमेव शरीरमित्यत आह **शरीराणामिति**। उपचयो=वृद्धिःअपचयो=ह्रासः। परिमाणभेददिति यावत्। **उत्पादविनाशशालित्वादिति**। परिमाणभेदेन द्रव्यभेदात्, पूर्वपरिमाणनाशस्याऽऽश्रयनाशहेतुकत्वादिति भावः, तथाच पूर्वपरिमाणनाशः-आश्रयनाशजन्यः परिमाणनाशत्वात् घटपरिमाणनाशवदिति प्रयोगः। **उत्पाद्यते इति**। पूर्वशरीरस्योत्तरशरीरहेतुत्वात् स्वप्रयोज्यसंस्कारवत्त्व-

इति वाच्यम्। अनन्तसंस्कारकल्पने गौरवात्। एवं शरीरस्य चैतन्ये बालकस्य स्तन्यपाने प्रवृत्तिर्न स्यात्, इष्टसाधनताज्ञानस्य तद्धेतुत्वात्, तदानीमिष्टसाधनताऽनुभावकाभावात्। मन्मते तु जन्मान्तरानुभूतेष्ट-साधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः। न च जन्मान्तरानुभूतमन्यदपि स्मर्यतामिति वाच्यम्। उद्बोधकाभावात्, अत्र तु अनायत्या जीवनाऽदृष्ट-मेवोद्बोधकं कल्प्यते। इत्थं च संसारस्याऽनादितया आत्मनोप्यनादित्व-सिद्धौ अनादिभावस्य नाशाऽसंभवान्नित्यत्वं सिद्ध्यतीति बोध्यम्।

उत्तर—ऐसा नहीं—क्योंकि अनन्त संस्कारों की कल्पना करने में गौरव होगा, और दूसरी बात यह भी है कि शरीर को यदि आत्मा मानेंगे तो बालक की माता के स्तन से दूध पीने में प्रवृत्ति नहीं होगी—क्योंकि "इदं मदिष्टसाधनम्" अर्थात् यह स्तनपान मेरे इष्ट (जीवन) का साधन है—यह ज्ञान ही माता के स्तनपान में बच्चे की प्रवृत्ति का कारण है—सो शरीरात्मपक्ष (चार्वाकमत) में इष्टसाधनता का कोई स्मारक नहीं है—और हमारे (नैयायिक के) मत में आत्मा नित्य है अतएव शरीरादि से भिन्न है—अतः उसी नित्य आत्मा ने माता के स्तनपान में इष्टसाधनता का बच्चे के जन्मान्तरीयशरीरावच्छिन्न होकर अनुभव किया था—वही आत्मा बच्चे के इस नवप्रसूतशरीर में वर्त्तमान है जो कि जन्मान्तरीय अनुभव के संस्कारों द्वारा स्तनपान में इष्टसाधनता का स्मरण करता है। प्रश्न—चार्वाक कहता है कि उस नित्य आत्मा को जन्मान्तरानुभूत और पदार्थों का भी स्मरण होना चाहिये। उत्तर—अन्य पदार्थों के स्मरण का कोई उद्बोधक नहीं है—(यह नियम है कि आत्मा में किसी पदार्थ के अनुभव के बाद अनुभवजन्यसंस्कार रह जाते हैं—फिर कालान्तर में वे संस्कार ही उद्बोधकविशेष के द्वारा उद्बुद्ध होकर उसी आत्मा में अनुभवविषयविषयकस्मृति को उत्पन्न करते हैं। अतः अन्य पदार्थों का स्मरण करानेवाला कोई ऐसा उद्बोधक नहीं है जिससे कि उनका स्मरण हो सके) और प्रकृत में (स्तनपानप्रवृत्ति में) बालक का जीवनरूपी अदृष्ट ही जन्मान्तरीयसंस्कारों का उद्बोधक है। इस प्रकार संसार के अनादि होने से आत्मा का अनादित्व भी सिद्ध ही है—और अनादिभाव पदार्थ का नाश नहीं होता है अतः आत्मा का नित्यत्व सिद्ध हो जाता है।

संबन्धेन पूर्वशरीरसमवेतानुभवस्य स्थविरशरीरे सत्त्वाच्चेति भावः। तथाच न स्मरणानुपपत्तिः। तथाच शरीरमेवाऽऽत्मेति सिद्धम्। दूषणान्तरमाह **एवमिति।** **तद्धेतुत्वात्**=इच्छाद्वारा प्रवृत्तिहेतुत्वात्। तदानीं स्तन्यपानप्रवृत्तिपूर्वकाले इत्यर्थः। **अनुभावकाभावादिति।** इन्द्रियसन्निकर्षाभावेन प्रत्यक्षानुत्पत्त्या ज्ञानसामान्याभावादेव इष्टसाधनताविषयकानुमित्यसंभवादिति भावः। स्वमते इष्टसाधनताज्ञानमुपपादयति **मन्मते त्विति।** **प्रवृत्तिरिति।** तथाच स्मृत्यनुभवसाधारणेष्टसाधनताज्ञानत्वेन हेतुत्वादिति भावः। **अत्र त्विति।** इष्टसाधनतास्मारकसंस्कारे इत्यर्थः।

तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः ॥४८॥
मनोपि न तथा, ज्ञानाद्यनध्यक्षं तदा भवेत्।

ननु-चक्षुरादीनामेव ज्ञानादिकं प्रति करणत्वं कर्तृत्वं चास्तु विरोधे साधकाभावादत आह तथात्वमिति। चैतन्यमित्यर्थः। उपघाते=नाशे सति। अर्थाच्चक्षुरादीनामेव। कथं स्मृतिरिति। पूर्वं चक्षुषा साक्षात्कृतानां चक्षुषोऽभावे स्मरणं न स्यात्, अनुभवितुरभावात्, अन्यदृष्टस्यान्येन स्मरणाऽसंभवात्, अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावात् ॥४८॥

प्रश्न—चक्षुरादि इन्द्रियो को ही ज्ञानादिकार्य के प्रति करण एवं कर्त्ता मान लिया जावे (चक्षुरादि करण एवं कर्त्ता नहीं हो सकते हैं) इस विरोध में आपके यहाँ कोई साधक युक्तियाँ नहीं हैं (अभिप्राय यह है कि इन्द्रियों को आत्मा मान लिया तो क्या हानि है। कर्त्ता करके चेतन जो आत्मा उसी का ग्रहण है) उत्तर—"तथात्वं चेदिन्द्रियाणाम्" अर्थात् इन्द्रियों को यदि चेतन (आत्मा) मानेंगे तो—इन्द्रियों के उपघात (विनाश) होने पर तत्तदिन्द्रियों द्वारा तत्तत् अनुभूत पदार्थों का स्मरण कैसे होगा। क्योंकि पूर्वकाल चक्षु के द्वारा साक्षात्कार (प्रत्यक्ष) किये गये पदार्थों का चक्षु के अभाव (नष्ट) हो जाने पर स्मरण नहीं हो सकेगा–(क्योंकि जिस इन्द्रियरूपी आत्मा ने अनुभव किया था वह तो नष्ट हो गया अन्य से अनुभूत का अन्य से स्मरण नहीं हो सकता है। (क्यों कि जो अनुभवकर्त्ता होता है वही स्मरण का कर्त्ता होता है) अनुभव-स्मरण का सामानाधिकरण्य (एक अधिकरण में होना) देखा जाता ॥४८॥

अनायत्या=अगत्या। **जीवनादृष्टमेवेति**। अन्यथा इष्टसाधनत्वानुभवाभावेन, उद्बोधकाभावेन स्मरणासंभवेन च प्रवृत्त्यसंभवेन च बालः शुष्ककण्ठो म्रियेतेति भावः। आत्मनो नित्यत्वं साधयति **इत्थंचेति**। स्तन्यपानप्रवृत्त्यनुकूलेष्टसाधनतास्मरणे चेत्यर्थः। **अनादित्वसिद्धाविति**। स्तन्यपाने बालस्य प्रवृत्तिर्नेष्टसाधनताज्ञानमन्तरेण, तच्च ज्ञानं नानुभवरूपं, बाधात्, किन्तु स्मृतिरूपम्, स्मृतेश्च स्वसमानाधिकरणपूर्वजन्मसापेक्षतया पूर्वजन्मसत्त्वे पूर्वजन्मन्यपि प्रथमप्रवृत्त्यनुरोधेन तत्पूर्वस्य, एवं तत्पूर्वस्य जन्मनः सिद्धौ अनादित्वमात्मन इति भावः। **सिद्ध्यतीति**। आत्मा नित्यः अनादित्वे सति भावत्वाद् गगनवदित्याकारकः। **अर्थादिति**। तथाचै"कमेवेन्द्रियाणामि"तिपदं काकाक्षिगोलकन्यायेनोभयत्रान्वेति। **सामानाधिकरण्येनेति**। आत्मनिष्ठप्रत्यासत्त्या इत्यर्थः। विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावस्य निराकृतत्वादिति भावः।

विज्ञानमेवेति। आत्मनिरूपणस्य प्रस्तुतत्वादात्मेत्युक्तम्, तन्मते वस्तुमात्रस्यैव विज्ञानरूपत्वात्। अत्र विज्ञानत्वं प्रमेयत्वव्यापकं नवेति विप्रति-

नतु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यादत आह मनोपीति। न तथा=न चेतनम्। ज्ञानादीति। मनसोऽणुत्वात्प्रत्यक्षे च महत्त्वस्य हेतुत्वात्, मनसि ज्ञानसुखादिसत्त्वे तत्प्रत्यक्षानुपपत्तिरित्यर्थः। यथा च मनसोऽणुत्वं तथाऽग्रे वक्ष्यते ॥४८॥

नन्वस्तु विज्ञानमेवात्मा, तस्य स्वतःप्रकाशरूपत्वाच्चेतनत्वम्।

प्रश्न—चक्षुरादि इन्द्रियों को चेतन (आत्मा) न माना जाय–परन्तु मन इन्द्रिय तो है–उसे ही आत्मा मान लिया जाय। उत्तर—"मनोऽपि न तथा" मन भी आत्मा नहीं है–क्योंकि मन को यदि आत्मा (चेतन) मानेंगे तो ज्ञान-इच्छादि-का प्रत्यक्ष नहीं हो सकेगा–कारण कि प्रत्यक्ष में महत्त्व कारण है और मन परम अणु है–अतः मन को आत्मा मानने पर मन में ज्ञान सुखादि का सत्त्व मानना होगा—तब ज्ञान-सुखादि के प्रत्यक्ष की अनुपत्ति हो हो जावेगी–क्योंकि प्रत्यक्ष में महत्त्वकारण है यह हम पहिले ही कह चुके हैं। मन का अणुत्व अगाड़ी "मनोनिरूपण" में कहेंगे।

प्रश्न—क्षणिक विज्ञान को आत्मवादी योगाचार का कहना है कि विज्ञान ही को

पत्तिर्बोध्या। तत्र विधिकोटिर्योगाचारस्य निषेधकोटिर्नैयायिकानाम्। बौद्धमते हि रूप-विज्ञान-वेदना-संज्ञासंस्काराः पञ्च स्कन्धाः। इन्द्रियाणि पञ्च-पञ्च विषयाः–अविज्ञप्तिश्चेत्येकादश रूपस्कन्धाः। श्रोत्रत्वक्चक्षुर्जिव्हाघ्राणाख्यानि पञ्चेन्द्रियाणि। शब्दस्पर्शरूपरसगन्धाः विषयाः। अविज्ञप्तिः शरीरम्। रूप्यन्ते विषयाः एभिः, एवं रूप्यन्ते इति वा रूपाणि इति व्युत्पत्त्या रूपपदमिन्द्रियविषयशरीरपरम्। पृथिवीजलतेजोवायूनामाकाशस्य च धातुसंज्ञा। एतेषां रूपस्कन्धान्तर्गतत्वं बोध्यम्। विज्ञानस्कन्धः सर्वं बाह्याभ्यन्तरं ज्ञानम्। तथाहि—द्विविधं विज्ञानं, प्रवृत्तिविज्ञानमालयविज्ञानं च। श्रावणज्ञानादिभेदभिन्नं घटादिविषयभेदेन च भिन्नं चाऽनेकविधं प्रवृत्तिविज्ञानम्, इदमित्याकारकम्, प्रवृत्तिविज्ञानस्यैव प्रवाहः संसारः। अहमित्याकारं सततानुवर्त्तमानं विज्ञानमालय-विज्ञानम्। तच्च सुषुप्तावपि स्वीक्रियते। द्विविधविज्ञानयोरनारतप्रवाहो विज्ञान-स्कन्धः। अत एव "विज्ञानस्कन्धोऽहमित्याकारो रूपादिविषयेन्द्रियजन्यो वा दण्डायमान" इति वाचस्पतिमिश्राः। "अहमित्याकारमालयविज्ञानम्, इन्द्रियादि-जन्यज्ञानं एतद्द्वयं दण्डायमानं प्रवाहापन्नं विज्ञानस्कन्ध इत्यर्थः" इति। कल्पतरुकृतश्च वेदनास्कन्धः सुखं दुःखं उपेक्षा च विज्ञानस्कन्धस्य रूपस्कन्धेन सह संपर्कात् "इष्टादनिष्टात्तदुभयरहिताच्च" सुखस्य दुःखस्य उपेक्षायाश्चाऽवस्थाविशेषो वेदना-स्कन्धः। संज्ञास्कन्धः घटः पटः इत्यादिसंज्ञोल्लेखिसंवित्सन्तानः। अयं च सविकल्पकरूपो-विज्ञानस्कन्धश्च निर्विकल्पकरूपः इत्यनयोर्भेदः। "संज्ञास्कन्धः सविकल्पकरूपः संज्ञासंसर्गयोग्यप्रतिभासः, यथा डित्थः कुण्डली गौरो ब्राह्मणो गच्छतीत्येवंजातीयक इति" भामती। "सविकल्पकरूपः इत्यनेन विज्ञानस्कन्धो निर्विकल्पक इति भेदः स्कन्धयोर्ध्वनितः" इति कल्पतरुः। संस्कारस्कन्धः सुखदुःख-

संवेदनजनिताः रागद्वेषमदमानमोहादयः धर्माधर्मौ च संस्काररूपेण वर्तमानौ। इमे पञ्च स्कन्धाः। रागादयो यस्मादुदियन्ति स समुदयपदाभिधेय आत्मा विज्ञानरूपः क्षणिक इति। इदमत्रावधेयम्–ते च पदार्थाः न नैयायिकमतमतिक्रामन्ति, इन्द्रियादीनां द्रव्यादिष्वन्तर्भावात्। संज्ञाभेदमात्रस्य स्वतन्त्रेच्छत्वेन करणादिति। योगाचारमतावलंबिनामयमाशयः। माध्यमिकमते यया बुद्धया जगतः शून्यता आपाद्यते सा बुद्धिस्तु अवश्यं स्वीकर्तव्या, अन्यथा शून्यस्य निःसाक्षिकत्वापत्तेः। अत एव योगाचाराः विज्ञानवादिनः। एते विज्ञानमेव पारमार्थिकं स्वीकुर्वन्ति। चित्तं मनोबुद्धिरिति पर्यायाः। तदुक्तम्—

"चित्तं मनश्च विज्ञानं संज्ञावैकल्यवर्जिताः।
विकल्पधर्मतां प्राप्ताः" इति।

अपि च माध्यमिकमते वादिना विचारावसरे वादिनः आशयं बुद्ध्वा तत्खण्डने शून्यवादो दत्ताञ्जलिः स्यात्, शून्यस्यैव प्रमाणत्वे वादे माध्यमिकाना-मधिकारो न स्यात्। तदुक्तम्-

त्वयोक्तसर्वशून्यत्वे प्रमाणं शून्यमेव ते।
अतो वादेऽधिकारस्ते न परेणोपपद्यते॥
स्वपक्षस्थापनं तद्वत्परपक्षस्य दूषणम्।
कथं करोत्यत्र भवात् विपरीतं वदेन्न किम्॥ इति।

तथाच विज्ञानसत्त्वैव पारमार्थिकी। तदुक्तम्–"गुरुक्तं भावनाचतुष्टयं बाह्यार्थस्य शून्यत्वं चाङ्गीकृत्य आन्तरस्य शून्यत्वं चाङ्गीकृतम्। कथमिति नियोगस्य करणाद् योगाचारप्रथा। बाह्यार्थश्च विज्ञानस्य विवर्त एव। उक्तंच एषा हि तेषां परिभाषा

चित्तं प्रवर्तते चित्तं चित्तमेव विमुच्यते।
चित्तं हि जायते नान्यत्, चित्तमेव निरुध्यते॥
दृश्यन्न विद्यते बाह्यं चित्ते चित्तं हि दृश्यते।
देहयोगप्रतिष्ठानं चित्तमात्रं वदाम्यहम्॥
चित्तमात्रं, न दृश्योस्ति द्वेधा चित्तं हि दृश्यते।
ग्राह्यग्राहकभावेन शाश्वतोच्छेदवर्जितम्॥
अविभागो हि बुद्धयात्मा विपर्यान्वितदर्शनैः।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते॥
बुद्धिस्वरूपमेकं हि वस्त्वस्ति परमार्थतः।
प्रतिभानस्य नानात्वान्न चैकत्वं विहन्यते॥ इति।

स्वयंवेदनं तावदङ्गीकार्यम्। अन्यथा जगदान्ध्यं प्रसज्येतेति। विज्ञानस्य क्षणिकत्वं तावत्सत्त्वेनोपेयम्। अत एव क्षणिकविज्ञानवादिनः–तच्च विज्ञानं द्विविधम्। प्रवृत्ति-विज्ञानमालयविज्ञानं च। तत्राऽयं घटः इति प्रवृत्तिविज्ञानम्। तादृशज्ञानस्यैव तद्गोचरप्रवृत्तिजनकत्वात्। तच्च पुनः चक्षुर्विज्ञानश्रोत्रविज्ञानघ्राणविज्ञानजिह्वा-

ज्ञानसुखादिकं तु तस्यैवाकारविशेषः। तस्यापि भावत्वादेव क्षणिकत्वम्, पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञाने हेतुत्वात्, सुषुप्त्यवस्थायामालयविज्ञान-धारा निराबाधैव, मृगमदवासनावासितवसन इव पूर्वपूर्वविज्ञानजनितसंस्का-

आत्मा मान लिया जाय—क्योंकि वह भी स्वतःप्रकाशरूप होने से चेतन है। ज्ञान-सुखादि उसके (विज्ञान के) ही आकार विशेष हैं—और वह विज्ञान भावरूप होने से क्षणिक है। पूर्व २ विज्ञान उत्तरोत्तर विज्ञान में कारण होता है—अतःसुषुप्ति अवस्था में भी आलयविज्ञान की धारा बराबर बनी रहती है। कस्तूरीगन्ध से सुगन्धित वस्त्र की तरह अभिप्राय यह है कि आप वस्त्र की सौ पड़त करके, उसमें से पहिली पड़त में मृगमद (कस्तूरी) को रख दीजिये तो वह कस्तूरी की गन्ध जैसे पहिली पड़त से दूसरी में—दूसरी से तीसरी में—तीसरी से चौथी में इस प्रकार अन्तिम पड़त (सौवीं पड़त) में यथाक्रम उत्पन्न होती चली जाती है—उसी प्रकार पूर्व २ विज्ञान उत्तरोत्तर विज्ञान में स्वानुभवजन्य संस्कारों को उत्पन्न करता रहता है। अतः

विज्ञान-कामविज्ञान-मनोविज्ञान-क्लिष्टमनोविज्ञानभेदेन सप्तधा। आलयविज्ञानन्तु अहमित्याकारकम्, तदेवात्मा। यथा समुद्रे पवनप्रेरिता वीचयो नृत्यन्ति, कदाचिदपि विश्रान्तिं न भजन्ते, तथैवालयविज्ञाने "विषय" पवनप्रेरिताः "प्रवृत्ति-विज्ञान"तरङ्गाः नृत्यन्ति, न कदाचिदपि विश्रान्तिं भजन्ते। तदुक्तम्—

तरङ्गा उदधेर्यद्वत्पवनप्रत्ययेरिताः।
नृत्यमानाः प्रवर्त्तन्ते व्युच्छेदश्च न विद्यते॥
आलयौघस्तथा नित्यं विषयपवनेरितः।
चित्रैस्तरङ्गविज्ञानैर्नृत्यमानः प्रवर्तते॥ इति।

अद्वैतमतवदेतन्मतेपि व्यावहारिकसत्तां पारमार्थिकसत्तां चाभ्युपगम्याध्यारोपापवादन्यायेन सर्वे व्यवहाराः संपादनीयाः। अद्वैतमतादविशेष इति तु नाशंकनीयम्। तन्मते विज्ञानं नित्यम्, एतन्मते क्षणिकं प्रवाहविज्ञानसन्तानप्रवाहाविच्छेदरूपं चेति विशेषः। एतन्मते अनुपप्लवा चित्तसन्ततिर्मोक्षः। उपप्लवः संसारः प्रवृत्ति-विज्ञानमिति यावत्, तद्भिन्ना आलयविज्ञानसन्ततिरिति यावत्। चिन्तामणिकृतस्तु उपप्लवो दुःखं तदभावविशिष्टेत्यर्थः। उपप्लवपदस्य प्रवृत्तिविज्ञानपरत्वे दुःख-हेतुरुपप्लवः। तदुक्तम्— "प्रागुक्तभावनाप्रचयबलान्निखिलवासनोच्छेदविगलित-विषयाकारोपप्लवविशुद्धविज्ञानोदय" इति संक्षेपः। **तस्य**=विज्ञानस्य। **स्वतः-प्रकाशरूपत्वादिति**। स्वविषयकत्वादित्यर्थः। तथाच विज्ञानं स्वप्रकाशं विज्ञान-त्वाद्यन्नैवं तन्नैवं यथा घटः। एवं विज्ञानं चेतनं स्वप्रकाशत्वाद्, अत्रापि उक्त-व्यतिरेकिदृष्टान्तो बोध्यः। **तस्यापि**=विज्ञानस्यापि। **भावत्वादेव**=सत्त्वादेव। तथाच विज्ञानं क्षणिकं "स्वोत्पत्त्यव्यवहितोत्तरक्षणवृत्तिध्वंसप्रतियोगि" सत्त्वादि-त्यनुमानं फलितम्। अथ सत्त्वं-सत्ता सा सती असती वा! आद्ये तत्रापि सत्ता स्वीकार्या सापि आश्रयीभूतसत्तातोऽतिरिक्ताऽनतिरिक्ता वा! आद्ये सा सती

राणामुत्तरोत्तरविज्ञाने हेतुत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न। तस्य जगद्विषयकत्वे सर्वज्ञत्वापत्तिः, यत्किंचिद्विषयकत्वे विनिगमनाविरहः- सुषुप्तावपि विषयावभाशप्रसंगाच्च, ज्ञानस्य सविषयत्वात्। तदानीं निराकारा चित्सम्त-

स्मरण की अनुपपत्ति रूप दोष भी नहीं है। उत्तर—यह ठीक नहीं—नैयायिक बौद्ध (योगाचार) से कहता है कि वह विज्ञानरूप आत्मा जगत् को विषय करता है—अथवा यत्किञ्चित् पदार्थ को विषय करता है—यदि जगद् विषयक वह विज्ञान है तब तो सर्वज्ञत्व की आपत्ति लग जायेगी, यात्किञ्चित् पदार्थ विषयक है तो विनिगमनाविरह (एक पक्षप्रतिपादकयुक्ति का अभाव) है। अर्थात् तुम यत्किञ्चित्पद से घटका ग्रहण करोगे तो हम यत्किञ्चित् पट का या मठ का ग्रहण करके यह कह सकते हैं कि तुम (बौद्ध) जैसे उस विज्ञान को कहते हो कि घटविषयक है तो हम (नैयायिक) कहेंगे कि वह विज्ञान पट विषयक या मठ विषयक क्यों नहीं है। और दूसरी बात यह है कि जब तुम (बौद्ध) सुषुप्ति अवस्था में भी आलय विज्ञान मानते हो तो सुषुप्ति में भी विषय का स्फुरण होना चाहिये—क्योंकि विज्ञान सविषयक होता है। यदि तुम इसका

असती वा! आद्ये तत्रापि सत्तान्तरं स्वीकार्यमित्यनवस्था। अनतिरिक्ता चेदात्माश्रयः। असती चेत्तदा स्वयमसिद्धा कथं सद्व्यवहारं जनयेत्। अतोऽर्थक्रियाकारित्वमेव सत्त्वं वाच्यम्। अत्र रामरुद्रीकृतः। यदा हि बीजात्किमपि कार्यं न जायते तदा तदसदेव, तथाहि-एकमेव बीजं अङ्कुरादीनि बहूनि कार्याणि करोति, तत्किं कृत्स्नमपि युगपदेव करोति क्रमेण वा! युगपदित्युच्यमाने यानि किल कार्याणि कर्तुं बीजं प्रभवेत्, तानि सर्वाणि एकदैव जनयेत्, इष्टापत्तौ च तदुत्तरं तस्याऽसत्त्वमावश्यकमेव, तस्य द्वितीयक्षणे करणीयाभावात्। यदि क्रमेण कुर्यादित्युच्यते, तर्हि क्रमेण किमिति कुर्यात्, नहि बीजं तादृशकार्यकारणभावस्वभावशून्यं येन प्रथमक्षणे एव न तानि कार्याणि कुर्यात्, तथासति द्वितीयादिक्षणेऽपि तदनुत्पत्त्यापत्तेः। द्वितीयक्षणे स्वभावान्तरमुत्पद्यते इति चेद् बीजान्तरमेवोत्पद्यते इति किं न कल्प्यते। तदेवेदं बीजमिति प्रत्यभिज्ञया बीजस्य प्राक्क्षणस्थाद्बीजादभेदोऽवगाह्यते, अतः स्वभावान्तरकल्पनेति चेद्, प्रत्यभिज्ञानस्य साजात्यावलंबनत्वात्। ननु बीजं तावत्कार्यकरणस्वभावयुक्तमपि सहकारिसमवधानविरहेण न युगपत्कार्याणि करोति यथा कुसूलस्थबीजादिः, यदा च पृथिव्युदकसंयोगादिसामग्रीसमवधानं तदैतत्कार्यकरणक्षमं भवति इति चेन्न। सा सामग्री यदि बीजे कंचन विशेषं न जनयेत्, न जनयेत्तर्हि कार्यमपि, बीजस्य तत्पूर्वं कार्यकारणस्वभावरहितत्वात्। यदि सामग्रीविशिष्टस्य तस्याङ्कुरजनकत्वमुच्यते, कोपि विशेषस्तत्र सामग्र्याः समाहितो न वा, आद्ये तस्य विशेषस्यैवाऽर्थक्रियाकारित्वमस्तु, द्वितीये कार्यानुत्पत्त्यापत्तिरिति सामग्रीसमवधानक्षणे बीजादौ कश्चन विशेषः स्वीकार्यः, यं कुर्वद्रूपमित्याचख्यौ भगवान् बुद्धः, सत्येवं तस्य विशेषस्यापि क्षणमात्रस्थायित्वमावश्यकमेव, अन्यथा तत्रापि क्रमयौगपद्यव्यवस्थानुपपत्तेः। एवं चार्थक्रियाकारिषु क्षणसन्तानेष्वेव सत्त्वम्। ननु तादृशविशेषसहितमेव बीजमारभतामिति न क्षणिक-

तिरनुवर्तते इति चेन्न। तस्याः स्वप्रकाशत्वे प्रमाणाभावात्, अन्यथा घटादीनामपि ज्ञानत्वापत्तिः। न चेष्टापत्तिः, विज्ञानव्यतिरिक्तवस्तुनोऽभावादिति वाच्यम्। घटादेरनुभूयमानस्यापलपितुमशक्यत्वात्।

यह उत्तर करते हो कि सुषुप्ति में चित्सन्तति (आलय विज्ञानधारा) निराकार (निर्विषयक) है—यह भी ठीक नहीं-क्यों कि उस विज्ञान धारा के स्वप्रकाशत्व में कोई प्रमाण नहीं है।

कारण कि विज्ञान विषय का ही तो प्रकाश करता है—सुषुप्ति में विज्ञान का जब विषय ही कोई नहीं तो वह विज्ञान प्रकाश किसका करेगा] अन्यथा (विना प्रमाण के ही) यदि चित्सन्तति को सुषुप्ति अवस्था में निर्विषय मानोगे तो घट आदि पदार्थों को भी आपत्ति लग जायगी—अर्थात् घट-पटादि को भी ज्ञानरूपता की आपत्ति आप को (बौद्ध को) इष्ट है—क्यों कि विज्ञान के अतिरिक्त कोई वस्तु आपके यहाँ नहीं है-कारण कि घट-पटादि सभी विज्ञान रूप हैं—खण्डन नैयायिक कहता है कि घटादि का अनुभव (ज्ञान) यह एक दूसरी चीज है और घटादि उस अनुभव के विषय हैं अर्थात् घटादि अनुभूयमान है इसका अपलाप कोई

स्वव्यवस्थितिरिति चेन्न। विशेषेणापि बीजे विशेषान्तरानाधानेऽसहकारितायास्तुल्यत्वादिति सिद्धेयं व्याप्तिः यत्सत्तत्क्षणिकमिति सौगतानामिति प्राहुः। ननु सुषुप्तावात्मा न सिद्ध्येत्, पूर्वविज्ञानस्य क्षणिकत्वेन नाशात्, तदानीं पुरीतद्बहिर्देशावच्छेदेन मनःसंयोगरूपकारणविरहेण विज्ञानान्तरस्योत्पत्त्यसंभवादत आह पूर्वपूर्वेति। आलयविज्ञानधारा=अहमित्याकारकविज्ञानसन्ततिः। मृगमदः=कस्तूरिका, तेन वासितं संस्कृतं यद्वसनमित्यर्थः। यथा कस्तूरिकागन्धस्य वसने संक्रमो भवति तथा पूर्वविज्ञानजनितसंस्कारस्योत्तरविज्ञाने संभवतीति स्मरणं निराबाधमेवेति भावः। विज्ञानं जगद्विषयकं यत्किंचिद्विषयकं वेति विकल्प्याऽऽद्ये दूषणमाह तस्येति। विज्ञानस्येत्यर्थः। द्वितीये दूषणमाह यत्किंचिदिति।

जगतो यथाकथंचित्स्वप्नापेक्षया उत्कृष्टसत्ताभ्युपगमेपि परमार्थतः सत्त्वं यथा वेदान्तिभिर्नाङ्गीक्रियते तथा अस्माभिरपि। भेदस्त्वियानेव यत्तैर्ब्रह्मणः परमार्थसत्त्वमिष्यते नास्माभिरिति। एवं स्वप्ने जागरणे वा "न मया दृष्टं रजत"-मित्यादि प्रत्ययोपपत्तिः ऋते सर्वशून्यत्ववादं न कर्त्तुं शक्यते-तथाहि परैस्तत्र दर्शने रजतविषयकत्वाभावः, रजतविषयकदर्शनाभावो वा आत्मनि प्रत्याय्यते। तच्चानुपपन्नम्-अहं रजतविषयकदर्शनाभाववानिति ज्ञानस्य रजतविषयकदर्शनवानिति ज्ञानप्रतिबन्धकतया तस्य च तन्मतानुसारेणाऽहमंशे प्रमात्वं, रजतविषयकत्वांशे भ्रमत्वं स्थितम्। तत्रैकस्यैव ज्ञानस्यांशभेदेन भ्रमत्वं प्रमात्वं च न युक्तम्। ज्ञानं हि न घटादिरिव सावयवं वस्तु यत्तस्यांऽशादिकल्पना न्याय्या स्यात्। एवं रजतविषयकनिषेधे सर्वस्यापि निषेधो वक्तव्यः, अन्यथाऽर्धजरतीयत्वप्रसंगः। यदि भवन्मतानुसारेणापि निषेध्यं रजतज्ञानं सत्-तदा रजतं रजतत्वं तत्संबन्धस्तद्विषयकत्वं चेत्यादि सर्वमपि वक्तुं पार्येत, नहि तत्तथेति सर्वस्यापि ज्ञानविषयस्य निषेध

आकारविशेष एवायं विज्ञानस्येति चेन्न। किमयमाकारोऽतिरिच्यते विज्ञानात्, तर्हि समायातं विज्ञानव्यतिरिक्तेन। नातिरिच्यते चेतर्हि समूहालंबने नीलाकारोपि पीताकारः स्यात्, स्वरूपतो विज्ञानस्याऽविशेषात्। अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न।

नहीं कर सकता है। बौद्ध-घट-पट आदि यावत् पदार्थ विज्ञान के आकार विशेष ही हैं—नैयायिक-क्या यह विज्ञान का आकार विशेष विज्ञान के स्वरूप से भिन्न है या अभिन्न है। यदि भिन्न है तब तो विज्ञान से घट-पटादि-सिद्ध हो गये अर्थात् विज्ञानव्यतिरिक्त मार्ग पर आप आ गये। यदि घट पटादि बाह्य वस्तु विज्ञान से अतिरिक्त नहीं है तो "नीलपीते" इत्याकारक समूहालम्बनज्ञान में नीलाकार विज्ञान पीताकार हो जाना चाहिये—क्यों कि नील-पीत-ये दोनों विज्ञान के ही आकार विशेष है—स्वरूपतः विज्ञान में तो कोई भेद है नहीं। (जो नीलाकार विज्ञान है वही पीताकार है) बौद्ध-हम अपोह (अतद्व्यावृत्तिरूप नीलत्व जाति को नीलाकार विज्ञान का धर्म मानते हैं—एवं अपोह (अतद्व्यावृत्ति) रूप पीतत्व जाति को

एवोचितः। एवं चाधिष्ठानस्यात्मनः विशेष्यायाः शुक्तेः प्रकारीभूतस्य रजतस्य रजतत्वस्य च बाधात्सर्वत्रैव सर्वस्य बाधदर्शनात् "न मया किमपि ज्ञातं" इतिप्रत्ययबलात् "नाहं किंचिदवेदिष" मिति प्रत्ययप्रामाण्याद्वा जगतः शून्यत्वसिद्धिः। यद्वा यथाऽद्वैतवादिभिः प्रपञ्चस्य मिथ्यात्वं साध्यते तथा अस्माभिरपि। संक्षेपतस्तत्प्रकारश्च प्रपञ्चस्तावन्न शशविषाणवदत्यन्ताऽसत् व्यावहारिकप्रत्यक्षविषयत्वात्। प्रपञ्चस्तावन्न सत् तत्त्वज्ञानेन बाध्यत्वात्। बाधश्चात्र पक्षनिष्ठाभावप्रतियोगित्वम्। पक्षश्च स्वाश्रयत्वेनाभिमतो ग्राह्यः। स्वपदं च प्रपञ्चपरम्। एवं चाऽ"द्वैतमते" ब्रह्मण एव प्रपञ्चाधिष्ठानतया निर्धर्मकत्वेन प्रपञ्चाभाववत्तया च चैतन्यनिष्ठाभावप्रतियोगित्वं प्रपञ्चेऽस्तीति। तथाच प्रपञ्चो न सत् स्वाश्रयत्वेनाभिमत"चैतन्य" निष्ठाभावप्रतियोगित्वात् शुक्तिरूप्यवत्। यथा तादात्म्येन रजताश्रयत्वेनाभिमतायां शुक्तौ वर्तमानो योऽभावस्तत्प्रतियोगित्वं रजतस्येति रजतं न सत्। तथा च स्वात्यन्ताभावस्य स्वस्य चैकत्र वर्त्तमानतया प्रतीतिः स्वीक्रियते-तादृशप्रतीतिविषयत्वं बाध्यत्वं, तदेव च मिथ्यात्वं बोध्यम्। एवं च प्रपञ्चो न सत् मिथ्यात्वात् शुक्तिरूप्यवदित्यनुमानं फलितम्। न च स्वरूपाऽसिद्धिः, स्वाधिकरणे स्वात्यन्ताभावविरोधादिति वाच्यम्। **"नेह नानास्ति किंचने"**तिश्रुत्या स्वाश्रयत्वेनाभिमते स्वात्यन्ताभावं सामानाधिकरण्यबोधनात्। एवं च ब्रह्मभिन्नं सर्वं मिथ्या ब्रह्मभिन्नत्वादिति सामान्यानुमानेन घटो मिथ्या दृश्यत्वादिति विशेषानुमानेन वा घटादीनां सर्वेषां पदार्थानां मिथ्यात्वसिद्धिः **विनिगमनेति**। तथाच विनिगमनाविरहात्सर्वविषयकं स्यात्, निर्विषयकं वा स्यादिति भावः। ज्ञानस्य सविषयकत्वे दूषणमाह **सुषुप्ताविति**। शंकते **तदानीमिति**। सुषुप्तिकाले इत्यर्थः। **निराकारा**=

अहमित्याकारा निर्विषयकेति यावत् **चित्सन्ततिः** विज्ञानसन्ततिः। **तस्याः**=निराकारचित्सन्ततेः। **स्वप्रकाशत्वे**=विज्ञानरूपत्वे। **प्रमाणाभावादिति।** ज्ञानत्वस्य विषयिताऽव्याप्यत्वनियमादिति भावः। **अन्यथा**=तत्र ज्ञानत्वस्वीकारे। **अभावादिति।** तथाच घटादीनां विज्ञानरूपत्वे इष्टापत्तिरिति भावः। बाह्यं नास्ति-तथाच घटज्ञानं घटाभिन्नं "घटो वा घटज्ञानाऽभिन्नः घटज्ञानाविषयकप्रतीत्यविषयत्वात् घटवत् घटज्ञानवच्च। न च स्वरूपासिद्धिः, घटज्ञानाविषयक "घटविषयक"प्रतीत्यविषयत्वस्य घटज्ञाने विरहादिति वाच्यम्। ज्ञानस्य स्वप्रकाशतयाऽसिद्धिविरहात्। एवमात्मापि बाह्यपदार्थः, तन्मते ज्ञानानात्मकस्य सर्वस्यैव बाह्यपदार्थत्वात्। आत्मा ज्ञानाऽभिन्नः ज्ञानाविषयकप्रतीत्यविषयत्वात्। अत्र नैयायिकानामेकवाक्यतैव **"अध्यक्षो विशेषगुणयोगत"** इत्युक्तेः। एवमात्मा ज्ञानाऽभिन्नः ज्ञानविषयकप्रतीतिविषयत्वादित्यनुमानमपि अभेदसाधकं बोध्यम्। एवं गुणिनं पक्षयित्वा गुणाभेदः गुणं वा पक्षयित्वा गुण्यभेदः साधनीयः। अत एव शुक्लो घट इत्यादिसामानाधिकरण्यधीरपि संगच्छते। बाह्यवस्तुजातस्य सत्त्वे किं प्रमाणम्। यदि प्रत्यक्षादिकमुच्यते तदा घटस्य स्वसंवित्त्या सहोपलंभनियमेनाऽभेद एव किं न कल्प्यते, भेदो हि सहानुपलब्धिव्याप्यः यथा गवाश्वयोः। नहि तयोः सहोपलब्धिनियमोस्ति, गोपरिहारेणापि वाजिनः प्रतीतेः। अत एव गोव्यक्तिरश्वतो भिन्नेति सिद्धे भेद-सहानुपलंभयोर्व्याप्यव्यापकभावे व्यापकस्य सहानुपलंभस्य व्यतिरेकेण ज्ञानविषययोर्भेदोपि निवर्त्तते। यश्च ज्ञानविषययोः पार्थक्यविभासः स तु मृषाकल्पित एव। तथाचोक्तम्—

सहोपलंभनियमादभेदो नीलतद्धियोः।
भेदश्च भ्रान्तिविज्ञानैर्दृश्यतेन्दाविवाद्वये॥ इति।

अत्रेदं बोध्यम्। सर्वं भावजातं शून्यमेव, अन्योन्याभावस्वरूपत्वात्। अभावस्याधिकरणरूपतयाऽभावत्वेनैव सर्वेषां प्रतीतेः। प्रतीतिश्च घटः पटो न, घटे पटो नास्तीत्यादिरूपा, तथाच पारमर्षं सूत्रम् **"सर्वमभावः-भावेष्वितरेतराभावसिद्धेरिति"।** व्यवहारे प्रमाविषयत्वेनोपलभ्यमानानां पदार्थानां स्वप्ने बाधदर्शनात्स्वप्नसृष्टेर्मिथ्यात्वमिव प्रपञ्चस्य मिथ्यात्वं बोध्यम्। ननु स्वाप्निकप्रपञ्चस्य न बहुकालमनुवृत्तिः, व्यावहारिकस्य तु तथेति व्यावहारिक-प्रातिभासिकसत्ताभेदाङ्गीकारेण प्रातिभासिकस्यैव बाध्यत्वापरपर्यायं मिथ्यात्वम्, व्यावहारिकस्य तु आब्रह्मदर्शनमनुवृत्तिरिति वेदान्तमतानुप्रवेश एव श्रेयानिति चेत्तर्हि सिद्धं ममापि मनोरथद्रुमेण, कालस्याऽनियामकत्वात्। तिमिरादिरोगोपहतस्याऽनल्पनिद्रस्य वा जनस्य बहुशः स्वाप्नदृष्टिप्रचारस्यैव दृष्टचरत्वात्, जगतः स्वप्नसमानशीलत्वमेव। यदुक्तं वेदान्तमतानुप्रवेश इति—तन्नास्माकमनिष्टम्। सर्वशून्यतायां पर्यवसानम्। न च यदि सर्वं शून्यमेव तदा सकलोपि प्रेक्षावतां

व्यवहारः कथमुपपद्यतामिति वाच्यम्। तस्य युष्माकमिवाऽस्माकमपि अविद्यावासनामूलकत्वादिति। इष्टापत्तिं निराकरोति **घटादेरिति । अनुभूयमानस्येति ।** अनुभवकर्मण इत्यर्थः। तथाच घटादेरनुभवकर्मत्वमनुभवसिद्धं "घटमनुभवामीति" प्रत्ययात्। नतु अनुभवाश्रयत्वमनुभवसिद्धं "घटोऽनुभवती"त्यप्रत्ययादिति भावः। **आकारविशेषः** = स्वरूपविशेषः। आकारस्य विज्ञानातिरिक्तत्वमनतिरिक्तत्वं वेति विकल्प्याद्ये दूषणमाह **तर्हीति । विज्ञानव्यतिरिक्तेनेति ।** तथाच विज्ञानव्यतिरिक्तवस्तुनोऽभावादित्यस्याऽसंगतिरिति भावः। द्वितीये त्वाह **तर्हीति ।** **समूहालंबने** = नीलपीते इत्याकारके। **स्यादिति ।** तदभिन्नाभिन्नस्य तदभिन्नत्वनियमेन नीलरूपाकारात्मकविज्ञानाऽभिन्न-विज्ञानाऽभिन्नस्य पीताकारस्य नीलाभिन्नत्वं स्यादिति भावः। तदेवोपपादयति **स्वरूपतो विज्ञानस्येति ।** विज्ञानस्वरूपस्येत्यर्थः। **अविशेषात्** = एकत्वात्। ननु नीलाकारः पीताकारश्चाऽभिन्न एव, भेदप्रतीतिस्तु तद्धर्मयोर्नीलत्वपीतत्वयोर्भेदादित्याशंकते **अपोहरूप इति ।** अतद्व्यावृत्तिरूप इत्यर्थः। अनीलव्यावृत्तिरूप इति यावत्। घट इत्यनुगतबुद्धेरघटभेदविषयकत्वात्, भेदस्योभयवादिसिद्धतया जातेश्च नवीनायाः कल्पनीयतया न विनिगमनाविरहावसरः। तदुक्तम्—

> प्रसज्यप्रतिषेधश्च गौरगौर्न भवत्यम्।
> अतिविस्पष्ट एवायमन्यापोहोऽवगम्यते ॥ इति ।

अपोहः=अन्यापोहः, स्वलक्षणमिति चानर्थान्तरम्। तथाचाऽगोव्यावृत्तिधर्मस्य सकलगोसाधारणतया तस्यैव शक्त्यनुगमकत्वात्। अगोव्यावृत्तिधर्मस्य एकत्र गवि विद्यमानत्ववत् गोमात्रे सत्वात्। तदुक्तम्—"तथा **हि एको गौरगोव्यावृत्तिस्तथा परेपि गावः" इति ।** भवतां विधिरूपस्येव निषेधरूपस्यापि गोत्वस्य संकेतविषयत्वमस्माकमिति। अपोहे विप्रतिपत्तिस्तु - गवादिपदं, व्यावृत्तिवाचकं न वा! अनुगतधर्मे भावत्वं वर्तते नवेत्याकारिका वोध्या। विधिकाटिर्नैयायिकानां निषेधकोटिश्च सौगतानाम् द्वितीयविप्रतिपत्तौ, प्रथमविप्रतिपत्तौ च विधिकोटिः सौगतानां निषेधकोटिश्च नैयायिकानाम्। सौगतानामयमाशयः—अतव्द्यावृत्तिरन्यापोहशब्दार्थः। नेदमरजतमिति ज्ञात्वैव रजतार्थिनां प्रवृत्तेः। यद्यपि विषयव्यवस्थाऽनुव्यवसायाधीना, अनुव्यवसायश्च रजतमहं जानामीत्याकारको न तु अरजतव्यावृत्तिमहं जानामीत्याकारकः। अत एव "**नहि शब्दलिंगाभ्यामिह महीधरोद्देशे अनग्निर्न भवतीति स्फुरणम्, अपि तु अग्निरस्ति**" इत्याचार्याः। "अरजत" व्यावृत्तिमहं जानामीत्यनुव्यसायस्तदा स्याद्यदि व्यवसाये व्यावृत्तिः स्वातन्त्र्येण स्फुरेत्, न त्वेवम्। तथापि अरजतव्यावृत्तिमिति भाने "अरजतव्यावृत्तात्मकं" रजतमिति भाने वा व्यावृत्तात्मकविशिष्टबुद्धौ व्यावृत्तिरपि विशेषणत्वेन भासते

नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशात्, इतरथा विरोधावधारणस्यैव दुरुपपादत्वात्। न वा वासनासंक्रमः संभवति, मातृपुत्रयोरपि वासनासंक्रमप्रसंगात्। न चोपादानोपादेयभावो नियामक इति वाच्यम्। वासनायाः संक्रमाऽसंभवात्। उत्तरस्मिन्नुत्पत्तिरेव संक्रम इति चेन्न।

पीताकार विज्ञान का धर्म मानते हैं—इससे नील-पीत में भेद सिद्ध है। नैयायिक – हम तो कहते हैं कि जो नीलाकार विज्ञान है वही तो पीताकार विज्ञान है उभयाकार विज्ञान तो एक ही है सो उस एक विज्ञान में नीलत्व पीतत्व यह विरुद्ध धर्म कैसे रहेंगे—अन्यथा विरोध ही दुरुपपन्न हो जायगा। और पहिले जो आप (बौद्ध ने कहा कि मृगमद वासना की तरह पूर्व २ विज्ञान उत्तरोत्तर विज्ञान में वासना का संक्रमण करता है सो "न वा वासना संक्रमः संभवति" वासना का संक्रमण भी संभव नहीं है। क्योंकि माता के संस्कार पुत्र में आ जाने चाहिये—अर्थात् माता से अनुभूत पदार्थों का स्मरण गर्भस्थ बालक को होना चाहिये। बौद्ध-उपादान कारण के संस्कार ही उपादेय (कार्य) में आते हैं जैसे पूर्व विज्ञान उत्तर विज्ञान का उपादान कारण है अतः पूर्व विज्ञान के संस्कार उत्तर विज्ञान में जाते हैं। वही कहा है कि "नचोपादानोपादेयभावः" इत्यादि। नैयायिक—हमारा कहना यह है कि पूर्व विज्ञान की वासना का उत्तर विज्ञान में संक्रमण (संचार) संभव ही नहीं क्यों कि आप (बौद्ध) के यहाँ पूर्व विज्ञान क्षणिक होने के नाते पूर्णरूप से नष्ट हो जाता है - उसका कुछ भी अंश नहीं रहता है कि जिसका संक्रमण उत्तर विज्ञान में हो सके। अतः यह सर्वथा असंभव है कि पूर्वविज्ञान उत्तर विज्ञान में वासना प्रदान करता है) बौद्ध-पूर्वविज्ञान की वासना का उत्तर विज्ञान में उत्पत्ति

एव। तदुक्तम् आचार्यैः "नहि अनन्तर्भावितविशेषणा विशिष्टप्रतीतिर्नाम, ततो यथा सामान्यमहं प्रत्येमीत्यनुव्यवसायाभावेपि साधारणाकारस्फुरणाद् विकल्पधीः सामान्यबुद्धिः परेषां, तथा निवृत्तप्रत्ययाद्भिन्ना निवृत्तिबुद्धिरस्माक"मिति। **एकस्मिन्** = विज्ञाने। **इतरथा** = विरुद्धनीलादीनामेकाधिकरणवृत्तित्वनिश्चये। ननु समूहालंबने चित्राकार एवानुभूयते इति नोक्तदोष इति वासनासंक्रमं मुख्यतया दूषयति **नवेति**। **वासनासंक्रमप्रसंगादिति**।

तथाच कार्यकारणभावेपि नानात्वस्य तादवस्थ्यात् स्मरणाद्यनुपपत्तिर्दुर्वारैव, मात्रानुभूतस्य गर्भस्थेन तत्सन्तानेनाऽस्मरणवदिति भावः। उपादानेनानुभूतमुपादेयेन स्मर्यते इत्यपि निरस्यति **नचेति**। नियामक इति। संस्कारस्येति शेषः। उपादानत्वं चाऽसहकृतकारणत्वम्, उत्तरविज्ञानव्यक्तौ पूर्वविज्ञानव्यक्तिमात्रस्यैव सौगतमते कारणत्वात्, भवति उत्तरविज्ञानव्यक्तौ पूर्वविज्ञानव्यक्तेरुपादानत्वम्, माता पिता वा पुत्रम्प्रति नाऽसहकृतं कारणं, शुक्रशोणितादेरपि कारणत्वात्। **संक्रमाऽसंभवात्** = गमनाऽसंभवात्। शंकते **उत्तरस्मिन्निति**। वासनोत्पादके

तदुत्पादकाभावात् । चितामेवोत्पादकत्वे संस्कारानन्त्यप्रसंगः । क्षणिकविज्ञानेषु अतिशयविशेषः कल्प्यते इति चेन्न । मानाभावात्, कल्पनागौर-

हो जाना ही संक्रम कहलाता है। नैयायिक यह ठीक नहीं--क्योंकि उत्तर विज्ञान में संस्कार का उत्पादक ही जब कोई नहीं तब पूर्व विज्ञान में संस्कार की उत्पत्ति उत्तर विज्ञान में कैसे होगी। बौद्ध-चित् (पूर्व २ विज्ञान ही संस्कारों का उत्पादक माना जाय। नैया० विज्ञान अनन्त हैं—अतः प्रत्येक विज्ञान से उत्पन्न होने वाले संस्कार भी अनन्त ही मानने पड़ेंगे—तब संस्कारों को आनन्त्य दोष का प्रसङ्ग (आपत्ति) हो जावेगी। बौद्ध—क्षणिक विज्ञान में एक अतिशय (शक्ति) विशेष की कल्पना करेंगे कि पूर्व २ विज्ञान अपनी शक्ति के द्वारा उत्तरोत्तर विज्ञान में वासना को उत्पन्न करता रहता है। नैया० शक्ति कल्पना में कोई प्रमाण नहीं—दूसरी बात यह है कि यदि शक्ति की कल्पना करो तो भी क्षणिक विज्ञान अनन्त

इत्यर्थः। **तदुत्पादकाभावादिति** । तथाहि—उत्तरविज्ञानोत्पत्तिकाले एव पूर्वविज्ञानस्थितसंस्कारादुत्तरविज्ञाने संस्कारोत्पत्तिर्वाच्या, सा च न संभवति संस्कारस्य संस्कारजनकत्वानभ्युपगमात् । पूर्वविज्ञानस्यैवोत्तरविज्ञानमिवोतरविज्ञाननिष्ठसंस्कारं प्रति च जनकत्वसंभवेपि विज्ञानानामानन्त्यात्संस्कारानन्त्यप्रसंगः। एतदेवाह **चितामेवेति** । विज्ञानानामेवेत्यर्थः। **संस्कारानन्त्यप्रसंग इति** । **विज्ञानानामानन्त्यादित्यादिः** । ननु विज्ञानव्यक्तीनां संस्कारजनकत्वे प्रतिविज्ञानं भिन्नभिन्नसंस्कारव्यक्तिकल्पनागौरवेपि यादृशज्ञानव्यक्त्युत्तरं स्मरणमनुभवसिद्धं तादृशज्ञाननिष्ठसंस्कारानुकूला काचिच्छक्तिः पूर्वज्ञानव्यक्तौ स्वीकरणीयेति ज्ञानानन्त्यप्रयुक्तसंस्कारानन्त्याभावान्न पूर्वोक्तगौरवमित्याशयेनाऽशंकते **क्षणिकविज्ञानेष्विति**। **अतिशयविशेषः** = शक्तिविशेषः—उत्तरोत्तरविज्ञानानुकूलतयेति शेषः। **मानाभावादिति** । तादृशाऽतिशये इत्यादिः। **कल्पनागौरवादिति** । तादृशशक्तेरपि भावत्वेन क्षणिकतया अनन्तशक्तितत्प्रागभावादिकल्पनागौरवादिति भावः।

अथ सन्तानमाश्रित्य क्रियते तत्समर्थनम्।
न तस्य भिन्नाभिन्नत्वविकल्पानुपपत्तितः ॥
अभेदपक्षे क्षणवद् व्यवहारो न सिद्धयति।
व्यतिरेके तु चिन्त्योऽसौ वास्तवोऽवास्तवोपि वा ॥
वास्तवत्वे स्थिरो वा स्यात्क्षणिको वेति चिन्त्यताम्।
अवास्तवत्वे पूर्वोक्तं कार्यं विघटते पुनः ॥
सन्ताननिर्विशेषः स्यान्सन्तानः क्षणभङ्गुरः।
न सिद्धयेत्पुनरप्येष व्यवहारः पुरोदितः ॥
अथापि नित्यं परमार्थसन्तं सन्ताननामानमुपैषि भावम्।

वाच्च। एतेन क्षणिकशरीरेष्वेव चैतन्यं प्रत्युक्तम्, गौरवात् अतिशये माना-भावाच्च। बीजादावपि सहकारिसमवधानाऽसमवधानाभ्यामेवोपपत्तेः कुर्व-द्रूपत्वाकल्पनात्।

हैं उनमें से प्रत्येक की कल्पना करनी होगी—तो अनन्त शक्तियों की कल्पना करने में गौरव भी होगा।

कोई लोग क्षणिक-शरीर को ही चेतन (आत्मा) मानते थे—सो इन पूर्वोक्त दोनों दोषों से वह पक्ष भी खण्डित हो गया। गौरव दोष से—तथा शक्ति विशेष की कल्पना करने में कोई प्रमाण नहीं है। बौद्ध जैसे क्षेत्रस्थ वीज से अङ्कुर उत्पन्न होता है—और कुशूलस्थ वीज से अंकुर उत्पन्न नहीं होता है अतः क्षेत्रस्थ वीज में एक कुर्वद्रूपा शक्ति है जिस शक्ति के द्वारा क्षेत्रस्थवीज अंकुर को उत्पन्न करता है। कुशूलस्थ वीज में वह शक्ति नहीं हैं अतः उससे अंकुर उत्पन्न नहीं होता है—ऐसे ही क्षणिक विज्ञान-या क्षणिक शरीर में कुर्वद्रूपा शक्ति मान ली जाय—जिस कुर्वद्रूपा शक्ति के द्वारा उत्तर विज्ञान में या उत्तर शरीर में संस्कार की उत्पत्ति होती है। नैयायिक—क्षेत्रस्थवीज में कुर्वद्रूपा शक्ति कल्पना व्यर्थ है—वहाँ धरणी सलिल संयोगरूप सहकारी कारण के संवलन होने से अंकुरोत्पत्ति होती है—और कुशूलस्थवीजस्थल में सहकारीकारण का समवधान नहीं है अतः अंकुरोत्पत्ति वहाँ नहीं होती है।

उच्छिन्न भिक्षो फलितास्तवाशाः सोयं समाप्तः क्षणभङ्गवादः॥ इति। **एतेन**=वक्ष्यमाणदोषेण। **क्षणिकशरीरेष्वेवेति**। एवकारेण घटादिव्यावृत्तिः। अथ क्षेत्रस्थबीजादङ्कुरोत्पत्तिः, न कुसूलस्थबीजादतोऽङ्कुरत्वावच्छिन्नं प्रति कुर्वद्रूपत्वेन हेतुत्वमङ्गीक्रियते, कुर्वद्रूपत्वं चाङ्कुरजनकतावच्छेदकतया सिद्धो जातिविशेषः, स च फलोपधायकक्षणिक-समर्थबीजमात्रवृत्तिबीजत्वव्याप्यः कल्प्यते, एवमत्रापि कुर्वद्रूपत्वेनैव क्षणिकशरीरेषूत्तरोत्तरशरीरनिष्ठवासनोत्पादकत्वं स्वीकरणीयमत आह **बीजादाविति। उपपत्तेः**=कस्माच्चिद्बीजादङ्कुरोत्पत्तिः, कस्माच्च नेति नियमो-पपत्तेः। **कुर्वद्रूपत्वाकल्पनादिति।** कुसूलस्थबीजादिषु धरणिसलिलसंयोगादि-रूपसहकार्यभावादेवाङ्कुरानुपपत्तेः, कुर्वद्रूपत्वं तेन रूपेण जनकत्वं न कल्प्यते प्रमाणाभावादिति भावः। कुर्वद्रूपत्वे विप्रतिपत्तिस्तु अङ्कुरकरणाभाववन्ति वीजानि-अंकुरजनकतावच्छेदकबीजवृत्तिजातिशून्यानि न वेत्याकारिका बोध्या। विधिकोटि-र्नैयायिकानां निषेधकोटिः सौगतानाम्। तादृशजातिश्चाऽपोहरूपा। इदमत्रावधेयम्—यत्सत्तत्क्षणिकमिति व्याप्तिरेवाऽसिद्धा। जलधरपटले अन्त्यशब्दे च तत्साहचर्य-मस्तीति चेत्, जलधरपटलेऽसिद्धा व्याप्तिः, क्षणिकत्वेनैव तस्यावस्थानमित्यस्य शपथनिर्णेयत्वात्। अन्त्यशब्दस्य क्षणिकत्वं च कैश्चिदेवेष्यते। अङ्गीकारपक्षेपि वा न तदुदाहरणेन सामान्यव्याप्तिः साधयितुं शक्या। गुणिनो घटादेः सावयवत्व-दर्शनाद्द्रव्यमात्रस्यैव तया दिशा सावयवत्वं सिद्ध्येत्। तस्माद्व्याप्तौ मानाभावेनाऽ

नुमानमेवाऽसिद्धम्। द्वितीये च किं सामर्थ्यपदाभिधेयं यदि करणत्वं "तदेव कारित्वं" तच्च फलायोगव्यवच्छिन्नकारणत्वरूपं तदाऽऽपाद्याऽऽपादकयोरभेदापत्तिः। कुसूलस्थबीजं यदि समर्थं स्यात्तदा कारि स्यादिति प्रसङ्गे सामर्थ्यस्याऽऽपादकत्वात्, कारित्वस्याऽपाद्यत्वात्, तयोश्चैक्यात्। **"आपाद्यापादकयोरपि भेदे सति आपादनप्रवृत्तेः साध्यसाधनयोरिवे"त्यभियुक्तोक्तेः"**। एवं विपर्यये क्षेत्रस्थबीजं यद्यसमर्थं स्यादकारि स्यादित्यत्रापि आपाद्यापदकयोरभेदापत्तिर्बोध्या। अथ सामर्थ्यं योग्यता, तथा च नापाद्यापादकयोरभेदापत्तिरिति भेदसिद्धौ क्षणिकत्वसिद्धिरिति चेत्, सत्यं, सा योग्यता सहकारिसाकल्यरूपा कारणतावच्छेदकीभूतबीजत्वरूपा—कुर्वद्रूपत्वरूपा वा। नाद्यः, सिद्धसाधनात्, तथाहि यदि बीजं सहकारिसमवहितं स्यात्तदा कारि स्यादित्यत्रेष्टापत्तिः। तदुक्तमाचार्येण **"यत्सहकारिसमवधानवत्तद्धि करोत्येवेति को नाम नाभ्युपैति यमुद्दिश्य साध्यते। न चाकरणकाले सहकारिसमवधानवत्त्वं नैयायिकेनाभ्युपेयते यतः प्रसंगः प्रवर्त्तेते" ति**। न द्वितीयः, व्यभिचारात्-बाधाच्च। तथाहि कुसूलस्थं यदि बीजं स्यात्तदा कारि स्यादिति प्रसंगे व्यभिचारः। क्षेत्रस्थं यदि बीजं न स्यादकारि स्यादिति विपर्यये बाधः। अथ सामर्थ्यं "बीजत्वव्याप्याङ्कुर"कुर्वद्रूपत्वमेव, कुसूलस्थ बीजं कुर्वद्रूपत्वजातिमत्स्यादङ्कुरकारि स्यात् क्षेत्रपतितबीजवत्, एवं क्षेत्रस्थबीजं यदि कुर्वद्रूपत्वजातिमन्नस्यादंकुरकारि न स्यात्, कुसूलस्थबीजवदिति प्रसंगविपर्ययाभ्यां भेदसिद्धौ क्षणिकत्वसिद्धिरिति चेत्। दृष्टान्तस्य "क्षेत्रपतितबीजस्य" साधनविकलत्वात्, तादृशजातिविशेषस्य अंकुरकारिण्यपि अनभ्युपगमात्। अत एव बीजमंकुरारम्भे धरणिसलिलेऽवश्यमपेक्षते। अत एव कृषीवलोऽङ्कुरकामो बीजवापाय प्रवर्तते। अन्यथा अंकुरकुर्वद्रूपस्यैव कारणत्वे कदाचिद्धरणिसलिलसंयोगमन्तरेणापि बीजमङ्कुरं जनयेत्। कृषीवलोपि वा बीजादौ न प्रवर्त्तेत बीजस्याऽङ्कुरेऽकारणत्वात्। तादृशक्षणोत्पादनायैव स तत्र प्रवर्त्तते इति चेन्न। तादृशक्षणोत्पादकस्यापि क्षणत्वेन बीजादेस्तत्राऽकारणत्वात्। तत्रापि क्षणान्तरानुसरणे चाऽनवस्थापातात्। अत्राचार्यपादाः—**"को हि नाम सुस्थात्मा प्रमाणशून्यमभ्युपगच्छेत्, तदृधि तावन्न प्रत्यक्षेणानुभूयते तथाऽनध्यवसायात्। नाप्यनुमानेन-लिङ्गाभावात्। यदि न कश्चिद्विशेषः, कथं तर्हि करणाकरणे इति चेत्, क एवमाह नेति, परं किं जातिभेदरूपः—सहकारिलाभालाभरूपो वेति नियामकं प्रमाणमनुसरन्तो न पश्यामः" इति**। अथ सामर्थ्यं सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वम्। कुसूलस्थस्य सहकारिवैधुर्यमुभयमतसिद्धम्, तथा च सहकारिविधुरं बीजं यदि सहकारिवैकल्यप्रयुक्तकार्याभाववत्स्यात्तदा कारि स्यात्, एवं बीजं यदि सहकारिवैकल्यप्रयुक्तकार्याभाववत्स्यात्तदाऽकारि स्यात्, एवं बीजं यदि सहकारिवैकल्यप्रयुक्तकार्याभाववन्न स्यात्तदा कारि स्यात्, एवं बीजं यदि सहकारि-

वैकल्यप्रयुक्तकार्याभाववन्न स्यात्तदाऽकारि स्यादिति प्रसङ्गविपर्ययौ स्यातां न कश्चिद्दोष इति चेत् विरोधात् सहकार्यभावप्रयुक्तकार्याभाववान् सहकारिविरहे कार्यवांश्चेति व्याहतमिति। किन्तु यत्सहकारिविरहान्न करोति, तदैव सहकारिसत्त्वे करोतीत्यायातम्, तच्च स्थैर्यसिद्धावेव संभवतीति ध्येयम्। एवं घटादीनां स्थैर्ये "सोयं घट" इत्यादि प्रत्यभिज्ञापि प्रमाणम्। तथाहि घटस्य क्षणिकत्वे प्रतिक्षणं घटव्यक्तिभेदेन "स एवायं घटः" इति पूर्वापरकालीनाऽभेदावगाहि प्रत्यक्षं सर्वानुभवसिद्धं न स्यादिति तदुपपत्तये घटादिपदार्थानां स्थैर्यमावश्यकम्। अनुमानमपि विमतो भावः स्थिरः "क्षणिकत्वाभाववान्" सोऽयमित्यादिप्रत्यभिज्ञाविषयत्वाद्यन्नैवं तन्नैवं यथा क्षणिकान्यशब्दः। न च तत्त्व--इदन्त्वोल्लेखिज्ञानत्वस्यैव प्रत्यभिज्ञात्वेन तस्य च ज्वालादिप्रतिभिज्ञायामपि सत्त्वेन व्यभिचारिजातीयत्वेन प्रत्यभिज्ञायामपि सत्त्वेन व्यभिचारिजातीयत्वेन न प्रत्यभिज्ञाविषयत्वस्य ज्वालादावपि सत्त्वात्तत्र च स्थैर्याभावादुक्तहेतोर्व्यभिचारितयाऽप्रयोजकत्वमिति वाच्यम्। विरुद्धधर्मासंसृष्टविषयकप्रत्यभिज्ञाविषयत्वस्य हेतुत्वोपगमात्। नचायं हेतुः स्वरूपासिद्धः, सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्मसंसर्गस्यैव दर्शितत्वादिति वाच्यम्। सहकारिसाकल्ये सति बीजे सामर्थ्यं—सहकार्यसमवधाने तत्रैवाऽसामर्थ्यमिति प्रागुक्तदिशा तयोरविरोधादिति। कृतहानाऽकृताभ्यागमप्रसंगोपि क्षणिकत्वे बाधकः। तदुक्तं जयन्तभट्टेन—

कर्मसन्तानिनाऽन्येन यत्कृतं चैत्यवन्दनम्।
ततोऽद्य फलमन्येन भुज्यतेऽकृतकर्मणा॥ इत्यन्यत्र विस्तरः।

एवमगोव्यावृत्तिरूपाऽपोहघटकः अगोपदार्थो "गोस्वरूपलक्षणरूपस्य" गोपिण्डस्य भेदवान्। ततश्च गोपिण्डभिन्नेभ्यो यावद्भ्यो व्यावृत्तिर्विवक्षिता-किं वा गोपिण्डभिन्नाद्यतः कुतश्चिद् व्यावृत्तिर्विवक्षिता। आद्ये—गवान्तरेपि गोव्यहारानुपपत्तिः, गवान्तरस्य यत्किंचिद्गोभिन्नत्वेन "अगोपदार्थस्य" यावदन्तर्गततया तद्व्यावृत्तेस्तत्राऽसत्त्वात्। द्वितीये अश्वादावपि गोव्यवहारापत्तिः, गोभिन्नयत्किंचिन्महिष्यादिव्यावृत्तेस्तत्र सत्त्वात्। गोत्वावच्छिन्नप्रतियोगिताकभेदवत्त्वावच्छिन्नप्रतियोगिताकभेद एव गोव्यवहारे निमित्तमिति चेत्। गोत्वमननुगतमनुगतं वा! आद्ये उक्तव्यवहारानुपपत्तिस्तदवस्थैव। द्वितीये अनुगतमपि गोत्वं विधिरूपं निषेधरूपं वा! आद्ये-सिद्धं नः समीहितम्। द्वितीये च गोस्वलक्षणभिन्नेभ्यो यावद्भ्यो व्यावृत्तिरूपत्वे गवान्तरे गोव्यवहारानुपपत्तिः। तादृशाद्यतः-कुतश्चिद्व्यावृत्तिरूपत्वे अश्वेपि गोव्यवहारापत्तिर्दुर्वारैव। न च गोत्वाभाववानगोपदार्थं इति वाच्यम्। तथापि गोत्वाभाववद्व्यावृत्तिर्गोत्वमेवेति दिक्।

अत्र कन्दलीकारा अपि—के पुनरगावो यद्व्यावृत्त्या गवाकारेषु गोत्वमारोप्यते। ये गावो न भवन्ति तेऽगाव इति चेत्। गावः के! येऽगावो न भवन्तीति चेत्, गवाश्वस्वरूपे निरूपिते तद्व्यावृत्तत्वेनाऽगवां स्वरूपं निरूप्यते—अगवां स्वरूपे निरूपिते तद्व्यावृत्तत्वेन गवां स्वरूपनिरूपणमित्येकाप्रतिपत्तौ इतराप्रतिपत्तेरुभयाप्रतिपत्तिः। तदुक्तम्—

सिद्धश्च गौरपोह्येत गोनिषेधात्मकश्च यः।
तत्र गौरेव वक्तव्यो नञा यः प्रतिषिध्यते।
गव्यसिद्धे त्वगौर्नास्ति तदभावे तु गौः कुतः॥ इति प्राहुः।

वार्तिककृतस्तु—न युक्तोऽपोहः—विकल्पानुपपत्तेः। तथाहि योयं गोरपोहः स गोर्व्यतिरिक्तोऽव्यतिरिक्तो वा। व्यतिरिक्तोपि आश्रितोऽनाश्रितो वा। यद्याश्रितस्तदा गुणः आश्रितत्वात्, एवं च गोशब्देन गुणाभिधाने गौर्गच्छतीति सामानाधिकरण्यं न स्यात्। अथाऽनाश्रितः, तर्हि गोरपोह इति षष्ठी न स्यात्, गवापोहयोः परस्परमाधाराधेयभावादिरूपसंबन्धस्य विरहात्। अपरषष्ठ्याश्चाऽनवकाशात्। अथाऽव्यतिरिक्तः, गौरेवाऽपोह इति स्वीकारेपि न कश्चिदुपयोगः। किं चायमपोहो गोव्यक्तिभेदाद् भिद्यते न वा! आद्ये, गोपिण्डवदस्याप्यानन्त्येन शक्तिग्रहाऽसंभवाच्छब्दत आख्यानानुपपत्तिः। द्वितीये यद्येकोऽनेकगोसंबन्धी तदा गोत्वे एव पर्यवसानम्। किं चायमपोहोऽपोहशब्दवाच्योथाऽवाच्यः। वाच्योपि स्वरूपेण अपोहेन वा? न स्वरूपतः, तथासति गवाऽश्वादिभेदेनाऽपोहस्यानन्त्येन शक्तिग्रहाऽसंभवेन वाच्यत्वानुपपत्तेः। नाप्यपोहापोहेन, तथासति अपोहे वर्तमानोऽपोहोपि अपोहापोहेन, एवं सोप्यपोहापोहेनेत्यनवस्थापातात्। एवं चापोहस्यापोहशब्दाभिधेयत्वाभावेन तदतिरिक्तस्य कस्यचित्स्वार्थत्वासंभवेन च निरर्थक एवाऽपोहशब्द इति यथा यथा सौगतमतं परीक्ष्यते तथा तथा दम्भ एव प्रतीयते इत्याहुः। **बौद्धानामयमाशयः**—संसारो दुःखमयः, सर्वेषां विवेकिनां जिहासितश्च। अथ च वैराग्यार्थं दुःखरूपतयैव भावनीयमिति हि शाक्योपदेशः, परन्तु तदुच्छेदप्रकारो न वेदादिप्रतिपादितेन पथा वेदानां प्रामाण्यस्यैव सन्दिग्धत्वात्। **"तदप्रामाण्यमनृतव्याघातपुनरुक्तिदोषेभ्यः"** इति सूत्रेण तदप्रामाण्यस्य समुद्घोषात्। किन्तु चतुर्विधभावनया अपवर्गसिद्धिः। चतुर्विधभावना च सर्वं क्षणिकं क्षणिकं सर्वं दुःखं दुःखं सर्वं स्वलक्षणं स्वलक्षणं सर्वं शून्यं शून्यमिति। एताश्चतस्रो भावनाः सम्यगबुद्धाववस्थापितास्तत्त्वज्ञानद्वारा परनिर्वाणाख्यं मोक्षमासादयन्ति। अथ सर्वं क्षणिकं क्षणिकमित्याकारिकया भ्रमात्मिकया भावनया कथं परनिर्वाणं सेत्स्यतीति चेदत्रसौगताः—अर्थक्रियाकारित्वं विना नैकोपि पदार्थः सत्तावान्। यतो हि अर्थक्रियाकारित्वमेव हि सत्त्वम्, **न तु सत्ताजातिः**। यथा घटेन जलानयनादिरूपोर्थः—स्वसंवित्तिरूपा क्रिया वा। भावानां स्थिरत्वे च सत्त्वमनुपपन्नम्, अनुक्षणमर्थक्रियाकारित्वविरहात्। अतः स्वमेव स्वसदृशं कार्यं करोति प्रतिक्षणमुत्पद्यन्ते पदार्थाः, तत्र कार्यकारणात्मना विच्छिन्ना परम्परा प्रवहति। इयमेव विच्छिन्नपरम्परा "प्रतीत्यसमुत्पाद"शब्देनोच्यते। तथाच विवादाध्यासितो "घटादिः" क्षणिकः "स्वोत्पत्त्यव्यवहितोत्तरक्षणवृत्तिध्वंसप्रतियोगी" सत्त्वात्। यद्यत्सत् तत्तत्क्षणिकमिति सामान्यव्याप्तिरेव क्षणिकत्वे मानम्। जलधरपटले अन्त्यशब्दे च साहचर्यदर्शनान्न दृष्टान्तासिद्धिः। कार्याणां हि द्वयी स्थितिः-

अस्तु तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा, "अविनाशी वा अरेऽयमात्मा सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुतेश्चेति चेन्न। तस्य

वेदान्ती शंका करता है कि क्षणिक विज्ञान को आत्मा मानने में गौरव है तो नित्य विज्ञान ही को फिर आत्मा मान लिया जावे-नित्यज्ञान को आत्मा मानने में श्रुति भी प्रमाण है "अविनाशी वाऽरेयमात्मा" "सत्यं ज्ञान मनन्तं ब्रह्म" इत्यादि। अर्थात् अरे मैत्रैयी यह आत्मा अविनाशी है-सत्यस्वरूप है-ज्ञानस्वरूप है-आनन्दस्वरूप है। नैयायिक-यह आप

भिन्नभिन्नकार्याणां भिन्नभिन्नकाले उत्पत्तिः, यथा दण्डाद् घटादेः। अनेककार्याणामेककाले उत्पत्तिश्च, यथा घटे रूपरसगन्धस्पर्शानाम्। तथाच कस्यचित्कार्यस्य क्रमिककालोत्पत्तिकत्वम्, कस्यकार्यस्य एककालोत्पत्तिकत्वं प्रसिद्धम्। स्थैर्यपक्षे तु न क्रमसंभवः, समर्थात्कारणाद्युगपदनागतसर्वकार्यापत्तिः। असमर्थता चेत्कारणस्य तदा किंचिदपि कार्यं न स्यात्। युगपत्करणमपि दुर्घटम्, कार्यकरणसमर्थस्य "कार्यकारित्व"स्वभावस्योत्तरकालमप्यनिवृत्तेः। कृतस्य कारणं नास्ति कर्तव्यं चास्य न विद्यते निखिलकार्यकलापस्य कृतत्वादतः क्षणान्तरे न करोतीति चेत्तर्हि तदानीमस्याऽसत्त्वापत्तिः, समस्तार्थक्रियाकारित्वविरहादिति क्षणिकत्वमभ्युपेयम्। एवं विरुद्धधर्माध्यासादपि क्षणिकत्वसिद्धिः। तथाहि—एकमेव बीजादिकार्यं क्षेत्रनिपतितं सत् अंकुरं जनयति कुसूलस्थं पुनर्नेति सामर्थ्यासामर्थ्यरूपविरुद्धधर्माध्यासः स्पष्ट एव। एवञ्च क्षेत्रस्थबीजं कुशूलस्थबीजं यद्येकं स्यात्तदा सामर्थ्यासामर्थ्यरूपविरुद्धधर्मवत्स्यादित्यापत्तेः सुघटत्वात्। तथाच विरुद्धधर्माभावरूपेणापाद्याभावेन हेतुना तयोर्भेदसिद्धौ सत्त्वेन हेतुना क्षणिकत्वसिद्धिः। न च सामर्थ्यासामर्थ्ययोः स्वरूपयोग्यत्वतदभावरूपयोर्विरोधित्वेपि प्रकृतानुपयोगः, कारित्वाकारित्वयोः प्राकृतयोरपि न विरोध इति वाच्यम्। प्रसंगविपर्ययाभ्यां तत्साधनात्—तथाहि—प्रसंगः कुसूलस्थबीजं यद्यंकुरसमर्थं स्यादंकुरं जनयेत् न च करोति, तस्मान्न समर्थमिति। विपर्ययश्च क्षेत्रस्थबीजं यद्यंकुरजननासमर्थं स्यान्न कुर्यात्, करोति च तस्मान्नासमर्थमिति, आभ्यामेव कुसूलस्थक्षेत्रस्थबीजयोर्भेदसिद्धिः। तथाच क्षणिकत्वे एव पर्यवसानं बोध्यम्। प्रतिक्षणविनाशे किं कारणमिति चेत्, न किंचित्। तदुक्तं शान्तिरक्षितेन—

तत्र ये कृतकाः भावास्ते सर्वे क्षणभङ्गिनः।
विनाशं प्रति सर्वेषामनपेक्षतया स्थितिः॥
यद्भावं प्रति यत्रैव हेत्वन्तरमपेक्षते।
तत्तत्र नियतं ज्ञेयं स्वहेतुभ्यस्तथोदयात्॥
निर्निबन्धा हि सामग्री स्वकार्योत्पादने यथा।
विनाशं प्रति सर्वेपि निरपेक्षाश्च जन्मिनः॥ इति।

नित्यविज्ञानाऽत्मवादिनामद्वैतवेदान्तिनां मतमुपन्यस्यति। अस्तु इति। क्षणिकविज्ञाने इति। आत्मनः क्षणिकविज्ञानरूपत्वे इत्यर्थः। गौरवादिति।

सविषयकत्वासंभवस्य दर्शितत्वात्, निर्विषयस्य ज्ञानत्वे मानाभावात्। सविषयकत्वस्याप्यननुभवात्, अतो विज्ञानादिभिन्नो नित्य आत्मेति सिद्धम्। "सत्यं ज्ञान"मिति तु ब्रह्मपरं, जीवे तु नोपयुज्यते, ज्ञानाज्ञानसुखित्वदुःखित्वा-

(वेदान्ती) का कथन ठीक नहीं है-क्योंकि वह नित्यविज्ञान सविषयक है या निर्विषयक है—यदि सविषयक तो यह बतावो कि जगद्‌विषयक है या यत्किंचिद्वस्तुविषयक है—यदि जगद्‌विषयक है तो सर्वज्ञत्व की आपत्ति है-और द्वितीयपक्ष में विनिगमनाविरह है यह हम पहिले सविषयकत्व का असम्भव दिखला चुके हैं (कि नित्यविज्ञानरूप उस आत्मा को सविषयक नहीं मान सकते हैं) यदि कहो कि निर्विषयक है, तो निर्विषयक ज्ञान में कोई प्रमाण नहीं है। (वेदान्ती का कहना है कि आत्मा जिन=विषयों का प्रत्यक्ष करता है वह विज्ञानस्वरूप आत्मा तत्तद्विषयक होने से सविषयक है अतः आत्मा को सविषयकत्व निर्विवाद है) इस पर नैयायिक उत्तर देता है कि "सविषयकत्वस्याप्यननुभवात्" विज्ञानस्वरूप आत्मा सविषयक है ऐसा अनुभव होता नहीं है—अतः ज्ञानादि से भिन्न नित्य आत्मा है यह सिद्ध हो गया। प्रश्न—वेदान्ती-यदि ज्ञान से भिन्न आत्मा आपने (नैयायिक ने) स्वीकार कर लिया—तब "सत्यं ज्ञान मनन्तं ब्रह्म" इत्यादि जो आत्मा को ज्ञानस्वरूपता की प्रतिपादक श्रुति हैं उसके साथ आपके कथन का विरोध हो जायेगा। उत्तर-नैयायिक-"सत्यं ज्ञानमनन्तं ब्रह्म" यह श्रुति ब्रह्मपद सामानाधिकरण्य से ब्रह्म को ज्ञानस्वरूपता का प्रतिपादन करती है—न कि जीव को। वही मूल में कहा है कि "सत्यं ज्ञानमिति हि ब्रह्मपरं जीवेषु नोपयुज्यते"। प्रश्न—वेदा० जीव तथा ब्रह्म का

अनन्तसंस्कारकल्पने गौरवादित्यर्थः। **नित्यविज्ञानमेवेति**। एवकारेण क्षणिकविज्ञानव्यावृत्तिः। आत्मनो नित्यविज्ञानरूपत्वे श्रुतिं प्रमाणयति **अविनाशीति**। याज्ञवल्क्योक्तिरियम्। अरे-गार्गि-अयमात्मा अविनाशी त्रिकालाऽबाध्यः सत्यादिरूपः। इत्यादीत्यादिपदेन **"नित्यं विज्ञानमानन्दं ब्रह्मेति"** श्रुतिसंग्रहः। एकमेव ब्रह्म "चैतन्यं" परमेश्वरजीवभेदाद्द्विविधम्। तत्र मायावच्छिन्नं चैतन्यमीश्वरः। अविद्यावच्छिन्नं चैतन्यं जीवः। आत्ममात्रस्य विज्ञानरूपत्वमीश्वरस्यैव वेति विकल्प्याद्ये दूषणमाह **तस्येति**। **दर्शितत्वादिति**। **"तस्य जगद्विषयकत्वे"** इत्यादिना दर्शितत्वादित्यर्थः। तथा च जीवस्य तथात्वाऽसंभवान्नात्ममात्रस्य नित्यज्ञानस्वरूपत्वमिति भावः। **मानाभावादिति**। ज्ञानत्वस्य विषयिताव्याप्यत्वादिति भावः। ननु जीवस्य न जगद्विषयकत्वं न वा नियतयत्किंचिद्विषयकत्वं, किन्तु यद्विषयकत्वं यत्र जीवेऽनुभवसिद्धं, तत्र तद्विषयकत्वमित्यत आह **अननुभवादिति**। सविषयकत्वस्य जीवात्मनोऽननुभवात्, घटस्य ज्ञानमित्यनुभवात् ज्ञाने घटादिविषयकत्वमंगीकृतम्, **"घटस्यात्मे"**-त्यनुभवाभावाद् घटविषयकज्ञानवानित्यनुभवाच्चात्मनो न घटादिविषयकत्वमतो नित्यज्ञानं नात्मेति भावः। तदेवाह **अत इति**। सविषयकत्वाभावादेवेत्यर्थः। ननु श्रुतिरेव जीवस्य ज्ञानस्वरूपत्वे प्रमाणमत आह **सत्यमिति**। **ब्रह्मपरमिति**।

दिभिर्भेदसिद्धौ सुतरामीश्वरभेदः सिद्धयति। अन्यथा बन्धमोक्षव्यवस्थानुपपत्तेः। योपीश्वराऽभेदबोधको वेदः, सोपि तदभेदेन तदीयत्वं प्रतिपादयन् स्तौति, अभेदभावनयैव यतितव्यमिति वदति। अत एव "सर्वे आत्मानः

अभेद है अतः जीव को भी ब्रह्मवत् नित्यविज्ञानस्वरूपता निर्विवाद है। उत्तर–नैयायि० ज्ञान–अज्ञान–सुखित्व-दुःखित्व–इत्यादि धर्मों से जीवों का ही जब कि परस्परभेद सिद्ध है- तब जीवों से सुतरां ईश्वर (ब्रह्म) का भेद सिद्ध है-(क्योंकि जीव अनेक हैं–और ईश्वर (ब्रह्म) एक है।

अन्यथा (जीव-ईश्वर का भेद नहीं मानेंगे तो) बन्ध–और मोक्ष की व्यवस्था नहीं बनेगी–(क्योंकि ईश्वर को तो बन्ध मोक्ष होता नहीं–अब यदि जीव को भी ईश्वरस्वरूप ही मानेंगे तो जीव को भी बन्ध-मोक्ष व्यवस्था की अनुपपत्ति हो जावेगी) और जो भी जीव का ईश्वर (ब्रह्म) से अभेदबोधन करने वाले "तत्त्वमसि" इत्यादि उपनिषद् वाक्य हैं–वे भी जीव को तदीयत्व (ईश्वर स्वरूपता का प्रतिपादन करते हैं। (अर्थात् उस ईश्वर (ब्रह्म) के समान तुम (श्वेत केतु हो) इसलिये उस ईश्वर की अभेदभावना से उपासना करनी चाहिये। इसी श्रुति में यह भी बतलाया है कि सब जीवात्मा परमेश्वर में समर्पित हैं–अर्थात् ईश्वर के

श्रुतिस्तु ब्रह्मपदसामानाधिकरण्याद् ब्रह्मस्वरूपप्रतिपादनपरेत्यर्थः। जीवे तु नोपयुज्यते इति न तु जीवप्रतिपादनपरेत्यर्थः। ननु जीवब्रह्मणोरैक्यान्नित्यविज्ञानस्वरूपत्वं जीवस्य निराबाधमित्यतो जीवब्रह्मणोर्भेदं साधयति ज्ञानाज्ञानेति। कश्चिद्ज्ञानी—कश्चिदज्ञानी—कश्चित्सुखी--कश्चिद्दुःखी इत्यादिप्रतीतिविषयैर्ज्ञानत्वादिविभिन्नधर्मैर्जीवानां भेदः स्वकार्यः। अत्र एतच्छरीरावच्छेद्यज्ञानादिमान् एतच्छरीरभिन्नशरीरावच्छेद्यविभिन्नः एतच्छरीरावच्छेद्यज्ञानादिमत्त्वात्-यन्नैवं तन्नैवं शरीरान्तरावच्छिन्नात्मवदित्यनुमानेन जीवानां परस्परं भेदसिद्धिर्बोध्या। अयमाशयः ऐकात्म्ये हि यथा बाल्यावस्थायामनुभूतं वृद्धावस्थायामनुसन्धीयते मम सुखमासीत् मम दुःखमासीदिति, एवं देहान्तरानुभूतमपि अनुसन्धीयेत, अनुभवितुरेकत्वात्। न चैवमस्ति-अतः प्रतिशरीरं नानात्मानः। यथा सर्वत्रैकाकाशस्य श्रोत्रत्वे कर्णशष्कुल्याद्युपाधिभेदाच्छब्दोपलब्धिव्यवस्था-तथाऽऽत्मैकत्वेपि देहभेदादनुभवव्यवस्थेति चेत्। विषमोयमुपन्यासः--प्रतिपुरुषं व्यवस्थिताभ्यां धर्माधर्माभ्यामुपगृहीतानां शब्दोपलब्धिहेतूनां कर्णशष्कुलीनां व्यवस्थानाद्युक्ता तदधिष्ठाननियमेन शब्दग्रहणव्यवस्था, ऐकात्म्ये तु धर्माधर्मयोरव्यवस्थानाच्छरीरव्यवस्थाऽभावे किंकृता सुखदुःखोत्पत्तिव्यवस्था, मनःसंबन्धस्यापि साधारणत्वात्। यदि च नानात्मानः तदा सर्वेषामात्मनां सर्वगतत्वेन सर्वशरीरसंबन्धेपि न साधारणो भोगः। यस्य कर्मणा यच्छरीरमारब्धं तस्यैव तद्भोगायतनं न सर्वस्य, कर्मापि यस्य शरीरेण कृतं तस्यैव तद्भवति नापरस्य, एवं शरीरान्तरनियमः कर्मान्तरनियमादिति। तथाच पारमर्षसूत्रम् "व्यवस्थातो नानात्मानः" इति। अनैकात्मत्वे ऐकात्म्यश्रु-

समर्पिता" इति श्रूयते । मोक्षदशायामज्ञाननिवृत्तौ अभेदो जायते, इत्यपि न, भेदस्य नित्यत्वेन नाशाऽसंभवात्, भेदनाशेपि व्यक्तिद्वयं स्थास्यत्येव । न च द्वित्वमपि नश्यतीति वाच्यम् । तव निर्धर्मके ब्रह्मणि सत्यत्वाभावेपि सत्य-

लिये वे आत्मसमर्पण कर देते हैं। (सो वह समर्पण अभेदपक्ष में असम्भव है) प्रश्न—वेदान्ती—मोक्षकाल में जब कि जीवात्माओं का अज्ञान नष्ट हो जाता है तब ईश्वर से उनका अभेद हो जाता है। उत्तर—नैया० यह बात भी ठीक नहीं—क्योंकि भेदनित्य है उसका नाश नहीं हो सकता है (जिससे कि अभेद हो) और दूसरी बात यह है कि भेद का नाश होने पर भी जीव-और ब्रह्म ये दो व्यक्ति तो रहेंगी ही। प्रश्न—वेदा० द्वित्व भी मोक्ष दशा में नष्ट हो जाता है—(अर्थात् मोक्षदशा में जीव ब्रह्मस्वरूप जब कि हो जाता है तो तद्गत द्वित्व भी नष्ट हो जाता है] उत्तर—नैया० सो ठीक नहीं-क्योंकि तुम्हारे निर्धर्मकब्रह्म में सत्यत्व के न

तिविरोध इत्यपि नास्ति, मुमुक्षुणा सर्वं विहायाऽऽत्मप्रतिष्ठेन भवितव्यम्, न चैक एवेति तात्पर्यादिति संक्षेपः। **सुतरामिति** । अनायासेनेत्यर्थः। **ईश्वरभेदः**= ईश्वरजीवात्मनोर्भेदः। **सिद्ध्यतीति** । जीवः ईश्वरभिन्नः सुखित्वात्, ईश्वरो वा जीवभिन्नः एकत्वादित्याद्यनुमानं प्रमाणतया बोध्यम्। जीवात्मनां नानात्वसिद्धौ ईश्वरस्यैकस्य नानाजीवात्मकत्वाऽसंभवाद्, एकत्वाऽनेकत्वयोर्विरोधादिति भावः। **अन्यथा** = ईश्वरस्य जीवात्मकत्वे। **बन्धमोक्षव्यवस्थानुपपत्तेरिति** । कश्चित्संसारी बद्धः, कश्चित्संसारी मुक्त इति व्यवस्थाऽनुपपन्ना स्यादित्यर्थः। चैत्रमैत्रात्मनोरीश्वररूपयोरैक्यादिति भावः।

अथ तत्तदन्तःकरणावच्छिन्नचैतन्यस्यैकत्वेपि तत्तदन्तःकरणस्य नाशे तत्तदन्तःकरणावच्छिन्नचैतन्यस्य मुक्तत्वव्यवहारः, यदन्तःकरणस्य न नाशस्तदन्तःकरणावच्छिन्नचेतन्ये बद्धत्वव्यवहारः इति बद्धमुक्तव्यवस्थाया नानुपपत्तिरिति चेत्। एवमपि मोक्षार्थं प्रयत्नानुष्ठानवैफल्यापत्तेर्दुर्वारत्वात्, एकान्तःकरणनाशेपि अन्तःकरणान्तरावच्छिन्ने स्वात्मनि दुःखोत्पत्तेरावश्यकतया प्रवृत्तिफलस्य निर्दुःखत्वस्याऽसंभवात्, यदि चाऽन्तःकरणस्यैव धर्मः सुखादिर्न चैतन्यस्येत्युच्यते। तदापि मुक्त्यर्थप्रयासो व्यर्थ एव, स्वस्य नित्यत्वात्। यदि च भ्रान्तिनिवृत्त्यर्थं प्रयत्नः कर्तव्य इत्युच्यते, तदापि अन्तःकरणान्तरावच्छिन्ने स्वस्मिन्नेव भ्रान्तेरावश्यकतया प्रयत्नस्य वैफल्यापत्तेर्दुर्वारत्वादिति ध्येयम्। ननु जीवब्रह्मणोः परस्परं भिन्नत्वेऽभेदप्रतिपादकश्रुतिविरोध इत्यत आह **योपीति** । **वेदः** = श्रुतिः। सा च तत्त्वमसि अहं ब्रह्मास्मी"त्यादिरूपा। **तदभेदेन** = ईश्वराभेदेन। **तदीयत्वम्** = ईश्वरीयत्वम्। ईश्वरस्वरूपत्वमिति यावत्। **अत एव** = अभेदप्रतिपादकश्रुतेस्तदीयत्वबोधनादेव । **आत्मानः** = जीवात्मानः। **समर्पिता इति** । आत्मनि परमेश्वरे इति शेषः।

स्वरूपं तदितिवत्, द्वित्वाभावेपि व्यक्तिद्वयात्मकौ तौ इति सुवचत्वात्। मिथ्यात्वाभावोऽधिकरणात्मकस्तत्र सत्यत्वमिति चेद्, एकत्वाभावो व्यक्तिद्वयात्मको द्वित्वमप्युच्यताम्, पृथिवीजलयोर्न गन्ध इतिवदुभयं नैकमित्यस्य सर्वजनसिद्धत्वात्।

योऽपि तदानीमभेदप्रतिपादको वेदः सोपि निर्दुःखत्वादिना साम्यं प्रतिपादयति, संपदाधिक्ये पुरोहितोयं राजा संवृत्त इतिवत्, अत एव "निरञ्जनः परमं साम्यमुपैति" इति श्रूयते। ईश्वरोपि न ज्ञानसुखात्मा, किन्तु

रहने पर भी उस ब्रह्म को जैसे सत्यस्वरूप मानते हो-उसी प्रकार द्वित्व का अभाव (नाश) होने पर भी (मोक्षदशा में) जीव और ब्रह्म दो व्यक्ति तो अवश्य ही रहेंगे। प्रश्न—वेदा० ब्रह्म में सत्यत्व है मिथ्यात्व का अभाव-और वह मिथ्यात्वाभाव अधिकरण (ब्रह्म) स्वरूप है— (क्योंकि अभाव को हम अधिकरणस्वरूप मानते हैं—अथ च अधिकरण सबका ब्रह्म है। उत्तर—नैया० यदि ऐसा आपका कथन है तो हम भी कहेंगे कि एकत्व का अभाव ही द्वित्व है—और वह अभाव व्यक्तिद्वयस्वरूप है-क्योंकि जैसे पृथ्वी में गन्ध रहने पर भी पृथ्वी-जल दोनों में गन्ध नहीं है—वैसे ही प्रत्येक में एकत्व रहने पर भी जीव-ब्रह्म दोनों में एकत्व नहीं है यह प्रतीति सर्वजन सिद्ध है। और जो मोक्षदशा में जीव-ब्रह्म के अभेद का प्रतिपादक वेद (श्रुति) है "तत्त्वमसि" इत्यादि—वह भी मोक्षावस्थापन्नजीव के निर्दुःख हो जाने के कारण जीव में ईश्वर के साम्य (समानता) का प्रतिपादन करता है। जैसे सम्पत्ति के अधिक हो जाने पर लोग पुरोहित में भी राजा का व्यवहार करते हैं-इसीलिये मोक्षावस्था में निरञ्जन (दुःखरहित) जीव ईश्वर के साथ परम समता तो प्राप्त होता है-इसी अर्थ का बोधक श्रुति

जीवानां **"नाथ तवाह"**मिति समर्पणं परमेश्वरभिन्नत्वे एव सम्भवति न त्वभेदे इति भावः।

अथ भेदोपि मिथ्या ब्रह्मभिन्नत्वात्, तथाचाऽज्ञानकाले भेदसत्त्वेपि मोक्षकाले आत्मनोऽभेदः स्यादेवेति सिद्धान्तिमतं निरस्यति **मोक्षदशायामिति**। इत्यपि न, युक्तिसिद्धमिति शेषः। तुष्यतु इति न्यायेनाह **भेदनाशेपीति**। भेदसत्त्वे तु व्यक्तिद्वयं निर्विवादमेवेत्यपिना सूचितम्। द्वित्वमपीति। अपेक्षाबुद्धिनाशादिति भावः। **तव** = वेदान्तिनः। **निर्धर्मके इति**। तथाच चैतन्यं सत्यत्वाभाववत् निर्धर्मकत्वादिति भावः। अथ निर्धर्मकत्वं स्वभिन्नधर्मशून्यत्वम्, मिथ्यात्वाभावरूपसत्यत्वस्य ब्रह्मरूपतयाऽभावस्याधिकरणात्मत्वात्, सत्यत्वं नानुपपन्नमित्याशंकते **मिथ्यात्वाभाव इति**। ननु एकत्वाधिकरणे कथं तदभावरूपद्वित्वमत आह **प्रत्येकमिति**। ननु "ब्रह्मविद् ब्रह्मैव भवतीति" श्रुतेः का गतिरत आह **योपीति**। **तदानीं** = मोक्षदशायाम्। **अत एव** = उक्तश्रुतेः साम्यप्रतिपादकत्वादेव।

ज्ञानाद्याश्रयः, "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादौ विज्ञानपदेन ज्ञानाश्रय एवोक्तः, "यः सर्वज्ञः स सर्वविदि"त्याद्यनुरोधात्। आनन्दमित्यत्र "अर्शादित्वान्मत्वर्थीयाऽच्प्रत्ययः, अन्यथा पुंलिंगत्वापत्तेः। आनन्दोपि दुःखाभावे उपचयते, भाराद्यपगमे सुखी संवृत्तोहमिति वत्। अस्तु वा तस्मिन्नानन्दः, न त्वसौ आनन्दः, "असुख"मिति श्रुतेः। न विद्यते सुखं यस्येति कुतो नार्थ इति चेन्न, क्लिष्टकल्पनापत्तेः, प्रकरणविरोधात्, आनन्दमित्यत्र मत्वर्थीयाच्प्रत्ययविरोधाच्चेति संक्षेपः।

वाक्य है (निरञ्जनः परमं साम्यमुपैति)। "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादि श्रुति में आत्ममात्र को ज्ञानस्वरूपता का निरास करके अब ईश्वर को ज्ञानस्वरूपता का निरास करते हैं "ईश्वरोऽपि न ज्ञानसुखात्मा" ईश्वर भी ज्ञानस्वरूप-एवं सुखस्वरूप नहीं है-किन्तु ज्ञानादि का आश्रय है। क्योंकि "नित्यं विज्ञानमानन्दं ब्रह्म" यहाँ पर विज्ञानपद से ज्ञानादि का आश्रय ही लिया गया है—कारण कि "यः सर्वज्ञः स सर्ववित्" यहाँ पर "यः सर्वज्ञः" जो सामान्यरूप से सर्वविषयक ज्ञानवान् है-"स सर्ववित्" विशेषरूप से सर्वविषयक ज्ञानवान्" है-सो यहाँ पर आत्मा को ज्ञानाश्रय सिद्ध किया है—इस अनुरोध से "नित्यं विज्ञानमानन्दं ब्रह्म" "सत्यं ज्ञान मनन्तं ब्रह्म" इत्यादि सर्वत्र श्रुति में ज्ञानपद से ज्ञान का आश्रय ही आत्मा विवक्षित है। "आनन्दम्" इसका भी आनन्दवान् यही अर्थ है-क्यों "अर्श आदिभ्योऽच्" इस सूत्र से मतुप् अर्थ में अच् प्रत्यय करने से आनन्दशब्द का समवायेन ज्ञानाश्रय यही अर्थ है। अन्यथा आनन्द शब्द नित्यपुल्लिङ्ग होने के नाते "आनन्दो ब्रह्म" ऐसी पुल्लिङ्गत्व की आपत्ति होनी चाहिये थी। दूसरी बात यह है कि आनन्द शब्द दुखाभावरूप अर्थ में उपचरित है-जैसे शिर के ऊपर से भार (बोझा) दूर होने पर "मैं सुखी हो गया" ऐसी प्रतीति होती है—ऐसे ही दुःखाभाव होने से सुखित्वप्रत्यय मुक्तावस्था में जीव को होता है। यदि यही मान लिया जाय कि ईश्वर या मुक्तात्मा में आनन्द रहता है तो भी आत्मा आनन्दरूप नहीं सिद्ध होता है—क्योंकि "असुखम्" इस श्रुति में ईश्वर सुख अर्थात् आनन्दस्वरूप नहीं है ऐसा कहा गया है। प्रश्न-नहीं है सुख जिसमें यही "असुखम्" इस श्रुति का अर्थ क्यों न किया जाय। उत्तर—क्लिष्टकल्पनापत्ति हो जायेगी-दूसरे प्रकरण विरोध भी हो जावेगा। और "आनन्दम्" यहाँ पर मत्वर्थीय अच् प्रत्यय का विरोध भी हो जावेगा-"आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचन" जो पुरुष ब्रह्म के आनन्द को जानता है वह किसी से नहीं डरता है-यहाँ पर आनन्द तथा उसके अधिकरण का भेद षष्ठी विभक्ति से स्पष्ट सिद्ध हो रहा है। यह वेदान्तमत का संक्षेप है।

निरंजनः = निर्दुःखः। न च भेदनाशे प्रतिबन्धकाभावादेव तादात्म्यमप्युत्पद्यतामिति वाच्यम्। अभेदभावनामात्रेण तादात्म्योत्पत्तौ घटपटयोरपि तथात्वापत्तेः। ईश्वरस्य विज्ञानरूपत्वे द्वितीयपक्षे दोषमाह **ईश्वरोपीति। ज्ञानाश्रय एवोक्त इति।**

एतेन—प्रकृतिः कर्त्री—पुरुषस्तु पुष्करपलाशवन्निर्लेपः, किन्तु चेतनः, कार्यकारणयोरभेदात् कार्यनाशे सति कार्यरूपतया तन्नाशोपि न स्यादित्यकारणत्वं तस्य, बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत्कल्पनम्। बुद्धिश्च

सांख्यमत खण्डन—'एतेन' इसका 'इतिमतमपास्तम्' इसके साथ सम्बन्ध है। एतेन इसका अर्थ है आत्मा को ज्ञानवत्ता जो पूर्व में सिद्ध कर चुके हैं उस पुर्व युक्ति से—तथा "कृत्यदृष्ट भोगानामिव" इस अग्रिमयुक्ति से सांख्यमत खण्डित हो गया। सांख्यमत में प्रकृति जगत् की कर्त्री है—और पुरुष कमलपत्र की तरह अलिप्त तथा चेतन है। कार्य तथा कारण का इनके मत में अभेद है—कार्य का नाश होने पर कार्यरूप होने से पुरुष का भी नाश न हो जाय इसलिये पुरुष (जीवात्मा) को अकारण कह दिया। बुद्धिगत जो चैतन्याभियान 'मैं चेतन हूँ' अन्यथा (पुरुष को माने बिना) अनुपपन्न है अतः पुरुष की

विज्ञानमस्मिन्निति विज्ञानम्। विपूर्वकज्ञाधातोः "करणाधिकरणयोश्चे"ति सूत्रेणाऽधिकरणार्थे ल्युट्प्रत्ययादिति भावः। अथाऽनन्दवदित्यर्थोपि कथं संगच्छते तव मते ईश्वरे आनन्दाभावादत आह **आनन्दोपीति**। लक्षणाभयादाह **अस्तु वेति। तस्मिन्** = ईश्वरे। परमात्मनि नित्यज्ञानमिव नित्यसुखमपि भवतु इत्यर्थः। **असुखमिति**। न सुखं असुखमिति नञ्तत्पुरुषः सुखभिन्नमित्यर्थः। वेदान्ती शंकते **न विद्यते इति। क्लिष्टकल्पनापत्तेरिति**। अन्यपदार्थप्रधाने बहुव्रीहौ अन्यपदार्थलाभार्थं नञस्तत्र लक्षणाया आवश्यकत्वादिति भावः। ननु तत्र नञोऽभाववति लक्षणा तवापि दुर्वारा, अन्यथा समानवचनत्वानुपपत्तेरत आह **प्रकरणविरोधादिति**। **"अस्थूलं-अनणु-अदीर्घ"मित्यादौ** सर्वत्र नञ्तत्पुरुषदर्शनेन तत्सन्निधौ पठितस्य असुखमितिपदस्य बहुव्रीहिस्वीकारे प्रकरणविरोधादित्यर्थः।

सांख्यमतं दूषयितुमुपन्यस्यति **एतेनेति**। आत्मनो ज्ञानवत्त्वसाधनेनेत्यर्थः। इदमुपलक्षणम्। वक्ष्यमाणयुक्त्या चेत्यपि बोध्यम्। सांख्यमते चेतनत्वं न ज्ञानाश्रयत्वम्, पुरुषे ज्ञानाभावात्। किन्तु जातिविशेषः, तदेवाऽऽत्मत्वमिति। **पुष्करपलाशवत्** = पद्मपत्रवत्। **निर्लेप इति**। तथा च यथा पद्मपत्रमम्भसा लिप्तं न भवति तथा पुरुषः कृतिज्ञानसुखदुःखेच्छादिलेपरहित इत्यर्थः। तथाच पुरुषः कर्तृत्वाभाववान् कारणत्वाभावादित्यनुमानं तत्र प्रमाणं बोध्यम्। स्वरूपासिद्धिं परिहरति **कार्यकारणयोरभेदादिति**। कार्यकारणयोस्तादात्म्यादित्यर्थः। **तन्नाशोपि** = कारणनाशोपि। **न स्यादिति** = मा भवतु इत्यर्थः। **तस्य** = पुरुषस्य। तथाचाऽऽत्मना घटादिकारणत्वे कार्यनाशे सति आत्मनो नाशापत्तिरत आत्मा न कारणमिति भावः। एवं पुरुषस्य घटादिकारणत्वे घटादि-

प्रकृतेः परिणामः, सैव महत्तत्त्वमन्तःकरणमित्युच्यते, तत्सत्त्वासत्त्वाभ्यामेव पुरुषस्य संसारापवर्गौ, तस्या एवेन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना संबन्धः, पुरुषे कर्त्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाऽग्रहात्। ममेदं कर्त्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतया तत्प्रतिबिंबाद-

कल्पना करते हैं। बुद्धि प्रकृति का परिमाण है—उसको ही महत्तत्व तथा अन्तः करण भी कहते हैं बुद्धि के सत्त्व (होने) से पुरुष संसारी होता है—और असत्त्व (न होने) से पुरुष को अपवर्ग (मोक्ष) होता है। उस अन्तः करणरूप बुद्धि का चक्षुरादि इन्द्रिय रूप नालिका के द्वारा ज्ञानरूप परिणाम ही घटादि पदार्थों के साथ सम्बन्ध है—

अभिप्राय यह है कि सांख्य मतानुसार "अयं घटः" "अयं घटः" इत्यादि ज्ञान कैसे होता है सो हमारा अन्तः करण (बुद्धि) चक्षुरादि इन्द्रियरूप नालिका के द्वारा घट-घट आदि पदार्थों तक जाकर ठीक घट के आकार में परिणत हो जाता है—अर्थात् वास्तविक जो उस विषय का स्वरूप होता है उसी स्वरूप में हमारा अन्त करण बदल जाता है – अन्त करण बदलजाता है–अन्त करण का जो उस विषयरूप से बदल जाना इसी को उस विषय का ज्ञान कहते है। पुरुष में 'मैं कर्त्ता हूँ', बुद्धि में 'मैं चेतन हूँ' यह अभिमान–बुद्धि और पुरुष में भेदज्ञान न होने के कारण होता है। "ममेदं कर्त्तव्यम्" मेरा यह कर्त्तव्य है— इस वाक्य में "मम, इदम्, कर्त्तव्यम्, ये तीन अन्श हैं। उनमें 'मम' अन्श पुरुष (जीवात्मा) का है–क्योंकि बुद्धि में प्रतिबिम्बित हुवा पुरुष भासता है–अर्थात् पुरुष का

कायस्यापि नाशो न स्यात्, कार्यकारणयोरभेदात्, पुरुषस्य नाशरूपविकाराऽसंभवादिति ध्येयम्। ननु एतादृशनिर्विशेषपुरुषस्वीकारे किं प्रमाणमत आह **बुद्धिगतेति**। बुद्धिगतो यश्चैतन्याभिमानः "चेतनोऽहमि"त्याकारकः तस्य, **अन्यथा** "पुरुषस्यास्वीकारे" **अनुपपत्त्या** "असिद्धया" **तत्कल्पनं** "तादृशाभिमानोपपत्तये पुरुषकल्पनम्" क्वचित्प्रसिद्धस्यैव चैतन्यस्य बुद्धौ आरोपसंभवात्, तत्प्रसिद्ध्यर्थं पुरुषस्वीकार इति भावः। ननु का सा बुद्धिर्यस्यां पुरुषसंबन्धाच्चैतन्यं समारोप्यते इत्यत आह **बुद्धिश्चेति**। **प्रकृतेः** = मूलप्रकृतेः। **परिणामः** = अवस्थाविशेषः। **सैव** = बुद्धिरेव। ननु पुरुषस्य कर्त्तृत्वाभावे तत्र धर्माधर्मयोरुत्पत्त्यभावात्तदधीनसुखदुःखयोस्तत्रानुत्पत्तौ दुःखध्वंसरूपमोक्षः पुरुषस्य न स्यादत आह **तत्सत्त्वासत्त्वाभ्यामिति**। बुद्धिसत्त्वासत्त्वाभ्यामित्यर्थः। तथाच बुद्धिसत्त्वे इन्द्रियमार्गेण बहिर्निर्गताया बुद्धेर्घटादिविषयदेशप्राप्तौ घटाद्याकारेण बुद्धेः परिणामो जायते स एव परिणामो वृत्तिरित्युच्यते, एतन्मते वृत्तिरेव प्रत्यक्षं प्रमाणम्। तादृशबुद्धिसंबन्धात्पुरुषस्य संसारः। बुद्धेरसंबन्धादपवर्गः। दुःखसंबन्धतद्ध्वंसरूपौ संसारमोक्षौ न पुरुषस्य किन्तु बुद्धेरेवेति भावः। तथाच पुरुषेण सह घटादिविषयस्य स्वीकारवृत्तेरगृहीताभेदताकत्वसंबन्धः, न संयोगादिरित्याह **तस्या एवेति**।

तात्त्विकः, दर्पणस्येव मुखोपरागः, इदमिति विषयोपरागः इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विकः निःश्वासाभिहतदर्पणस्येव मलिनिमा, कर्त्तव्यमिति व्यापारांशः, तेनांशत्रयवती बुद्धिः, तत्परिणामेन ज्ञानेन पुरुषस्याऽतात्त्विकः संबन्धः, दर्पणमलिनिम्नेव मुखस्य, उपलब्धिरित्युच्यते। ज्ञानवत् सुख-

चैतन्य बुद्धि में प्रतीयमान होता है–परन्तु दर्पण में जैसे मुख का प्रतिविम्ब वास्तविक नहीं है–अर्थात् उस प्रतिविम्ब से दर्पण में किसी प्रकार का भी परिवर्त्तन नहीं होता है–क्यों कि दर्पण स्वच्छ है और न उस प्रतिविम्ब से मुख में ही किसी प्रकार का असर होता है। ऐसे ही बुद्धि में जो पुरुष का प्रतिविम्ब (छाया-आकार) है वह भी मिथ्या है। एवं द्वितीय अंश विषय का है-क्योंकि बुद्धि ही विषयाकारेण परिणत होती है अर्थात् बुद्धि का चक्षुरादि इन्द्रियद्वारा विषय के साथ सम्बन्ध होता है वह सम्बन्ध (उपराग) सत्य है। जैसे निःश्वासाभिहत फूंकमारने से) मलिनिमा (मालिन्य दोष) का सम्बन्ध सत्य है–वैसेही बुद्धि का विषयाकारेण परिणामरूप से विषय के साथ सम्बन्ध सत्य है। ऐसे तीसरा "कर्त्तव्यम्" यह व्यापार अंश है– कर्त्तव्य अंश का अर्थ है कि किसी विषय की तरफ प्रवृत्ति होना–अर्थात् विषय के लिये प्रयत्न या चेष्टा करना। यह भी बुद्धिधर्म ही है-जैसे कि निःश्वास से अभिहत दर्पण में मालिन्य दोष किसी प्रकार का असर नहीं आने पाता-अर्थात् बाद में दर्पण फिर स्वच्छ का स्वच्छ ही है। ऐसे ही बुद्धि में वर्त्तमान जो घट-पट आदि विषय का ज्ञान उस ज्ञान से पुरुष का वास्तविक सम्बन्ध नहीं है। वही मूल में कहा है कि 'तत्परिणामेन ज्ञानेन पुरुषस्यातात्त्विकः सम्बन्धः" अर्थात् पुरुष स्वच्छ ही है–क्योंकि उस परिणाम (ज्ञान)

बुद्धेरेवेत्यर्थः। यद्वा बुद्धितो ज्ञानस्य भेदमाह **तस्या एवेति**। तथाच बुद्धेः परिणामो ज्ञानं न तु बुद्धिरेवेति भावः। **भेदाऽग्रहादिति**। बुद्धिपुरुषयोर्भेदाऽग्रहादित्यर्थः। पुरुषः कर्त्ता इत्यनुभवो बुद्धिपुरुषयोर्भेदाऽग्रहनिबन्धनो भ्रमात्मक एवेति दर्शयति **पुरुषे कर्तृत्वाभिमान इति**। पुरुषे **"अहं करोमी"**तिकर्तृत्वप्रकारकाभिमानः बुद्धिश्चेतना इति बुद्धौ चैतन्याभिमानश्च, भेदाग्रहात् विवेकाग्रहादिति यावत्। प्रतीयते इत्यर्थः। इदानीं बुद्धितदुपलब्ध्योर्भेददर्शनार्थं बुद्धेरंशत्रयं दर्शयति **ममेदमित्यादिना**। मम इदं कर्तव्यमिति अंशत्रयवती बुद्धिरित्यर्थः। **मदंशः**=अस्मच्छब्दार्थः। **पुरुषोपरागः**=पुरुषसंबन्धः। **तत्प्रतिबिंबात्**=तस्य पुरुषस्य बुद्धौ प्रतिबिंबात्। अभेदः समारोपितो भवति स चाऽभेदः अतात्त्विकः अवास्तवः, दर्पणस्य यथा मुखसंबन्धः प्रतिबिम्बमात्रम्, न तु तात्विकः, तथा बुद्धिपुरुषयोर्भेदाऽग्रहादेकत्वाभिमानः पुरुषोपराग इत्यर्थः। विषयस्य बुद्ध्या सह संबन्धमाह **इदमिति**। इदमंशो यो घटादिर्विषयः-तस्योपरागः बुद्ध्या सह संबन्धः "स च ज्ञानात्मकवृत्तिरूपः, तादृशज्ञानं च घट इत्याकारकम्–इन्द्रियप्रणालिकया जायमानः

दुःखेच्छाद्वेषप्रयत्नधर्माऽधर्मा अपि बुद्धेरेव कृतिसामानाधिकरण्येन प्रतीतेः। न च बुद्धिश्चेतना, परिणामित्वादिति-मतमप्यपास्तम्। कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेः, तद्भिन्ने मानाभावाच्च। चेतनोऽहं करोमीति प्रतीतेश्चैतन्यांशे भ्रम इति चेत्, कृत्यंशे किं नेष्यते! अन्यथा

से बुद्धि का सम्बन्ध है। जैसे ज्ञान बुद्धि का धर्म है ऐसे ही सुख-दुःख-इच्छा-द्वेष-प्रयत्न-धर्मा धर्म भी बुद्धि के ही धर्म हैं – क्यों कि कृति (प्रयत्न) के साथ एक अधिकरण में रहने वाले हैं। और बुद्धि चेतन नहीं है परिणामी होने से (अनित्य धर्मों वाली होने से) यह सांख्य मत है– नैयायिक कहता हैं कि यह भी मत ठीक नहीं है–क्योंकि जैसे कृति-अदृष्ट-भोग इनकी एक अधिकरण में प्रतीति होती है–वैसे ही चैतन्य की भी उसी एक अधिकरण में प्रतीति होती है–क्योंकि चैतन्य ज्ञान से अतिरिक्त और कोई वस्तु नहीं है। और जो चेतन होता है वही कर्त्ता भी होता है–क्योंकि "चेतनोऽहं करोमि" यह प्रतीति होती है–कर्त्ता से भिन्न चेतन मानने में कोई प्रमाण नही है। सांख्य कहता है कि "चेतनोऽहं करोमि" यह प्रतीति चैतन्यांश में भ्रम है–क्यों कि चेतन पुरुष है। नैयायिक कहता है कि यदि ऐसा है तो कृति (कर्तृत्व) अंश में भी भ्रम क्यों न मान लिया जाय–कर्तृत्व भी चेतन पुरुष का ही धर्म मान लिया जाय।

परिणतिविशेषः स च तात्त्विकः वास्तवः, तथाच बुद्धौ घटाकारज्ञानवत्त्वमेव संबन्धः। स च संबन्धो "ज्ञानं" बुद्धेर्धर्मो न तु बुद्धिरिति न्यायमताद्वैलक्षण्यं बोध्यम्। तस्य पारमार्थिकत्वे निःश्वासाभिहतदर्पणस्येव मलिनिमा दृष्टान्तः। विषयनिष्ठक्रियात्मकव्यापारस्य बुद्ध्या सह संबन्धमाह **कर्तव्यमिति। ज्ञानेन** = घटमहं जानामीत्यनुव्यवसायेन। **पुरुषस्याऽतात्त्विकः संबन्ध इति।** अस्य स उपलब्धिरित्युच्यते इत्यनेनान्वयः। अतात्त्विके दृष्टान्तो दर्पणस्य मलिनिम्नेव मुखस्य संबन्ध इति। तथाच ज्ञानेन सह चेतनोऽहं घटं जानामीत्याकारो बुद्धावारोपितस्य पुरुषस्य यः संबन्धोऽतात्त्विकः स उपलब्धिः सैव प्रमेत्युच्यते, न तु बुद्धिरेवोपलब्धिरिति भावः। **कृतिसामानाधिकरण्येन प्रतीतेरिति।** कृतिसाध्यताज्ञानसाध्यत्वात्प्रवृत्तेः, यत्र ज्ञानं तत्रेच्छा यत्रेच्छा तत्र च कृतिरिति नियमादिति भावः। अथ बुद्धावेव चैतन्यं कल्पनीम्, कृतं पुरुषस्य चैतन्यवत्तया कल्पनेनेत्यत आह **नचेति।** तथाच बुद्धिश्चेतनत्वाभाववती परिणामित्वात् "अनित्यत्वात्" घटवदिति सांख्यमतमपास्तमित्यर्थः।

खण्डनयुक्तिमाह नैयायिकः-**कृत्यदृष्टभोगानामिति।** कृतिः स्वसमानाधिकरणमेवादृष्टं जनयति, तच्चाऽदृष्टं स्वसमानाधिकरणमेव भोगं जनयति इति कृत्यदृष्टभोगानां सामानाधिकरण्यप्रमितिवत् चेतनोऽहं करोमीति चैतन्यकृत्योः सामानाधिकरण्यप्रमितिप्रतीतेरित्यर्थः। **तद्भिन्ने इति** = कर्तृभिन्ने।

बुद्धेर्नित्यत्वे मोक्षाभावः, अनित्यत्वे तत्पूर्वमसंसारापत्तिः। ननु अचेतनायाः प्रकृतेः कार्यत्वाद् बुद्धेरचेतनत्वम्, कार्यकारणयोस्तादात्म्यादिति चेन्न। असिद्धेः, कर्त्तुर्जन्यत्वे मानाभावात्। वीतरागजन्मादर्शनादनादित्वम्, अनादेर्नाशासंभवान्नित्यत्वम्, तत्किं प्रकृत्यादिकल्पनेन। न च—

इससे यह सिद्ध हुआ कि जो चेतन होता है वही कर्त्ता होता है और चेतन द्रव्य ही होता है बुद्धि द्रव्य नहीं है वह ज्ञान रूप है यह नैयायिक का कहना है)। अन्यथा यदि बुद्धि को अतिरिक्त द्रव्य स्वीकार करोगे तो हम (नैयायिक) पूछते हैं कि वह द्रव्यात्मिका बुद्धि नित्य है या अनित्य—बुद्धि को यदि नित्य मानते हैं तो बुद्धि का संयोग सम्बन्ध आत्मा के साथ हमेशा बना रहेगा—इससे आत्मा को मोक्ष प्राप्त नहीं हो सकेगा। अनित्य यदि मानते हैं तो हम पूछते हैं कि जब बुद्धि उत्पन्न होगी तभी बुद्धि का संयोग पुरुष के साथ होगा—और बुद्धि का पुरुष के साथ संयोग होने पर संसार होगा—परन्तु जब तक बुद्धि उत्पन्न ही नहीं हुवी उसके पूर्व में बुद्धि का पुरुष के साथ संयोग न होने से असंसारापत्ति दोष लग जायेगा। असंसारापत्ति में इष्टापत्ति कर नहीं सकते, क्योंकि संसार अनादि है। वही मूल में कहा है कि "अन्यथा बुद्धे नित्यत्वे" इत्यादि। सांख्य बोलता है कि नैयायिक ने जो पहले कहा था कि चैतन्यस्यापि सामानाधिकरण्येन प्रतीतेः" अर्थात् जिसमें कर्त्तृत्वधर्म रहता है उसी में चैतन्य भी रहता है सो कर्त्ता जब कि बुद्धि है तो उसी को चेतन भी मानो—वह नैयायिक का कहना ठीक नहीं है क्योंकि हमारे यहाँ बुद्धि का कारण जो प्रकृति वह जब अचेतन (जड़) है तो उस अचेतन प्रकृति का कार्य है बुद्धि, उसको भी जड़ ही मानना पड़ेगा वह चेतन कैसे हो सकती है—क्योंकि कार्य कारण में हमारे यहाँ तादात्म्य (अभेद) है। नैयायिक कहता है कि यह तुम्हारा (सांख्य) का कथन ठीक नहीं—क्योंकि—असिद्धिदोष होने से—(इसका अभिप्राय यह है कि सांख्य जब बुद्धि में "प्रकृतिजन्य" हेतु के द्वारा अचैतन्य (जड़त्व) सिद्ध करने जायेंगे तो इस बुद्धिः अचेतना प्रकृतिजन्यत्वात् अनुमान में—हम (नैयायिक) असिद्धि—पक्ष

मानाभावादिति। चेतने इत्यादिः। कर्तृत्वाश्रयः चैतन्याभाववान् जन्यत्वाद् घटवदिति बाधकसत्त्वाच्चेतनोहं करोमीतिप्रतीतिश्चैतन्यांशे भ्रम इत्याशंकते चैतन्यांशे इति। कृत्यंशेपीति। बुद्धिः कर्तृत्वाभाववती जन्यत्वादिति बाधकस्य तत्रापि सत्त्वादिति भावः। **अन्यथा**=कर्तृचेतनयोर्भेदाङ्गीकारे। कर्त्तृभिन्नस्य चेतनस्य स्वीकारे चेतने च शुभाऽशुभाऽकर्तरि सुखदुःखयोरसंभवात् संसारमोक्षयोरनुपपत्त्या पूर्वोक्तरीत्या बुद्धिसत्त्वासत्त्वाभ्यामेव संसारापवर्गौ वाच्यौ, तथाच बुद्धेर्नित्यत्वे तु तत्सत्त्वनिबन्धनस्य संसारस्य सर्वदाऽऽपत्त्या मोक्षाभाव एव स्यादित्यर्थः। अनित्यत्वे इति। बुद्धेरनित्यत्वे तु तत्र जन्यत्वं स्वीकरणीयम्। अजन्यस्य नाशाऽसंभवात्, तथाच तदुत्पत्तेः पूर्वं तत्सत्त्वनिबन्धनः संसारो न स्यादित्यर्थः। वस्तुतस्तु बुद्ध्युत्पत्तेः पूर्वं तदाश्रिताऽदृष्ट-तज्जनककर्मणोरभावाद् बुद्धेरनुत्पत्तिः, कार्यमात्रेऽदृष्टस्य हेतुत्वात्। तथाच बुद्धेरनुत्पत्त्या संसारः कदापि न

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ॥

इत्यनेन विरोध इति वाच्यम् । प्रकृतेः=अदृष्टस्य, गुणैः=अदृष्टजन्यैरिच्छादिभिः । कर्ताहमिति । कर्ताऽहमेवेत्यस्य तदर्थत्वात् ।

तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः ।

इत्यादि वदता भगवता प्रकटीकृतोऽयमुपरिष्टादाशय इति संक्षेपः ।

(बुद्धि) में हेतु की असिद्धि हो जायेगी–अर्थात् स्वरूपासिद्धि हो जायेगी–पक्ष में हेतु का न रहना ही स्वरूपासिद्धि कहलाता है–जैसे प्रकृत में बुद्धि को कर्त्ता मानते हो तो वह प्रकृति से जन्य नहीं हो सकती है–कारण कि कर्त्तृत्व नित्वतत्व का व्याप्य होता है–सो जहाँ व्याप्य कर्त्तृत्व रहेगा–वहाँ व्यापक नित्यवत्व भी रहेगा–अतः बुद्धि को यदि कर्त्ता मानेंगे तो उसे नित्य मानना होगा–तब प्रकृतिजन्यत्व हेतु पक्ष (बुद्धि) में नहीं रह सकने के कारण स्वरूपासिद्धि हो जायेगी) वही मूल में कहा है कि–कर्त्तुर्जन्यत्वेमानाभावात्–कर्त्ता के जन्य होने में कोई प्रमाण नहीं है । अर्थात् कर्त्ता वही होगा जो नित्य होगा । कर्त्ता नित्य होता है इसमें सूत्र प्रमाण है–"वीतराग जन्मादर्शनात्" बीत (नष्ट) हो चुकी है राग (मिथ्या ज्ञान-जन्य वासना) जिस पुरुष की–ऐसे पुरुष का जन्म नहीं देखने में आता है सो इस गौतम सूत्र से कर्त्ता अनादि प्रतीत होता–और अनादिभावपदार्थ पुरुष का नाश नहीं होता है–इससे कर्त्ता नित्य ही मानना उचित है । सो प्रकृति आदि को कर्त्ता मानने में क्या लाभ है–प्रश्न–सांख्य कहता है कि प्रकृति के न मानने में "प्रकृतेः क्रियामाणानि गुणैः कर्माणि सर्वशः अहङ्कार विमूढात्मा कर्त्ताऽहमिति मन्यते" इस भगवद्वाक्य से विरोध हो जावेगा–क्योंकि सांख्यमतानुसार इस भगवद् वाक्य का यह अर्थ है कि सत्व आदि गुणों के द्वारा प्रकृति से क्रियमाण जो शुभाशुभ कर्म हैं–उन कर्मों का सर्वशः (सर्वतोभावेन) मैं कर्त्ता हूँ–ऐसा अहङ्कार से मूढ़ जो आत्मा है वह कर्त्ता न होते हुवे भी अपने को मानता है । इससे प्रकृति का अङ्गीकार भी सिद्ध हो रहा है–तथा कर्त्तृत्व भी सिद्ध हो रहा है–जब कि प्रकृति को कर्त्तृत्व इससे सिद्ध हो गया तो प्रकृति के कार्य बुद्धि को भी कर्त्तृत्व सिद्ध ही है–क्योंकि कार्य कारण का अभेद है । उत्तर–नैयायिक कहता है कि इस भगवद्वाक्य का यह अर्थ नहीं है–अपितु इच्छादि गुणों के द्वारा प्रकृति अर्थात् अदृष्ट से क्रियमाण जो शुभाशुभ कर्म हैं–उन कर्मों का अहंकार से विमूढ़ जो आत्मा (जीवात्मा) है वह मैं कर्त्ता हूँ-ऐसा अपने को मानता है । यहाँ प्रकृति का अर्थ है अदृष्ट–गुण करके अदृष्टजन्य इच्छादि गुणों का ग्रहण है । सो प्रकृति आदि की कल्पना व्यर्थ है । अतएव "तत्रैवंसति" यहाँ पर आत्मा के कर्त्तृत्व को बतलाते हुवे भगवान् ने यह स्पष्ट कर दिया कि आत्मा का अपने ही को कर्मों का एकमात्र कर्त्ता समझना भूल है । यह सांख्यमत का संक्षेप है ।

स्यादिति ध्येयम् । **असिद्धेरिति** । बुद्धौ प्रकृतिकार्यत्वाऽसिद्धेरित्यर्थः । अथ कर्तृत्वेन जन्यत्वमनुमेयमिति चेत्तदाऽऽह, **कर्त्तुरिति** । **मानाभावादिति** ।

धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ॥४६॥

धर्माधर्मेति । आत्मेत्यनुषज्यते । शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणां देहान्तरेण भोगानुपपत्तेः । विशेषेति । योग्यविशेषगुणस्य ज्ञानसुखादेः संबन्धेनाऽऽत्मनः प्रत्यक्षत्वं सम्भवति, न त्वन्यथा, "अहं जाने-अहंकरोमी"-त्यादिप्रतीतेः । ॥४६॥

प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः ।

अहंकारस्याश्रयोयं मनोमात्रस्य गोचरः ५०

विभुर्बुद्ध्यादिगुणवान्—

आत्मा परदेहादौ प्रवृत्त्यादिनाऽनुमीयते । प्रवृत्तिरत्र चेष्टा, ज्ञाने-

आत्मा धर्म अधर्म का आश्रय है-और उस आत्मा का ज्ञान-सुख-आदि विशेषगुणों के सम्बन्ध से प्रत्यक्ष होता है-और शरीर को यदि धर्म-अधर्म आश्रय मानते हो तो पूर्व जन्म के देह से किये हुवे कर्मों का दूसरे जन्म के देह से भोग नहीं हो सकता है । प्रत्यक्षयोग्य ज्ञान सुखादि विशेष गुणों के सम्बन्ध से आत्मा का प्रत्यक्ष होता है । अन्यथा नहीं । क्योंकि 'मैं जानता हूँ' 'मैं करता हूँ' इत्यादि प्रतीतियों से ज्ञान-कर्तृत्व का आश्रय होने से आत्मा का प्रत्यक्ष होता है । जैसे रथ की गति से सारथि का अनुमान होता है-वैसे ही यह आत्मा परपुरुष के शरीर में चेष्टा द्वारा अनुमेय है । इस आत्मा का परदेह में प्रवृत्ति आदि के द्वारा

कर्तृत्वमस्तु जन्यत्वं मास्तु इति व्यभिचारशंकानिराकरणानुकूलतर्काभावादिति भावः । प्रत्युत जन्यत्वविरोध्यनादित्वमेव कर्तुरित्याह वीतरागजन्माऽदर्शनादिति । न्यायसूत्रं सरागजन्मदर्शनादिति सूत्रार्थः । अनादित्वमिति । स्तन्यपाने बालस्य प्रवृत्तिर्नेष्टसाधनताज्ञानमन्तरेण, तच्च ज्ञानं नानुभवरूपं साक्षात्, किन्तु स्मृतिरूपम्, स्मृतेश्च स्वसमानाधिकरणपूर्वजन्मसापेक्षतया पूर्वजन्मसत्त्वे पूर्वजन्मनि अपि प्रथमप्रवृत्त्यनुरोधेन तत्पूर्वस्य, एवं तत्पूर्वस्य जन्मनः सिद्धौ अनादित्वमात्मन इति भावः । अनादेरिति । अनादिभावस्येत्यर्थः । विरोध इति । उक्तवचनेनाऽऽत्मनि कर्तृत्वाभावप्रतिपादनादिति भावः । कर्ताऽहमेवेति । तथाच तेन स्वतन्त्रकर्तृत्वाभाव एवाऽऽत्मनि प्रतिपाद्यते न तु कर्तृत्वसामान्याभाव इति भावः । प्रकटीकृतोयमिति ।

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमम् ॥ भ० गी०

इत्यनेन पंचानां कर्तृत्वं प्रतिपाद्य "तत्रैवं सती" त्यादिनापि स्वतन्त्रकर्तृत्वस्यैवाऽऽत्मनि निषिद्धत्वादिति भावः ।

च्छाप्रयत्नादीनां देहेऽभावस्योक्तप्रायत्वात् चेष्टायाश्च प्रयत्नसाध्यत्वात्, चेष्टया प्रयत्नवानात्मानुमीयते इति भावः। अत्र दृष्टान्तमाह रथेति। यद्यपि रथकर्म चेष्टा न भवति, तथापि तेन कर्मणा सारथिर्यथाऽनुमीयते, तथा चेष्टात्मकेन कर्मणा परात्मानुमीयते इति भावः। अहङ्कारस्येति। अहंकारः। अहमिति प्रत्ययः, तस्याऽऽश्रयः, विषय आत्मा, न शरीरादिरिति। मनइति मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयः, मानसप्रत्यक्षविषयश्चेत्यर्थः। रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात्। ५०

विभुरिति। विभुत्वं परममहत्परिमाणवत्त्वम्।

बुद्धिस्तु द्विविधा मता।

अनुभूतिः स्मृतिश्च स्यात् अनुभूतिश्चतुर्विधा ॥५१॥

प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे।

अनुमान किया जाता है-प्रवृत्ति से यहाँ चेष्टा का ग्रहण है। ज्ञान-इच्छा-प्रयत्न-आदि गुण में नहीं रहते हैं-यह प्रायः कह चुके हैं-"शरीरस्य न चैतन्यम्" इत्यादि ग्रन्थ से चेष्टा प्रयत्न से साध्य होती है-अतः चेष्टावत्त्वरूप हेतु से प्रयत्नवान् आत्मा का अनुमान किया जाता है जैसे रथ की गति से सारथि का यह दृष्टान्तरूप से कहा है। यद्यपि रथकर्म चेष्टा नहीं होती है-तथापि उस रथकर्म से जैसे सारथि का अनुमान किया जाता है-वैसे ही चेष्टात्मक कर्म से परात्मक अनुमान किया जाता है। "अहम्" इत्याकारक ज्ञान को अहङ्कार कहते हैं उस अहङ्कार का आश्रय विषय आत्मा है शरीर आदि नहीं है। एवं आत्मा मन से भिन्न इन्द्रिय से होने वाले प्रत्यक्ष का अविषय है-तथा मानसप्रत्यक्ष का विषय है। रूप आदि के आत्मा में न होने से आत्मा चक्षु आदि इन्द्रियान्तर से प्रत्यक्ष योग्य नहीं है ॥ ५० ॥

यह आत्मा व्यापक तथा बुद्ध्यादिगुण वाला है। परममहत्व परिमाणवान विभु होता है-और परममहत्व परिमाणवत्त्व विभुत्व है। वह पहिले हम कह भी चुके हैं-परन्तु स्पष्टार्थ फिर कह दिया। बुद्धि-सुख-दुःख-इच्छा आदि जो १४ गुण पहिले कहे जा चुके हैं—तादृशबुद्ध्यादि गुणवाला ही आत्मा है।

तदाश्रयत्वे = धर्माधर्माश्रयत्वे। अन्यथा = विशेषगुणं विना। प्रवृत्त्यादिनेति। परकीयशरीरस्यैव पक्षतया तत्र प्रवृत्तिरूपहेतोरसत्त्वात्स्वरूपासिद्धिः, परकीयप्रवृत्त्यादेरतीन्द्रियतया हेतुज्ञानासंभवश्चाऽत आह। प्रवृत्तिरत्रेति। चेष्टा च हिताहितप्राप्तिपरिहारार्था क्रिया। अनुमीयते इति। अनुमानप्रकारश्च तथाच चेष्टा प्रयत्नजन्या चेष्टात्वात् मदीयचेष्टावत्, स्वप्रयत्नः क्वचिद्द्रव्यसमवेतः गुणत्वाद्रूपवदिति। न भवतीति। शरीरवृत्तिक्रियाया एव चेष्टात्वात्। तथापीति। उत्तरसंयोगजनकक्रियावत्त्वमेव हेतुरिति ध्येयम्।

अत्रैव प्रसंगाद्बुद्धेः कतिपयं प्रपञ्चं दर्शयति बुद्धिस्त्विति। द्वैविध्यं व्युत्पादयति अनुभूतिरिति। एतासां चतसृणां करणानि चत्वारि "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति सूत्रोक्तानि वेदितव्यानि।

प्रसङ्गवश यहीं पर अब बुद्धि का कतिपय प्रपञ्च (भेद) दिखलाते हैं—बुद्धि दो प्रकार की हैं—अनुभूति तथा स्मृतिभेद से। उसमें अनुभूति (अनुभव) चार प्रकार की है! इन चार प्रकार की अनुभूतियों के करण भी "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इस गौतमसूत्र में कहे हुवे चार ही जानने चाहिये ॥ ५१ ॥

अत्रैव = आत्मनिरूपणे एव। प्रसंगादिति। स्मृतिविषयत्वे सति द्वेषाविषयत्वात्। ज्ञानत्वजातिमत्त्वं बुद्धेर्लक्षणम्। सा द्विविधा अनुभवः, स्मृतिश्च। अनुभवत्वं=जातिः। अनुभवत्वस्य प्रत्यक्षादिचतुष्टयसाधारणजातित्वे मानाभावः, स्मृत्यन्यज्ञानत्वेनैवोपपत्तेः। न चाऽनुभवामीत्यनुव्यवसायात्तत्सिद्धिरिति वाच्यम्। शुद्धमनुभवामीत्यनुव्यवसायाभावेन साक्षात्कारत्वस्यैव तद्विषयत्वात्। न च विशेषणज्ञानजन्यतावच्छेदकतया तत्सिद्धिः, स्मृतौ व्यभिचारेण विशेषणज्ञानस्य विशिष्टबुद्धिमात्रे हेतुत्वासंभवादिति वाच्यम्। विशिष्टसाक्षात्कारत्वस्यैव विशेषणज्ञानजन्यतावच्छेदकत्वादिति। विशेषणज्ञानाभावेऽनुमित्यादेरभावस्य परामर्शाद्यभावेनैव संभवात्। न चाप्रसिद्धसाध्यकानुमितेः साध्यप्रकारकत्ववारणायाऽनुमितावपि विशेषणज्ञानस्य हेतुत्वमावश्यकमिति वाच्यम्। साध्यतावच्छेदकरूपेण साध्यप्रकारकानुमितेः साध्यतावच्छेदकविशिष्टवैशिष्ट्यविषयताशालित्वनियमेन विशेषणतावच्छेदकप्रकारकनिश्चयाभावादेव तत्र साध्यप्रकारकानुमितेरनुत्पादात्, सामान्यसामग्रीसहिताया एव विशेषसामग्र्याः कार्योपधायकत्वात्।

अथैवं विशेषणतावच्छेदकप्रकारकनिश्चयजन्यतावच्छेदकतयैवाऽनुभवत्वजातिसिद्धिः, स्मृत्यन्यज्ञानत्वस्य तत्कार्यतावच्छेदकत्वे गौरवात्। न च विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षत्वमेव तस्य जन्यतावच्छेदकम्, अप्रसिद्धसाध्यकानुमितेरपि साध्यप्रकारकत्वापत्तेः। न चाऽप्रसिद्धसाध्यकस्थलीयपरामर्शस्य साध्यविशेष्यकानुमितित्वमेव कार्यतावच्छेदकमिति वाच्यम्। उच्छृंखलसाध्यज्ञानसत्त्वे तादृशपरामर्शादेव साध्यप्रकारकानुमितेरुत्पादात्। न च तथापि तज्जातेः प्रत्यक्षानुमितिमात्रसाधारण्यमस्तु शाब्दबोधोपमितिसाधारण्ये मानाभाव इति वाच्यम्। प्रत्यक्षानुमितिमात्रसाधारणस्यैव तस्याभ्युपगमादिति चेन्न।

तथापि प्रत्यक्षादिचतुष्टयसाधारणायास्तस्या असिद्धेः। बाधबुद्धिप्रतिबध्यतावच्छेदकेन प्रत्यक्षव्यावृत्तेन परोक्षत्वेन स्मृतिसाधारणेन सांकर्यापत्त्या प्रत्यक्षानुमितिमात्रसाधारणस्यापि तस्य सिद्धेरसंभवाच्च चतुष्टयसाधारणतज्जातिसिद्धेर्दुर्वारत्वात्। विशेषणतावच्छेदकप्रकारकनिश्चयजन्यतावच्छेदकतया शाब्दव्यावृत्तमनुभवत्वं-बाधादिबुद्धिप्रतिबध्यतावच्छेदकतया प्रत्यक्षव्यावृत्तं परोक्षत्वं च द्वयमेव जातिर्लाघवात्। न चैवं विशेषणतावच्छेदकप्रकारकनिश्चयजन्यतावच्छेदकस्यानुभवत्वस्य

इन्द्रियजन्यं ज्ञानं प्रत्यक्षम्। यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानं, तथापि इन्द्रियत्वेन रूपेणेन्द्रियाणां यत्र ज्ञाने करणत्वं तत्प्रत्यक्षमिति विवक्षितम्। ईश्वरप्रत्यक्षं तु न लक्ष्यम्। "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति" सूत्रे तथैवोक्तत्वात्।

प्रत्यक्ष-अनुमिति-उपमिति-शब्दज (शाब्दबोध) यह चार प्रकार का अनुभव है। उसमें प्रत्यक्ष घ्राणज आदि के भेद से छः प्रकार का है। इन्द्रियजन्य ज्ञान ही प्रत्यक्ष है। यद्यपि मनोरूप इन्द्रिय से जन्य तो सभी ज्ञान हैं-तथापि इन्द्रियत्वरूप से इन्द्रियों को जिस ज्ञान में कारणता हो वही ज्ञान प्रत्यक्ष ज्ञान है। "इन्द्रियजन्यज्ञान" यह ईश्वर के प्रत्यक्ष का लक्षण नहीं है-क्योंकि "इन्द्रियार्थसन्निकर्षोत्पन्नम्" इत्यादि गौतमसूत्र में जन्य प्रत्यक्ष (जीवात्मा के प्रत्यक्ष) का ही लक्षण किया है। अथवा जिस ज्ञान में ज्ञान करण न हो वही

प्रत्यक्षसाधारणस्योक्तयुक्त्या शाब्दबोधवृत्तित्ववदुपमितिवृत्तित्वेपि मानाभावेन परस्परमनुमितौ सांकर्यापत्तिः परोक्षत्वस्य प्रत्यक्षवृत्तित्वादिति वाच्यम्। सांकर्यवारणायैव विशेषणतावच्छेदप्रकारकनिश्चयजन्यतावच्छेदकस्यानुभवत्वस्योपिमितावपि अभ्युपगमात्। तथापि अनुभवत्वव्याप्यत्वमेव परोक्षत्वमिति न सांकर्यम्। न च बाधबुद्धिप्रतिबध्यतावच्छेदकस्य परोक्षत्वस्य स्मृतावपि सत्त्वेन कथमनुभवत्व व्याप्यत्वमिति वाच्यम्। स्मृतेर्बाधादिबुद्ध्यप्रतिबध्यत्वादित्यलं विस्तरेण।

एतासां=चतसृणां=प्रत्यक्षानुमित्युपमितिशाब्दबोधानाम्। **इन्द्रियजन्यमिति।** अत्र च स्मृत्यादेरपीन्द्रियप्रयोज्यत्वात्तद्वारणाय जन्यपदोपादानम्। इन्द्रियसंयोगादेर्वारणाय ज्ञानमिति। अनुमित्यादिवारणायेन्द्रियेति। **सर्वमेव ज्ञानमिति।** सर्वमेव जन्यं ज्ञानमित्यर्थः। **इन्द्रियत्वेन रूपेणेति।** इन्द्रियत्वावच्छिन्नकारणतानिरूपितविषयतासंबन्धावच्छिन्नकार्यताशालित्वं लक्षणार्थः। अयं च ज्ञानपदोपादानलभ्यः, इतरथा विवक्षितकारणतयैवेन्द्रियसंयोगादेर्वारणसंभवेन ज्ञानपदानर्थक्यप्रसंगात्। **यत्र ज्ञाने इति,** सप्तम्यर्थो निरूपितत्वम्। अव्याप्तिमाशंक्याह— **ईश्वरप्रत्यक्षमिति।** तथाच जन्यसाक्षात्कारत्वमेव लक्ष्यतावच्छेदकमिति भावः। नन्वनेन रूपेण प्रमितिविभागे किं मानं तत्राह। **इन्द्रियार्थेति।** **तथैव**=जन्यप्रत्यक्षप्रमाया एव। **उक्तत्वादिति।** लक्ष्यत्वलाभादित्यर्थः। अनुमितिशाब्दबोधप्रमाया अपि अर्थसन्निकर्षात्मकगुणजन्यत्वादुक्तमिन्द्रियमिति। त्वङ्मनोयोगजन्यानुमित्यादावतिव्याप्तिवारणायार्थेति। चक्षुःकपालसंयोगजन्यचक्षुर्घटसंयोगे आत्ममनोयोगजन्यानुमित्यादेश्च वारणाय ज्ञानमिति। तन्महिम्ना च विषयतासंबन्धावच्छिन्नं जन्यत्वं लभ्यते। भ्रमवारणायऽव्यभिचारीति भ्रमभिन्नार्थकम्। तथाचेन्द्रियार्थसन्निकर्षनिष्ठकारणतानिरूपितविषयतासंबन्धावच्छिन्नकार्यताशालित्वं लक्षणार्थः।

अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्। अनुमितौ व्याप्तिज्ञानस्य उपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मृतावनुभवस्य कारणत्वात्तत्र-नातिव्याप्तिः, इदं लक्षणमीश्वरप्रत्यक्षसाधारणम्।

परामर्शजन्यं ज्ञानमनुमितिः।

यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि परामर्शजन्यं हेत्व-

ज्ञान प्रत्यक्ष ज्ञान कहलाता है। प्रत्यक्षज्ञान से अतिरिक्त जितने भी ज्ञान हैं - वे सब ज्ञानकरणक हैं जैसे अनुमति में व्याप्तिज्ञान करण है–उपमिति में सादृश्यज्ञान करण है। शाब्दबोध में पदज्ञान करण है। स्मृति में अनुभव करण है-अतः प्रत्यक्षातिरिक्त समस्त ज्ञान ज्ञानकरणक होने से उनमें अतिव्याप्ति नहीं हुवी। और यह लक्षण (ज्ञानाकरणकंज्ञानं प्रत्यक्षम्) ईश्वर-और जीव-इन दोनों के प्रत्यक्षसाधारण है। परामर्श से जन्य ज्ञानको अनुमिति कहते हैं। प्रश्न – इस अनुमितिलक्षण की परामर्श प्रत्यक्ष में अतिव्याप्ति है-क्योंकि परामर्श का प्रत्यक्ष

केचित्तु इन्द्रियार्थसन्निकर्षोत्पन्नमिति सूत्रादिन्द्रियत्वेन अर्थत्वेन सन्निकर्षत्वेनेति लक्षणत्रयं लभ्यते इत्याहुः। तच्च द्विधा व्याचष्टे—अव्यपदेश्यमिति। व्यपदेशः शब्दप्रयोगो यस्मादिति व्यपदेश्यं तद्भिन्नं ज्ञानमव्यपदेश्यं-निर्विकल्पकमित्यर्थः। व्यवसायात्मकं-सविकल्पकमित्यर्थः। तुष्यत्विति न्यायेनाह ज्ञानाकारणकं ज्ञानमिति। अनुमित्यादावतिव्याप्तिवारणाय ज्ञानाकरणकमिति। घटादावतिव्याप्तिवारणाय ज्ञानमिति। द्वितीयानुव्यवसायादावव्याप्तिवारणाय ज्ञानाकरणज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वं तदर्थो द्रष्टव्यः। प्रतियोगिप्रसिद्धिं दर्शयति अनुमिताविति। तत्र अनुमित्यादौ। एतत्पक्षे च यो विशेषस्तमाह इदमिति। तथाचास्मिन् पक्षे साक्षात्कारत्वमेव लक्ष्यतावच्छेदकमिति भावः। साक्षात्कारत्वं च साक्षात्करोमीतिप्रतीतिसाक्षिको जातिविशेष इति प्राञ्चः। आंशिकालौकिकसाक्षात्कारे चन्दनं साक्षात्करोमीतिप्रतीतिवत्सौरभं साक्षात्करोमीत्यप्रतीतेर्लौकिकविषयताया नियामकत्वं कल्प्यम्, ततश्चैतादृशकल्पनातस्तादृशविषयताया एव तथाविधप्रतीतिविषयत्वकल्पनायां सामंजस्येन लौकिकविषयत्वातिरिक्तसाक्षात्कारत्वे मानाभावादिति नव्याः। एतेन चाक्षुषत्वादि व्याख्यातम्।

परामर्शजन्यं ज्ञानमनुमितिरिति। परामर्शश्च व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयः। तथा च व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिरित्यर्थः। परामर्शसंस्कारवारणाय ज्ञानमिति। प्रत्यक्षादावतिव्याप्तिवारणाय परामर्शजन्यमिति। एवमपि परामर्शप्रत्यक्षेऽतिव्याप्तिरित्याह यद्यपीति। परामर्शजन्यमिति। विषयविधया परामर्शस्य जनकत्वं बोध्यम्। तथाच हेतुतावच्छेदक-

विषयकं यज्ज्ञानं तदेवानुमितिः। नच कादाचित्कहेत्वविषयकानुमितावव्याप्ति-रिति वाच्यम्। तादृशज्ञानवृत्त्यनुभत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्।

अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः। सादृश्यज्ञानकरणकं ज्ञान-

भी परामर्श से जन्य ज्ञान है। उत्तर—हेतु जिसमें विषय न हो ऐसा जो परामर्शजन्यज्ञान सो ऐसा ज्ञान "पर्वतो वह्निमान्" यही ज्ञान होगा-यही अनुमिति है। प्रश्न—जिस पुरुष को "धूमवान् पर्वतो वन्हिमान्" यह अनुमिति हुवी उस अनुमिति में धूमहेतु भी पक्षतावच्छेदक विधया विषय होगया-अतः यह अनुमिति हेत्वविषयक होने से इसमें अव्याप्ति हो गयी। उत्तर-परामर्शजन्य जो हेत्वविषयकज्ञान "पर्वतो बन्हिमान्" यह अनुमितिरूप ज्ञान, इसमें वृत्ति जो अनुभवत्व व्याप्य जाति (अनुमितित्वजाति) तादृश अनुमितित्व जातिमान् सकल अनुमितिरूप ज्ञान हैं तो "धूमवान्पर्वतोवन्हिमान्" यह भी हुवा-इसमें भी अनुमितित्व जाति घटित लक्षण चला गया अतः अव्याप्ति नहीं है। अथवा व्याप्तिज्ञानकरणक जो ज्ञान वह अनुमिति है। सादृश्यज्ञान जिसमें करण हो वह ज्ञान उपमिति है। पदज्ञान करण जिस ज्ञान में होवे वही ज्ञान शाब्द बोध है। वस्तुतः यत्किञ्चित् अनुमितिव्यक्ति से "पर्व तो वन्हिमान्" इस अनुमिति को लेकर उस अनुमिति व्यक्ति में रहने वाली और प्रत्यक्ष में न रहने वाली जो जाति (अनुमितित्व) तादृश जातिमान् अनुमिति ही होगा। ऐसे ही "अयंघटः" इस प्रत्यक्ष को लेकर उस प्रत्यक्षव्यक्ति में वृत्ति और अनुमिति में अवृत्ति जो जाति (प्रत्यक्षत्वजाति) तादृशजाति मत्त्व यह प्रत्यक्षत्वादिक कह देना चाहिये। जन्य प्रत्यक्ष का विभाग करते हैं—घ्राणजादीति। घ्राणज-रासन-चाक्षुष-स्पार्शन-श्रौत्र-मानस-यह षड्विध (छःप्रकार का) प्रत्यक्ष है। प्रश्न-ईश्वर के प्रत्यक्ष का आपने विभाग नहीं किया अतः न्यूनता हो जावेगी। उत्तर-"इन्द्रियार्थसन्निकर्षोत्पन्नम्" इत्यादि गौतमीय सूत्रानुसार जन्यप्रत्यक्ष का ही निरूपण किया है-अतः उसका ही विभाग भी उचित है॥ ५२॥

संबन्धावच्छिन्नव्याप्त्यवच्छिन्नप्रकारतानिरूपितपक्षविशेष्यताशालिनिश्चयत्वावच्छिन्न-जनकतानिरूपितजन्यताशालिज्ञानत्वस्य विवक्षणीयत्वात्, प्रत्यक्षे च विषयत्वेन हेतुत्वान्नातिव्याप्तिः। अत्र च विषयतया लौकिकप्रत्यक्षत्वावच्छिन्नं प्रति लौकिक-विषयतया प्रत्यक्षत्वावच्छिन्नं प्रति वा तादात्म्येन विषयत्वेन कारणत्वं बोध्यम्। अथवा तत्तद्व्यक्तित्वेन कारणता बोध्या। न च प्रत्यक्षत्वस्य नित्यानित्यसाधारणतया जन्यतावच्छेदकत्वाऽसंभवः, साधारण्येपि बाधकाभावात, जन्यप्रत्यक्षत्वस्य तथात्वा-भ्युपगमात्। कालिकसमवायोभयसंबन्धस्य कार्यतावच्छेदकताघटकत्वाद्वाऽनुपपत्त्य-भावात्। हेत्वविषयकत्वं चाऽवश्यं निवेशनीयम्। अन्यथा वह्निव्याप्यधूमवत्पर्वत-वान्देशः इत्याकारकविशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नं प्रति विशेषणतावच्छेदक-प्रकारकनिश्चयत्वेनैव परामर्शस्य हेतुतया तत्रातिप्रसंगः स्यादित्यतः परामर्शजन्यत्वा-दिकमित्यत्राऽऽदिपदमुपात्तम्।

ननु प्रत्यक्षत्वेन विषयत्वेन हेतुत्वे मानाभावः। न चैवमतीताऽनागतघट-प्रत्यक्षापत्तिः। वर्तमानव्यवहितविप्रकृष्टघटादिप्रत्यक्षवारणाय सन्निकर्षहेतुताया

आवश्यकत्वेन तत एव तदापत्त्यभावात्। न च विनश्यदवस्थघटोत्पत्तिद्वितीयक्षणे तत्प्रत्यक्षापत्तिः, अनाश्रितसन्निकर्षस्य पूर्वक्षणे सत्त्वात्। एवं विनष्टज्ञानशब्दादीनामपि नित्यसन्निकर्षसत्त्वात्तत्प्रत्यक्षापत्तिरपि दुर्वारैवेति वाच्यम्। सन्निकर्षस्य विषयनिष्ठतया हेतुत्वेन यत्र लौकिकविषयतया प्रत्यक्षमापाद्यते तदव्यवहितपूर्वकालावच्छेदेन कारणतावच्छेदकसंबन्धेन सन्निकर्षसत्त्वस्यापेक्षणादुक्तस्थले तेषां विषयनिष्ठत्वाभावेनापत्त्यभावात्। न चैवमपि घटादिनाशसमये तत्प्रत्यक्षापत्तिः, विषयस्य तु कार्यसहभावेन हेतुतया नापत्तिरिति वाच्यम्। सन्निकर्षस्यैव कार्यसहभावेन हेतुत्वादापत्तिवारणसंभवादिति चेत्। धर्माधर्मसंस्कारगुरुत्वादिप्रत्यक्षवारणाय विषयतया लौकिकप्रत्यक्षवारणाय प्रत्यक्षत्वावच्छिन्नं प्रति हेतुत्वमावश्यकम्। अनन्तप्रतिबध्यप्रतिबन्धकभावकल्पनापेक्षया तथाविधहेतुताकल्पनाया एव लघीयस्त्वात्। नचैवं विषयतया साक्षात्कारवत्त्वरूपस्य विषयत्वस्यावच्छेदकीभूताननुगतसाक्षात्कारभेदेन भेदात्कथमेककार्यकारणभाव इति वाच्यम्। स्वाश्रयविषयत्वसंबन्धेन साक्षात्कारत्वविशिष्टत्वस्य सर्वसाक्षात्कारसाधारणैकलौकिकविषयताया वा कारणतावच्छेदकत्वांगीकारेणोक्तदोषाभावात्। नचैवं कारणतावच्छेदकत्वेन विषयत्वकल्पनवत्प्रतिबन्धकतावच्छेदकत्वेनापि विषयत्वकल्पनापत्तिरिति वाच्यम्। नव्यरीत्या साक्षात्करोमीति प्रतीतिसिद्धविषयतायामेव कारणतावच्छेदकत्वकल्पनायाः समुचितत्वात्। तथात्वे तादृशाभाववत्त्वस्य कारणतावच्छेदकत्वे गौरवाच्च।

अत्रेदं बोध्यम्—यथा धर्मादीनां प्रत्यक्षापत्तिवारणाय विषयत्वेन सामान्यतः कार्यकारणभावः कल्पनीयः, तथा सत्यपि चक्षुःसंयुक्तसमवाये रसगन्धस्पर्शशब्दादेः, सत्यपि घ्राणसंयुक्तसमवाये रूपरसस्पर्शशब्दादेः, सत्यपि रसनासंयुक्तसमवाये रूपगन्धस्पर्शशब्दादेः, सत्यपि त्वक्संयुक्तसमवाये रूपरसगन्धशब्दादेः, सत्यपि मनःसंयुक्तसमवाये तेषां लौकिकप्रत्यक्षाभावाद्विशिष्य तत्तद्व्यक्त्यन्तर्भावेन कार्यकारणभावकल्पने च गौरवाच्चाक्षुषत्वाद्यवच्छिन्नं प्रति चाक्षुषवत्त्वादिना कार्यकारणभावाः कल्पनीयाः। अन्यत्सर्वं पूर्ववत्।

अथैवं सति महत्त्वरूपादीनां प्रत्यक्षविलोपापत्तिरिति चेत्। यदि स्तस्तद्ग्राहकौ स्वतन्त्रान्वयव्यतिरेकौ कस्तदा तद्विलोपनायाऽलम्। यदि न स्तः, तदा तद्विलोपेऽपि का क्षतिः। इदन्तु विचारणीयम्—चाक्षुषवत्त्वादिनापि विशिष्य कार्यकारणभावानामावश्यकत्वेन तत एव सामंजस्ये विषयत्वेन सामान्यहेतुतायां मानाभावः। गुरुत्वादावपि उक्तविशेषकारणाभावेन प्रत्यक्षवारणसंभवात्। "यद्विशेषयोरिति" नियमस्तु अप्रयोजकः। एतेन यद्धर्मावच्छिन्नानुत्पादप्रयोजकत्वं यद्धर्मावच्छिन्नाभावे क्लृप्तम्, तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नस्य नियामकत्वम्। अस्ति च प्रत्यक्षत्वावच्छिन्नानुत्पादप्रयोजकत्वं विषयत्वावच्छिन्नाभावे, अतः प्रत्यक्षत्वावच्छिन्नं प्रति विषयत्वावच्छिन्नस्य नियामकत्वम्। न च चाक्षुषविषयत्वावच्छिन्नाभावानामेव नियामकत्वं कल्प्यतामिति वाच्यम्। अनेकेषां प्रत्यक्षत्वावच्छिन्नानुत्पादप्रयोजकत्व-

कल्पनापेक्षया एकस्यैव तादृशाभावस्य प्रयोजकत्वकल्पनायां लाघवात्। इत्थं च तादृशसामान्यहेतुतायां सुकरं मानमित्यपि निरस्तम्। अप्रयोजकत्वादित्यलम्।

अथैवं विशिष्टस्मरणेऽतिव्याप्तिः वह्निव्याप्यधूमवत्पर्वतविशेष्यकस्मृतिं प्रति वह्निव्याप्यधूमवत्पर्वतविशेष्यकनिश्चयत्वेन हेतुत्वात्। न चोपेक्षात्मकज्ञानात्स्मृत्यनुत्पादेनोपेक्षान्यवह्निव्याप्यधूमवत्पर्वतविषयकनिश्चयत्वेनैव स्मृतिहेतुत्वान्नातिव्याप्तिरिति वाच्यम्। उपेक्षात्वस्य दुर्वचत्वेन स्मृतिकारणतावच्छेदककोटौ निवेशाऽसंभवात्। तथाहि उपेक्षात्वं न जातिः, चाक्षुषत्वादिना संकरप्रसंगात्, आंशिकत्वापाताच्च। नापि प्रवृत्तिनिवृत्त्यजनकज्ञानत्वम्, अजिज्ञासितविषयत्वं वा, तादृशादपि स्मृत्युत्पादात्। नापि संस्काराजनकत्वं तत्, उपेक्षाज्ञानव्यावृत्तस्य संस्कारजनकतावच्छेदकरूपान्तरस्याऽभावात्, संस्काराजनकान्यत्वेन हेतुत्वे त्वात्माश्रयापत्तेः। स्मृत्यजनकान्यत्वेन संस्कारजनकत्वे च स्मृतिजनकताज्ञानाधीनं संस्कारजनकताज्ञानं संस्कारजनकताज्ञानाधीनं स्मृतिजनकताज्ञानमित्यन्योन्याश्रयापत्तेः। अत्रोपेक्षात्वस्यानुगतस्य दुर्वचत्वेपि तत्तद्व्यक्तित्वरूपस्योपेक्षात्वस्य सुवचत्वेन तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदा एव निवेश्यन्ते गत्यन्तराभावादिति चेत्। सत्यम् ईदृशदिशैव भेदो निवेशयितुं शक्यः। तथापि स संस्कारकारणतायामेव निवेश्यते तत एव स्मृतिवारणसंभवात् अत, एव वक्ष्यति—

"उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् इति"। तथाच वह्निव्याप्यधूमवत्पर्वतविषयकस्मृतिं प्रति वह्निव्याप्यधूमवत्पर्वतविषयकनिश्चयत्वेनैव हेतुत्वादतिव्याप्तिर्दुर्वारैवेति चेन्न। व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमित्यत्र द्वितीयज्ञानपदस्यानुभवपरत्वात्। एवं च नोक्तातिव्याप्तिः।

न च वह्निव्याप्यधूमवत्पर्वतनिश्चयत्वेन न स्मृतिहेतुत्वम्, अपितु वह्निव्याप्यधूमवत्पर्वतविषयकानुभवत्वेन, तथाच नोक्तस्मृतावतिव्याप्तिः, संशयान्यज्ञानत्वात्मनो निश्चयत्वस्यानुभवत्वापेक्षया व्यापकत्वादिति वाच्यम्। तथात्वे सकृदनुभूतस्य स्मरणोत्तरं स्मरणं न स्यात्, अनुभवस्य स्वजन्यसंस्कारसंबन्धेन हेतोरभावात्। तादृशस्थलेऽनुभवजन्यसंस्कारस्याऽऽद्यस्मरणेन नाशात्। न च तथापि वह्निव्याप्यधूमवत्पर्वतविषयकज्ञानत्वेनैव हेतुत्वमस्तु इति वाच्यम्। वह्निव्याप्यधूमवान्न वापर्वत इति संशयात्तथाविधस्मृत्यापत्तेरित्यन्यत्र विस्तरः।

कादाचित्केति। पक्षतावच्छेदकविधयेत्यर्थः। **हेतुविषयकानुमितौ** = धूमवान्पर्वतो वह्निमानित्यनुमितौ। **अव्याप्तिरिति**। तथाचाऽलोकलिङ्गकधूमवत्पर्वतपक्षकवन्हिविधेयकानुमितौ हेत्वविषयकत्वादव्याप्तिरिति भावः। **तादृशज्ञानवृत्तीति**। परामर्शजन्यहेत्वविषयकज्ञानवृत्तीत्यर्थः। पक्षधर्मताया अप्रवेशेन लाघवाल्लक्षणान्तरमाह **अथवेति**। अत्रापि एकां व्याप्तिमुपादाय तद्व्याप्तिज्ञानकरणकज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वमित्यर्थो बोध्यः।

घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥५२॥
घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः।
तथा रसो रसज्ञायास्तथा शब्दोपि च श्रुतेः ॥५३॥
उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये।
विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम् ॥५४॥

मुपमितिः। पदज्ञानकरणकं ज्ञानं शाब्दबोधः। वस्तुतो यां कांचिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तित्वे सति यां कांचित्प्रत्यक्षव्यक्तिमादाय तदवृत्तिजातिमत्त्वमनुमितित्वम्। एवं यत्किंचित्प्रत्यक्षादिकमादाय तद्व्यक्तिवृत्ति अनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं वाच्यमिति। जन्यप्रत्यक्षं विभजते। घ्राणजादीति। घ्राणजं–रासनं–चाक्षुषं–स्पार्शनं-श्रौत्रं–मानसमिति षड्विधं प्रत्यक्षम्। न चेश्वरप्रत्यक्षस्याविभजनान्न्यूनत्वम्। जन्यप्रत्यक्षस्यैव निरूपणीयत्वात्, उक्तसूत्रानुसारात् ॥५२॥ गोचर इति। ग्राह्य इत्यर्थः। गन्धत्वादिरित्यादिपदात्सुरभित्वादिपरिग्रहः। गन्धस्य प्रत्यक्षत्वात्तवृत्ति जातिरपि प्रत्यक्षा, गन्धाश्रयग्रहणे तु घ्राणस्याऽसामर्थ्यमिति बोध्यम्। तथा रसइति। रसत्वादिसहित इत्यर्थः। तथा शब्दोपि-शब्दत्वादिसहितः। गन्धोरसश्चोद्भूतोबोध्यः ॥५३॥

"घ्राणस्य गोचरो गन्धः" घ्राणेन्द्रिय से होने वाले प्रत्यक्ष के विषय गन्ध और गन्धत्व आदि हैं। तथा रसज्ञा (रसनेन्द्रिय) से रस-रसत्व का प्रत्यक्ष होता है। एवं श्रुति (श्रोत्रेन्द्रिय) से शब्द प्रत्यक्ष होता है। गन्धत्वादि यहाँ पर आदिपद से सुरभित्व-असुरभित्व का भी ग्रहण घ्राण से ही होता है। गन्धका प्रत्यक्ष होने से गन्ध में रहने वाली गन्धत्व जाति का भी प्रत्यक्ष होता है। परन्तु गन्ध का आश्रय जो द्रव्य उसका प्रत्यक्ष करने में घ्राण की सामर्थ्य नहीं है। गन्ध-और रस उद्भूत लेना ॥ ५३ ॥

"उद्भूतरूपं नयनस्य गोचरः" उद्भूतरूप नयन (चक्षु) का गोचर ग्राह्य है। उद्भूतरूपवाले द्रव्य-तथा पृथक्त्व-संख्या संयोग-विभाग परत्व-अपरत्व-स्नेह-द्रवत्व और परिणाम ये सब नयन से ग्राह्य हैं। ग्रीष्म और उष्मा में अनुद्भूतरूप है अतः उसका प्रत्यक्ष नहीं होता है ॥ ५४ ॥

अथ प्रत्यक्षादिप्रमाचतुष्टयं प्रति मन एव करणम्, सामग्रीवैलक्षण्यादेव कार्यवैजात्योपपत्तेः, कार्यवैजात्यात्प्रमाणविभागोपपत्तेश्च, तथाच पूर्वोक्तलक्षणान्वयसंभव इत्यत आह। वस्तुत इति। मनसः करणत्वपक्षे ज्ञानाकरणकत्वरूपप्रत्यक्षलक्षणमनुमित्यादावतिव्याप्तमत आह एवमिति। यत्किंचिदुपमितिव्यक्तिमादाय

क्रियां जातिं योग्यवृत्तिं समवायं च तादृशम् ।
गृह्णाति चक्षुः संयोगादालोकोद्भूतरूपयोः ॥५५॥

उद्भूतरूपमिति । ग्रीष्मोष्मादावनुद्भूतं रूपमिति न तत्प्रत्यक्षम् । तद्वन्ति = उद्भूतरूपवन्ति । योग्येति । पृथक्त्वादिकमपि योग्यव्यक्तिवृत्तिग्राह्यम् । तादृशं योग्यवृत्तिम् । चक्षुर्योग्यत्वमेव कथं तदाह गृह्णातीति । आलोकसंयोगः उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणम् । तत्र द्रव्यचाक्षुषं प्रति तयोः समवायसंबन्धेन कारणत्वम् । द्रव्यसमवेतरूपादिचाक्षुषं प्रति तयोः स्वाश्रयसमवायसंबन्धेन, द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबन्धेनेति ॥५४, ५५॥

'क्रियां जातिं योग्यवृत्तिः" प्रत्यक्ष योग्य द्रव्य में रहने वाली क्रिया तथा जाति, और प्रत्यक्षयोग्यद्रव्य में रहने वाला समवाय इनका प्रत्यक्ष आलोक और उद्भूतरूप के सम्बन्ध से चक्षु करता है। पृथक्त्व आदि भी प्रत्यक्षयोग्य जो द्रव्यव्यक्ति उसमें रहने वाले ही लेने चाहिये। और प्रत्यक्षयोग्य व्यक्ति में रहने वाले ही समवाय का भी प्रत्यक्ष होता है। प्रश्न—ये सब चक्षु से प्रत्यक्षयोग्य कैसे हैं। उत्तर—आलोक संयोग-और उद्भूतरूप चाक्षुषप्रत्यक्ष में कारण हैं। उसमें भी द्रव्य के चाक्षुष प्रत्यक्ष में आलोक संयोग-तथा उद्भूतरूप समवाय सम्बन्ध से कारण होते हैं। और द्रव्य में रहने वाले रूप आदि के प्रत्यक्ष में वे दोनों स्वाश्रय समवाय सम्बन्ध से कारण हैं। स्वपद से आलोक संयोग और उद्भूतरूप-उनका आश्रय द्रव्य-उसमें समवाय सम्बन्ध से रूप भी है। द्रव्य में समवेत जो रूप—उस रूप में समवेत जो रूपत्व-उस रूपत्व के प्रत्यक्ष में आलोकसंयोग-उद्भूतरूप-स्वाश्रवसमवेत समवाय सम्बन्ध से कारण हैं—स्वपद से आलोक संयोग-उद्भूतरूप-उनका आश्रय द्रव्य—उस द्रव्य में सनवेत हुवा रूप-उस रूप का समवाय रहा रूपत्व में अर्थात् स्वाश्रयसमवेत समवाय सम्बन्ध से आलोक संयोग-और उद्भूतरूप रूपत्व पर बैठ गये अतः रूपत्व का प्रत्यक्ष होता है॥ ५५ ॥

तद्व्यक्तिवृत्तिप्रत्यक्षासमवेतजातिमत्त्वमुपमितित्वम् । यत्किंचिच्छाब्दबोधव्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्यक्षासमवेतंजातिमत्त्वं शाब्दबोधत्वं निर्वाच्यमिति ध्येयम् । घ्राणस्य निर्विषयकत्वादाह **ग्राह्य इति** । गोचरपदस्य जन्यज्ञानविषयार्थकतया नासंगतिरिति भावः । **तद्वृत्तिजातिरपि**=गन्धवृत्तिजातिरपि । यो गुणो यदिन्द्रियेण गृह्यते तन्निष्ठा जातिस्तदभावश्च तेनैव गृह्यते इति नियमात् । **न तत्प्रत्यक्षमिति** । नोष्मादिगतरूपप्रत्यक्षमित्यर्थः । नोष्मादिप्रत्यक्षमिति तु नार्थः, **"द्रव्याणि तद्वन्ति"** इत्यनेनैव तत्प्रत्यक्षस्य वारणीयत्वात । न्यूनतां परिहरति **पृथक्त्वादिकमपीति** ।

आलोकसंयोग इति। तथाच द्रव्यचाक्षुषं प्रति आलोकसंयोगः समवायेन कारणम्, अन्यथा अन्धकारे घटादेश्चाक्षुषापत्तिः स्यात्। एतेन तमःस्थितघटादेश्चाक्षुषापत्तिर्दुर्वारैव। न च तत्र तदानीं चक्षुःसंयोगे मानाभावः। चक्षुःसंयुक्तविशेषणताया द्रव्यवृत्त्यभावचाक्षुषं प्रति हेतुतया तमःस्वरूपाभावप्रत्यक्षानुरोधेन तदानीमपि चक्षुः संयोगस्य घटादावावश्यकत्वात् इति निरस्तम्। उद्भूतानभिभूतरूपवन्महाऽऽलोकसंयोगत्वेन हेतुत्वात्। उद्भूतेत्याद्युपादानात् ग्रीष्म-सुवर्ण-तैजसाणूनां संयोगेपि न घटादीनां चाक्षुषग्रहः। तमःस्थिततप्तायःपिण्डादौ च वन्हेः रूपं नाभिभूतमरुणत्वेनैव तद्ग्रहादिति तद्गतं शुक्लत्वसामान्यमेव तथेति नायःपिण्डस्य चाक्षुषासंभवः। वन्ह्यादेर्मणिप्रभादेर्वा चाक्षुषस्थले च तादृशालोकान्तरासत्त्वेपि चक्षुर्वन्ह्यादिसंयोग एव तादृशालोकसंयोगोस्तीत्यदोषः।

नव्यास्तु उक्तरूपेणालोकसंयोगस्य हेतुत्वे गौरवाद् द्रव्यचाक्षुषं प्रति प्रभासंयोगत्वेनैव हेतुत्वम्। प्रभात्वन्तु तेजस्त्वव्याप्यजातिविशेषः। एवं च वन्ह्यादिमध्यवर्त्तिघटादावपि वन्हिसंयुक्तप्रभायाः संयोगोस्तीति न तत्प्रत्यक्षानुपपत्तिः। द्व्यणुकात्मकप्रभायाः संयोगेपि घटाद्यदर्शनान्महत्त्वेन प्रभा विशेषणीयेति प्राहुः।

एवं द्रव्यचाक्षुषं प्रति उद्भूतरूपं समवायेन कारणम्। तेन वाय्वादीनां न चाक्षुषम्। रूपं द्विविधम्—उद्भूतमनुद्भूतं च। तत्र घ्राणरसनचक्षुःपिशाचादीनां भर्जनकपालस्थवन्हेस्तदूष्मणां चानुद्भूतरूपम्। उद्भूतरूपं च घटपटादीनाम्। न च तादृशद्वैविध्ये मानाभावः, उद्भूतत्वानुद्भूतत्वयोः रूपनिष्ठयोर्धर्मद्वयोरनभ्युपगमेपि क्षतिविरहादिति वाच्यम्। द्रव्यचाक्षुषं प्रति सामान्यतो रूपत्वेन करणत्वे घ्राणादीनामपि चाक्षुषापत्त्या उद्भूतरूपत्वेनैव हेतुत्वम्। तच्चोद्भूतत्वं घ्राणादिरूपव्यावृत्त मित्यवश्याभ्युपेयत्वात्। एवं स्पर्शोपि उद्भूतानुद्भूतभेदेन द्विविधः। तत्र घ्राणरसनचक्षुस्त्वक्पिशाचादीनां प्रभावाष्पयोश्चानुद्भूतस्पर्शः। घटपटादीनां वायुभर्जनकपालस्थवन्ह्यादूष्मसौरादितेजःप्रभृतीनां चोद्भूतस्पर्शः। न च स्पर्शस्य तादृशद्वैविध्ये मानाभावः, उद्भूतत्वानुद्भूतत्वयोः स्पर्शनिष्ठधर्मद्वयोरनभ्युपगमेपि क्षतिविरहादिति वाच्यम्। द्रव्यस्पार्शनं प्रति सामान्यतः स्पर्शत्वेन कारणत्वे घ्राणादीनां प्रभावाष्पयोश्च स्पार्शनापत्त्या उद्भूतस्पर्शत्वेनैव हेतुत्वम्, तच्चोद्भूतत्वं घ्राणादिस्पर्शव्यावृत्तमित्यवश्याभ्युपेयत्वात्। एवं रसोपि उद्भूतानुद्भूतभेदेन द्विविधः। तत्र घ्राणरसनमणिरत्नादीनामनुद्भूतरसः उद्भूतरसश्च गुडादीनाम्। न च तादृशं द्वैविध्ये मानाभावः, रसरासनं प्रति सामान्यतो रसत्वेन कारणत्वे रसनसंयुक्तसमवायसन्निकर्षेण घ्राणमणिरत्नादीनामपि रसोपलब्ध्यापत्त्या उद्भूतरसत्वेनैव तत्र हेतुत्वम्, तच्चोद्भूतत्वं घ्राणादिरसव्यावृत्तमित्यवश्याभ्युपेयत्वात्। एवं गन्धोपि उद्भूतानुद्भूतभेदेन द्विविधः। तत्र घ्राणपाषाणमणिवज्रादीनामनुद्भूतगन्धः। उद्भूतगन्धश्च घटपटचंपकादीनाम्। न च तादृशद्वैविध्ये मानाभावः घ्राणसंयुक्तमहदुद्भूतरसवत्समवायस्य सन्निकर्षतया च न घ्राणादीनां ग्रह इत्येवास्तु किं गन्धनिष्ठोद्भूतत्वकल्पनेन, निर्गन्धस्यापि रसवतो जलस्य सत्त्वेनोक्तयुक्त्या

रसनिष्ठोद्भूतत्वस्यावश्यकत्वादिति वाच्यम्। अनन्तरसानां सन्निकर्षकारणतावच्छेदककोटौ प्रवेशमपेक्ष्याद्भूतगन्धत्वेन गन्धस्य कारणताया एव लघुत्वात्। धूमस्य नीरसत्वे तदीयगन्धग्रहे उक्तसन्निकर्षस्य व्यभिचाराच्चेति न्यायसिद्धान्तः। तत्र रूपनिष्ठोद्भूतत्वानुद्भूतत्वे कः पदार्थः। किमुभयमेव जातिः अथवोद्भूतत्वं जातिः तदभावोऽनुद्भूतत्वम्। अथवाऽनुद्भूतत्वं जातिस्तदभाव उद्भूतत्वमिति चेत्। अत्र सिद्धान्तानुयायिनः—अनुद्भूतत्वं जातिः तदभाव उद्भूतत्वम्, न तूद्भूतत्वं जातिस्तदभावोनुद्भूतत्वम्, नीलत्वादिना सांकर्यात्। अथैवमनुद्भूतत्वमपि कथं जातिः, नीलत्वादिना सांकर्यात्। न चानुद्भूतत्वं नीलत्वादीनां सर्वेषां विरुद्धम्, अनुद्भूतरूपस्यातीन्द्रियतया तत्र नीलत्वादिसत्वे मानाभावादिति वाच्यम्। तथासति तत्र रूपत्वादिसत्वेपि मानाभावात्, घ्राणादावनुद्भूतरूपात्मकधर्मिसत्वेपि मानाभावाच्च। पृथिवीत्वादेः रूपत्वावच्छिन्नव्याप्यतया घ्राणादावनुद्भूतरूपस्य, तत्र रूपे रूपत्वस्य च सिद्धिरिति यदि विभाव्यते, तदा रूपत्वस्य नीलाद्यन्यतमत्वव्याप्यतया नीलत्वादेरपि तत्रावश्यकत्वात्।

नव्यास्तु नीलत्वादेर्यस्य कस्यचिदेकस्य तद्व्याप्यमिति वाच्यम्। विनिगमकाभावात् विनिगमकाभावेन सर्वेषामेव व्याप्यत्वाभ्युपगमे च नीलत्वपीतत्वादीनां परस्परं संकरप्रसंगात् इति चेत्, सत्यम्। नीलत्वपीतत्वादिव्याप्यं नानैवानुद्भूतत्वं अनुभूतत्वाभावकूटवत्त्वमेवोद्भूतत्वं, तद्वद्रूपत्वेनैव द्रव्यचाक्षुषं प्रति जनकत्वं तादृशाभावकूटवत्त्वस्यानुगतत्वात्, उद्भूतत्वस्यैव नीलत्वपीतत्वादिव्याप्यनानाजातित्वे तेन रूपेण द्रव्यचाक्षुषं प्रति जनकत्वे परस्परं व्यभिचारापत्तेः। न च घ्राणादिनिष्ठमनुद्भूतत्वं नीलात्मकं पीताद्यात्मकं वेत्यत्र विनिगमनाविरह इति वाच्यम्। विनिगमकाभावेन व्याप्यवृत्तिनीलपीतादिनानाऽनुद्भूतरूपाणामेव तत्राभ्युपगमात्।

वस्तुतस्तु अनुद्भूतत्वं शुक्लत्वव्याप्यमेव सर्वमेवानुद्भूतरूपं शुक्लमित्यभ्युपगमात्। न च नीलत्वादिमादाय विनिगमनाविरहः। अनुद्भूतत्वस्य रसने चक्षुराद्यात्मकजलतेजोवृत्तिरूपे अपि सत्वेन नीलत्वादिव्याप्यत्वासंभवात्, जलतेजसोः शुक्लरूपवत्त्वनियमात्। शुक्लरूपस्य च घ्राणाद्यात्मकपृथिव्यामपि संभवात्। न च शुक्लत्वव्याप्योत्कर्षापकर्षाभ्यां समं सांकर्यमिति वाच्यम्। अनुद्भूतरूपत्वस्यात्यन्तापकृष्टपरतया तत्रोद्भूतशुक्लसाधारणोत्कर्षवत्त्वे मानाभावात्। न च तथापि भास्वरत्वमादाय सांकर्यं दुर्वारं, तेजसो भास्वररूपवत्वनियमेन चक्षुरादिरूपे भास्वरत्वस्यावश्यकत्वात्, तादृशनियमानभ्युपगमे तेजसो रूपवत्त्वनियमस्याप्यसंभवेन तत्राप्यनुद्भूतरूपस्याप्यसिद्धिप्रसंगादिति वाच्यम्। अनुद्भूतत्वस्य भास्वरत्वव्याप्यविरुद्धभेदेन द्विविधत्वात्। तादृशानुद्भूतत्वाभावद्वयवद्रूपत्वेन चाक्षुषं प्रति हेतुता। एवं स्पर्शनिष्ठानुद्भूतत्वमपि शीतत्वादिव्याप्यनानाजातिः, जलस्पर्शनिष्ठानुद्भूतत्वं शीतत्वव्याप्यं तेजःस्पर्शनिष्ठानुद्भूतत्वं उष्णत्वव्याप्यं, पृथिवीवायुस्पर्शनिष्ठानुद्भूतत्वमनुष्णाशीतत्वव्याप्यं, तादृशानुद्भूतत्वाभावकूटवत्स्पर्शत्वमेवोद्भूतस्पर्शत्वम्, तेनैव रूपेण

उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः।
रूपान्यच्चक्षुषो योग्यं, रूपमत्रापि कारणम् ॥५६॥
द्रव्याध्यक्षे,

उद्भूतेति। उद्भूतस्पर्शवद्द्रव्यं त्वचो गोचरः। सोपि = उद्भूतस्पर्शोपि स्पर्शत्वादिसहितः। रूपान्यदिति। रूपभिन्नं रूपत्वादिभिन्नं यच्चक्षुषो योग्यं तत्त्वगिन्द्रियस्यापि ग्राह्यम्। तथा च पृथक्त्वसंख्यादयो मे चक्षुर्ग्राह्या गुणा उक्ताः एवं क्रियाजातयो योग्यवृत्तयस्त्वचो ग्राह्या इत्यर्थः। अत्रापि = त्वगिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणम्। तथाच बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणम्।

"उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि" उद्भूतस्पर्श वाले द्रव्य का त्वगिन्द्रिय से प्रत्यक्ष होता है। और स्पर्शत्व सहित वह उद्भूत स्पर्श भी त्वगिन्द्रिय से ग्राह्य है। रूप से भिन्न-रूपत्व से भिन्न जो भी पदार्थ चक्षु से ग्राह्य है—वह त्वगिन्द्रिय से भी ग्राह्य है। पृथक्त्व-संख्या-आदि जो गुण चक्षु से ग्राह्य हैं—एवं प्रत्यक्ष योग्य पदार्थ में रहने वाली जो क्रिया और जाति—जो चक्षु से ग्राह्य हैं वे त्वगिन्द्रिय से भी ग्राह्य हैं। त्वगिन्द्रिय जन्य द्रव्य प्रत्यक्ष में भी रूप कारण है—इसलिए बहिरिन्द्रिय से होने वाले द्रव्यप्रत्यक्ष में रूप कारण हैं। नवीन नैयायिकों

द्रव्यस्पार्शनं प्रति जनकत्वम्, अभावकूटस्यानुगतत्वात्। रसनिष्ठानुद्भूतत्वमपि तिक्तत्वमधुरत्वव्याप्या नाना जातिः।

वस्तुतो रसनिष्ठानुद्भूतत्वं मधुरत्वव्याप्यमेव सर्व एवानुद्भूतरसो मधुर एवेत्युपगमात्। रसनाद्यात्मकजलनिष्ठरसेपि तस्य सत्वेन तिक्तत्वादिव्याप्यत्वस्य तत्राऽसंभवात्, अपां मधुर एव रस इति नियमात्। तादृशानुद्भूतत्वाभावकूटवत्त्वमेवोद्भूतरसत्वम्, तेनैव रूपेण रसरासनत्वावच्छिन्नं प्रति जनकत्वम्। गन्धनिष्ठानुद्भूतत्वं च विनिगमकाभावेन द्वयं, एकं सुरभित्वव्याप्यमपरं चासुरभित्वव्याप्यं तदभावद्वयवद्गन्धत्वमेवोद्भूतगन्धत्वम्, तेनैव रूपेण गन्धघ्राणजत्वावच्छिन्नं प्रति जनकत्वम्। घ्राणपाषाणादिकं च सुरभ्यसुरभ्युभयानुद्भूतगन्धवदेव, विनिगमकाभावादित्याहुः।

अत्र मीमांसकानुयायिनो नव्यनैयायिकाः—तादृशरूपादिद्वैविध्ये मानाभावः, सामान्यतो द्रव्यचाक्षुषं प्रति रूपत्वेन, द्रव्यस्पार्शनं प्रति स्पर्शत्वेन, रसरासनं प्रति रसत्वेन, गन्धघ्राणजत्वावच्छिन्नं प्रति गन्धत्वेनैव लाघवेन हेतुत्वात्। न चैवं घ्राणरसनचक्षुःपिशाचादीनां चाक्षुषापत्तिः, तेषां प्रभावाष्पयोश्च स्पार्शनापत्तिः, घ्राणरसनादिवृत्तिरसानामपि रासनापत्तिः, घ्राणपाषाणमणिरत्नादिगन्धानामपि घ्राणजापत्तिश्चेति वाच्यम्। तेषां नीरूपत्व-नीरसत्व-निःस्पर्शत्वनिर्गन्धत्वाद्युपगमात्। एवं यत्रानुद्भूतरूपरसगन्धस्पर्शवत्त्वं नैयायिकसिद्धान्तिभिरभ्युपेयते तत्र नीरूपनी-

नवीनास्तु बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे न रूपं कारणं, प्रमाणा-भावात्। किन्तु चाक्षुषप्रत्यक्षे रूपं, स्पार्शनप्रत्यक्षे स्पर्शः कारणम्, अन्वय-व्यतिरेकात्। बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमितिचेत्, न किंचित्, आत्माऽवृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु। रूपस्य कारणत्वे लाघवमिति चेन्न। वायोस्त्वगिन्द्रियेणाऽग्रहणप्रसंगात्। इष्टापत्तिरिति चेत् उद्भूतस्पर्श एव लाघवात्कारणमस्तु। प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरेव किं नष्यते, तस्मात्प्रभां पश्यामीतिवत् वायुं स्पृशामीति प्रत्ययस्य सत्त्वा-द्वायोरपि प्रत्यक्षत्वं संभवत्येव। बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वम्। वायुप्रभयोरेकत्वं गृह्यते एव, क्वचित् द्वित्वादि-कमपि क्वचित्संख्यापरिमाणाद्यग्रहो दोषादित्याहुः।

का कहना है कि बहिरिन्द्रियजन्यद्रव्यप्रत्यक्ष मात्र में रूप कारण नहीं है क्यों कि उसमें कोई प्रमाण नहीं है। किन्तु चाक्षुष प्रत्यक्ष में रूप-और स्पार्शन प्रत्यक्ष में स्पर्श कारण है—अन्वय-व्यतिरेक से (अर्थात् रूप के अन्वय (सत्त्व) से चाक्षुष प्रत्यक्ष का भी सत्त्व देखा जाता है। और रूप के व्यतिरेक (असत्व) से चाक्षुषप्रत्यक्ष का भी असत्व देखा जाता है। ऐसे ही स्पर्श के अन्वय (सत्त्व) से स्पार्शन प्रत्यक्ष का सत्व देखा जाता है। और स्पर्श के व्यतिरेक (अभाव) में स्पार्शनप्रत्यक्ष का भी अभाव देखा जाता है] प्रचीन पूछता है कि बहिरिन्द्रियजन्य-द्रव्य प्रत्यक्ष मात्र में एक कौन कारण है। नवीन उत्तर देता है कि कोई नहीं अथवा आत्मा में न रहनेवाला जो शब्द भिन्न विशेषगुण-तादृश विशेषगुणवत्व ही बाह्य द्रव्यप्रत्यक्ष मात्र में कारण है। प्रश्न—रूप को कारण मानने में लाघव है। उत्तर—नही-तव वायु का त्वगिन्द्रिय से प्रत्यक्ष नहीं होगा। प्रश्न न हो वायु का प्रत्यक्ष—उसमें इष्टापत्ति करेंगे। उत्तर—यदि ऐसा हो तो बाह्यद्रव्यप्रत्यक्ष मात्र में उद्भूतस्पर्श ही को लाघवात् कारण मान लिया जाय। प्रश्न —प्रभा (प्रकाश) का प्रत्यक्ष नहीं होगा—क्योंकि प्रभा में उद्भूतस्पर्श नहीं है। उत्तर—प्रभा का प्रत्यक्ष नहीं होगा तो न हो वायु के अप्रत्यक्षत्व में इष्टापत्ति की-वैसे ही प्रभा के अप्रत्यक्षत्व में हम (नवीन) भी इष्टापत्ति करेंगे। अतः जैसे "प्रभां पश्यामि" यह प्रभा का चाक्षुषप्रत्यक्ष होता है—वैसे ही "वायुं स्पृशामि" यह वायु का भी स्पार्शन प्रत्यक्ष होता है। बहिरिन्द्रियजन्यद्रव्य प्रत्यक्ष मात्र में न रूप कारण हैं—अथवा न स्पर्श कारण है। प्रभागत एकत्व संख्या का प्रत्यक्ष त्वचा से होता है। कहीं द्वित्वसंख्या का भी (ये दो प्रभायें हैं) (ये पूर्वी-पश्चिमी दो वायु हैं) और कहीं संख्या-परिमाण आदि का जो प्रत्यक्ष नहीं होता है, वह दोष से—ऐसा नवीन कहते हैं॥ ५६ ॥

रसनिर्गन्धनिःस्पर्शाः लाघवात, तेषां रूपादिसत्त्वे मानाभावाच्च। द्रव्यत्वदेरिव पृथिवीत्वादेरपि रूपादिमत्वव्याप्यत्वे मानाभावात्। न चैवं प्रत्यक्षसिद्धरूपादि-मदवयव्यनारंभकाः परमाणवो घ्राणादिकमारभन्ते इति नियतारम्भवादिमते साधु

शोभते, मूलीभूतपरमाणूनामपि रूपादिरहिततयाऽवयवरूपादिविरहादेवाऽवयविनि घ्राणादौ रूपाद्यनुत्पत्तेः सुवचत्वात् । य एव परमाणवः प्रत्यक्षरूपादिमत्पृथिव्यादिकमारभन्ते त एव घ्राणादिकमप्यारभन्ते इत्यनियतारम्भनये तु न संगच्छते, प्रत्यक्षसिद्धरूपादिमदारम्भकत्वान्यथानुपपत्त्या परमाणावपि रूपादेरावश्यकतयाऽवयवरूपादिक्रमेण घ्राणादिष्वपि रूपाद्युत्पत्तौ बाधकाभावादिति वाच्यम् । अनियतारम्भनयेपि समवायसंबन्धेन रूपाद्युत्पत्तिं प्रति तादात्म्यसंबन्धेन घ्राणाद्यारम्भकद्वयणुकत्वेन प्रतिबन्धकतया तत्र रूपाद्यनुत्पादात् । द्वयणुके रूपाद्यनुत्पत्तौ अवयववृत्तिरूपाद्यभावादेव घ्राणादौ त्रसरेण्वादितदवयवपरम्परायां च रूपाद्यनुत्पत्तेरसंभवात् । घ्राणाद्यारम्भकत्वं च साक्षात्परम्परासाधारणतदवयवत्वसंबन्धेन घ्राणादिमत्त्वम् । परमाणुवारणाय द्वयणुकत्वप्रवेश इत्याहुरित्यन्यत्र विस्तरः ।

तथाचेति । एवंच वायोश्चाक्षुषसाक्षात्कारवत्स्पर्शेनापि न साक्षात्कार इति प्राचीनसिद्धान्तः । स न श्रद्धेयः । वायोरस्पार्शनत्वे शरीरवायुसंयोगानन्तरं शीतो वायुः, वायुर्वातीति वायुमुख्यविशेष्यकलौकिकस्पार्शनानुपपत्तेः । न चासौ न स्पार्शनोऽपि तु मानस एवेति वाच्यम् । वायोः शीतस्पर्शं स्पृशामि वायोर्वातं स्पृशामीत्यनुव्यवसायानुपपत्तेः । न चासौ भ्रमो, बाधकाभावात् । न च वायूनां विषयविधया त्वविषयकलौकिकप्रत्यक्षे तत्तद्व्यक्तित्वेन कारणत्वे कल्पनागौरवमेव बाधकमिति वाच्यम् । विषयस्य तत्तद्व्यक्तित्वेन प्रत्यक्षकारणत्वे मानाभावात् । विषयस्य तत्तद्व्यक्तित्वेन कारणताभियाऽतीन्द्रियत्वाभ्युपगमे घटादेरपि तथात्वापत्तेश्च । न चोद्भूतरूपस्य द्रव्यचाक्षुषवत् द्रव्यस्पार्शनेपि हेतुत्वात्कारणाभाव एव बाधक इति वाच्यम् । मानाभावात् । प्रभावाः स्पार्शनवारणायोद्भूतस्पर्शस्य द्रव्यस्पार्शने हेतुत्वस्यावश्यकतया तत एव पिशाचादेर्गगनादेश्चाऽस्पार्शनत्वोपपत्तेः । न च विनिगमनाविरहादेवोद्भूतरूपस्यापि द्रव्यस्पार्शनहेतुत्वमिति वाच्यम् । तथाप्युक्तप्रतीतेर्भ्रमत्वकल्पनाया एव विनिगमकत्वात् । न च वायूष्मणोस्त्वाचाभ्युपगमे तद्वृत्तिसंख्यादेरपि त्वाचापत्तिरिति वाच्यम् । इष्टत्वादित्याशयवतां मतमाह । नवीनास्त्विति । आत्मावृत्तीति । तेनाऽऽत्मकाशकालादेर्व्यावृत्तिः । प्रतिबन्द्युत्तरमाह । उद्भूतस्पर्श एवेति । समानं विरोध्युत्तरं प्रतिबन्दी । क्वचिदिति । सजातीयसंबलनाभावे । दोषादिति । सजातीयसंबलनादिरूपदोषादित्यर्थः ।

अत्र प्राञ्चः—सामान्यतो मानसेतरद्रव्यलौकिकप्रत्यक्षत्वावच्छेदेनैव द्रव्यलौकिकचाक्षुषं प्रति उद्भूतरूपस्य हेतुत्वान्न वायोः स्पार्शनसाक्षात्कारसंभवः, सामान्यसामग्रीसहिताया एव विशेषसामग्र्याः कार्योपधायकत्वात् । न च तादृशकार्यकारणभावे मानाभाव इति वाच्यम् । वाय्वादेः पिशाचादेरात्मनश्च लौकिकचाक्षुषवारणाय द्रव्यलौकिकचाक्षुषं प्रति उद्भूतरूपस्य हेतुत्वावश्यकतया तस्यैव सामान्यतोमानसेतरलौकिकप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वात् । असति बाधके सामान्यधर्मावच्छेदेनैव कार्यतादिग्राहकप्रवृत्तेरित्याहुः । तदसत् । मानसेतरद्रव्य-

प्रत्यक्षत्वस्याऽऽत्मेतरद्रव्यप्रत्यक्षत्वमादाय विनिगमनाविरहग्रस्ततया द्रव्यचाक्षुषत्वमपेक्ष्य शरीरगुरुतया च द्रव्यचाक्षुषत्वस्यैव उद्भूतरूपकार्यतावच्छेदकत्वौचित्यात्। बाधकसत्त्वेन सामान्यस्याऽकिंचित्करत्वात्। अपरे तु मूर्तलौकिकप्रत्यक्षत्वद्रव्यलौकिकचाक्षुषत्वयोः समशरीरतया विनिगमकाभावादुभयमेवोद्भूतस्पर्शस्य कार्यतावच्छेदकमतो न वायोः स्पार्शनसाक्षात्कारसम्भवः। न च मूर्तलौकिकप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वेपि द्रव्यलौकिकचाक्षुषत्वं कार्यतावच्छेदकमावश्यकम्, अन्यथा आत्मनि उद्भूतरूपाभावान्मूर्तप्रत्यक्षोत्पत्त्यसंभवेपि चक्षुःसंयोगलक्षणसन्निकर्षसत्वेन द्रव्यलौकिकचाक्षुषोत्पत्तिप्रसंगस्य दुर्वारत्वात, तथाचेदमेव विनिगमकमिति वाच्यम्। मूर्तलौकिकप्रत्यक्षत्वमात्रस्य कार्यतावच्छेदकत्वेपि मूर्तलौकिकप्रत्यक्षातिरिक्तस्य द्रव्यलौकिकचाक्षुषस्यालीकतया सामान्यसामग्रीविरहादेवाऽऽत्मनो द्रव्यलौकिकचाक्षुषापत्तेर्वारणसंभवादिति वदन्ति।

चाक्षुषप्रत्यक्षे रूपं कारणम्, स्पार्शनप्रत्यक्षे स्पर्शः कारणमित्युक्तम्। अथ चाक्षुषत्वस्य कार्यतावच्छेदकत्वे स्पार्शनप्रत्यक्षं प्रति उद्भूतरूपस्याजनकतया रसनस्य स्पार्शनवारणाय स्पार्शनं प्रति उद्भूतस्पर्शस्य जनकतायां स्पर्शनिष्ठानुद्भूतत्वाभावस्याप्यवच्छेदककोटौप्रवेशावश्यकत्वे गौरवापत्तेः। प्रत्यक्षत्वस्य कार्यतावच्छेदकत्वे स्पार्शनप्रत्यक्षं प्रति उद्भूतरूपस्य जनकतया तदभावादेव रसनस्य स्पार्शनाऽसंभवात न तत्प्रवेशः, उद्भूतरूपाऽनुद्भूतस्पर्शवतो जलस्याभावादिति चेन्न।

प्रत्यक्षत्वस्य कार्यतावच्छेदकत्वे त्वाचीयलौकिकविषयतानामपि कार्यतावच्छेदकसंबन्धकोटौ प्रवेशेन महागौरवात्। ननु तथापि प्रत्यक्षत्वस्य कार्यतावच्छेदकत्वे स्पर्शनिष्ठाऽनुद्भूतत्वत्वावच्छिन्नप्रतियोगिताकानुद्भूतत्वाभावकूटत्वेन द्रव्यस्पार्शनं प्रति हेतुत्वमुपेयम्, गगनादावपि तादृशाभावकूटवत्वेपि उद्भूतरूपात्मककारणान्तरविरहादेवास्पार्शनत्वोपपत्तेः। चाक्षुषत्वस्य कार्यतावच्छेदकत्वे तु स्पर्शनिष्ठाऽनुद्भूतत्वाभावकूटवत्स्पर्शत्वेनैव द्रव्यस्पार्शनं प्रति हेतुत्वमुपेयम्, अन्यथा गगनादेरपि स्पार्शनापत्तेः, उद्भूतरूपस्य स्पार्शनाहेतुत्वात्, तथाच स्पर्शत्वप्रवेशात्स्पर्शत्वाऽनुद्भूतत्वाभावकूटयोर्विशेष्यविशेषणभावे विनिगमकाभावेन कार्यकारणभावद्वयप्रसंगाच्च महद् गौरवमिति चेन्न। अपेक्षाबुद्धिभेदेन कूटत्वस्य नानाविधतया तादृशानुद्भूतत्वाभावकूटत्वेन हेतुत्वेऽनन्तकार्यकारणभावापत्तेः। अनुद्भूतत्वाभावकूटवत्स्पर्शत्वेन हेतुत्वे तु स्वरूपतोऽनुद्भूतत्वाभावकूटानां स्पर्शत्वस्य चैकत्र द्वयमिति न्यायेन व्यासज्यवृत्त्यवच्छेदकतया कूटत्वस्य कारणतावच्छेदककोटावप्रवेशात्।

वस्तुतस्तु अनुद्भूतस्पर्शे मानाभावात्सामान्यतः स्पर्शत्वेनैव द्रव्यस्पार्शनं प्रति हेतुत्वम्। नत्वनुद्भूतत्वाभावप्रवेशोपीति क्व गौरवसंभावना। न च तथापि मूर्तलौकिकप्रत्यक्षत्वस्य प्रत्यक्षत्वस्य वा उद्भूतरूपकार्यतावच्छेदकत्वे द्रव्यत्वाचं प्रति स्पर्शस्यापि पृथक् हेतुत्वमावश्यकमतो गौरवमिति वाच्यम्। मूर्तलौकिकप्रत्यक्षत्वस्य वा कार्यतावच्छेदकत्वेपि प्रभायास्त्वाचवारणाय द्रव्यत्वाचं प्रति स्पर्शस्य

त्वचो योगो मनसा ज्ञानकारणम्।
मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ॥५७॥

त्वचोयोग इति। त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणमित्यर्थः किं तत्र प्रमाणम्, सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्तमानेन मनसा ज्ञानाजननमिति। ननु सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवरूपं स्मरणरूपंवा, नाद्यः-अनुभवसामग्र्यभावात्, तथाहि चाक्षुषादिप्रत्यक्षे चक्षुरादिना सह मनःसंयोगस्य हेतुत्वात्तदभावादेव न चाक्षुषादिप्रत्यक्षम्। ज्ञानादेरभावादेव न मानसं प्रत्यक्षम्। ज्ञानाद्यभावे चाऽऽत्मनोपि न प्रत्यक्षमिति। व्याप्तिज्ञानाभावादेव नानुमितिः। सादृश्यज्ञानाभावान्नो-

"त्वचोयोगो मनसा ज्ञानकारणम्" त्वङ् मनः संयोग ज्ञानसामान्य में कारण है। प्रश्न—त्वङ् मनः संयोग ज्ञान सामान्य में कारण है इसमें क्या प्रमाण है। उत्तर—सुषुप्तिकाल में मन त्वक् को छोड़कर पुरीतत् नाडी में प्रविष्ट हो जाता है—(अतः त्वक् के साथ मन का संयोग उस काल में नहीं रहता है—इसलिए सुसुप्ति अवस्था में ज्ञान का न होना ही त्वङ्मनः संयोग को ज्ञानसामान्य के प्रति कारण सिद्ध करता है) (प्रश्न—यदि सुषुप्तिकाल में त्वङ्मनः संयोग मान भी लिया जाय तो उस अवस्था (सुषुप्ति) में कौन ज्ञान होगा अनुभवरूप या स्मरणरूप-यदि कहो कि आद्य (अनुभवरूप) ज्ञान होता है—यह नहीं कह सकते क्योंकि अनुभवज्ञान की सामग्री ही उस काल में नहीं है। तथाहि—अनुभव चार प्रकार का होता है, यह हम पहिले बतलाचुके हैं—सो प्रत्यक्षात्मक अनुभव में चक्षु आदि के साथ मनः संयोग कारण है—उसके न होने से चाक्षुष आदि प्रत्यक्ष नहीं हो सकेंगे। मानस प्रत्यक्ष भी ज्ञान इच्छा आदि का ही होता है सो सुषुप्ति में कोई भी ज्ञान-इच्छा वगैरह नहीं है अतः ज्ञानादि के न होने से मानसप्रत्यक्ष भी नहीं हो सकता है। और यदि कहो कि सुषुप्तकाल में आत्मा ही का प्रत्यक्ष होता रहता है सो भी ठीक नहीं—कारण की आत्मा का प्रत्यक्ष ज्ञानादि विशेष गुणों के सम्बन्ध से होता है जैसे अहंजानामि अहं सुखी-इत्यादि। सुषुप्तिकाल कोई भी ज्ञानादि विशेषगुण नहीं हैं। एवं सुषुप्तिकाल में कोई भी ज्ञान न होने से व्याप्तिज्ञान भी नहीं है अतः अनुमिति भी नहीं होगी। सादृश्यज्ञान न होने से उपमिति भी नहीं होगी—

पृथक्हेतुताया आवश्यकत्वादिति ध्येयम्। आहुरित्यस्वरसः तद्बीजं तु वायोः प्रत्यक्षतासन्देहेन लाघवाद् बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपत्वेनैव कारणत्वमुचितम्। एवं प्रभाया अप्रत्यक्षत्वे इष्टापत्तौ उपरिदेशे विहंगम इत्यत्र प्रभामण्डलस्यैवोपरि-देशतया तत्प्रत्यक्षं विनोपरिदेशे विहंगम इति प्रत्यक्षानुपपत्तेरित्यादिकं बोध्यम्।

ज्ञानसामान्ये=जन्यज्ञानसामान्ये। **ज्ञानाजननमिति। तत्र प्रमाणमिति** पूर्वानुवृत्तिः। तथाच सुषुप्तिकाले मनो न ज्ञानजनकं त्वक्संयोगाभावादित्यनुमानबलेन

पमितिः। पदज्ञानाभावान्न शाब्दबोधः इत्यनुभवसामग्र्यभावान्नानुभवः। उद्बोधकाभावाच्च न स्मरणम्। मैवम्। सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेस्तत्संबन्धेनाऽऽत्मनश्च प्रत्यक्षत्वप्रसंगात्। तदतीन्द्रियत्वे मानाभावात्। सुषुप्तिप्राक्काले निर्विकल्पकमेव जायते इत्यत्रापि प्रमाणाभावात्। अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं, तदा रासनचाक्षुषादिप्रत्यक्षकाले त्वाचप्रत्यक्षं स्यात्, विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च तत्र सत्वात्। परस्परप्रतिबन्धादेकमपि न स्यात्।

अत्र केचित्। पूर्वोक्तयुक्त्या त्वङ्मनःसंयोगस्य ज्ञानहेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबन्धकत्वमनुभवानुरोधात्कल्प्यते इति।

पदज्ञान न होने से शब्दबोध भी नहीं होगा—इस प्रकार अनुभव की सामग्री न होने से अनुभवरूप ज्ञान तो सुषुप्ति में होगा नहीं। और उद्बोधन कोई न होने से स्मरणरूप ज्ञान भी न होगा। उत्तर—यदि त्वङ्मनः संयोग को ज्ञानसामान्य में कारण नहीं मानेंगे तो सुषुप्तिप्राक्काल में अर्थात् सुषुप्तिप्रथमक्षण का जो अव्यवहित प्राक्क्षण उसमें उत्पन्न जो इच्छा-ज्ञानादि व्यक्ति—वह भी आत्मविषयकप्रत्यक्ष का कारणीभूत विशेष सामग्री है—सो उस इच्छादि व्यक्ति का सुषुप्तिप्राक्काल उत्पत्तिक्षण हुवा और सुषुप्तिप्रथमक्षण स्थितिक्षण हुवा, अतः सुषुप्तिप्रथमक्षण में इच्छा—एवं ज्ञानादि व्यक्ति का प्रत्यक्ष होना चाहिये—एवं सुषुप्तिप्राक्काल में आत्मा के साथ इच्छादि विशेषगुणों का सम्बन्ध होने के नाते आत्मा के भी सुषुप्तिप्रथमक्षण में प्रत्यक्ष की आपत्ति लग जायेगी। और सुषुप्तिप्राक्क्षणोत्पन्न ज्ञान व्यक्ति को अतीन्द्रिय मानने में कोई प्रमाण नहीं हैं।

प्रश्न—क्या सुषुप्ति के अव्यवहित प्राक्काल में उत्पन्न हुवा ज्ञान नियम से निर्विकल्पक होना है—तब तो उसका प्रत्यक्ष तथा उसके सम्बन्ध से आत्मा का प्रत्यक्ष नहीं हो सकेगा। उत्तर—वह ज्ञान नियम से निर्विकल्पक ही होता है इसमें भी कोई प्रमाण नहीं है। प्रश्न—ज्ञानमात्र से त्वङ्मनः संयोग यदि कारण है तो रासनप्रत्यक्ष—एवं चाक्षुषप्रत्यक्षकाल में त्वाचप्रत्यक्ष भी होना चाहिये—क्योंकि त्वाचप्रत्यक्ष का कारण जो विषय के साथ त्वक् (त्वगिन्द्रिय) का संयोग वह भी है और त्वक् के साथ मनःसंयोग भी है। और यदि एक प्रत्यक्ष की सामग्री को दूसरे प्रत्यक्ष में प्रतिबन्धक मानें तो परस्पर में प्रतिबन्धक हो जाने से एक भी प्रत्यक्ष नहीं होगा। उत्तर—कोई ऐसा कहते हैं कि "सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्त्तमानेन मनसा ज्ञानाजनम्" इस पूर्वोक्त युक्ति से "त्वङ्मनः संयोग" को तो ज्ञानसामान्य के के प्रति कारणत्व सिद्ध ही है और चाक्षुषप्रत्यक्ष की सामग्री स्पार्शनप्रत्यक्ष के प्रति प्रतिबन्धक

मनस्त्वक्संयोगस्य ज्ञानजनकत्वात्, मनस्त्वक्संयोगो ज्ञानकारणमन्वयव्यतिरेकानुविधायित्वादिति प्रमाणतया बोध्यम्। पुरीततित्वगिन्द्रियाभावादिति हृदयम्।

अन्ये तु सुषुप्त्यनुरोधाच्चर्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यते, चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसंयोगाभावान्न त्वाचप्रत्यक्षमिति । मनोग्राह्यमिति । मनोजन्यप्रत्यक्षविषय इत्यर्थः । मतिर्ज्ञानम् । कृतिः प्रयत्नः । एवं सुखत्वादिकमपि मनोग्राह्यम् । एवमात्मापि मनोग्राह्यः, किन्तु "मनोमात्रस्य" इत्यनेन पूर्वमुक्तत्वादत्र नोक्तः ।।५७।।

होती है सो एक प्रत्यक्ष की सामग्री को दूसरे प्रत्यक्ष के प्रति प्रतिबन्धकत्व की कल्पना अनुभव के अनुरोध से की जाती है। [इससे पूर्वदोष निरस्त हो जाता है, आपने जो पहिले दोष दिया था कि "रासन-चाक्षुषप्रत्यक्ष काले त्वाच प्रत्यक्षं स्यात्" सो इसका सीधा उत्तर है कि जब आपने एकप्रत्यक्ष सामग्री को दूसरेप्रत्यक्ष के प्रति प्रतिबन्धकत्व की कल्पना कर लिया तो रासन-चाक्षुषप्रत्यक्षकाल में त्वाच प्रत्यक्ष के होने में रासन-चाक्षुषप्रत्यक्ष की सामग्री प्रतिबन्धक हो जावेगी—अतः चाक्षुष आदि प्रत्यक्षकाल में त्वाचप्रत्यक्ष नहीं होगा – तब फिर त्वाचप्रत्यक्ष कब होगा—क्योंकि त्वाचप्रत्यक्ष का कारण जो त्वङ्मनः संयोग वह तो हमेशा रहेगा, तो इसका उत्तर यही है कि जब मन का त्वक् को छोड़कर किसी भी इन्द्रिय से सम्बन्ध नहीं होगा—केवल त्वक् के साथ ही मन का संयोग होगा—तब त्वाचप्रत्यक्ष होगा] और अन्य (पक्षधामिश्र) ऐसा कहते हैं कि सुषुप्ति के अनुरोध से चर्ममनः संयोग को ज्ञानसामान्य के प्रति हेतुत्व (कारणत्व) की कल्पना करनी चाहिये - पूर्वदोष का वारण हो गया कि चाक्षुषप्रत्यक्षकाल में त्वाचप्रत्यक्ष इसलिये नहीं होता कि उस काल में त्वाचप्रत्यक्ष का कारण त्वङ्मनः संयोग नहीं है।

"मनोग्राह्यं सुखं दुःखमिच्छा" सुख-दुःख-इच्छा-द्वेष-ज्ञान—तथा प्रयत्न ये सब मन से ग्राह्य (प्रत्यक्षयोग्य) हैं। ऐसे ही सुखत्व आदि भी मनोग्राह्य हैं। और आत्मा भी मनोग्राह्य है। किन्तु आत्मा के विषय में "मनोमात्रस्य गोचरः" यह पहिले कहा जा चुका है—अतः यहाँ पौनरुक्त्य के भय से नही कहा—यहाँ केवल सुखादि को ही मनोग्राह्य कहा ।।५७।।

सुषुप्तिकाले सामग्र्यभावादेव न ज्ञानोत्पत्तिरित्याशंकते । नन्विति । अत्र ज्ञानादेर्न मानसमित्यन्वयः । अभावादित्यत्रापि ज्ञानादेरित्यस्यान्वयो बोध्यः । "न प्रत्यक्षमिति । अध्यक्षो विशेषगुणयोगतः" इतिरीत्या योग्यविशेषगुणसंबन्धेनैवाऽऽत्मनःप्रत्यक्षतया तदन्तर्गतज्ञानादेरभावेन नात्मप्रत्यक्षमित्यर्थः । उद्बोधकाभावादिति । उद्बोधकस्य फलबलकल्प्यत्वादिति भावः । इच्छादिव्यक्तेरिति । इच्छाया आदिरिति तत्पुरुषः, तेन ज्ञानस्येत्यर्थलाभः । तदतीन्द्रियत्वे = ज्ञानातीन्द्रियत्वे । त्वङ्मनःसंयोगस्य चेति । तस्याऽस्वीकारे चाक्षुषमपि न स्यादिति भावः । सुषुप्त्यनुरोधेन = सुषुप्तौ ज्ञानानुत्पादानुरोधेन ।

ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते ।

चक्षुःसंयोगाद्यनन्तरं घट इत्याकारकं घटत्वादिविशिष्टविषयकं ज्ञानं न संभवति पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात्, विशिष्टबुद्धौ विशेषण-ज्ञानस्य हेतुत्वात्, तथाच प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाह्येव ज्ञानं जायते तदेव निर्विकल्पकम् ।

"ज्ञानं यन्निर्विकल्पाख्यम्" प्रत्यक्षज्ञान दो प्रकार का है—निर्विकल्पक और सविकल्पक उसमें निर्विकल्पक ज्ञान अतिन्द्रिय है। घट के साथ चक्षुःसंयोग होने के बाद "घटः" इत्याकारक घटत्वविशिष्टज्ञान नहीं होता है। कारण कि विशेषण जो घटत्व उसका ज्ञान पूर्व में नहीं होने से। क्योंकि विशिष्टबुद्धि (विशिष्टज्ञान) में विशेषणज्ञान कारण होता है। तथाच सर्वप्रथम घट के साथ चक्षुःसंयोग होने के अनन्तर घट-घटत्व के वैशिष्ट्य (सम्बन्ध) को अवगाहन न करने वाला जो ज्ञान उत्पन्न होता है—वही निर्विकल्पक है और उसका प्रत्यक्ष नहीं होता है।

प्रत्यक्षं द्विविधं-निर्विकल्पकं सविकल्पकं च। तत्राऽऽद्ये प्रमाण माह। **चक्षुःसंयोगाद्यनन्तरमिति ।** आदिना संयुक्तसमवायसंयुक्तसमेवतसमवाययोः संग्रहः। विशिष्टबुद्धिः विशेषणज्ञानसाध्या विशिष्टबुद्धित्वात् रक्तदण्डवानिति-विशिष्टबुद्धिवत्, रक्तो दण्ड इति निश्चयं बिना रक्तदण्डवानिति निर्णयानुदयादित्याह। **विशेषणज्ञानस्य हेतुत्वादिति ।** तच्च विशेषणज्ञानं यदि वैशिष्ट्यावगाहि, तदा तस्यापि विशिष्टबुद्धित्वेन विशेषणज्ञानान्तरसापेक्षता स्यात्, तस्यापि वैशिष्ट्या-वगाहित्वमित्यनवस्था स्यात् अनवस्थाभिया वैशिष्ट्यानवगाहि तत्स्वीकार्यमिति-सूचयितुं वैशिष्ट्यानवगाह्येवेत्येवकारः। **तदेव निर्विकल्पकमिति ।** तत्प्रकारक-ज्ञानस्य तद्विशेष्यकज्ञानस्य च सामग्र्यसमवहितायाः तद्विषयकज्ञानसामग्र्याः निर्विकल्पकप्रयोजकत्वं बोध्यम्। निर्विकल्पकत्वं च न जातिः चाक्षुषत्वादिना सांकर्यात्, आंशिकत्वाच्च। लक्षणन्तु प्रकारत्वानिरूपकत्वं विशेष्यत्वानिरूपकत्वं संसर्गत्वानिरूपकत्वं वेति स्फुटमेव। न च निर्विकल्पके त्रिविधविषयतानामसत्त्वेन निर्विषयकत्वापत्तिः, तत्र तुरीयविषयतास्वीकारात्।

ननु विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वे मानाभावः, चक्षुःसंयोग-द्वितीयक्षणे एव घट इति विशिष्टप्रत्यक्षोपगमे क्षतिविरहात्, नहि तृतीय-क्षणे एव तादृशप्रत्यक्षम्, क्षणविलंबस्य शपथनिर्णेयत्वात्, रक्तो दण्ड इति निर्णयं विना रक्तदण्डवानिति निर्णयानुदयेन अन्वयव्यतिरेकाभ्यां भवतु विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे विशेषणतावच्छेदकप्रकारकनिश्चयस्य कारणत्वम्, परन्तु विशेषणज्ञानस्य हेतुत्वं निर्युक्तिकमेवेति चेन्न। विशेषणज्ञानस्याहेतुत्वे जातिमानिति ग्रहकाले घटः इत्याकारकप्रत्यक्षापत्तिः स्यादतः स्वरूपतो घटत्व-प्रकारकबुद्धौ तादृशघटत्वज्ञानं कारणम्, घटत्वांशे जातित्वप्रकारकघटत्वविशिष्टबुद्धौ

च तादृशघटत्वज्ञानं कारणमित्यवश्यमभ्युपेयम्। मीमांसकास्तु निर्विकल्पकज्ञानमप्रामाणिकम्, अतीन्द्रियतया प्रत्यक्षायोगात्। अनुमानस्याप्रयोजकत्वात्। न च विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुतायाः प्राथमिकविशिष्टबुद्ध्यन्यथानुपपत्त्या सिद्धिरिति वाच्यम्। विशेष्यविशेषणभासकेन्द्रियसन्निकर्षादित एव विशिष्टबुद्धिनिर्वाहात्, तत्र विशेषणज्ञानहेतुताया एवाऽप्रामाणिकत्वात्, अन्यथा विशेष्यज्ञानत्वेनापि विशिष्टबुद्धिं प्रति हेतुत्वप्रसंगात्।

अथ तत्प्रकारकज्ञानं प्रति तद्विषयकज्ञानस्यानपेक्षितत्वेन भूतले घट इत्याकारकं घटविशेष्यकं निखिलमेव प्रत्यक्षं घटप्रकारकं स्यादिति घटविशेष्यकतथाविधप्रत्यक्षस्य दौर्लभ्यम्, तथाचानुभवविरोधः। अस्मन्मते तु यत्र पूर्वं घटेन्द्रियसन्निकर्षादिकं विद्यते न तु तद्ज्ञानं तत्रैव तथाविधप्रत्यक्षसौलभ्यमिति चेन्न।

घटत्वादिनोपस्थितघटादौ भूतलादिप्रकारकस्य घटविशेष्यकप्रत्यक्षस्य कदाचिदुत्पत्तेरानुभविकतया विशेषणज्ञानस्य हेतुत्वेपि अननुगततत्तत्कालघटितसामग्र्यास्तदंशे तत्प्रकारकप्रत्यक्षोत्पादनियामकताया आवश्यकत्वात्, तत एवाऽस्मन्मते तत्प्रकारकतद्विशेष्यकप्रत्यक्षसौलभ्यात्, अन्यथा इन्द्रियसन्निकर्षादेरविशेषात् क्वचिदेव तद्विशेष्यकप्रत्यक्षं क्वचित्तदविशेष्यकमित्येतादृशनियमनिर्वाहाय विशेष्यज्ञानहेतुतैव किं न स्वीक्रियते इत्यत्र विनिमगमनाविरहप्रसंगात्। यत्तु प्रमात्मकविशिष्टबुद्धौ विशेष्यविशेषणसंबन्धज्ञानं गुणतया, भ्रमात्मकविशिष्टबुद्धौ विशेष्याऽसंबद्धविशेषणज्ञानं दोषतया हेतुरतस्तादृशनिर्वाहाय विशिष्टबुद्धिसामान्ये विशेषणज्ञानसामान्यहेतुत्वमप्यावश्यकम्, **"यद्विशेषयोः कार्यकारणभावः बाधकं विना तत्सामान्ययोरपीति"** न्यायात्, सामान्यकारणतानभ्युपगमेपि विशेषकारणतायां व्यभिचारवारणायैव निर्विकल्पकस्वीकारस्यावश्यकत्वादिति। तदसत्। प्रमात्वभ्रमत्वयोरर्थसमाजग्रस्ततया तदवच्छिन्नयोर्गुणदोषहेतुताया एवाऽसिद्धेः। अस्तु वा तादृशगुणदोषयोर्हेतुता, तथापि निर्विकल्पकाऽसिद्धिः, स्वविषयतत्तद्धर्मवत्त्व, स्वविषयतत्तद्धर्माभाववत्त्वरूपविषयनिष्ठप्रत्यासत्त्या एव तयोस्तद्धर्मप्रकारकप्रमाभ्रमोत्पत्तिज्ञानत्वेन हेतुताया उपगन्तव्यतया पुरुषान्तरीयात्, नैयायिकानामन्तत ईश्वरीयात्तद्धर्मप्रकारकज्ञानादेव प्राथमिकप्रमाभ्रमयोरुत्पादसंभवात्। यत्तु पृथिव्यां जलभेद इत्याकारकसाध्यविशेष्यकानुमितेः साध्यप्रकारकत्ववारणाय विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वमावश्यकम्। तदसत्। तदर्थं अनुमितित्वावच्छिन्नं प्रति विशेषणज्ञानहेतुतायाः कल्पयितुमुचितत्वान्निर्विकल्पकाऽसिद्धिः। वस्तुतस्तु अनुमितावपि विशेषणज्ञानहेतुत्वं निर्युक्तिकमेव, जलभेदत्वावच्छिन्नप्रकारिकाया अनुमितेर्जलभेदत्वादिविशिष्टवैशिष्ट्यावगाहितया तत्र च विशेषणतावच्छेदकप्रकारकज्ञानमुद्रया जलभेदत्वादिप्रकारकज्ञानस्य हेतुत्वात्तादृशकारणविरहादेव दर्शितसाध्यविशेष्यकानुमिति काले साध्यप्रकारकानुमित्यापादनाऽसंभवात्। न च यत्र जलभेदत्वेन घटाद्यवगाहिज्ञानं वर्तते तत्र विशेषणतावच्छेदकप्रकारकज्ञानसत्त्वात् पृथिवीजलादिभेदवतीत्याकारकानुमित्यापत्तिरिति वाच्यम्। इष्टत्वात्। न च यत्र

साध्यवत्ताज्ञानरूपप्रतिबन्धकसत्त्वात्, साध्यविशेष्यतयापि भानसंभवात्, एकविधपरामर्शाद् द्विविधविषयताशाल्यनुमितेरापत्तिः, तत्स्वीकारे चानुभवविरोध इति वाच्यम्। साध्यतावच्छेदकरूपेण यत्किंचिद्विषयकज्ञानस्यैव साध्यविशेष्यकानुमितिविरोधित्वोपगमात्, साध्यस्य विशेष्यतया भानाऽसंभवादित्याहुः।

अत्र न्यायमतानुयायिनः—सामान्यतस्तत्प्रकारकबुद्धौ तद्ज्ञानं हेतुः, स्वरूपतस्तद्विशिष्टबुद्धौ तद्विषयकज्ञानत्वेन हेतुत्वमावश्यकम्, तथाहि जातिमानित्याकारकघटत्वादिप्रकारकज्ञानीयजातित्वावच्छिन्नघटत्वादिप्रकारतातो घट इति ज्ञानीयनिरवच्छिन्नघटत्वादिप्रकारतायां वैलक्षण्यं दुरपह्नवमेव, तादृशप्रकारता च यदि तत्प्रकारकज्ञानसामग्रीनियम्या तदा केवलजातिमानित्याकारकघटत्वप्रकारकप्रत्यक्षापलापप्रसंगः, तस्यापि तादृशप्रकारताशालित्वे बाधकाभावात्। नाप्यसौ घटत्वाद्यंशे किंचित्प्रकारकज्ञानसामग्र्यसमवहिततादृशसामग्रीनियम्या तदा जातिमान्, घट इत्याकारकद्विविधघटत्वादिप्रकारताशालिज्ञानविलोपापत्तिप्रसंगात्। तस्मात्तादृशप्रकारता शालिबुद्धौ स्वरूपतो घटत्वादिविषयकज्ञानस्य हेतुतां स्वीकृत्य यदा जातित्वादिनैव घटत्वाद्युपस्थितिः, तदा जातिमानित्याकारकं ज्ञानम्, यदा स्वरूपतो घटत्वादिविषयकं घट इत्याकारकं सविकल्पकं ज्ञानं, यदा च घटत्वादौ जातित्वादिभानसामग्री स्वरूपतो घटत्वाद्युपस्थितिश्च वर्तते, तदा जातिमान् घटश्चेति ज्ञानमित्येतादृशविशिष्योपपादनीय इति निर्विकल्पकसिद्धिः।

अथ स्वरूपतो घटत्वाद्युपस्थितिरूपकारणस्य कदाचित्समवायेनैव स्वरूपतो घटत्वप्रकारकं कदाचित्संबन्धान्तरेणेति नियमप्रयोजकत्वाऽसंभवात्, अननुगतकालसंबन्धादिघटितसामग्रीणां तत्संबन्धावच्छिन्नतादृशप्रकारताविशेषनियामकत्वमवश्यं वाच्यम्, तथाच तादृशप्रकारतासामान्येपि तादृशसामग्र्येव नियामिका, विशेषातिरिक्तस्य सामान्यस्याप्रसिद्धेरित्यलं स्वरूपतो विशेषणज्ञानहेतुतयेति चेन्न।

स्वरूपतो घटत्वप्रकारकज्ञानसामान्याभावेऽनन्ततत्तद्विशेषसामग्र्यभावानां प्रयोजकत्वापेक्षया स्वरूपतो घटत्वोपस्थित्यभावस्यैकस्यैव तथात्वे लाघवात्तादृशविशेषणज्ञानहेतुताया आवश्यकत्वात्, अन्यथा सर्वत्र विशेषसामग्रीत एव सामंजस्ये सामान्यकार्यकारणभावविलोपप्रसंगात्। घट इत्याकारकज्ञाने नियमतोऽबाधितयावत्संबन्धेन घटत्वादीनां प्रकारतास्वीकारे क्षतिविरहादननुगतसामग्रीणां तत्तत्संबन्धावच्छिन्नप्रकारताशालिज्ञानोत्पादकनियामकताया अपि अनभ्युपगमाच्च।

अथ स्वरूपतो घटत्वादिविशिष्टबुद्धौ स्वरूपतो घटत्वादिज्ञानस्य हेतुत्वे यत्र घटत्वादिना सममिन्द्रियसन्निकर्षोत्पत्तिकाले जातित्वादिना घटत्वादिधर्मस्योपस्थितिरासीत् तत्र तादृशसन्निकर्षाद् घटत्वादिनिर्विकल्पकं न स्यात्, तदंशे जातित्वादिभासकसामग्रीसत्त्वादिति तत्र प्रहरावधिनिरीक्षमाणस्य पुंसो घट इत्याकारिका विशिष्टबुद्धिर्न स्यात् स्वरूपतो घटत्वविषयकज्ञानाभावादिति चेन्न।

तत्र जातित्वेन घटत्वज्ञाने फलानुरोधेन निरवच्छिन्नघटत्वविषयतामभ्युपगम्य तदुत्तरं तथाविधबुद्धिरुपपादनीया। न चैवं निरवच्छिन्नतद्विषयताशालिबुद्धौ

तद्विशेष्यकज्ञानसामग्र्याः प्रतिबन्धकत्वाऽसंभवात्तादृशघटत्वादिविषयताया जातित्वादिना घटत्वादिविषयकनिखिलज्ञानसाधारण्यप्रसंग इति वाच्यम्। अननुगतसामग्रीणामेव तथाविधविषयतानियामकत्वोपगमात्। न चैवं तादृशसामग्रीणां किंचिद्धर्मावच्छिन्नघटत्वादिप्रकारतानियामकत्वमास्तां, किमन्तरा निर्विकल्पकेनेति वाच्यम्। अनन्ताननुगतसामग्रीणां स्वरूपतस्तत्प्रकारताया नियामककल्पनापेक्षया स्वरूपतस्तद्विषयकज्ञानस्य तथात्वेन लाघवात्, निर्विकल्पसिद्धिरप्रत्यूहैव। तदीयाननुगतनियामककल्पनागौरवस्य च फलमुखत्वेनाऽदोषत्वात्। अथास्तु स्वरूपतो घटत्वादिप्रकारिकायां बुद्धौ स्वरूपतस्तद्ज्ञानत्वेन हेतुता—तथापि निर्विकल्पकासिद्धिः। यत्र निर्विकल्पकमंगीकरोषि तत्र स्वरूपतो घटत्वादिप्रकारकस्मरणमुपगम्यापि तदुत्तरं घटत्वविशिष्टानुभवत्वस्य शक्योपपादनत्वात्। तदीयाननुगतनियामककल्पनागौरवस्य फलमुखत्वेनादोषत्वात्। स्मरणे च विशेषणज्ञानस्यानपेक्षितत्वात्। न च तत्प्रकारकस्मरणं निर्विकल्पकं वेत्यत्राविशेष इति वाच्यम्। निर्विकल्पककल्पने तदीयविलक्षणविषयताकल्पनस्याधिक्यात्। न च स्मरणकल्पने च तज्जनकोद्बोधककल्पनाया आधिक्यमिति वाच्यम्। तत्पूर्ववर्त्तिक्लृप्तसन्निकर्षव्यक्तीनामेवोद्बोधकत्वस्वीकारात्। तद्व्यक्तीनां च निर्विकल्पकव्यक्तिं प्रति तद्व्यक्तेरन्यदापत्तिवारणाय तद्व्यक्तित्वेन हेतुताया भवन्मते कल्पनीयतया मन्मते स्मृतिं प्रति उद्बोधकविधया तद्व्यक्तित्वेन हेतुताकल्पनाया अप्यवाधिक्यात् इति चेन्न।

तत्र स्मृतिस्वीकारे तदधीनतदानीन्तनतत्समानविषयकसंस्कारव्यक्तीनां कल्पनाया आधिक्येन गौरवान्निर्विकल्पककल्पनाया एवोचितत्वात्। निर्विकल्पकस्य संस्कारजन्यतावच्छेदकानाक्रान्ततया तदधीनसंस्कारव्यक्तिकल्पनाधिक्यविरहात्। यादृशघटत्वादिबुद्धेः प्राक् कदाचिदपि तस्य पुंसस्तथाविधबुद्धिर्नासीत् तत्र संस्काराभावेन स्मरणासंभवान्निर्विकल्पकस्वीकारस्यावश्यकत्वात्। चैत्रत्वादिविशिष्टबुद्धिस्थले जन्मान्तरीयसंस्कारस्याप्यसंभवात्। घटचक्षुःसंयोगादिद्वितीयक्षणे घटत्वप्रकारकस्मरणस्वीकारे तदानीं घटादिचाक्षुषस्पार्शनाद्यापत्तिवारणात् तथाविधस्मृतिसामग्रीणां प्रतिबन्धकत्वकल्पनाधिक्यम्, स्मृतिसामग्रीणां चाननुगतोद्बोधकघटितत्वेनाननुगततयाऽन्यस्थलीयस्मृतिसामग्र्याः प्रतिबन्धकताया अनिर्वाहात्। तदानीं चाक्षुषनिर्विकल्पोपगमेऽनुगतचाक्षुषसामग्रीप्रतिबन्धकताया अन्यत्र क्लृप्ततयैवोपपत्तेर्न प्रतिबन्धकत्वकल्पनाधिक्यमिति निर्विकल्पकसिद्धिः।

यत्तु विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वोपगमे सुखाद्युत्पादानन्तरं सुखत्वादिविषयकनिर्विकल्पकमुत्पाद्यैवाऽहं सुखीत्यादिविशिष्टबुद्धिरुपपादनीया, तथाच तादृशनिर्विकल्पकेन सुखादिनाशात्कार्यकाले विषयविरहात्तादृशलौकिकप्रत्यक्षस्याऽसंभव एव। न च तत्र तदुत्तरोत्पन्नसुखविषयिण्येव तादृशविशिष्टबुद्धिरुत्पाद्यते इति वाच्यम्। यत्र सुखाद्यन्तरस्य सामग्री नास्ति तत्र तादृशयुक्त्यभावादिति।

तदसत्। विषयस्य कार्यसहभावेन प्रत्यक्षहेतुत्वानभ्युपगमात्, विनश्यदवस्थसुखमादायापि विशिष्टबुद्धिसंभवात्। तादृशनिर्विकल्पकोपनायकबलादुपनीत-

तच्च न प्रत्यक्षम्। तथाहि वैशिष्ट्यानवगाहि ज्ञानस्य प्रत्यक्षं न भवति, घटमहं जानामीति प्रत्ययात्, तत्राऽऽत्मनि ज्ञानं प्रकारीभूय भासते, ज्ञाने घटः, तत्र घटत्वम्, यः प्रकारः स एव विशेषणमित्युच्यते, विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते, विशेषणतावच्छेदप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणम्, निर्विकल्पके च घटत्वादिकं न प्रकारः, तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं ज्ञाने न संभवति, घटत्वाद्यप्रकारकं च घटादिविशिष्टज्ञानं न संभवति, जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानस्य किंचिद्धर्मप्रकारकत्वनियमात्।

तथाहि—(विशेषण-विशेष्य के) वैशिष्ट्य (सम्बन्ध) के अनवगाही ज्ञान का प्रत्यक्ष नहीं होता है। क्योंकि "घटमहं जानामि" इत्याकारक ज्ञान का प्रत्यक्ष होता है। घटमहंजानामि—इसका अर्थ है "घटज्ञानवानहम्" सो यहाँ अहं पद का वाच्य आत्मा है वही विशेष्य है—उस आत्मा में ज्ञान प्रकार (विशेषण) होकर भासता है। और ज्ञान में घट—घट में घटत्व विशेषण होकर भासता है। जो प्रकार होता है उसे ही विशेषण कहते हैं—विशेषण में जो विशेषण उसे विशेषणतावच्छेदक कहते हैं—विशेषणतावच्छेदक प्रकारकज्ञान विशिष्ट वैशिष्ट्यज्ञान में कारण होता है। निर्विकल्पक में घटत्वादि प्रकार नहीं होते हैं—इसलिये घटत्वादिविशिष्ट जो घटादि उन घटादि के वैशिष्ट्य (सम्बन्ध) का भान निर्विकल्पकज्ञान में नहीं होता है—क्योंकि बिना घटत्व को विशेषण माने घटादि विशिष्टज्ञान हो ही नहीं सकता है—कारण कि जाति अखण्डोपाधि से अतिरिक्त जो पदार्थ उस पदार्थ विषयक ज्ञान में कोई धर्म प्रकार (विशेषण) नियम से होता है।

भानात्मिकाया एव तादृशविशिष्टबुद्धेरुपगमात्, यत्र च सुखं साक्षात्कारोमीत्यनुव्यवसायोनुभवसिद्धस्तत्र तादृशसुखोत्पत्त्यव्यवहितप्राक्कालेऽगत्या सुखत्वादिप्रकारकस्मृतेरेवाभ्युपगमात्। अथ विशिष्टबुद्धिविशेषणज्ञानयोर्विषयभेदेन विभिन्नकार्यकारणभावस्वीकारात् सुखत्वादिविशिष्टबुद्धौ तद्ज्ञानहेतुतानभ्युपगमात् तत्र निर्विकल्पकमन्तरेणैव विशिष्टबुद्धिरुत्पाद्यते इति प्राहुः।

तच्चेति। निर्विकल्पकं चेत्यर्थः। **न प्रत्यक्षमिति**। अतीन्द्रियमित्यर्थः। अतीन्द्रियत्वं दर्शयति। **तथाहीत्यादिना**। ज्ञानस्य प्रत्यक्षं वैशिष्ट्यानवगाहि न भवतीत्यन्वयः। **इति प्रत्ययादिति**। इत्यनुव्यवसायादित्यर्थः। घटाद्यवगाहित्वेनैव ज्ञानप्रत्यक्षस्यानुभवसिद्धत्वादितिभावः। **तत्र**=घटमहंजानामीत्यनुव्यवसाये। अहं पदार्थ आत्मा विशेष्यः। **तेन**=घटत्वाद्यप्रकारकत्वेन। तथाच निर्विकल्पकं विशिष्टवैशिष्ट्यानवगाहि घटत्वाद्यप्रकारकत्वादिति। तथाच विषयतासंबन्धेन मानसत्वावच्छिन्नं प्रति तादात्म्यसंबन्धेन निष्प्रकारकज्ञानं निर्विशेष्यकज्ञानं निःसंसर्गकज्ञानं च विरोधीति भावः। अथ निष्प्रकारकज्ञानत्व-निर्विशेष्यकज्ञानत्व-

महत्वं षड्विधे हेतुः ।

महत्वमिति । द्रव्यप्रत्यक्षे महत्वं समवायसंबन्धेन कारणम् । द्रव्यसमवेतानां गुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसंबन्धेन, द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबन्धेन कारणमिति ।

"महत्त्वं षड्विधे हेतुः" महत्त्व (महतपरिणाम) छै प्रकार के प्रत्यक्ष (चाक्षुष-स्पार्शन रासन) इत्यादि में कारण है। इसलिये उसी द्रव्य का प्रत्यक्ष होता है जिसमें महत्त्व रहता है— परमाणु तथा द्वयणुक में महत्त्व न होने से उनका प्रत्यक्ष नहीं होता है। उसमें भी द्रव्य के प्रत्यक्ष में महत्त्व समवायसम्बन्ध से कारण है। और द्रव्य में जो समवेत (समवायसम्बन्ध से रहनेवाले) गुण–कर्म–तथा सामान्य हैं उनके प्रत्यक्ष में महत्त्व स्वाश्रयसमवायसम्बन्ध से कारण है। स्वपद से महत्त्व—उसका आश्रय द्रव्य—उस द्रव्य में समवायसम्बन्ध से गुण–कर्म-तथा सामान्य (दव्यत्व-सत्ता) रहते हैं—इस सम्बन्ध से महत्त्व द्रव्यसमवेत पदार्थों में भी रह गया—अतः उनका भी प्रत्यक्ष हो जाता है)। द्रव्य में समवेत, जो गुण आदि—उनमें समवेत जो गुणत्व आदि—उनके प्रत्यक्ष में महत्त्व स्वाश्रय-समवेत समवायसम्बन्ध से कारण है—स्व = महत्त्व—उसका आश्रय–द्रव्य–उसमें समवेत-गुणादि, उनमें समवाव सम्बन्ध से गुणत्व आदि रहे—इस सम्बन्ध से महत्त्व-गुणत्व–कर्मत्व आदि में है—अतः उनका भी प्रत्यक्ष होता है।

निःसंसर्गकज्ञानत्वैस्त्रिभिर्धर्मैर्मानसत्वावच्छिन्नं प्रति प्रतिबन्धकत्वत्रयकल्पनामपेक्ष्य तदैन्द्रियकत्वाभ्युपगमस्यैव युक्तत्वात् ।

न च निर्विकल्पकस्यैन्द्रियकत्वे तदनुव्यवसायापत्तिरिति वाच्यम् । यत्रादौ निर्विकल्पकं ततो विशिष्टबुद्धिः, तत्र विशिष्टबुद्ध्यनुव्यवसायोत्पत्तिकाले निर्विकल्पकस्याप्यनुव्यवसाये इष्टापत्तेः । तत्र घटं साक्षात्करोमीति विशिष्टप्रत्यक्षानुव्यवसाये निर्विकल्पकाभानस्य शपथमात्रनिर्णेयत्वात् । न चैवमपि यत्र विनश्यदवस्थेन्द्रियसन्निकर्षजन्यनिर्विकल्पकं ततो न विशिष्टप्रत्यक्षं, तत्रापि निर्विकल्पकस्यानुव्यवसायापत्तिर्दुर्वारैवेति वाच्यम् । विषयवैशिष्ट्याविषयकज्ञानादिप्रत्यक्षस्यालीकतया तत्र विषयभानसामग्रीविरहादेव निर्विकल्पकस्याप्यनुत्पादात् । निर्विकल्पकस्याऽप्रत्यासत्तितया विषयभासकसामग्रीविरहात्, विनश्यदवस्थेन्द्रियसन्निकर्षजन्यनिर्विकल्पके मानाभावाच्च । न च यत्र सुखत्वादिनिर्विकल्पकानन्तरं सुखत्वादिविशिष्टप्रत्यक्षोत्पत्तिसमये एव सुखादिनिर्विकल्पस्य साक्षात्कारापत्तिः, विषयभासकलौकिकसन्निकर्षसत्वादिति वाच्यम् । इष्टत्वात् । क्षणविलंबस्य शपथनिर्णेयत्वात् । सुखादिजनकज्ञानविषयीभूतचन्दनसंयोगादेरुपनयमर्यादया सुखसुखत्वादिनिर्विकल्पकेऽघटयंभावेन ज्ञानेच्छाद्वेषवत् सुखादेरपि सविकल्पकमात्रवेद्यत्वाच्च । विनश्यदवस्थज्ञानजन्यसुखादौ मानाभावात् । मैवम् । अयं घट इति प्राथमिकविशिष्टप्रत्यक्षानन्तरं घटत्वेनेमं साक्षात्करोमीत्यनुव्यवसायोत्पत्त्या तत्र निर्विकल्पकभानस्य

वक्तुमशक्यत्वात्। प्रकारित्वस्य तृतीयार्थत्वात्, विषयितासामान्यस्य तृतीयार्थत्वेऽनेन घटत्वं साक्षात्करोमि. समवायेनेदं साक्षात्करोमीत्यनुव्यवसायापत्तेः। अत एव मानसत्वावच्छिन्नं प्रति विनिगमनाविरहान्निष्प्रकारकज्ञानत्वादिना प्रतिबध्य-प्रतिबन्धकभावकल्पनापि न दोषाय प्रामाणिकत्वात्, अन्यथा गुरुत्वादेरप्यतीन्द्रियत्वविलोपापत्तेरिति संक्षेपः।

मूले-षड्विधे इति। षड्विधसाधारणप्रत्यक्षत्वावच्छिन्ने इत्यर्थः। तेन श्रावणत्वावच्छिन्ने महत्वस्य कारणत्वे प्रयोजनविरहेपि न क्षतिः। द्रव्यसमवेतप्रत्यक्षत्वादेस्यज्जन्यतावच्छेदकतया तस्य श्रावणादिसाधारण्यात्। श्रावणाद्यन्यत्वनिवेशे गौरवात् प्रयोजनाभावाच्चेति ध्येयम्।

लौकिकविषयतासंबन्धेन चाक्षुषं प्रति प्रत्यक्षं प्रति वा महत्त्वं कारणम्। अथात्र महत्वस्य कार्यतावच्छेदकं चाक्षुषत्वं प्रत्यक्षत्वं वा। अत्र केचित्। प्रत्यक्षत्वमेव कार्यतावच्छेदकम्, चाक्षुषत्वस्य कार्यतावच्छेदकत्वे परमाणुद्व्यणुकयोरपि स्पार्शनापत्तेः। उत्कर्षापकर्षत्वयोरनुगतयोरभावात्, त्रसरेणुमहत्वापकर्षविशेषाभाववन्महत्वत्वेनैव कारणत्वमभ्युपेयम्. तथाचापकर्षाभावमहत्वत्वयोर्विशेषण-विशेष्यभावे विनिगमनाविरहेण कार्यकारणभावद्वयापत्त्या तदपेक्ष्य तादृशापकर्षविशेषाश्रयमहत्वस्यैव द्रव्यस्पार्शनं प्रति प्रतिबन्धकताया युक्तत्वात्, अपकर्षविशेषावच्छिन्नप्रतियोगिताकाभावत्वेन कारणत्वे लाघवाच्च। न च प्रत्यक्षत्वस्य नित्यानित्यसाधारणतया कथं कार्यतावच्छेदकत्वमिति वाच्यम्। नित्यव्यावृत्ताऽगुरुधर्मेण कार्यतावच्छेदकत्वसंभवे एव तत्साधारणधर्मेण कार्यत्वकल्पनाया अनुदयात्। वस्तुतस्तु जन्यप्रत्यक्षत्वमेव कार्यतावच्छेदकम्। तच्च महत्वकार्यतावच्छेदकतया सिद्धो जातिविशेष इत्याहुः।

तच्चिन्त्यम्। अपकर्षविशेषावच्छिन्नप्रतियोगिताकाभावत्वेन कारणत्वे गौरवापत्त्या स्पार्शनसाक्षात्कारजनकतावच्छेदकतया त्रसरेणुमहत्वव्यावृत्ता निखिलनित्यानित्यमहत्ववृत्तिरेका जातिरेव कल्प्यते लाघवात्, तादृशमहत्वाभावादेव परमाणुद्व्यणुकयोः स्पाशनाऽसंभवादिति ध्येयम्। **द्रव्यप्रत्यक्षे इति।** द्रव्यवृत्तिलौकिकविषयतासंबन्धेन प्रत्यक्षत्वावच्छिन्नं प्रतीत्यर्थः। **द्रव्यसमवेतानामिति।** द्रव्यसमवेतवृत्तिलौकिकविषयतासंबन्धेन प्रत्यक्षत्वावच्छिन्नं प्रतीत्यर्थः। **स्वाश्रयसमवायसंबन्धेनेति।** महत्वं कारणमित्यन्वयः। स्वपदग्राह्यमहत्वाश्रयद्रव्यसमवायस्य गुणादौ सत्वात्सगतिः। **द्रव्यसमवेतसमवेतानामिति।** द्रव्यसमवेतसमवेतवृत्तिलौकिकविषयतासंबन्धेन प्रत्यक्षत्वावच्छिन्नं प्रतीत्यर्थः। **स्वाश्रयसमवेतसमवायसंबन्धेनेति।** स्वं महत्त्वं तदाश्रयो द्रव्यं तत्समवेतगुणादिसमवायस्य गुणत्वादौ सत्त्वात्समन्वयो बोध्यः। **आत्मादिवारणायेति।** आत्मादावतिव्याप्तिवारणायेत्यर्थः। आदिपदेन च धर्मसंग्रहः। कस्यचिन्मतेन धर्मणोपि सुषुप्त्यनुरोधाद्

इन्द्रियं कारणं मतम् । ५८

इन्द्रियमिति । अत्रापि "षड्विधे" इत्यनुषज्यते । इन्द्रियत्वं न जातिः, पृथिवीत्वादिना सांकर्यात्, किन्तु शब्देतरोद्भूतगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वम । आत्मादिवारणाय सत्यन्तम् । उद्भूतविशेषगुणस्य शब्दस्य श्रोत्रे सत्वाच्छब्देतरेति । विशेषगुणस्य रूपादेश्चक्षुरादावपि सत्त्वादुद्भूतेति । उद्भूतत्वं न जातिः, शुक्लत्वादिना

"इन्द्रियं करणं मतम्" यहाँ भी "षड्विध" इसका अनुषङ्ग कर लेना—अर्थात् छः प्रकार के प्रत्यक्ष में इन्द्रियकरण हैं। इन्द्रियत्व जाति नहीं है—क्योंकि पृथिवीत्व के साथ साङ्कर्य हो जायगा– [जैसे पृथिवीत्व को छोड़कर इन्द्रियत्व चक्षुरादि में है- इन्द्रियत्व को छोड़कर पृथिवीत्व घटादि में है—दोनों का समावेश घ्राणेन्द्रिय में है] किन्तु शब्द से इतर उद्भूत विशेषगुण के अनाश्रय को ज्ञान कारण जो मनःसंयोग– उसके आश्रय को इन्द्रिय कहते हैं। जैसे चक्षु शब्द से इतर उद्भूतविशेषगुण अनाश्रय है – क्योंकि चक्षु में कोई भी उद्भूतविशेषगुण नहीं है—और ज्ञान का कारण जो चक्षुः मनः संयोग–उसका आश्रय भी चक्षु है—अतः यह इन्द्रियमात्र का लक्षण बन गया। प्रश्न—सत्यन्त विशेषण क्यों दिया- केवल 'ज्ञानकारणमनः संयोगाश्रयत्व' इतना ही इन्द्रिय का लक्षण पर्याप्त होगा। उत्तर— आत्मा में अतिव्याप्तिवारणार्थं सत्यन्त विशेषण दिया-तथाहि-ज्ञान का कारण जो मनः संयोग आत्मा के साथ मन का संयोग उस संयोग का आश्रय आत्मा भी है—अतः सत्यन्त विशेषण दिया तो आत्मा शब्द से इतर उद्भूत विशेष गुण-ज्ञान-इच्छा-आदि का आश्रय ही है–अनाश्रय नहीं है। इसलिये "शब्देतरोद्भूत विशेषगुणानाश्रयत्वविशिष्टज्ञानकारणमनः संयोगाश्रयत्व" आत्मा में नहीं गया– अतः आत्मा में अतिव्याप्ति नहीं है। प्रश्न– "शब्देतर" विशेषण क्यों दिया - केवव उद्भूत विशेष गुणानाश्रयत्वेसति ज्ञानकारणमनः संयोगाश्रयत्व ही लक्षण उचित है। उत्तर—श्रोत्रेन्द्रिय में अ व्याप्ति हो जायगी—क्योंकि 'श्रोत्र' शब्दत्मक उद्भूत विशेष गुण का आश्रय ही है—अनाश्रय नहीं है—अतः यह लक्षण श्रोत्र में नहीं

ज्ञानकारणत्वात् । एतेन आत्मभिन्नत्वे सतीत्येव कथं नोक्तमित्यपि परास्तम् । सत्यन्तदाने च शब्देतरे ये उद्भूतविशेषगुणाः सुखादयस्तदाश्रयत्वस्यैवाऽऽत्मनि सत्वान्नातिव्याप्तिः । श्रोत्रे सत्वादिति । अन्यथा श्रोत्रेऽतिव्याप्तिः स्यादिति भावः । शब्दतरेत्यत्र शब्दपदं ज्ञानेच्छाकृतीनामुपलक्षकम् । अन्यथा नवीनमते ईश्वरस्यैव श्रोत्रेन्द्रियत्वोपगमाच्छ्रोत्रेऽव्याप्तिप्रसंगात । संयोगे उद्भूतत्वानुद्भूतत्वयोनांगीकारान्तत्रोद्भूतत्वं घटयति । उद्भूतत्वं न जातिरिति । संकरादिति । उद्भूतत्वं विहाय शुक्लत्वमनुद्भूतशुक्ले शुक्लत्वं विहायोद्भूतत्वमुद्भूतनीलादौ द्वयोः समावेश उद्भूतशुक्ले इति भावः । जनकत्वानुपपत्तेरिति । एकैकस्य कारणतावच्छेदकत्वे व्यभिचारात्, कूटस्यैकत्राऽवृत्तितया कारणतानवच्छेदकत्वादिति

संकरात्। न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यम्। उद्भूतरूपत्वादिना चाक्षुषादौ जनकत्वानुपपत्तेः। किन्तु शुक्लत्वादिव्याप्यं नानैवाऽनुद्भूतत्वं, तदभावकूटश्चोद्भूतत्वम्। तच्च संयोगादावप्यस्ति, तथाच शब्देतरोद्भूतगुणः संयोगादिश्चक्षुरादावप्यस्ति अतो विशेषेति। कालादिवारणाय विशेष्यदलम्। इन्द्रियावयवविषयसंयोगस्यापि प्राचां मते

जायेगा—स्व में स्व का लक्षण न जाने से अव्याप्ति दोष होता है। इसलिये 'शब्देतर' यह विशेषण दिया—देने से अव्याप्ति नहीं—क्योंकि शब्द से इतर जो उद्भूत विशेष गुण ज्ञान आदि उनका अनाश्रय भी श्रोत्र है और ज्ञान का कारण जो श्रोत्र के मनः संयोग उसका आश्रय भी श्रोत्र है—अतः इन्द्रिय का लक्षण इन्द्रिय (श्रोत्र) में चला गया। प्रश्न—उद्भूत यह क्यों दिया—शब्देतर विशेष गुणानाश्रयत्वे सति ज्ञानकारणमनः संयोगाश्रयत्व यही लक्षण कर दिया जाय। उत्तर—उद्भूत पद न देने पर चक्षुरिन्द्रिय में अव्याप्ति हो जायेगी—क्योंकि शब्द से इतर जो विशेषगुण रूप उसका आश्रय ही चक्षु है—अनाश्रय नहीं है—उद्भूतपद दिया तो चक्षु का रूप अनुद्भूत है—अतः तादृशउद्भूतविशेषगुणानाश्रयत्व चक्षु में होने से अव्याप्ति नहीं हुवी। प्रश्न—उद्भूतत्व क्या वस्तु है जाति है या उपाधि। उत्तर—उद्भूतत्व जाति नहीं है—क्योंकि सांकर्य है—शुक्लत्व को छोड़कर उद्भूतत्व उद्भूतरस में है उद्भूतत्व को छोड़कर शुक्लत्व अनुद्भूतशुक्ल में है—दोनों का एकत्र समावेश वस्त्र के उद्भूतशुक्लरूप में है। अब शंका यह है कि शुक्लत्वादिकाव्याप्य नाना ही उद्भूतत्व उपाधि मान लिया जाय तो क्या हानि है—इसका उत्तर दिया कि उद्भूतरूपत्वेन उद्भूतरूप को चाक्षुषप्रत्यक्ष के प्रति कारणता नहीं बनेगी। अतः शुक्लत्वादि का व्याप्य नाना अनुद्भूतत्व माना जाय—और अनुद्भूतत्वाभावकूट को उद्भूतत्व माना जाय—और वह उद्भूतत्व संयोगादि में भी है—अब यदि विशेषपद नहीं देंगे तो चक्षुरादि इन्द्रिय में अव्याप्ति हो जावेगी—क्योंकि शब्द से इतर जो उद्भूतगुण संयोगादि उनका आश्रय चक्षुरादि इन्द्रिय भी हैं—अनाश्रय नहीं हैं। विशेषपद दिया तो संयोगादि विशेषगुण नहीं हैं। ज्ञानकारणमनःसंयोगाश्रयत्व यह विशेष्यदल नहीं देंगे तो कालादि में अतिव्याप्ति हो जावेगी—क्योंकि कालादि में कोई भी विशेषगुण नहीं है—अतः शब्देतरोद्भूतविशेषगुणानाश्रयत्वरूपइन्द्रियत्वकालादि में चला गया।

भावः। तदभावकूटश्चोद्भूतत्वमिति। तथाच तादृशकूटस्यैकत्र वृत्तितया कारणतावच्छेदकत्वान्नोक्तदोष इति भावः। इन्द्रियावयववारणायेति। अस्य मनःपदमित्यनेनान्वयः। तथाचेन्द्रियावयवाऽर्थावयवयोः संयोगस्यापि प्राचांमते ज्ञानकरणतया तमादायेन्द्रियावयवेऽतिव्याप्तिवारणाय मनःपदमिति भावः। सन्निकर्षघटकतयेति। चक्षुःसंयुक्तविशेषणतारूपसन्निकर्षघटकतयेत्यर्थः। कालादेर्वारणायेति। कालादावतिव्याप्तिवारणायेत्यर्थः। न च घटाभावप्रत्यक्षे इति कथं नोक्तमिति वाच्यम्। काले यदि घटः स्यात्तदा समवायेन घटवत्तयोपलभ्येतेति

प्रत्यक्षजनकत्वादिन्द्रियावयववारणाय, नवीनमते कालादौ रूपाभावप्रत्यक्ष सन्निकर्षघटकतया कारणीभूतचक्षुःसंयोगाश्रयस्य कालादेर्वारणाय मनःपदम् । ज्ञानकारणमित्यपि तद्वारणायैव । करणमिति । असाधारणं कारणं करणम् । असाधारणत्वं व्यापारवत्वम् । ५८ ।

इसलिये कालादि में अतिव्याप्तिवारण के लिये ज्ञानकारणमनःसंयोगाश्रयत्व यह विशेष्यदल दिया–तो काल के साथ जो मनःसंयोग है वह ज्ञान का कारण नहीं है–(अपितु आत्मा के साथ मनःसंयोग–इन्द्रिय के साथ मनःसंयोग इत्यादि संयोग ही ज्ञान के कारण हैं) अतः काल में अतिव्याप्ति नहीं है। प्रश्न–मनःपद क्यों दिया। उत्तर–इस प्रश्न के प्राचीन-नवीन मतभेद से दो उत्तर किये हैं प्राचीनमत में चक्षुरिन्द्रियावयव और घट का संयोग घटप्रत्यक्ष में कारण होता है–अतः घटप्रत्यक्षात्मक ज्ञान का कारण जो चक्षुरिन्द्रियावयव तथा घटात्मक-विषय का संयोग उस संयोग का आश्रय चक्षुरिन्द्रियावयव भी है–और सत्यन्तदल भी चक्षु-रिन्द्रियावयव में है–अतः चक्षुरिन्द्रियावयव में अतिव्याप्तिवारणार्थ मनःपद दिया। देने पर ज्ञान का कारण मनःसंयोग इन्द्रियमनःसंयोग ही है–इन्द्रियावयवमनःसंयोग नहीं है अतः इन्द्रियवयव में अतिव्याप्ति नहीं है। नवीन मत में "कालोरूपाभाववान्" यह काल में रूपाभाव का प्रत्यक्ष चक्षुःसंयुक्तविशेषतासन्निकर्ष से होगा-क्योंकि चक्षुःसंयुक्त हुवा काल–उसमें विशेषणता 'रूपाभाव' की है। अतः कालो रूपाभाववान् इस प्रत्यक्ष में चक्षुःसंयुक्त विशेषणतासन्निकर्षकारण है-तब इस सन्निकर्ष के अन्तःपाती जो चक्षुःसंयोग वह भी कारण हुवा इसलिये तादृशचक्षुःसंयोगाश्रयत्व भी काल में है–और सत्यन्तदल भी काल में है–सो काल में अतिव्याप्तिवारणार्थ मनःपद दिया–देने पर यह अर्थ हुवा कि ज्ञान सामान्य का कारण जो मनःसंयोग–सो काल के साथ जो मनःसंयोग वह तो ज्ञानसामान्य का कारण नहीं है—जो मनःसंयोग ज्ञान का कारण है—जैसे आत्मा के साथ मनःसंयोग—इन्द्रिय के साथ मनःसंयोग आदि—तादृशसंयोगाश्रयत्व काल में नहीं है अतः काल में अतिव्याप्ति नहीं है। प्रश्न—'ज्ञानकारण' यह पद क्यों दिया। उत्तर—ज्ञानकारण न देने पर केवल "मनः-संयोगाश्रयत्व" इतना ही विशेष्य रहेगा—सो मनःसंयोग काल में है अतः मनःसंयोगाश्रयत्व काल में रहा—और सत्यन्तदल भी काल में है—सो काल में अतिव्याप्तिवारण के लिये "ज्ञानकारण" यह पद दिया। देने पर काल के साथ जो मनःसंयोग वह ज्ञान का कारण नहीं है—अतः काल में अतिव्याप्ति नहीं है। असाधारणकारण को करण कहते हैं। असाधारण नाम व्यापार वाले का है ॥५८॥ प्रकृत में व्यापार नाम है विषय के साथ इन्द्रिय-

---

आपत्ते कालस्यायोग्यतयाऽसंभवात्, काले यदि रूपं स्यात्तदा उपलभ्येतेति आपत्तिस्तु संभवति, नीरूपत्वेनैव कालस्याऽयोग्यतायाः संपादनीयतया रूपसत्वेऽयोग्यत्वानिर्वाहात्। तद्वारणायैवेति। कालमनःसंयोगमादाय काले अतिव्याप्ति-वारणायैवेत्यर्थः।

विषयेन्द्रियसंबन्धो व्यापारः सोपि षड्विधः ॥
द्रव्यग्रहस्तु संयोगात्, संयुक्तसमवायतः ॥५९॥
द्रव्येषुसमवेतानां, तथा तत्समवायतः ॥
तत्रापि समवेतानां, शब्दस्य समवायतः ॥६०॥
तद्वृत्तीनां समवेतसमवायेन ग्रहः ॥

विषयेन्द्रियेति। व्यापारः सन्निकर्षः। षड्विधं सन्निकर्षमुदाहरणद्वारा प्रदर्शयति। द्रव्यग्रह इति। द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यम्, द्रव्यसमवेतप्रत्यक्षमिन्द्रियसंयुक्तसमवायजन्यम्। एवमग्रेपि। वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम्। द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः कारणम्। द्रव्वसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः कारणम्। एवमन्यत्रापि विशिष्यैव कार्यकारणभावः।

सम्बन्धात्मकसन्निकर्ष का। वह सन्निकर्ष छः प्रकार का है उसे उदाहरण द्वारा दिखलाते हैं। घट-पट-आदि द्रव्य के चाक्षुषप्रत्यक्ष के प्रति चक्षुः का संयोगसन्निकर्ष कारण हैं। द्रव्य में समवेत (समवायसम्बन्ध से रहने वाले) गुण-कर्म के चाक्षुषप्रत्यक्ष के प्रति चक्षुःसंयुक्तसमवायसन्निकर्ष कारण है। द्रव्य में समवेत (गुणादि) उनमें समवेत (गुणत्व आदि) के चाक्षुषप्रत्यक्ष के प्रति चक्षुःसंयुक्तसमवेतसमवायसन्निकर्ष कारण है। इसी प्रकार अन्यत्र भी (त्वाचादिप्रत्यक्षस्थल में भी) विशेषरूप से अर्थात् प्रत्येक इन्द्रिय से होनेवाले प्रत्यक्ष का

ननु विषयेन्द्रियसंबन्धो व्यापार इत्यसंगतम्, शब्दश्रोत्रसंबन्धस्य समवायस्य नित्यतया तज्जन्यत्वे सति तज्जन्यजनकत्वरूपव्यापारत्वाऽसंभवादत आह। व्यापारः सन्निकर्ष इति। द्रव्यग्रहस्तु संयोगादित्यत्र ग्रहपदस्य ज्ञानमात्रार्थकत्वे द्रव्यविषयकानुमित्यादेरिन्द्रियसंयोगाजन्यत्वादव्याप्तिरतो ग्रहपदस्य प्रत्यक्षपरत्वं पंचम्या जन्यत्वार्थकत्वं चाह-इन्द्रियसंयोगजन्यमिति। तथाच द्रव्यवृत्तिलौकिकविषयतासंबन्धेन प्रत्यक्षं प्रतीन्द्रियसंयोगः समवायेन कारणमित्यर्थः। एवं द्रव्यसमवेतवृत्तिलौकिकविषयतासंबन्धेन प्रत्यक्षं प्रति इन्द्रियसंयुक्तसमवायः कारणम्। एवमग्रेपीति। द्रव्यसमवेतसमवेतवृत्तिलौकिकविषयतासंबन्धेन प्रत्यक्षं प्रतीन्द्रियसंयुक्तसमवेतसमवायः कारणमित्यर्थः। ननु द्रव्यप्रत्यक्षे इन्द्रियसंयोगत्वेन हेतुत्वे त्वक्प्रभासंयोगाच्चाक्षुषापत्तिः, एवमन्धकारे घटचक्षुःसंयोगात्स्पार्शनापत्तिश्चेत्यत आह। वस्तुतस्त्वति। द्रव्यचाक्षुषं प्रतीति। द्रव्यवृत्तिलौकिकविषयतासंबन्धेनेत्यादिः। एवमग्रेपि द्रव्यसमवेतवृत्तिलौकिकविषयतासंबन्धेनेत्यस्य द्रव्यसमवेतसमवेतवृत्तिलौकिकविषयतासंबन्धेनेत्यस्य चान्वयो बोध्यः।

परन्तु पृथिवीपरमाणुनीले नीलत्वं, पृथिवीपरमाणौ पृथिवीत्वं च चक्षुषा कथं न गृह्यते, तत्र परंपरयोद्भूतरूपसंबन्धस्य महत्वसंबन्धस्य च सत्वात्। तथाहि–नीलत्वं जातिरेकैव घटनीले परमाणुनीले च वर्तते, तथाच महत्वसंबन्धो घटनीलमादाय वर्तत्वे, उद्भूतरूपसंबन्धस्तूभयमादायैव वर्तते, एवं पृथिवीत्वेपि घटादिकमादाय महत्वसंबन्धो बोध्यः। एवं वायौ तदीय-

अलग-अलग कार्यकारणभाव समझना चाहिये। परन्तु अब विचारणीय यह है कि पृथिवी के परमाणुगत नील में नीलत्व का, एवं पृथ्वी के परमाणु में पृथिवीत्व का चाक्षुषप्रत्यक्ष क्यों नहीं होता है—(क्योंकि जिस वस्तु में उद्भूतरूप—तथा महत्त्व रहता है उस वस्तु के साथ चक्षुःसंयोग होने पर उसका चाक्षुषप्रत्यक्ष अवश्य होता है) सो वहाँ (नीलत्व में तथा पृथिवीत्व में) परम्परया (स्वाश्रयसमवेतसमवायसम्बन्ध से) उद्भूतरूप तथा महत्त्व विद्यमान है। तथाहि—नीलत्वजाति तो एक ही है—सो वह घट के नीलरूप में भी है—और परमाणु के नीलरूप में भी समवायसम्बन्ध से वर्तमान है—जैसे (महत्त्व घट में समवायसम्बन्ध से है—और घट का प्रत्यक्ष होता है—ऐसे ही महत्त्व स्वाश्रयसमवेतसमवायसम्बन्ध से नीलत्व में भी है—स्वपद से महत्त्व – उसका आश्रय घट—घट में समवेत नीलरूप—उस नील में समवाय सम्बन्ध से नीलत्व है—इस सम्बन्ध से महत्त्व नीलत्व में है। सो विषयतासम्बन्ध से नीलत्व-जाति में चाक्षुषप्रत्यक्ष है—और उस नीलत्वजाति में स्वाश्रयसमवेतसमवायसम्बन्ध से महत्त्व भी है अतः परमाणुगतनील में भी नीलत्वजाति का प्रत्यक्ष होना चाहिये। इस प्रकार महत्त्व का सम्बन्ध घट के नीलरूप को लेकर नीलत्व के साथ है—और उद्भूतरूप का सम्बन्ध नीलत्वजाति में उभय (घटनील-तथा परमाणुनील) इन दोनों को लेकर है। (उसमें घटनील को लेकर उद्भूतरूप का सम्बन्ध नीलत्व में महत्त्व की तरह पूर्ववत् समझ लेना—और परमाणुनील को लेकर इस प्रकार है कि—स्वपद से उद्भूतरूप–उसका आश्रय परमाणु–उसमें समवेत नीलरूप—उसमें समवायसम्बन्ध से नीलत्वजाति है—सो इस प्रकार परमाणु नील को लेकर उद्भूतरूप का भी सम्बन्ध नीलत्व में स्वाश्रयसमवेतसमवायसम्बन्ध से है। इसी प्रकार पृथिवीपरमाणु में जो पृथिवीत्वजाति है - उस पृथिवीत्व में भी घट आदि को लेकर महत्त्वसम्बन्ध जानना चाहिये -(अर्थात् पृथिवीपरमाणु में जो पृथिवीत्वजाति है वही घट में भी है—सो घटगत पृथिवीत्व में महत्त्व–और उद्भूतरूप स्वाश्रयसमवायसम्बन्ध से है—स्वपद से महत्त्व तथा उद्भूतरूप—इन दोनों का आश्रय घट-घट में समवायसम्बन्ध से पृथिवीत्व है-इस सम्बन्ध से महत्त्व तथा उद्भूतरूप घटादि को लेकर पृथिवीत्व में हैं–और वही पृथिवीत्व जाति पृथिवीपरमाणु में है–जब कि घट में उस पृथिवीत्वजाति का प्रत्यक्ष होता है तो पृथिवी-परमाणु में उस पृथिवीत्वजाति का प्रत्यक्ष क्यों नहीं होता है।

ननु विशिष्यैव कार्यकारणभावे आत्मप्रत्यक्षानुरोधेन मनःसंयोगस्य, ज्ञानादि-प्रत्यक्षानुरोधेन मनःसंयुक्तसमवायस्य प्रत्यासत्तित्वेपि चक्षुरादिसंयोग–तत्संयुक्तसम-वाययोः प्रत्यासत्तित्वे प्रमाणाभावः, चक्षुरादिसंयुक्तसमवेतसमवायेनैव त्र्यणुकादेश्चा-

स्पर्शादौ च सत्तायाश्चाक्षुषप्रत्यक्षं स्यात्। तस्मादुद्भूतरूपावच्छिन्नमहत्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य द्रव्यसमवेतप्रत्यक्षे, तादृशचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्यसमवेतसमवेतप्रत्यक्षे कारणत्वं वाच्यम्। इत्थं च परमाणुनीलादौ न नीलत्वादिग्रहः, परमाणौ चक्षुःसंयोगस्य महत्वावच्छिन्नत्वा-

एवं वायु में तथा वायु के स्पर्श में सत्ता का चाक्षुषप्रत्यक्ष क्यों नहीं होता है। क्योंकि सत्ता में भी स्वाश्रयसमवायसम्बन्ध से घटसत्ता को लेकर महत्त्व—एवं उद्भूतरूप है–स्वपद से महत्परिमाण तथा वायु उद्भूतरूप–इन दोनों का आश्रय घट–घट में समवायसम्बन्ध से सत्ता है–इस सम्बन्ध से महत्परिमाण तथा उद्भूतरूप ये दोनों सत्ता में हैं वही सत्ता वायु में तथा वायु के स्पर्श में भी है अतः जब कि घटवृत्ति सत्ता का चाक्षुषप्रत्यक्ष होता है तो वायु तथा वायुस्पर्शवृत्तिसत्ता का भी चाक्षुषप्रत्यक्ष क्यों नहीं होता है। इन सब प्रश्नों का उत्तर करते हैं कि द्रव्य में जो समवेत उनके चाक्षुषप्रत्यक्ष के प्रति—महत्त्वावच्छिन्न – उद्भूतरूपावच्छिन्न-जो चक्षुःसंयुक्त – तादृशचक्षुःसंयुक्तसमवायसन्निकर्ष कारण है। और द्रव्य में जो समवेत—उसमें जो समवेत—उनके चाक्षुषप्रत्यक्ष के प्रति महत्त्वावच्छिन्न—उद्भूतरूपावच्छिन्न जो चक्षुःसंयुक्त तादृशचक्षुःसंयुक्तसमवेतसमवायसन्निकर्ष कारण है। इस प्रकार परमाणुनील में नीलत्व के, पृथिवीपरमाणु में पृथिवीत्व के प्रत्यक्ष की आपत्ति नहीं लग सकती है—क्यों चक्षुःसंयुक्त जो परमाणु उसमें महत्त्व नहीं है—अतः महत्त्वावच्छिन्न जो चक्षुःसंयुक्त—तादृशचक्षुःसंयुक्तसमवेतसमवायसन्निकर्षरूप चाक्षुषप्रत्यक्ष का कारण परमाणुनीलगत नीलत्व में नहीं है अतः परमाणुनील में नीलत्व का चाक्षुषप्रत्यक्ष नहीं होता है। ऐसे ही पृथिवीपरमाणुगतपृथिवीत्व में भी महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायात्मकसन्निकर्षरूप कारण नहीं

क्षुषाद्युपत्तेरतआह। **परन्त्विति। परंपरया**=स्वाश्रयसमवेतसमवायेन। स्वं-उद्भूतरूपं तदाश्रयः परमाणुस्तत्समवेतसमवायस्य नीलत्वे सत्वात्। एवं स्वपदग्राह्यं महत्वं-तदाश्रयघटसमवेतसमवायरूपसंबन्धोपि बोध्यः। **उभयमादायेति।** घटमादाय परमाणुं चादायेत्यर्थः। **महत्वसंबन्ध इति।** स्वाश्रयसमवायरूप इत्यर्थः। **प्रत्यक्षं स्यादिति।** घटमादाय उद्भूतरूपसंबन्धस्य "स्वाश्रयसमवायस्य स्वाश्रयसमवेतसमवायस्य" च सत्वात्। महत्वसंबन्धस्य तूभयमादायैव सत्त्वादिति भावः। उद्भूतरूपावच्छिन्नेति महत्वावच्छिन्नेति च चक्षुःसंयुक्तपदार्थैकदेशे संयोगेऽन्वेति। तथा च महत्वावच्छिन्नचक्षुः संयुक्तसमवेतसमवायस्य त्रसरेणावभावात्तच्चाक्षुषानुपपत्तिरतः संयोगस्य प्रत्यासत्तित्वमावश्यकमिति। एवं च महत्वोद्भूतरूपयोर्न स्वातन्त्र्येण कारणत्वं किन्तु सन्निकर्षघटकतयेति ध्येयम्। संयुक्तसमवेतसमवायेन संयुक्तसमवायोपि नान्यथासिद्ध इत्याह। **द्रव्यसमवेतचाक्षुषे इति। तादृशेति।** महत्वावच्छिन्नेत्यर्थः। **तत्रा** वाय्वादौ। तथा च महत्वावच्छिन्नचक्षुःसंयुक्तसमवेतसमवायस्यापि प्रत्यासत्तित्वमावश्यकमिति भावः।

भावात्। एवं वाय्वादौ न सत्तादिचाक्षुषं, तत्र चक्षुःसंयोगस्योद्भूतरूपावच्छिन्नत्वाभावात्। एवं यत्र घटस्य पृष्ठावच्छेदेनाऽलोकसंयोगः, चक्षुःसंयोगस्त्वग्रावच्छेदेन तत्र घटप्रत्यक्षाभावादालोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगे विशेषणं देयम्।

है क्योंकि चक्षुःसंयुक्त जो परमाणु उसमें महत्त्व नहीं है—अतः पृथिवीपरमाणु नीलगतनीलत्व का प्रत्यक्ष नहीं होता है। ऐसे ही वायु में तथा वायु के स्पर्श में सत्ताजाति का प्रत्यक्ष नहीं होता है। क्योंकि वायु में चक्षुःसंयोग उद्भूतरूपावच्छिन्न नहीं है अर्थात् चक्षुःसंयुक्त जो वायु वह उद्भूतरूपावच्छिन्न नहीं है। एवं जहाँ (अन्धकार में घट रक्खा हुवा है) वहाँ घट के मध्य (उदर) प्रदेश में आलोक (प्रकाश) का संयोग है—और चक्षुःसंयोग घट के बाहरी हिस्से में है—वहाँ पर घट का प्रत्यक्ष नहीं होता है--(यह अन्वय व्यभिचार हुवा—क्योंकि कारणसामग्री सब मौजूद है परन्तु कार्य (प्रत्यक्ष) नहीं हो रहा है अतः) आलोकसंयोगावच्छिन्नत्व चक्षुःसंयोग में विशेषण दे देना चाहिये। (यहाँ अवच्छिन्नत्व का विशिष्ट = युक्त — यह अर्थ जानना) [सो जहाँ महत्त्वावच्छिन्न-उद्भूतरूपावच्छिन्न-आलोकसंयोगावच्छिन्न-चक्षुःसंयोग होगा उसी स्थल में द्रव्य का प्रत्यक्ष होगा—अर्थात् घट के जिस हिस्से में चक्षुःसंयोग हो उसी हिस्से में आलोकसंयोग भी होना चाहिये। प्रकृत में घट के बाहरी हिस्से में चक्षुःसंयोग रहते हुवे भी आलोकसंयोग वहाँ नहीं है, अतः एकदेशावच्छेदेन कारणसामग्री के न होने से कार्य (प्रत्यक्ष) भी नहीं होता है इसलिये व्यभिचार नहीं हुआ।]

अथ चक्षुः संयुक्तसमवाय-द्रव्यसमवेतचाक्षुषयोः केन रूपेण कार्यकारणभाव इति चेदत्र केचित्—लौकिकविषयतासंबन्धेन तत्पुरुषीयद्रव्यसमवेतचाक्षुषं प्रति स्वरूपसंबन्धेन तत्पुरुषीयचक्षुः संयुक्तसमवायः कारणम्। न च द्रव्यसमवेतचाक्षुषस्य समूहालंवनरूपस्य "रूपवान् घटः, रूपे रूपत्वं च" गुणकर्मवृत्तिजात्यादावपि सत्वाद् व्यभिचार इति वाच्यम्। द्रव्यसमवेतत्वविशिष्टचाक्षुषत्वस्य कार्यतावच्छेदकत्वात्, विशिष्टस्य द्रव्यसमवेते एवोत्पादात्। वस्तुतस्तु चाक्षुषत्वमेव कार्यतावच्छेदकम्, द्रव्यसमवेतत्व विशिष्टस्य लौकिकविषयत्वस्य कार्यतावच्छेदकसंबन्धत्वाच्च न क्वापि व्यभिचारः। न च तथापि परमाण्वादिवृत्तिरूपादेर्गगनादिवृत्त्येकत्वादेश्च तादृशसन्निकर्षेण चाक्षुषापत्तिर्दुर्वारैवेति वाच्यम्। द्रव्यसमवेतत्वविशिष्टलौकिकविषयतासंबन्धेन चाक्षुषं प्रति स्वाश्रयसमवेतत्वसंबन्धेन महत्वस्य, द्रव्यसमवेतत्वविशिष्टलौकिकविषयतासंबन्धेन चाक्षुषोत्पत्तौ स्वाश्रयसमवेतसमवेतत्वसंबन्धेनोद्भूतरूपस्य च हेतुत्वात्। महत्वस्य कार्यतावच्छेदकसंबन्धकोटौ "द्रव्यसमवेते" द्रव्यान्यत्वमपि विशेषणीयम् तेन त्रसरेणुचाक्षुषे न व्यभिचारः। न च तथापि परमाणौ गगने च सत्ताद्रव्यत्वयोश्चाक्षुषापत्तिः घटादिकमादायैव स्वाश्रयसमवेतत्व संबन्धेन महत्वोद्भूतरूपयोः सत्वादिति वाच्यम्। इष्टत्वात्। परमाणुगगनादिचक्षुः संयोगदशायां महत्वोद्भूतरूपवद्द्रव्यान्तरचक्षुः संयोगस्याप्याकश्यकतया, तदानी सत्ताद्रव्यत्वयो

श्चाक्षुषत्पादस्य सर्वसिद्धत्वात्। अत एव परमाणुगगनादिघटितसन्निकर्षजन्यत्वाभावस्य शपथनिर्णेयत्वादित्युक्तम्। न चैवं रूपेण कार्यकारणभावे घटादौ चक्षुःसंयोगविगमेपि तद्वृत्तिगुणादेश्चाक्षुषापत्तिः यदा कदाचिच्चक्षुः संयुक्ततयैव चक्षुः संयुक्तसमवायसंभवः, कारणतावच्छेदकपर्वसत्वस्य कार्योत्पत्तौ अनपेक्षितत्वादिति वाच्यम्। अत्र कारणतावच्छेदकविशिष्टस्यैव कारणस्य पूर्वसत्तायाः अपेक्षितत्वात्। वस्तुतस्तु तत्पुरुषीयचक्षुः संयोगत्वेनैव कारणत्वम्, स्वाश्रयसमवेतत्वं च कारणतावच्छेजकसंबन्धः, एवं च लाघवमपीत्याहुः। तच्चिन्त्यम्। स्वाश्रयसमवेतत्वसंबन्धेन महत्वोद्भूतरूपयोः पृथक् कार्यकारणभावद्वयकल्पने द्रव्यस्याऽतिरिक्तप्रतिबन्धकत्वकल्पने च गौरवात्।

साम्प्रदायिकास्तु तत्पुरुषीयचक्षुःसंयुक्तमहदुद्भूतरूपवत्समवायत्वेन महदुद्भूतरूपवत्स्वाश्रयसमवेतत्वसंबन्धेन तत्पुरुषीयचक्षुःसंयोगत्वेनैव कारणता तत्पुरुषीयचाक्षुषत्वेन कार्यता, महत्समवेतत्वविशिष्टलौकिकविषयत्वं च कार्यतावच्छेदकसंबन्धः। त्रसरेणुचाक्षुषे व्यभिचारवारणाय लघुतरमपि द्रव्यसमवेतत्वमपहाय महत्समवेतत्वस्य प्रवेशः। न च यत्र चक्षुःसंयुक्तकपाले कपाले चक्षुःसंयोगोत्पत्तिकाले वा घटोत्पत्तिस्तत्र घटोत्पत्तिद्वितीयक्षणे एव तद्घटे महत्समवेतत्वविशिष्टलौकिकविषयतासंबन्धेन चाक्षुषापत्तिः, चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवायलक्षणस्य सन्निकर्षस्य घटे पूर्वक्षणे सत्वात्, इष्टापत्तौ च द्रव्यचाक्षुषं प्रति चक्षुःसंयोगोद्भूतरूपादीनां कारणत्वस्य व्यभिचारप्रसंगादिति वाच्यम। चक्षुःसंयोगस्यातीन्द्रियतया कपाले चक्षुःसंयोगसत्वकाले घटोत्पत्तौ मानाभावात्। न चैवमेतत्कपाले घटो भविष्यतीति कपालवृत्तितया प्रागभावस्य लौकिकप्रत्यक्षानुपपत्तिः, घटोत्पत्तिक्षणे एव घटप्रागभावलौकिकप्रत्यक्षस्य प्राचीनैरुपगमात्, तदानीं च त्वया कपाले चक्षुःसंयोगानभ्युपगमादिति वाच्यम्। सन्निकर्षस्य कार्यसहवर्त्तित्वेनाऽहेतुतया सर्वत्र विनश्यदवस्थचक्षुःसंयोगेनैव घटाद्युत्पत्तिक्षणे तत्प्रागभावप्रत्यक्षसंभवात्। प्रागभावे तत्प्रत्यक्षे वा मानाभावाच्चेत्याहुः।

तच्चिन्त्यम्। अनन्तमहत्वानां कार्यतावच्छेदकसंबन्धघटकतया महागौरवात्।

अन्ये तु चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवायस्य महत्समवेतत्वविशिष्टलौकिकविषयत्वं न कार्यतावच्छेदकसंबन्धः, किन्तु द्रव्यान्यद्रव्यसमवेतत्वविशिष्टलौकिकविषयत्वम्। द्रव्यान्यत्वप्रवेशादेव न त्रसरेणुप्रत्यक्षे व्यभिचारः। नचैवं घटादौ द्रव्येपि तादृशलौकिकविषयतया चाक्षुषापत्तिः, चक्षुःसंयुक्तमहदुद्भूतरूपाणां त्रयाणां तत्समवायस्य तत्राप्यविशेषादिति वाच्यम्। द्रव्यान्यत्वविशिष्टलौकिकविषयतासंबन्धेन प्रत्यक्षोत्पत्तौ तादात्म्यसंबन्धेन द्रव्यस्यापि प्रतिबन्धकत्वात्। प्रागुक्तप्राचीनमतेपि तादृशप्रतिबध्यप्रतिबन्धकभावस्यावश्यकत्वात्। महत्वोद्भूतरूपयोः पृथक्कार्यकारणभावकल्पनं च तस्याधिकम्। अतएव कपाले चक्षुःसंयोगसत्वदशायां घटोत्पत्तावपि न क्षतिः, द्रव्यान्यत्वविशिष्टलौकिकविषयतासंबन्धेन

प्रत्यक्षोत्पत्तौ तादात्म्येन द्रव्यस्य प्रतिबन्धकत्वात्। अत्र चातिरिक्तप्रतिवध्यप्रतिबन्धकभावस्य फलमुखत्वात्। न च प्राचीनमतेऽनन्तमहत्ववदत्रापि द्रव्यान्यत्वस्य निखिलद्रव्यघटिततया कार्यतावच्छेदकसंबन्धे गौरवं तुल्यमेवेति वाच्यम्। अत्र द्रव्यान्यत्वस्य स्वावच्छिन्नप्रतियोगित्वसंबन्धेन द्रव्यत्ववद्भेदरूपतया द्रव्याघटितत्वादित्याहुः।

स्वतन्त्रास्तु द्रव्यान्यत्वमपि न प्रवेशनीयम्, गौरवात्, अतिरिक्तप्रतिवध्यप्रतिबन्धकभावकल्पनाप्रसंगाच्च। किन्तु द्रव्यत्वविशिष्टलौकिकविषयतामात्रं चक्षुःसंयुक्तमहत्वोद्भूतरूपवत्समवायस्य कार्यतावच्छेदसम्बन्धः। न चैवं त्रसरणौ व्यभिचार इति वाच्यम्। प्रतियोगित्वानुयोगित्वसाधारणविशेषणताविशेषस्यैव कारणतावच्छेदकसंबन्धतया तत्रापि चक्षुःसंयुक्तमहदुद्भूतरूपवान् त्रसरेणुरेव तन्निष्ठरूपादिसमवायस्यैवानुयोगितासंबन्धेन सत्वात्। न चैवं द्व्यणुकेपि द्रव्यसमवेतत्वविशिष्टलौकिकविषयतासंबन्धेन चाक्षुषापत्तिः, चक्षुः संयुक्तमहदुद्भूतरूपवान् त्रसरेणुस्तत्प्रतियोगिकस्यैव "समवायस्या" नुयोगितासंबन्धेन तत्र सत्वादिति वाच्यम्। चक्षुःसंयुक्तमहदुद्भूतरूपवदनुयोगिकत्वविशिष्टसमवायस्यैव प्रतियोगित्वानुयोगित्वसाधारणविशेषणताविशेषसामान्येन सन्निकर्षत्वात्। तथाच कारणतावच्छेदकविशिष्टस्य पूर्वं सत्तायाः कार्योत्पत्त्यप्रयोजकत्वनये तत्पुरुषीयसंयोगत्वेनैव कारणतावच्छेदकीभूतमहदुद्भूतरूपाश्रयानुयोगिकत्वविशिष्टसमवायाश्रयत्वं च तदवच्छेदकसंबन्धः प्रतियोगित्वानुयोगित्वसाधारणविशेषणताविशेष्यसामान्येनैवाश्रयत्वस्य संबन्धघटकतया त्रसरेणौ न व्यभिचारः। शेषं संप्रदायमतवदवसेयमिति माहुः।

ननु द्रव्यलौकिकचाक्षुषं प्रति चक्षुःसन्निकर्षः संयोगएवास्तु—किं द्रव्यान्यद्रव्यसमवेत-द्रव्यान्यद्रव्यसमवेतसमवेतयोर्लौकिकचाक्षुषं प्रति चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवाय-चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवेतसमवायोः सन्निकर्षत्वेन। न च विनिगमनाविरहः। द्रव्यचाक्षुषानुरोधेन चक्षुःसंयोगस्य सन्निकर्षत्वावश्यकत्वात्। लाघवाच्च। न चैवं निमीलितनयनस्यापि गुणादितत्समवेतजातेश्च चाक्षुषापत्तिः, चक्षुःसंयुक्तपरमाण्वादिनित्यरूपादेरपि चाक्षुषापत्तिश्चेति वाच्यम्। द्रव्याऽविषयकगुणादिचाक्षुषस्यालीकतया द्रव्यचाक्षुषसामग्रीविरहादेव तदापत्तिविरहादिति चेन्न।

चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवायस्याऽसन्निकर्षत्वे चक्षुःसंयुक्तघटादेश्चाक्षुषदशायां घटादिद्रव्यविषयकचाक्षुषस्यैव तद्वृत्तिगुणकर्मजातिष्विवाऽसन्निकृष्टपटादिवृत्तिगुणकर्मजातिषु, परमाण्वादिवृत्तिगुणकर्मजातिषु च लौकिकविषयतासंबन्धेनोत्पादापत्तेर्दुर्वारत्वात्। न चाश्रयाविषयकगुणादिचाक्षुषस्यालीकतया स्वाश्रयीभूतस्याऽसन्निकृष्टपटादेश्चाक्षुषसामग्रीविरहादेव तद्वृत्तिगुणादेर्न चाक्षुषमिति वाच्यम्। तावता पटवृत्तिगुणादिचाक्षुषत्वेनापत्त्यसंभवेपि तादृशपटवृत्तिगुणादौ लौकिकविषयतया चाक्षुषसामान्यापत्तेर्दुर्वारत्वात्। पटाविषयकस्यापि चाक्षुषस्य सत्वात्। एवं चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवेतसमवायस्याऽसन्निकर्षत्वे चक्षुःसं-

क्षघटादिचाक्षुषोत्पत्तिदशायां तादृशघटादिविषयकचाक्षुषस्येव गुणादितद्वृत्तिजातावित्राऽसन्निकृष्टद्रव्यवृत्तिगुणादिमात्रसमवेतजातौ परमाण्वादिवृत्तिगुणमात्रसमवेतजातौ च लौकिकविषयतासंबन्धेनोत्पादप्रसंगस्य दुर्वारत्वादिति सिद्धान्तानुयायिनः ।

इदमत्रावधेयम् । जातिलौकिकचाक्षुषं प्रति स्वविषयसमवेतत्वसंबन्धेनाऽऽश्रयलौकिकचाक्षुषमेव हेतु र्लाघवात्, न तु द्रव्यान्यद्रव्यसमवेत–द्रव्यान्यद्रव्यसमवेतसमवेतयोर्लौकिकचाक्षुषं प्रति चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवाय—चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवेतसमवाययोः सन्निकर्षयोर्हेतुत्वम् । तत्र तयोर्हेतुत्वे तद्बलेन द्रव्येपि द्रव्यान्यद्रव्यसमवेतविषयकचाक्षुषापत्तिवारणाय द्रव्यान्यद्रव्यविषयकप्रत्यक्षं प्रति द्रव्यभेदस्य, द्रव्यतन्मात्रवृत्तिजातिष्वपि द्रव्यान्यद्रव्यसमवेतविषयकचाक्षुषापत्तिवारणाय द्रव्यान्यद्रव्यसमवेतसमवेतविषयकप्रत्यक्षं प्रति समवेतत्वसंबन्धेन द्रव्यान्यस्य च हेतुत्वावश्यकतया गुरुतरकार्यकारणभावचतुष्टयकल्पनापत्तेः । गुरुत्वस्थितिस्थापकत्व-रसत्व-गन्धत्व-स्पर्शत्वानां तद्व्याप्यजातीनां चाक्षुषवारणाय समवेतत्वविशिष्टलौकिकविषयतासंबन्धेन चाक्षुषोत्पत्तिं प्रति तादात्म्यसंबन्धेन गुरुत्वान्य समवेतत्वादिना समवेतसम्बन्धेनगुरुत्वादिना वा कार्यकारणभावपंचकान्तरकल्पनापत्तेश्च । जाति चाक्षुषं प्रति स्वाश्रयचाक्षुषस्य हेतुत्वे चाश्रयचाक्षुषाभावादेव न तेषां चाक्षुषापत्तिः । केवलव्यक्तिविषयकनिर्विकल्पकानन्तरमेव जातिनिर्विकल्पकं ततो जातिविशिष्टप्रत्यक्षमित्यभ्युपगमाच्च, नाश्रयचाक्षुषस्य जातिचाक्षुषे व्यभिचारः । न तथापि चक्षुःसंयुक्तघटादेश्चाक्षुषोत्पत्तिदशायामसन्निकृष्टद्रव्यवृत्तिगुणकर्मस्वपि लौकिकविषयतासंबन्धेन चाक्षुषोत्पादवारणाय चक्षु । संयुक्तमहदुद्भूतरूपवत्समवायलक्षणस्य सन्निकर्षस्य कारणत्वमावश्यकम्, जातिचाक्षुषं प्रत्येवाश्रयचाक्षुषस्य हेतुत्वादिति वाच्यम् । व्यासज्यवृत्तिगुणचाक्षुषं प्रति स्वाश्रयसमवेतत्वसंबन्धेन चक्षुःसंयोगाभावस्य प्रतिबन्धकत्वमावश्यकम् तस्य हि प्रतिबध्यतावच्छेदकं न गुणचाक्षुषत्वम्, व्यासज्यवृत्तिगुणचाक्षुषत्वं वा, किन्तु गुणकर्मोभयसाधारणं द्रव्यान्यसचाक्षुषत्वमेव । यावदाश्रयचक्षुःसंयोगं विनापि द्रव्यस्य सत्तादिजातेश्चाक्षुषोदयात् तद्बहिर्भावः । द्रव्यान्यसत्वं च लाघवाच्चक्षुःसंयोगाभावप्रतिबध्यतावच्छेदकतया सिद्धो गुणकर्ममात्रवृत्तिजातिविशेषः । द्रव्यान्यसत्प्रत्यक्षं प्रति तादात्म्यसंबन्धेन द्रव्यान्यसत्वेनापि कारणतया निरुक्तप्रतिबन्धकाभावस्याऽविशिष्टत्वेपि द्रव्यजात्योरतीतानागतगुणकर्मणोर्वा न द्रव्यान्यसचाक्षुषापत्तिः । गुणचाक्षुषत्वादेः प्रतिबध्यतावच्छेदकत्वेपि निरुक्तप्रतिबन्धकाभावबलेन द्रव्यादौ गुणचाक्षुषाद्यापत्तिवारणाय गुणचाक्षुषादिकं प्रति गुणत्वादिना कारणत्वावश्यकत्वेन तुल्यत्वात् । न च द्रव्यान्यसच्चाक्षुषत्वस्य प्रतिबध्यतावच्छेदकत्वे यावदाश्रय चक्षुःसंयोगविरहदशायां संयोगद्वित्वादौ द्रव्यान्यसच्चाक्षुषौत्पत्त्यसंभवेपि चाक्षुषसामान्यापत्तिर्दुर्वारा, द्रव्यान्यसच्चाक्षुषातिरिक्तस्य जातिचाक्षुषस्यैव प्रसिद्धत्वादिति वाच्यम् । जातिप्रत्यक्षं प्रति जातित्वेनापि कारणत्वात् । गुणादिचाक्षुषत्वस्य प्रतिबध्यतावच्छेदकत्वेपि यावदाश्रयचक्षुःसंयो-

गविरहदशायां संयोगद्वित्वादौ चाक्षुषसामान्यापत्तिवारणाय गुणादिभिन्नविषयकचाक्षुषं प्रति गुणाद्विभेदस्य कारणत्वावश्यकतया तुल्यत्वात्। ननु तथापि चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवायलक्षणसन्निकर्षस्याहेतुत्वे चक्षुःसंयुक्तघटादेश्चाक्षुषोत्पत्तिदशायां चक्षुरसंयुक्तस्य चक्षुःसंयुक्तस्य वा परमाण्वादेः चक्षुः संयुक्तपिशाचादेश्च गुणकर्मणोरपि चाक्षुषापत्तिः, स्वाश्रयसमवेतत्वसंबन्धेन चक्षुःसंयोगाभावस्य प्रतिबन्धकस्याभावादिति वाच्यम्। द्रव्यान्यसचाक्षुषं प्रति महदुद्भूतरूपवत्समवायत्वेनापि कारणत्वात्। न चैवं किं लाघवम्, द्रव्यान्यद्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवायलक्षणसन्निकर्षस्य हेतुत्वाकल्पनेपि जातिचाक्षुषं प्रति स्वाश्रयचाक्षुषहेतुत्वस्य तत्स्यानाभिषिक्तस्य कल्पनात्, तथा च किं सिद्धान्तपरित्यागेनेति वाच्यम्। सिद्धान्तिनये कारणतावच्छेदकगौरवात्, उक्तयुक्त्या द्रव्यान्यविषयकप्रत्यक्षं प्रति द्रव्य भेदस्य द्रव्यान्यद्रव्यसमवेतसमवेतविषयकं प्रति समवेतत्वसंबन्धेन द्रव्यान्यस्य, समवेतत्वविशिष्टलौकिकविषयतासंबन्धेन चाक्षुषोत्पत्तिं प्रति समवेतत्वसंबन्धेन गुरुत्वान्यादीनां पञ्चानां च कारणत्वकल्पनावश्यकतया कार्यकारणभावसप्तकबुद्धिप्रसंगाच्च। वस्तुतस्तु द्रव्यान्यसचाक्षुषं प्रति महदुद्भूतरूपवत्समवायत्वेनापि कारणत्वं नोपेयम्। किन्तु जातिचाक्षुषं प्रति स्वविषयसमवेतत्वसंबन्धेन यावदाश्रयचाक्षुषस्य कारणत्वम्, तस्यैव कार्यतावच्छेदकं न जातिचाक्षुषत्वम्, किन्तु द्रव्यान्यद्रव्यसमवेतचाक्षुषत्वमतः परमाण्यादिसमवेतगुणकर्मणोर्न चाक्षुषापत्तिः, जातिचाक्षुषवद्रूपादीनां कर्मणां च चाक्षुषमपि नाश्रयचाक्षुषं विना। यद्वा व्यासज्यवृत्तिगुणचाक्षुषं प्रति स्वाश्रयसमवेतत्वसंबन्धेनाऽऽश्रयचाक्षुषाभावस्य प्रतिबन्धकत्वमावश्यकम्, तस्यैव प्रतिबध्यतावच्छेदकं न व्यासज्यवृत्तिगुणचाक्षुषत्वं-अपि तु सामान्यतो द्रव्यान्यचाक्षुषत्वमेवाऽतो न परमाण्वादिसमवेतगुणकर्मणोश्चाक्षुषापत्तिरिति विभावनीयम्।

आलोकसंयोगावच्छिन्नत्वमिति। आलोकत्वं च तेजस्त्वव्याप्यो जातिविशेषः। **चक्षुः संयोगे इति**। एतेन सामानाधिकरण्यसंबन्धेन संयोगे उद्भूतरूपावच्छिन्नत्व-महत्वावच्छिन्नत्वयोर्निवेशापेक्षया संयुक्ते एव समवायेन उद्भूतरूपावच्छिन्नत्वस्य महत्वावच्छिन्नत्वस्य च निवेशे लाघवमित्यपि निरस्तम्। विभिन्नवच्छेदेनाऽलोकचक्षुः संयोगाभ्यां मूलोक्तरीत्या चक्षुः संयोगे आलोकनिष्ठावच्छेदकतानिरूपकत्वस्य विवक्षणीयतया तत्रैव महत्वोद्भूतरूपवैशिष्ट्यं निवेशितम्, संयुक्ते विशेषणद्वयमिति स्वीकारे अर्धजरतीयन्यायापत्तेः।

यद्यपि द्रव्यचाक्षुषं प्रति नालोकसंयोगत्वेन हेतुतासंभवः, विनाप्यालोकसंयोगं विडालादेस्तमसि द्रव्यग्रहात्। न च विडालचक्षुरवच्छेदेनालोकान्तरं तत्रास्तीति वाच्यम्। तथा सति बिडालेनेव जनान्तरस्यापि तादृशालोकसंयोगदशायां तमःस्थितघटादेर्ग्रहणप्रसंगात्। तमःसाक्षात्कारानुरोधेन पुरुषान्तरचक्षुः संयोगस्यापि तदानीं सत्वस्य प्रागावेदितत्वात्। नापि मानुषीयद्रव्यचाक्षुषत्वावच्छिन्नं प्रति आलोकसंयोगत्वेन हेतुत्वम्, विनाप्यालोकसंयोगं साञ्जनचक्षुषां पुंसां तमसि

चाक्षुषोत्पादेन व्यभिचारात्। तथापि येषां कदापि अंजनसंयोगान्न चाक्षुषं, तत्पुरुषीयद्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येवाऽऽलोकसंयोगत्वेन हेतुत्वम्, यस्य पुरुषस्य सत्यञ्जनसंयोगे तमस्यपि द्रव्यचाक्षुषम्, तत्पुरुषीयद्रव्यचाक्षुषत्वावच्छिन्नं प्रति तत्पुरुषीयाञ्जनसंयोगाभावविशिष्टाऽऽलोकसंयोगाभावत्वेन प्रतिबन्धकत्वात्, तदवच्छिन्नाभावो हेतुः, स च विशिष्टाभावो विनाप्यालोकसंयोगमञ्जनसंयोगदशायां केवलालोकसंयोगदशायां चाऽस्तीत्यदोषः। बिडालादिचाक्षुषत्वावच्छिन्नं प्रति तु बिडालादिचक्षुः संयोगत्वेनैव हेतुत्वम्, नहि तत्राऽऽलोकाद्यपेक्षेति। अत्रेदं चिन्त्यते= चक्षुः संयोगस्याऽऽलोकसंयोगावच्छिन्नत्वं न तावदालोकसंयोगसमानाधिकरणत्वम्, विभिन्नावच्छेदेन चक्षुरालोकयोः संयोगसत्वेपि भित्यादिचाक्षुषापत्तितादवस्थ्यात् नापि स्वरूपसंबन्धविशेषो, मानाभावात। अन्यथा भूतलनिष्ठयोर्घटपटसंयोगयोरपि परस्परावच्छेद्यतापातात्। न च द्रव्यचाक्षुषजनकतावच्छेदकतयैव "चक्षुः संयोगस्याऽऽलोकसंयोगावच्छिन्नत्वरूपस्वरूपसंबन्धस्य सिद्धिः। कारणतावच्छेदकतया चक्षुः संयोगनिष्ठस्य कस्यचिद्धर्मस्य सिद्धावपि तत्रालोकसंयोगनिरूपितत्वासिद्धेः। न चालोकसंयोगावच्छेदकदेशावच्छिन्नचक्षुः संयोगत्वेन हेतुत्वम्, कारणतावच्छेदकस्य पूर्वसत्वापेक्षणात्, आलोकसंयोगस्यापि हेतुत्वाच्च, आलोकसंयोगावच्छिन्नचक्षुः संयोगत्वेनेव चक्षुः संयोगावच्छिन्नाऽऽलोकसंयोगत्वेनापि हेतुत्वसंभवात्" न तद्विगमे प्रत्यक्षमिति वाच्यम। यत्रैकस्यैव पटस्यार्ध तमसि अर्ध चालोके तदवच्छेदेन चक्षुःसंयोगेपि तत्पटप्रत्यक्षापत्तेः। आलोकसंयोगावच्छेदकीभूता या दीर्घतन्तुव्यक्तिस्तदवच्छेदेन तमसि तत्पटचक्षुः संयोगसत्वात्, न हि तत्तन्त्ववच्छेदेन तत्र पटे न चक्षुः संयोगो न वाऽऽलोकसंयोग इति शक्यते वक्तुम्, मानाभावात्।

तस्माद्विलक्षणचक्षुः संयोगत्वेनैव द्रव्यचाक्षुषं प्रति हेतुत्वम्। कारणतावच्छेदकतयैव तादृशवैलक्षण्यसिद्धेः, तच्च चाक्षुषोपधायकचक्षुः संयोगमात्रवृत्ति इति नातिप्रसंगः। न च यत्र विनश्यदवस्थालोकसयोगदशायां चक्षुः संयोगोत्पत्त्याऽऽलोकसंयोगनाशदशायां घटस्य प्रत्यक्षं तत्रोत्तरकालमालोकविगमेपि तत्र प्रत्यक्षापत्तेः, तादृशचक्षुःसंयोगस्यापि चाक्षुषप्रयोजकवैजात्यवत्वादिति वाच्यम्। क्षणमात्रमिष्टत्वात्।

यत्तु तत्पुरुषीयद्रव्यचाक्षुषं प्रति तत्पुरुषीयविलक्षणचक्षुः संयोगत्वेनेव विलक्षणाऽऽलोकसंयोगत्वेनापि हेतुत्वम्, विनिगमकाभावादिति। तन्न। किंचिदवयवावच्छेदेनाऽऽलोकसंयुक्तस्यैकेनेवापरेणापि ग्रहणापत्त्या पुरुषभेदेनाऽऽलोकसंयोगनिष्ठानामनन्तवैजात्यानां कल्पनागौरवस्यैव विनिगमकत्वात्। नन्वेवं द्रव्यचाक्षुषं प्रति उद्भूतरूपस्य हेतुत्वं न स्यात्, पिशाचादौ विलक्षणचक्षुः संयोगविरहादेव न चाक्षुषमित्यस्यापि वक्तुं शक्यत्वात्। न च तस्य विलक्षणसंयोगत्वेनैव हेतुत्वम्, न तु चक्षुःप्रतियोगिकविलक्षणसंयोगत्वेन, गौरवात, तथा च चक्षुषोपि चाक्षुषापत्तिः, तत्रापि विलक्षणसंयोगसत्वादिति वाच्यम्। हेत्वन्तरकल्पनामपेक्ष्य लाघवेन कॢप्तकारणभावस्य चक्षुः संयोगस्यैव चक्षुः प्रतियोगिकाविलक्षणसंयोगत्वेनैव हेतुत्वौचित्यादिति चेन्न।

एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणम्। द्रव्यसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवायः। द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः। अत्रापि महत्वावच्छिन्नत्वमुद्भूतस्पर्शावच्छिन्नत्वं च पूर्ववदेव बोध्यम्।

एवं गन्धप्रत्यक्षे घ्राणसंयुक्तसमवायः, गन्धसमवेतस्य घ्राणजप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः कारणम्।

रासनप्रत्यक्षे रसनासंयुक्तसमवायः, रससमवेतरासनप्रत्यक्षे रसनासंयुक्तसमवेतसमवायः कारणम्।

एवं द्रव्य का जहाँ त्वगिन्द्रिय के द्वारा स्पार्शन प्रत्यक्ष हुआ वहाँ त्वक्संयोग कारण है। एवं द्रव्य में समवेत जो स्पर्श उसके प्रत्यक्ष में त्वक्संयुक्त समवाय सन्निकर्ष कारण है। एवं द्रव्य में समवेत (स्पर्श) उसमें समवेत स्पर्शत्व आदि के प्रत्यक्ष में त्वक्संयुक्त समवेतसमवाय सन्निकर्ष कारण है। यहाँ (त्वक्संयोग में) भी महत्त्वावच्छिन्नत्व-उद्भूतस्पर्शावच्छिन्नत्व-चाक्षुष प्रत्यक्ष की तरह दे देना। ऐसे ही गन्ध के प्रत्यक्ष में घ्राणसंयुक्त समवाय सन्निकर्ष कारण है। गन्ध समवेत गन्धत्व के घ्राण से जायमान प्रत्यक्ष में घ्राणेन्द्रियसंयुक्तसमवेतसमवायसन्निकर्ष कारण है। इसी प्रकार रस के प्रत्यक्ष में रसना संयुक्तसमवायसन्निकर्ष कारण है। रस में समवेत (रसत्व) के रासन प्रत्यक्ष में रसनासंयुक्तसमवेतसमवाय सन्निकर्ष

द्रव्यवृत्त्यभावचाक्षुषं प्रति हि तादृशचक्षुः संयोगवद्विशेषणता एव प्रत्यासत्ति र्वाच्या। अन्यथा अन्धकारेपि चक्षुःसंयुक्तवाय्वादिविशेषणता प्रत्यासत्त्या वाय्वादौ रूपाभावचाक्षुषप्रसंगात्, एवं चाऽऽलोकसंयोगदशायां यथा वाय्वादौ रूपाभावप्रत्यक्षं तदा वाय्यादेरपि चाक्षुषापत्तिः, अभावप्रत्यक्षानुरोधेन तदानीं वाय्वादावपि विलक्षणसंयोगसत्वादतो द्रव्यचाक्षुषं प्रति उद्भूतरूपत्वेनापि हेतुत्वमावश्यकम् एवं परमाण्वादौ महत्वाभावप्रत्यक्षं प्रति चक्षुः संयुक्तविशेषणतायां द्रव्यचाक्षुषप्रयोजकस्य चक्षुः संयोगनिष्ठवैलक्षण्यस्यावश्यं प्रवेशः। अन्यथा तमस्यपि परमाणुचक्षुः संयोगेन महत्वाभावचाक्षुषप्रसंगात्। तथा च परमाणौ चक्षुः संयोगदशायां महत्वाभावस्येव परमाणोरपि चाक्षुषापत्तिः, अतो महत्वस्यापि चाक्षुषोपयोगित्वमावश्यकम् परमाणोरस्पार्शनत्वस्य मनसोऽमानसत्वस्य चोपपत्तये द्रव्यसाक्षात्कारसामान्यं प्रत्येव महत्वत्वेन हेतुत्वस्य वक्तव्यत्वाच्चेति संक्षेपः।

स्पार्शनप्रत्यक्षे त्वगिन्द्रियसन्निकर्षं दर्शयति=एवमिति। तथा च द्रव्यवृत्तिलौकिकविषयतासंबन्धेन स्पार्शनं प्रति त्वक्संयोगः कारणमित्यर्थः। एवं द्रव्यसमवेतवृत्तिलौकिकविषयतासंबन्धेन स्पार्शनं प्रति त्वक्संयुक्तसमवायः— द्रव्यसमवेतसमवेतवृत्तिलौकिकविषयतासंबन्धेन स्पार्शनं प्रति त्वक्संयुक्तसमवेतसमवायः कारणमित्यपि बोध्यम्। अत्रापि=स्पार्शनप्रत्यक्षेपि। त्वक्संयोगे इति शेषः।

शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः कारणम्। अत्र सर्वत्र प्रत्यक्षं लौकिकं बोध्यम्। वक्ष्यमाणमलौकिकप्रत्यक्षमिन्द्रियसंयोगादिकं विनापि संभवति।

एवमात्मप्रत्यक्षे मनःसंयोगः, आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः, आत्मसमवेतसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणम्।

कारण है। शब्द के प्रत्यक्ष में श्रोत्रावच्छिन्नसमवाय सन्निकर्ष कारण है। शब्द के प्रत्यक्ष में श्रोत्रावच्छिन्नसमवाय सन्निकर्ष कारण है। शब्द में समवेत (शब्दत्व) के श्रावण प्रत्यक्ष में श्रोत्रावच्छिन्नसमवेतसमवायसन्निकर्ष कारण है। इस प्रकरण में सब जगह प्रत्यक्षशब्द से अलौकिक प्रत्यक्ष का ही ग्रहण करना चाहिये। वक्ष्यमाण (आगे कहा जानेवाला) अलौकिक प्रत्यक्ष तो इन्द्रियसंयोगादि सम्बन्ध के बिना भी होता है। ऐसे ही आत्मा के प्रत्यक्ष में मनः-संयोग कारण है। आत्मा में समवेत (सुखादि) के मानस प्रत्यक्ष में मनः संयुक्तसमवायसन्निकर्ष कारण है। आत्मा में समवेत (सुखादि) सुखादि में समवेत (सुखत्वादि) के मानस-

---

पूर्ववदिति। चक्षुःसन्निकर्षइवेत्यर्थः। बोध्यमिति। अन्यथा परमाणुस्पर्शस्पार्शन प्रत्यक्षप्रभास्पर्शस्पार्शनप्रत्यक्षयोरापत्तेरिति भावः। एवमग्रेपि घ्राणसंयोगे रसनासंयोगे महत्त्वावच्छिन्नत्वं देयम्, अन्यथा परमाणुगन्धघ्राणजप्रत्यक्षतत्समवेतरसरासन प्रत्यक्षयोरापत्तेः। श्रोत्रावच्छिन्नसमवाय इति। केवलश्रोत्रानुयोगिक समवाय इत्यर्थः। महत्त्वावच्छिन्नत्व निवेशे प्रयोजनाभावा दिति भावः। न च तत्राऽवच्छिन्नत्वान्तनिवेशो व्यर्थः। केवलसमवायस्य सन्निकर्षत्वे श्रोत्रदेशेऽनुत्पन्नशब्दस्यापि श्रावणत्वापत्तेः। न च तादृशविशेषणेपि कथं तद्वारणम्, विशिष्टसमवायशुद्धसमवाययोरैक्यादिति वाच्यम्। कर्णविवरावच्छिन्नाकाशानुयोगिकत्वविशिष्टसमवायत्वेनैव संसर्गत्वात्। अत्र चेति। उक्तकार्यकारणभावे चेत्यर्थः। आत्मप्रत्यक्षे इति। लौकिकविषयतासंबन्धेन प्रत्यक्षे इत्यर्थः। अन्यथा कालिकसामानाधिकरण्यमात्रस्य प्रत्यासत्तित्वे संसारस्याऽनष्टतया सर्वदैवाऽवश्यं क्वचिन्मनःसंयोगसत्वेनाव्यावर्त्तकत्वात्, एवंरूपेण कार्यकारणभावानां व्यर्थतापत्तेः। अथ लौकिकविषयत्वस्य कार्यतावच्छेदकसंबन्धत्वे आत्ममानसस्य समूहालंबनरूपस्याऽऽसमवेतगुणादौ, आत्मसमवेतादिमानसस्य च समूहालंबनरूपस्याऽऽत्मादावपि लौकिकविषयतया सत्वेन व्यभिचारापत्तेरिति चेन्न। आत्मत्वविशिष्टविषयत्वात्मसमवेतत्वविशिष्टविषयत्वाऽऽत्मसमवेतसमवेतत्वविशिष्टविषयत्वसंबन्धैर्मानसोत्पत्ति प्रति यथाक्रममात्ममनःसंयोगा-ऽऽत्ममनःसंयुक्तसमवाया-ऽऽत्ममनःसंयुक्तसमवेतसमवायत्वेन विषयनिष्ठतया कार्यसहभावेन हेतुत्वमतो न व्यभिचारः, आत्मत्वविशिष्टविषयतासंबन्धेनाऽऽत्मभिन्ने मानसस्य बाधितत्वात्। आत्मत्वा-

दिविशिष्टमपहाय वस्तुगत्या आत्मादिनिष्ठत्वोपलक्षितविषयतैव कार्यतावच्छेदकसंबन्धो वाच्यः, नातो विशेषणविशेष्यभावभेदेन कार्यकारणभावभेदप्रसंगः। आत्मादिमानसोत्पत्तिदशायां गगनादितत्समवेतादावपि तादृशविषयतासंबन्धेन मानसोत्पत्तिवारणाय कारणतावच्छेदककोटावात्मत्वनिवेशः। समवाय्यसमवायिकारणयोर्विशेषणज्ञानादिरूपनिमित्तकारणस्य च समवायसंबन्धावच्छिन्नोत्पत्तिं प्रत्येव नियामकतया विषयतासंबन्धेनोत्पत्त्यतिप्रसंगस्य ततो वारणाऽसंभवात्। न चाऽऽत्मादिमानसोत्पत्तिदशायां गगनादौ मनःसंयोगे मानाभावः, देशान्तरेण समं संयोगोत्पत्तिदशायां सर्वेष्वेव विभुष्ववश्यं संयोगोत्पत्तिरिति नियमे मानाभावादिति वाच्यम्। तथासति गगनादीनां सर्वमूर्त्तसंयोगित्वव्याघातात्, अनन्तसंसारे सर्वदैवावश्यमात्मादिमानसोत्पत्तेः, खण्डप्रलयेपि ब्रह्माण्डान्तरे मानसोत्पत्तेः। अत एवाऽऽत्मत्वजातिरपि प्रामाणिकी, सन्निकर्षनिष्ठकारणतावच्छेदकतयैव तत्सिद्धेः। आत्ममनःसंयोगनाशोत्पत्तिक्षणे आत्मादिमानसवारणाय कार्यसहभावनिवेशः। सामान्यतो द्रव्यलौकिकप्रत्यक्षं प्रति महत्वस्य कारणतया च मनसि आत्ममनःसंयोगसत्वेपि न तादृशविषयतया मानसोत्पादः। न च तथापि यदात्मतत्समवेतज्ञानादेः कुतो न परस्य प्रत्यक्षमिति वाच्यम्। तत्पुरुषीयमानसत्वस्य कार्यतावच्छेदकतया तदापादनाऽसंभवात्। अथ सामान्यतः आत्ममनःसंयोगत्वादिना कारणत्वे आत्ममनःपूर्वसंयोगनाशोत्पत्तिक्षणे तदुत्तरं आत्ममनःसंयोगान्तरोत्पत्तिक्षणे च आत्मतत्समवेतादौ तादृशविषयतया मानसोत्पादापत्तिः, आत्मनो विभुतया तदानीमपि आत्मनि पुरुषान्तरीयमनःसंयोगसत्वात्, स्वकीययोरात्ममनसोः संयोगस्य कार्यसहभावेनाऽसमवायिकारणस्य समवायसंबन्धेनैवोत्पत्तिं प्रत्येव नियामकतया विषयतासंबन्धेनोत्पत्त्यतिप्रसंगस्य तदभावेन वारणाऽसंभवात्। न च समवायसंबन्धेनोत्पत्तिं विना विषयतासंबन्धेनोत्पत्त्यसंभव इति वाच्यम्। परात्मन्येव समवायसंबन्धेनोत्पत्त्या विषयतासंबन्धेन स्वात्मन्युत्पादस्य सुवचत्वादिति चेन्न। स्वात्मनि कालान्तरे पुरुषान्तरीयमनःसंयोगसत्वेपि स्वीयमनःसंयोगनाशोत्पत्तिक्षणे पुरुषान्तरीयमनःसंयोगे मानाभावात्, विभूनां सर्वमूर्तसंयोगित्वनियमेपि देशान्तरेण समं संयोगनाशोत्पत्तिदशायां सर्वेष्वेव विभुषु अवश्यं संयोगोत्पत्तिरिति नियमे मानाभावादिति।

केचित्तु मानससाक्षात्कारजनकतावच्छेदकतया आत्मनिष्ठसंयोगेषु बहिर्द्रव्यनिष्ठसंयोगव्यावृत्तं परात्मनिष्ठसंयोगव्यावृत्तं च वैजात्यं कल्प्यते, तत्तदात्मभेदेनाऽनन्तकार्यकारणभावकल्पनामपेक्ष्य लाघवात्, तथाच सामान्यत एवाऽऽत्मनिष्ठलौकिकविषयत्वाऽऽ–त्मसमवेतनिष्ठलौकिकविषयत्वाऽऽ–त्मसमवेतसमवेतनिष्ठलौकिकविषयत्वसंबन्धेन मानसोत्पत्तिं प्रति यथाक्रमं विलक्षणसंयोगत्व-विलक्षण संयोगाश्रयात्मसमवायत्व - विलक्षणसंयोगाश्रयात्मसमवेतसमवायत्वेनैव कार्यसहभावेन हेतुत्वम्। सामान्यतो द्रव्यलौकिकप्रत्यक्षं प्रति महत्वस्य कारणतया च विलक्षणमनःसंयोगस्य मनस्यपि सत्वेपि आत्मनिष्ठलौकिकविषयतया न मानसोत्पत्तिप्रसंगः। मनःसमवेतस्य मनःसमवेतसमवेतस्य च मानसप्रत्यक्षवारणाय कारणतावच्छेदक-

कोटावात्मत्वप्रवेशः । विलक्षणसंयोगावच्छिन्नाधारत्व-विलक्षणसंयोगावच्छिन्नाधारतावत्समवेतत्व-विलक्षणसंयोगावच्छिन्नाधारतावत्समवेतसमवेतत्वसंबन्धेन मनस्त्वेनैव वा यथाक्रमं कार्यसहभावेन हेतुत्वम्। मनसि च मनसो नाधारतेति नोक्तातिप्रसंगः। अत एवात्मत्वजातेरनभ्युपगमेपि न क्षतिः। न च विलक्षणसंयोगावच्छिन्नाधारत्वादिसंबन्धेन मनस्त्वेन वा हेतुत्वम्, आत्मत्वेन वेत्यत्र विनिगमनाविरहः। आत्मनिष्ठवायुसंयोगे एव वैलक्षण्यस्य सुवचत्वात् इति वाच्यम्। वायुत्वेन हेतुत्वे जलत्वादिना विनिगमनाविरहापत्तेः। मनस्त्वेन कारणतायां चानेनैव मनसःसिद्धतया न जलत्वादिना विनिगमनाविरहः। आत्ममनसोर्विलक्षणसंयोगनाशोत्पत्तिसमये आत्मतत्समवेतादौ लौकिकविषयतया परकीयमानसापत्तिवारणाय कार्यसहभावप्रवेशः। इत्थं चाऽऽत्मादिमानसोत्पत्तिसमये तत्कालोत्पन्नमानसाविषयेषु मनःसंयुक्तपरात्मादिषु मनःसंयोगस्याविशेषेपि न लौकिकविषयतया मानसापत्तिः, मनःसंयोगनिष्ठवैलक्षण्यस्य फलबलकल्प्यतया परात्मनि तदानीं विलक्षणसंयोगविरहात्, तत्सत्वे तत्रापि तदानीं लौकिकविषयतया मानसोत्पादस्येष्टत्वादित्याहुः।

इदं पुनरिहावधेयम्। मानसप्रत्यक्षं प्रति आत्ममनःसंयोगात्ममनःसंयुक्तसमवायाऽऽत्ममनःसंयुक्तसमवेतसमवायानां सन्निकर्षाणां हेतुत्वे एव मानाभावः।

अथैवमात्मतत्समवेतादाविव बहिर्द्रव्यतत्समवेतादावपि न कुतो लौकिकविषतासंबन्धेन मानसोत्पत्तिः, समवायिकारणानां तत्तद्व्यक्तित्वेन कारणत्वस्य समवायसंबन्धेनोत्पत्तिं प्रत्येव नियामकतया विषयतासंबन्धेनोत्पत्तिं प्रति अतिप्रसंगस्य तेन वारणासंभवात्। न चाऽऽत्मतिष्ठलौकिकविषयत्वाऽऽत्मसमवेतनिष्ठलौकिकविषयत्वाऽऽत्मसमवेतसमवेतनिष्ठलौकिकविषयत्वसंबन्धेन मानसोत्पत्ति प्रति यथाक्रमं तादात्म्य-समवेतत्व-समवेतसमवेतत्वसंबन्धेनाऽऽत्मत्वेन कारणत्वान्नायमतिप्रसंग इति वाच्यम्। तथापि आत्मतत्समवेतादिषु लौकिकविषयतया मानसोत्पत्तिसमये तत्कालोत्पन्नमानसाविषयेष्वपि परात्मतत्समवेतादिषु लौकिकविषयतया मानससामान्यापत्तेर्दुर्वारत्वात्। आत्मत्वस्याविशेषात्। मानसेतरज्ञानसामग्र्यादेश्च समवायसंबन्धेन मानसोत्पत्तिं प्रत्येव प्रतिबन्धकत्वादिति चेन्न।

तदात्मनिष्ठलौकिकविषयत्व-तदात्मसमवेतनिष्ठलौकिक विषयत्व-तदात्मसमवेतसमवेतनिष्ठलौकिकविषयत्वसंबन्धेन मानसोत्पत्तिं प्रति यथाक्रमं तादात्म्य-समवेतत्व-समवेतसमवेतत्वसंबन्धेन तदात्मत्वेन कारणत्वात्। इत्थं चात्मादिमानसोत्पत्तिसमये तत्कालोत्पन्नमानसाविषयेषु परात्मादिषु न लौकिकविषयतया मानस सामान्यापत्तिः। सांप्रदायिकमते मनःसंयोगादिसन्निकर्षकारणत्वपक्षोरीत्या तस्य निरसनीयत्वात्।

इयांस्तु विशेषो यत्तत्र स्वीयमनःसंयोग-परकीयमनःसंयोगानादाय तदतिप्रसंगवारणम्, अत्र तु आत्मपरात्मानौ आदाय। न चैवमप्यात्मभेदेन कार्यकारणभावभेदस्याविशिष्टतया किमपराद्धं सांप्रदायिकोक्तरीत्या सन्निकर्षाणां कारणत्वेनेति वाच्यम्। सन्निकर्षाणां कारणत्वे कारणतावच्छेदकगौरवात्, मनःसंयुक्तसमवाय-

विशेषणतया तद्वदभावानां ग्रहोभवेत् ॥६१॥
यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ।
प्रत्यक्षं समवायस्य विशेषणतया भवेत् ॥६२॥

अभावप्रत्यक्षे समवायप्रत्यक्ष चेन्द्रियसंबद्धविशेषणता हेतुः । वैशेषिकमते तु समवायो न प्रत्यक्षः ।

अत्र यद्यपि विशेषणता नानाविधा—तथाहि—भूतलादौ घटाद्यभावः संयुक्तविशेषणतया गृह्यते । संख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया,

प्रत्यक्ष में मनः संयुक्त समवेत समवाय सन्निकर्ष कारण है । अभाव के प्रत्यक्ष में और समवाय के प्रत्यक्ष में इन्द्रियसंबद्धविशेषणतासन्निकर्ष कारण है (जैसे घटाभाववद् भूतलम्" यहाँ पर चक्षुरिन्द्रियसम्बद्ध हुवा भूतल-उसमें विशेषणता घटाभाव को है—ऐसे ही "घटत्वसमवान् घटः" यहाँ पर चक्षुरिन्द्रियसम्वद्ध हुवा घट-उसमें विशेषण समवाय है—अतः विशेषणता समवाय को है।

वैशेषिकों के मत में समवाय का प्रत्यक्ष नहीं होता है । यहाँ यद्यपि विशेषणता नाना प्रकार की है—तथाहि-जैसे "घटाभाववद्भूतलम्" इत्याकारक जो भूतलादि में घटाभाव का प्रत्यक्ष चक्षुःसंयुक्तविशेषणतासन्निकर्ष से होता है । (चक्षुःसंयुक्त हुवा भूतलादि-उसमें विशेषणता घटाभाव को है) संख्या आदि में रूपादि के अभाव का प्रत्यक्ष संयुक्तसमवेत विशेषणता-

---

मनःसंयुक्तसमवेतसमवाययोः कार्यतावच्छेदके तत्तत्पुरुषीयत्वस्य प्रवेशेन तयोः कार्यतावच्छेदकगौरवाच्च । न च तथापि तत्तदात्मभेदेनान्तकार्यकारणभावकल्पनामपेक्ष्योक्तरीत्या मनःसंयोगनिष्ठवैजात्येन सन्निकर्षहेतुतैव लघीयसीति वाच्यम् । फलमुखगौरवस्यापि दोषतया मनःसंयोगनिष्ठवैजात्येन सन्निकर्षकारणताया निराकृतत्वात् । फलमुखगौरवस्यापि दोषत्वेन मनः संयोगादिसन्निकर्षाणां मानसप्रत्यक्षजनकत्वे मानाभावः, तस्याऽदोषत्वे तु मनःसंयोगनिष्ठवैजात्येन मनःसंयोगादिसन्निकर्षाणामेव तत्र हेतुत्वमिति दिक् । विशेषणतासन्निकर्षस्योदाहरणं दर्शयति । **अभावप्रत्यक्षे इति** । यद्यपि समवायप्रत्यक्षे अभावप्रत्यक्षे चेत्येव वक्तुमुचितम्, क्रमिकत्वात्, तथापि अभावप्रत्यक्षस्य सर्वमतसिद्धतया तस्यैव प्रथमोपादानम् । **इन्द्रियसंबद्धविशेषणतेति** । यद्यपि इन्द्रियसंयुक्तविशेषणता-इन्द्रियसंयुक्तसमवेतविशेषणतेत्यादिक्रमेण विशेषणतावाहुल्यम्, तथापि विशेषणतात्वमनुगतम्, तैनेकरूपेण विभागः । विशेषणता च न प्रकारतारूपा, अतो भूतले घटाभाव इत्यत्रापि विशेषणतैव सन्निकर्षः, नातः षड्विधत्वहानिरिति ध्येयम् । पृथिव्यां गन्धस्य समवायो न जले इति प्रतीत्या समवायस्य नानात्ववादिनव्यमतेऽतीन्द्रियवृत्तिसमवायस्याऽप्रत्यक्षत्वेपि योग्यवृत्तिसमवायस्य प्रत्यक्षत्वादाह । **वैशेषिकमते इति । समवायो न प्रत्यक्षइति** । संबन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वात्, समवायस्य चैकतया एकदा भाविभूतसकलाश्रयव्यक्तीनां ज्ञानाऽसंभवादिति भावः । न्याय-

संख्यात्वादौ रूपाद्यभावः संयुक्तसमवेतसमवेतविशेषणतया, शब्दाभावः केवल-श्रोत्रावच्छिन्नविशेषणतया, कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषण-तया, कत्वादौ घत्वाभावः श्रोत्रावच्छिन्नसमवेतसमवेतविशेषणतया, एवं कत्वावच्छिन्नाभावे गत्वाभावादिकं श्रोत्रावच्छिन्नविशेषणविशेषणतया, घटाभावादौ पटाभावः चक्षुःसंयुक्तविशेषणविशेषणतया, एवमन्यत्राप्यूह्यम्। तथापि विशेषणतात्वेन एकैव सा गण्यते, अन्यथा षोढा सन्निकर्ष इति प्राचां प्रवादो व्याहन्येतेति।

यदि स्यादिति। अत्राभावप्रत्यक्षे योग्यानुपलब्धिः कारणम्—तथाहि–भूतलादौ घटादिज्ञाने जाते घटाभावादिकं न ज्ञायते, तेनाऽभावोपलंभे प्रतियोग्युपलंभाभावः कारणम्।

सन्निकर्ष से होता है। (जैसे चक्षुःसंयुक्त हुवा भूतल–उसमें समवेत हुवी संख्या–उसमें विशेषणता रूपादि के अभाव को है) संख्यात्वादि में रूपाभाव का प्रत्यक्ष संयुक्तसमवेत समवेत विशेषता सन्निकर्ष से होता है। (जैसे चक्षुः संयुक्त हुवा भूतल–उसमें समवेत हुवी संख्या–उसमें समवेत है संख्यात्व–उसमें विशेषणता है रूपादि के अभाव को–क्योंकि रूपादि का अभाव संख्यात्व में विशेषण है) शब्दाभाव का प्रत्यक्ष श्रोत्रावक्छिन्नविशेषणतासन्निकर्ष से होता है—अर्थात् श्रोत्र से अवच्छिन्ना कही जाती है। 'क' आदि शब्दों में खत्व आदि के अभाव का प्रत्यक्ष श्रोत्रावच्छिन्न समवेत विशेषणतासन्निकर्ष से होता है। (क्योंकि श्रोत्रावच्छेदेन समवेत जो 'क' शब्द उसमें विशेषणता है खत्वाभाव को)। एवं कत्वावच्छिन्नाभाव में गत्वाभाव आदि का श्रोत्रावच्छिन्नविशेषणविशेषणतासन्निकर्ष से ग्रहण होता है। ऐसे ही घटाभाव में पटाभाव चक्षुःसंयुक्तविशेषणविशेषणतासन्निकर्ष से ग्रहण होता है–(क्योंकि चक्षुःसंयुक्त हुवा भूतल–उसमें विशेषण घटाभाव हुवा–और घटाभाव में विशेषण पटाभाध है–अतः घटाभाव निरूपित विशेषणता पटाभाव में है) इसी प्रकार अभावप्रत्यक्ष में स्थलानुसार और भी सम्बन्धों की कल्पना कर लेना। इसप्रकार विशेषणता यद्यपि अनेक प्रकार की है—तथापि विशेषणतात्वरूप से वह विशेषणता एक ही है—अन्यथा छः ही प्रकार का सन्निकर्ष है—यह प्राचीनों का (प्रवाद) कथन असंगत हो जावेगा।

"यदि स्यादुपलभ्येत" मीमांसकों (कुमारिलभट्ट) का कहना है कि "विशेषणतया तद्वद्-भावानां ग्रहोभवेत्" अर्थात् विशेषणतासन्निकर्ष से अभावों का प्रत्यक्ष होता यह नैयायिकों का का कहना सर्वथा असंगत है—क्योंकि अभाव का प्रत्यक्ष होता ही नहीं अतः अभाव प्रत्यक्ष के अनुरोध से विशेषणतासन्निकर्ष का स्वीकार व्यर्थ है। प्रश्न—समवाय के प्रत्यक्ष के लिये

मते तु संयोगप्रत्यक्षे एव यावदाश्रयप्रत्यक्षस्य हेतुत्वाङ्गीकारेण न समवायस्य प्रत्यक्ष-त्वानुपपत्तिः। एवं च तादृशकार्यकारणभावे मानाभावः। एतेन "तथासति" घटपटसंयोगवद्घटाकाशसंयोगप्रत्यक्षापत्तिरिति निरस्तम्।

तत्र योग्यताप्यपेक्षिता, सा च प्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकत्व-रूपा। तदर्थश्च प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्रसञ्जितः उपलम्भरूपः प्रतियोगी यस्य सोऽभावप्रत्यक्षे हेतुः। तथाहि—यत्राऽऽलोकसंयोगादिकं वर्तते, तत्र "यदि अत्र घटः स्यात्तर्हि उपलभ्येते" त्यापादयितुं शक्यते, तत्र

विशेषणता सन्निकर्ष का स्वीकार आवश्यक है। उत्तर—समवाय को हम पदार्थ ही नहीं मानते। प्रश्न-नैयायिक कहता है मीमांसक से कि फिर तुम्हारे यहाँ अभाव का ग्राहक प्रमाण कौन होगा—उत्तर—हम (मीमांसक) अभाव की प्रतीति का कारण अनुपलब्धि नामक प्रमाण को मानते हैं—और वह अभाव की प्रतीति प्रत्यक्षात्मिका नहीं होती है—अपितु परोक्षात्मिका नहीं होती है। नैयायिक लोगों का कहना है कि हमारे यहाँ तो अभाव का प्रत्यक्ष ही होता है—और समवाय को भी हम पदार्थ मानके हैं अतः इन दोनों के प्रत्यक्ष के अनुरोध से विशेषणता सन्निकर्ष मानना आवश्यक है—उसमें भी हम अभावप्रत्यक्ष में अनुपलब्धि को सहकारी कारण मानसे हैं और अभाव का प्रत्यक्ष तो विशेषणतासन्निकर्ष से ही होता है-इसी अभिप्राय से "यदि स्यादुपलभ्येत" इस कारिका की व्याख्या करते हैं।

यह विषय संस्कृत टीका में स्पष्ट किया है। यहाँ (इन्द्रिय तथा विशेषणतासन्निकर्षजन्य) अभावप्रत्यक्ष में योग्यतानुपलब्धि सहकारी कारण है। तथाहि—भूतल आदि (अधिकरण) में घट आदि का प्रत्यक्षात्मक ज्ञान होने पर घटाभाव आदि का प्रत्यक्ष नहीं होता है। इससे यह सिद्ध हुवा कि अभाव के उपलंभ (प्रत्यक्ष) में प्रतियोगी का उपलंभाभाव (उपलब्ध्यभाव) अर्थात् अनुपलब्धि (प्रत्यक्ष न होना) सहकारी कारण है। अर्थात् जहाँ प्रतियोगी का प्रत्यक्ष नहीं होगा—वहीं पर उसके अभाव का प्रत्यक्ष होता है। प्रश्न—प्रतियोगी का उपलंभाभाव यदि प्रतियोगी के अभाव प्रत्यक्ष में कारण है तो जलादि परमाणु में पृथिवीत्व का उपलंभ (प्रत्यक्ष) नहीं होता है सो वहाँ जलादिपरमाणु में पृथिवीत्वोपलंभा भाव है—अतः वहाँ पृथिवीत्वाभाव का प्रत्यक्ष होना चाहिये। उत्तर—वहाँ (प्रतियोग्युपलंभाभाव में) योग्यता भी अपेक्षित है अर्थात् योग्यताविशिष्ट जो प्रतियोग्युपलंभाभाव वही प्रतियोगी के अभावप्रत्यक्ष में कारण है। योग्यता को दिखलाते हैं—"सा च" इस ग्रंथ से—प्रतियोगी जो घट-पट आदि उनकी सत्त्व (सत्ता) का जो प्रसञ्जन (आरोप) 'यदि यहाँ घट (प्रतियोगी) होता' इत्याकारक आरोप—उस आरोप से आरोपित जो प्रतियोगी 'तो उसका उपलंभ (प्रत्यक्ष होता' इस आरोप का विषय घटोपलंभ (घटप्रत्यक्ष) रूप प्रतियोगी है ? और वह घटोपलंभ हैं प्रतियोगी जिसका—(घटोपलंभाभाव का) उस उपलंभाभाव में रहनेवाला जो तादृशप्रतियोगिकत्वात्मकधर्म—वही योग्यतापदार्थ है-तादृशयोग्यताविशिष्ट प्रतियोग्युपलंभाभाव प्रतियोगी के अभाव प्रत्यक्ष में कारण है। तथाहि—जहाँ आलोकसंयोगादिक हैं अर्थात् आलोकसंयोगावच्छिन्नमहत्त्वावच्छिन्नोद्भूत-

---

एवमन्यत्रापीति। अत्रेदं बोध्यम्। अभावस्तु विशेषणतया गृह्यते परन्तु अधिकरणैः सह इन्द्रियाणां पृथक् पृथक् संबन्धः उक्तदिशा कल्पनीय इति भावः ॥६१॥

अत्र मीमांसकाः "विशेषणतया तद्वदभावानां ग्रहो भवेदित्य"

घटाभावादिप्रत्यक्षं भवति। अन्धकारे तु नापादयितुं शक्यते, तेन घटाभावादेरन्धकारे न चाक्षुषप्रत्यक्षम्, स्पार्शनप्रत्यक्षं तु भवत्येव, आलोकसंयोगं विनापि स्पार्शनप्रत्यक्षस्याऽऽपादयितुं शक्यत्वात्। गुरुत्वादिकं यदयोग्यं तदभावस्तु न प्रत्यक्षः, तत्र गुरुत्वादिप्रत्यक्षस्याऽऽपादयितुमशक्यत्वात्। वायौ रूपाभावः, पाषाणे सौरभाभावः, गुड़े तिक्ताभावः, श्रोत्रे शब्दाभावः, आत्मनि सुखाभावः, एवमादयस्तत्तन्द्रियैर्गृह्यन्ते, तत्तत्प्रत्यक्षस्याऽऽपादयितुं

रूपावच्छिन्न चक्षुःसंयोग है वहाँ "यदि यहाँ घट होता तो उसकी उपलब्धि (प्रत्यक्ष) होता, ऐसा आपादन नहीं कर सकते हैं—अतः वहाँ घटाभाव का प्रत्यक्ष होता है। और अन्धकार में ऐसा आपादन नहीं कर सकते हैं—अतः अन्धकार में घटाभावादि का चाक्षुष प्रत्यक्ष नहीं नहीं होता है - स्पार्शनप्रत्यक्ष तो घटादि का अन्धकार में भी होता ही है—क्योंकि आलोकसंयोग के बिना भी घट के स्पार्शनप्रत्यक्ष का आपादन कर सकते हैं। गुरुत्व-धर्म-अधर्म आदि जो प्रत्यक्ष के अयोग्य हैं—उनके अभाव का भी प्रत्यक्ष नहीं होता है—क्योंकि "घटे यदि गुरुत्वं स्यात् तर्हि उपलभ्येत" अर्थात् घट में यदि गुरुत्व होता तो उसका प्रत्यक्ष होता—ऐसा आपादन नहीं हो सकता है—(कारण कि गुरुत्व स्वयं ही प्रत्यक्ष के अयोग्य है–अनुमेय होने से।

इसी प्रकार वायु में रूपाभाव का—पाषाण में सुगन्ध के अभाव का—गुड़ में तिक्तरस के अभाव का—श्रोत्र में शब्द के अभाव का—आत्मा में सुख के अभाव आदि का प्रत्यक्ष

संगतम्, अभावप्रत्यक्षे यदि प्रमाणं स्यात्तदनुरोधेन विशेषणतापि सन्निकर्षः स्यात्, इति तैर्विशेषणतासन्निकर्षो न स्वीक्रियते। न च समवायप्रत्यक्षानुरोधेन सः स्वीकर्तव्य इति वाच्यम्। तैः समवायानङ्गीकारात्। एवं च सन्निकर्षाभावादभावप्रत्यक्षान्यथानुपपत्त्याऽनुपलब्धिनामकं प्रमाणान्तरं स्वीक्रियते-अभावप्रतीतिरपि परोक्षैव स्वीक्रियते इति।

परन्तु विशेषणतायाः सन्निकर्षत्वस्वीकारेणैवाऽभावस्य प्रत्यक्षसंभवात्किमनुपलब्धेः प्रमाणान्तरत्वेनेति भावो नैयायिकानाम्। अनुपलब्धेरभावग्राहकत्वाभावे भूतलादौ घटवत्ताभ्रमदशायामपि घटाभावप्रत्यक्षापत्तिः, विशेषणतासन्निकर्षसत्वात्। न चाभावग्राहकसन्निकर्षसत्वेपि घटवत्तानिश्चयस्य प्रतिबन्धकत्वेन घटभ्रमदशायां न घटाभावप्रत्यक्षापत्तिरिति वाच्यम्। प्रतिबध्यतावच्छेदककोटौ लौकिकसन्निकर्षाजन्यत्वस्य निवेशनीयतया घटाभावप्रत्यक्षस्य लौकिकसन्निकर्षजन्यत्वेन प्रतिबध्यतावच्छेदकानाक्रान्तत्वादित्याशंकां अभावप्रत्यक्षे योग्यानुपलब्धेः सहकारिकारणत्वं स्वीकृत्य परिहरति। अत्रेति। कारणमिति। कारणमेवेत्यर्थः। न तु करणमिति यावत्। तथाचानुपलब्धिसहकृतेनेन्द्रियेणैवाऽभावप्रत्यक्षसंभवेऽनुपलंभप्रमित्यन्तरं तत्करणत्वेनाऽनुपलब्धिरूपप्रमाणं च न स्वीकार्यं गौरवादिति भावः। यद्यपि अनुपलब्धेः कारणत्वकल्पनं, विशेषणतासन्निकर्षकल्पनं, चापेक्ष्याऽनुपलब्धौ

शक्यत्वात्। संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता, अन्योन्याभावप्रत्यक्षे त्वधिकरणयोग्यताऽपेक्षिता। अतः स्तम्भादौ पिशाचादिभेदोपि चक्षुषा गृह्यते एव। एवं प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम्। तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षो वर्णितः ॥६२॥

(प्रत्यक्ष) उन-उन इन्द्रियों से होता है—जिन-जिन इन्द्रियों से उन-उन अभावों के उन-उन प्रतियोगियों का प्रत्यक्ष होता है) क्योंकि पूर्वोक्त उन-उन अभावों के प्रत्यक्ष का आपादन (आरोप) हो सकता है। (कारण कि इन अभावों के प्रति योगी जो रूपादि हैं उनके उपलंभाभाव में "प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्व" रूपयोग्यता है—अतः "वायौ यदि रूपंस्यात् तर्हि चक्षुषा उपलभ्येत" ऐसा आपादन हो सकता है) संसर्गाभाव के प्रत्यक्ष में प्रतियोगी की प्रत्यक्ष योग्यता अपेक्षित है। और अन्योन्याभाव के प्रत्यक्ष में तो अधिकरण की योग्यता अपेक्षित है—इसीलिये स्तंभ आदि (अधिकरण) में पिशाच आदि का भेद चक्षु से गृहीत होता है। (क्योंकि यहाँ पिशाच आदि प्रतियोगी में प्रत्यक्ष योग्यता नहीं हैं) ५८-५६-६०-६१-६२ ॥

प्रमाणत्वकल्पनमेवोचितम्, तथापि अनुपलब्धेर्व्यापाराभावेन व्यापारवत्कारणत्वघटितप्रमाणत्वाऽसंभवात्, अभावज्ञानस्याऽधिकरणाविषयकस्याऽननुभवेनाऽनुपलब्धिजन्याभावज्ञानेऽधिकरणभानानुपपत्तेश्चाभावज्ञानस्य प्रत्यक्षरूपताया एव स्वीकरणीयत्वात्, तथासति चाभावस्य विषयतयाऽधिकरणस्य च संयोगादिना, एकस्मिन्नेव ज्ञाने भानसंभवान्नानुपपत्तिरिति भावः। कारणत्वमेवोपपादयति तथाहीत्यादिना। घटादिज्ञाने = घटादिभ्रमे। अत्र = प्रतियोग्युपलंभाभावे। ननु घटादिसत्वं नोपलंभव्याप्यमन्धकारविशिष्टगृहे घटादिसत्वेपि उपलंभाभावादित्यत आह। तथाहीत्यादि। अत्र = अधिकरणे। शक्यते इति। तथाच केवलघटसत्वस्य उपलंभाव्याप्यत्वेपि आलोकसंयोगादिसमवहितस्य घटसत्वस्योपलंभव्याप्यत्वात्तादृशव्यापकताश्रयोपलंभस्याऽभावः कारणमिति भावः। रूपाभाव इति। चक्षुःसंयुक्तविशेषणतयेति शेषः। सौरभाभाव इति। घ्राणसंयुक्तविशेषणतयेति। शेषः। तिक्ताभाव इति। रसनासंयुक्तविशेषणतयेति शेषः। शब्दाभाव इति। श्रोत्रावच्छिन्नविशेषणतयेति शेषः। सुखाभाव इति। मनःसंयुक्तविशेषणतयेति शेषः। तत्तदिन्द्रियैः=क्रमेण चक्षुर्घ्राणरसनश्रोत्रमनोभिः। संसर्गाभावप्रत्यक्षे इति। तथाच अभावे योग्यमात्रप्रतियोगिकत्वं विवक्षितमिति भावः। अधिकरणयोग्यतेति। योग्याधिकरणवृत्तित्वमित्यर्थः। पिशाचादिभेदोपि=स्तंभःपिशाचभिन्न इति भेदोपीत्यर्थः ॥६२॥

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥६३॥

अलौकिकसन्निकर्षस्त्विदानीमुच्यते अलौकिकस्त्विति । व्यापारः-सन्निकर्षः । सामान्यलक्षण इति सामान्यं लक्षणं यस्येत्यर्थः । अत्र लक्षण-पदेन यदि स्वरूपमुच्यते, तदा सामान्यरूपा प्रत्यासत्तिरित्यर्थो लभ्यते । तच्चेन्द्रियसंबद्धविशेष्यकज्ञानप्रकारीभूतं बोध्यम् ।

इस प्रकार लौकिक-अलौकिक के भेद से प्रत्यक्ष दो प्रकार का है—उसमें से लौकिक प्रत्यक्ष में छः प्रकार के सन्निकर्ष का वर्णन कर दिया—अब अलौकिक सन्निकर्ष का वर्णन करते हैं—"अलौकिकस्तु व्यापारः" इत्यादि ग्रन्थ से । अलौकिक व्यापार (सन्निकर्ष) तीन प्रकार का कहा गया है—सामान्य लक्षण—ज्ञान लक्षण—योगज । व्यापार नाम सन्निकर्ष का है । सामान्य लक्षण शब्द का अर्थ है कि सामान्य-घटत्वादि जाति, और घटादि व्यक्ति, ये हैं लक्षण, अर्थात् स्वरूप—जिसका—इससे "सामान्यस्वरूपप्रत्यासत्ति, (सन्निकर्ष) रूप अर्थ का लाभ होता है । और वह सामान्य स्वरूप सम्बन्ध—इन्द्रिय सम्बद्ध विशेष्यक जो "अयं घटः" इत्यारक ज्ञान—उसमें प्रकारीभूत धर्म जानना चाहिये—(वह प्रकारीभूत धर्म-जातिरूप हो या व्यक्तिरूप होइत्यन्यदेतत्) अभिप्राय यह है कि पुरोवर्त्ती घट के साथ चक्षुःसंयोग होने के अनन्तर "घट घटत्वे" इत्याकारक निर्विकल्पक ज्ञान होता है उसके बाद "अयंघटः" इत्याकारक सविकल्पक ज्ञान होता है । यह ज्ञान घट को विशेष्यविधया और घटत्व को प्रकार (विशेषण) विधया विषय करता है । अतः इन्द्रिय सम्बद्ध विशेष्य (घट) का जो ज्ञान "अयंघटः" इत्याकारक ज्ञान—इसमें प्रकारीभूत सामान्य हुवा घटत्व—उस घटत्वरूप सामान्य लक्षणा सन्निकर्ष के द्वारा 'घटाः' इत्याकारक सकल घट विषयक अलौकिक प्रत्यक्ष होता है ।

प्रत्यक्षंद्विविधम्—लौकिकम्, अलौकिकं च । सन्निकर्षषट्कजन्यं लौकिकम् । तच्च व्याख्यातमेव । अलौकिकसन्निकर्षजन्यमलौकिकम् । अलौकिकसन्निकर्षमाह । मूले—**अलौकिकस्त्विति** । अवधारणार्थकस्तु शब्दः "त्रिविध" इत्युत्तरं योजनीयः । सामान्यलक्षणायाः सामान्यरूपत्वे जन्यत्वघटितव्यापारत्वाऽसंभवादाह । **व्यापारः—सन्निकर्ष इति** । सामान्यं च तल्लक्षणं चेति कर्मधारये सामान्यलक्षण-मित्येव स्यात्, तथा च पुंल्लिङ्गतया निर्देशोऽसंगत इत्यतोवहुव्रीहिमाह । **सामान्यं लक्षणं यस्येति** । यत्पदार्थश्चात्र सन्निकर्षः । लक्षणपदस्याऽर्थद्वयम् । स्वरूपम्—निरूपकं "विषयः" च । आद्ये-आह । **अत्रेति** । वहुव्रीहसमासे इत्यर्थः । घटकत्वं सप्तम्यर्थः । ननु धूमत्वादिरूपायाः सामान्यलक्षणाया चक्षुराद्यनिरूपितत्वात्कथं तत्र "चक्षुरादि" प्रत्यासत्तित्वमत आह । **तच्चेति** । तथाच न केवलं सामान्यं प्रत्यासत्तिः, किन्तु ईदृशप्रकारताविशिष्टसामान्यमेवेति भावः । ईदृशसामान्यस्य प्रत्यासत्तित्वस्वीकारे नोक्तदोष इत्याह । **तथाहीति** । यत्र यद्‌वा अस्य प्रकार-पदार्थेन सहान्वयः । तत्र—तादृशज्ञाने । निरूपितत्वं सप्तम्यर्थः । अन्वयश्चास्य

तथाहि-इन्द्रियसंबद्धो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं यत्र जातं, तत्र ज्ञाने धूमत्वं प्रकारः, तत्र धूमत्वेन रूपेण सन्निकर्षेण धूमा इत्येवरूपं सकलधूमविषयकं ज्ञानं जायते। अत्र यदीन्द्रियसंबद्धमित्येवोच्यते तदा धूलीपटले धूमत्वभ्रमानन्तरं सकलधूमविषयकं ज्ञानं न स्याद् धूमत्वेन सहेन्द्रियसंबन्धाभावात्।

उसी को तथाहि—से दिखलाते हैं—जहाँ इन्द्रिय संयुक्त (संबद्ध) धूम आदि हैं—वे धूम आदि हैं विशेष्य जिसमें ऐसा ज्ञान 'धूमः' यह ज्ञान है—इस ज्ञान में प्रकार धूमत्व है—उस धूमत्वरूप सामान्य लक्षणासन्निकर्ष के द्वारा "धूमाः" ऐसा सकलधूमविषयक अलौकिक प्रत्यक्ष होता है। प्रश्न—'इन्द्रियसम्बद्धविशेष्यक ज्ञानप्रकारीभूत सामान्य' यहाँ पर 'इन्द्रिय संबद्धवृत्तित्व ही क्यों नहीं कहा—लाघव होने से, क्योंकि जैसे तादृश ज्ञान प्रकारीभूत सामान्य धूमत्व आदि पड़ते हैं—वैसे ही इन्द्रिय सम्बद्ध धूम हुवा—उसमें धूमत्व वृत्ति है—अतः धूमत्वेन "धूमाः" यह सकल धूम विषयक ज्ञान हो जायेगा। उत्तर—जहाँ धूलीपटल के साथ इन्द्रिय सम्बन्ध हुवा—और उस धूलीपटल में धूमत्व का भ्रम हुआ—उसके बाद सकल धूम विषयक "धूमाः" यह ज्ञान होता है—परन्तु अब नहीं होगा—क्योंकि धूमत्व के साथ इन्द्रिय सम्बन्ध नहीं है—अर्थात् इन्द्रिय सम्बद्ध जो धूलीपटल उसमें वृत्ति धूमत्व नहीं है।

प्रकारपदार्थघटकप्रकारत्वेन सह। तथाच चक्षुःसंयुक्तविशेष्यकचाक्षुषप्रकारतापन्नधूमत्वस्य चक्षुर्निरूपितत्वेन संयोगादेरिव तस्यापि प्रत्यासत्तित्वमिति भावः। तत्र=तदैव। धूमत्वेनेति। चक्षुःसंयुक्तविशेष्यकचाक्षुषप्रकारतापन्नधूमत्वेनेत्यर्थः।

एतेन धूमत्वरूपसामान्यलक्षणायाः नित्यत्वेन सर्वदा विद्यमानतया सर्वदा सकलधूमविषयकप्रत्यक्षापत्तिरित्यपि समाहितम्। धूमत्वे सर्वदा तादृशप्रकारतावैशिष्ट्याभावादिति ध्येयम्। अत्रायं क्रमः आदौ लौकिकसन्निकर्षः ततो धूमधूमत्वे इति निर्विकल्पकं विशेषणज्ञानात्मकम्। ततो धूम इति सविकल्पकम्, ततो धूमत्वप्रत्यासत्त्या "धूमा" इत्येवं रूपं निखिलधूमविशेष्यकमलौकिकं प्रत्यक्षं भवतीति।

न च सकलधूमभानाभावे का क्षतिरिति वाच्यम्। महानसीयधूमे वह्निव्याप्तिग्रहकाले पर्वतीयधूमानुपस्थितौ तत्र सन्निकर्षाभावात्पर्वतीयधूमविशेष्यकव्याप्तिग्रहाभावे वह्निव्याप्तिविशिष्टधूमवत्ताज्ञानादनुमितिर्न स्यात्, एवं प्रत्यक्षे धूमे वह्निसंबन्धस्य गृहीतत्वादन्यधूमस्य चाऽनुपस्थितत्वाद् धूमो वह्निव्याप्यो न वेति संशयानुपपत्तिश्च स्यात्। सामान्यस्य प्रत्यासत्तित्वस्वीकारे तु धूमत्वसामान्यलक्षणया पर्वतीयधूमस्योपस्थितौ पर्वतीयधूमनिष्ठव्याप्तेरपि ग्रहात्, पर्वतीयधूमदर्शनरूपोद्बोधकेन स्मृतायाः वह्निव्याप्तेः पर्वतीयधूमे ग्रहादनुमितिः। एवं सामान्यप्रत्यासत्त्या कालान्तरीयदेशान्तरीयधूमोपस्थितौ धूमो वह्निव्याप्यो न वेति संशयोपि नानुपपन्न इति ध्येयम् कार्यकारणभावस्तु—अलौकिकमुख्यविशेष्यतासंबन्धेन तत्प्रकारकतदाश्रयप्रत्यक्षं प्रति समवायसंबन्धेन इन्द्रियसंबद्धविशेष्यकज्ञानप्रकारीभूततद्धर्मो हेतुरित्याकारकः। ननु तादृशप्रत्यक्षं प्रति समवायसंबन्धेन इन्द्रियसंबद्धतद्रूपमेव हेतुरस्तु किं तद्विशेष्यक-

मन्मते इन्द्रियसंबद्धं धूलीपटलं तद्विशेष्यकं धूम इति ज्ञानं तत्र प्रकारीभूतं धूमत्वंप्रत्यासत्तिः । इन्द्रियसंबन्धश्च लौकिको ग्राह्यः । इदं च बहिरिन्द्रियस्थले बोध्यम् । मानसस्थले तु ज्ञानप्रकारीभूतं सामान्यं प्रत्यासत्तिः ॥६३॥

और मेरे मत में इन्द्रिय सम्बद्ध धूलीपटल हुवा—धूलीपटल है विशेष्य जिसमें ऐसा ज्ञान "धूमः" यह ज्ञान है—इसमें प्रकारीभूत सामान्य धूमत्व ही सामान्य लक्षण सन्निकर्ष है। और 'इन्द्रियसम्बद्धवि-शेष्यक' इसका अर्थ है इन्द्रियसम्बन्धवद्विशेष्यक—सो यहाँ इन्द्रिय का सम्बन्ध लौकिक ही लेना चाहिये। और बहिरिन्द्रिय से जहाँ घट ज्ञान होने के अनन्तर घटत्वरूप सामान्य लक्षण सन्निकर्ष के द्वारा सकल घट का ज्ञान हुवा— उसी स्थल में इन्द्रियसम्बद्धविशेष्यक ज्ञान प्रकारीभूत सामान्य को प्रत्यासत्ति विधया कारण जानना चाहिये। मानसस्थल में तो केवल ज्ञान प्रकारी भूत सामान्य को ही प्रत्यासत्ति (सन्निकर्ष) स्वीकार करना उचित है। परन्तु यहाँ समान

ज्ञानप्रकारीभूतेत्यनेनेत्यत आह। **अत्रेति** । लाघवादित्यादिः। प्रत्यासत्तावित्यर्थः। घटकत्वं सप्तमयर्थः। तस्येन्द्रियसंबद्धमित्यनेनाऽन्वयः। तथाच निरुक्तप्रत्यासत्तिघटकेन्द्रियसंबद्धसामान्यस्य प्रत्यासत्तित्वस्वीकारेणैव सर्वदा सकलधूमविषयकप्रत्यक्षापत्तेर्वारणे तादृशप्रकारताविशिष्टसामान्यस्य प्रत्यासत्तित्वे गौरवादिति भावः। तत्र=तदा। **इन्द्रियसंबन्धाभावादिति** । धूलीपटलस्यैवेन्द्रियसंयुक्तत्वादिति। तादृशप्रकारताविशिष्टस्य सामान्यस्य प्रत्यासत्तित्वे नोक्तदोष इत्याह। **मन्मते त्विति**। न नु यत्र धूमचक्षुः संयोगः—ततो धूमचाक्षुषं संयोगनाशश्च–ततस्तादृशचाक्षुषरूप "ज्ञानलक्षणाप्रत्यासत्ति" इन्द्रियसंबन्धविशिष्टधूमविशेष्यक "प्रथम" चाक्षुषप्रकारतापन्नधूमत्वप्रत्यासत्त्या सकलधूमविषयकचाक्षुषापत्तिरत आह। **इन्द्रियसंबन्धश्चेति** । एवं च ज्ञानलक्षणस्य लौकिकत्वाभावान्नापत्तिरिति भावः।

अथ लौकिकसन्निकर्षाणामननुगमः। न च संयोगस्यैव निवेशोस्तु, तथा चेन्द्रियसंयोगवद्विशेष्यकज्ञानप्रकारीभूतमेव सामान्यं प्रत्यासत्तिरिति वाच्यम्। संयोगमात्रनिवेशे संयुक्तसमवायेन जायमानरूपचाक्षुषे व्यभिचारः, अलौकिकमुख्यविशेष्यतासंबन्धेन उक्तचाक्षुषवति रूपे इन्द्रियसंयोगवद्विशेष्यकज्ञानप्रकारतापन्नरूपत्वविरहात्, रूपे चक्षुः संयोगविरहात्। न च लौकिकसन्निकर्षस्य नानात्वेपि कार्यकारणभावभेदान्न व्यभिचार इति वाच्यम्। तथापि धूमत्वप्रकारकचाक्षुषं प्रति चक्षुः संयोगवद्धर्मिकचाक्षुषप्रकारतापन्नधूमत्वस्य कारणत्वे, घटीयनीले धूमत्वभ्रमोत्तरं निखिलधूमत्वाश्रयचाक्षुषानुपपत्तिः, घटीयनीले चक्षुःसंयोगविरहात्। यदि चक्षुः संयुक्तसमवायवद्विशेष्यकचाक्षुषप्रकारतापन्नधूमत्वं हेतुरित्युच्यते, तदा धूमे धूमत्वप्रकारकचाक्षुषोत्तरं यावद्धूमविषयकचाक्षुषे व्यभिचारः, धूमे चक्षुः संयुक्त-

परन्तु सामानां भावः सामान्यम्, तच्च क्वचिन्नित्यं यथा धूमत्वादि, क्वचिच्चाऽनित्यं यथा घटादि, यत्रैको घटः संयोगेन भूतले समवायेन कपाले वा ज्ञातस्तदनन्तरं सर्वेषामेव तद्घटवतां भूतलादीनां कपालादीनां वा ज्ञानं भवति। तत्रेदं बोध्यम्। सामान्यं येन संबन्धेन ज्ञायते तेन संबन्धेनाधि-

पदार्थों के (भाव) प्रकारी भूत धर्म को ही सामान्य शब्द से कहते हैं। वह सामान्य कहीं नित्य है जैसे धूमत्व आदि– कहीं अनित्य है जैसे घट आदि। जहाँ एक ही घट संयोगसम्बन्ध से भूतल में और समवाय सम्बन्ध से कपाल में ज्ञात हुवा वहाँ ज्ञात होने के बाद "सर्वाणि भूतलानि संयोगेन घटवन्ति" एवं "सव कपालाः समवायेन घटवन्तः" इस प्रकार से संयोग सम्बन्ध से सकल घटवत् भूतलों का—एवं समवाय सम्बन्ध से सकल घट वाले कपालों का ज्ञान होता है— "तत्रेदं बोध्यम्" इस का अभिप्राय यह है कि ऐसे स्थलों में ज्ञायमान अनित्यसामान्य ही आश्रय

समवायाभावात्, अन्धकारादौ धूमत्वभ्रमजन्यचाक्षुषे व्यभिचाराच्चेति चेन्न। लौकिकविषयतासंबन्धावच्छिन्नचाक्षुषत्वावच्छिन्नकार्यतानिरूपिता या चक्षुर्जनकता तदवच्छेदकसंबन्धत्वेन चक्षुःसन्निकर्षमात्रस्यैवानुगमादिति ध्येयम्। यत्र चक्षुः संयोगे विद्यमानेपि दोषवशान्न धूमत्वप्रकारकं चाक्षुषं, किन्तु धूमत्वप्रकारकं स्मरणं तदुत्तरं धूमत्वसामान्यलक्षणाजन्यचाक्षुषापत्ति वारणाय ज्ञाने तदिन्द्रियजन्यत्वमपि निवेशनीयम्। तथा च तदिन्द्रियजन्यतावच्छेदकतया सिद्धस्य चाक्षुषत्वादेर्निवेशः। तथाच तत्पुरुषीयधूमत्वप्रकारकचाक्षुषं प्रति तत्पुरुषीयचक्षुः सन्निकृष्टधर्मिकचाक्षुष-प्रकारतापन्न धूमत्वं हेतुरिति फलितम्। कार्यस्याऽलौकिकमुख्यविशेष्यत्वं, कारणस्य तु समवायः प्रत्यासत्तिः। न च कार्यतावच्छेदककोटौ यावद्धूमविषयकत्वं विवेशनीयम्। यावद्धूमविषयकत्वस्य जन्यतावच्छेदकत्वानुपगमेपि विनिगमनाविरहेण यावत्सु धूमेषु कारणसत्त्वेन तत्र विषयतासंबन्धेन ज्ञानोत्पत्त्यैव यावद्धूमविषयकत्व-निर्वाहा दिति ध्येयम्।

एवं घटत्वादिकमन्तर्भाव्यापि कार्यकारणभावो बोध्यः। ननु अणुत्वेन यत्किंचिदणुपस्थितौ अणुत्वसामान्यलक्षणया सकलाणुगोचरोमानसबोधो न स्यात्, अणुत्वेन सह मनसः लौकिकसन्निकर्षस्य, ज्ञाने इन्द्रियजन्यत्वस्य चाभावादत आह। इदंचेति। निरुक्तप्रकारताविशिष्टसामान्यमित्यर्थः। अवधारणार्थकश्चशब्दः "वहिरिन्द्रियस्थले" इत्युत्तरं योजनीयः। बोध्यमिति। प्रत्यासत्तिविधया कारणमिति बोध्यमित्यर्थः। मानसस्थले त्विति। अवधारणार्थकस्तुशब्दः सामान्यमित्युत्तरं योजनीयः। तथाच केवलज्ञानप्रकारताविशिष्टसामान्यं प्रत्यासत्तिरिति भावः ६३।

ननु संयोगसंबन्धेन घटादिप्रकारकभूतलविशेष्यकं चाक्षुषं न स्यात्, तद्घटादेस्तादृशप्रकारतावत्त्वेपि तस्य सामान्यरूपत्वाभावादित्याशंकां परिहरति। परन्त्वित्यादिना। समानानां भाव इति। तथाच प्रकृते सामान्यपदं यौगिकमेव

करणानां प्रत्यासत्तिः। किन्तु यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातं तत्र सामान्यलक्षणया सर्वेषां तद्घटवतां भानं न स्यात्, सामान्यस्य तदानीमभावात्। किंचेन्द्रियसंबद्धविशेष्यकं घट इति ज्ञानं जातं तत्र परदिने इन्द्रियसंबन्धं विनापि तादृशज्ञानप्रकारीभूतसामान्यस्य सत्वान्तादृशज्ञानं कुतो न जायते, तस्मात्सामान्यविषयकं ज्ञानं प्रत्यासत्तिः, नतु सामान्य-

के प्रत्यक्ष में प्रत्यासत्ति होता है। परन्तु यहाँ इतना और ज्ञातव्य है कि सामान्य जिस सम्बन्ध से अर्थात् चक्षु आदि इन्द्रियसम्बन्धवद्विशेष्यकज्ञान में सामान्य जिस सन्वन्ध से विशेषण होता है—वह सामान्य उसी सम्बन्ध से अर्थात् इन्द्रियसम्बन्धवद् विशेष्यकज्ञान की प्रकारता का अवच्छेदक=नियामक जो सम्बन्ध उसी सम्बन्ध से अपने अधिकरणों (आश्रयों) के अलौकिक प्रत्यक्ष में प्रत्यासत्ति (अलौकिक सान्निकर्ष) हो सकता है—जैसे "संयोगेनघटवद्भूतलम्" इस ज्ञान में घट में प्रकारता संयोग सम्बन्ध से अवच्छिन्न=युक्त है अतः यहाँ उस प्रकारता के नियामक संयोगसम्वन्ध से ही अवच्छिन्न जो प्रकारता उस प्रकारता से विशिष्ट घटात्मक अनित्यसामान्य अपने अधिकरण समस्तभूतलों के अलौकिक प्रत्यक्ष में सन्निकर्ष हो सकता है—अन्यसम्बन्ध से नहीं अन्यथा कालिक सम्बन्ध से घट पट में भी है—काल आदि में भी है—अतः इससे 'घटवान् पटः' 'घटवान् कालः' यह आपत्ति लग जायगी।

हम प्राचीनमत से ज्ञायमान सामान्य को प्रत्यासत्ति बतलाकर अब नवीनमत से सामान्य ज्ञान को अलौकिकप्रत्यक्ष में सन्निकर्ष बतलाते हैं—अर्थात् प्राचीनमत को दूषित करते हैं— "किन्तु यत्र" तथा "किञ्च" इस ग्रन्थ से। प्रश्न—जहाँ "संयोगेन घटवद् भूतलम्" इत्याकारक भूतल में संयोगसम्बन्ध से घट का चाक्षुष प्रत्यक्ष हुवा—उसके बाद किसी कारणवश वह घट नष्ट

नतु पारिभाषिकमिति भावः। **तच्चेति**। निरुक्तसामान्यं चेत्यर्थः। **क्वचिदिति**। किंचिदित्यर्थः। एवमग्रेपि। घटत्वादिरूपयत्किंचित्सामान्यं नित्यमित्यर्थः। **तद्घटवतामिति**। संयोगेन तद्घटवतां समवायेन तद्घटवतामित्यर्थः **भूतलादीनामिति**। आदिना संयोगेन तद्घटाधिकरणद्रव्यान्तरस्य संग्रहः। **तत्रेदं वोध्यमिति**। तादृशस्थले निरुक्तप्रकारताविशिष्टघटादिकमनित्यसामान्यं प्रत्यासत्तिरिति वोध्यमित्यर्थः। तथाच नोक्ताशंकेति भावः। ननु समवायेन घटत्वप्रकारकचाक्षुषोत्तरं कालिकेन घटत्वाश्रयकालमुख्यविशेष्यकयावद्विषयक चाक्षुषापत्तिः, निरुक्तप्रकारताविशिष्टघटत्वस्य कालिकेन काले सत्वादत आह। **परन्त्विति**। **येन संबन्धेनेति**। इन्द्रियसंबद्धे इति शेषः। **प्रत्यासत्तिरिति**। वोध्यमिति शेषः। तथाचाऽलौकिकमुख्यविशेष्यतया समवायसंबन्धावच्छिन्न घटत्वप्रकारकचाक्षुषं प्रति समवायसंबन्धावच्छिन्न चाक्षुषप्रकारतायन्नघटत्वं समवायेन हेतुरतो नातिप्रसंग इति भावः। प्राचीनमतेन ज्ञायमानस्य प्रत्यासत्तित्वमुपपाद्य नव्यमतं सिद्धान्तयितुं प्राचीनमतं दूषयति। **किन्त्विति**। **सत्वादिति**। तादृशविशिष्टसामान्यस्य शुद्धसामान्याऽनति-

आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते ॥

मित्याह । आसत्तिरिति । आसत्तिः = प्रत्यासत्तिरित्यर्थः । तथा च सामान्यलक्षण इत्यत्र लक्षणशब्दस्य विषयोर्थः । तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थो लभ्यते ।

हो गया—सो वहाँ उस घट के नाश होने के बाद भी पूर्वोक्त चाक्षुषप्रत्यक्षात्मक अनुभवजन्य संस्कार बल से "भूतलं तद्घटवत्" यह स्मरण होने के अनन्तर सामान्यलक्षणाप्रत्यासत्ति के द्वारा तद्घटवाले समस्त अधिकरणों (भूतलों) का "तद्घटवन्ति भूतलानि" इत्याकारक अलौकिक भान होता है—सो वह ज्ञायमानसामान्य को प्रत्यासत्ति पक्ष में नहीं हो सकेगा—क्योंकि कारणीभूत सामान्य (तद्घट) नहीं है (नष्ट हो चुका) सो कारण के व्यतिरेक (न होने पर) कार्य का होना यह व्यतिरेक व्यभिचार कहलाता है—यह प्राचीनमत में प्रथमदोष व्यतिरेक व्यभिचार हुवा। किञ्च दूसरी बात यह है कि इन्द्रियसम्बद्धविशेष्यक "अयं घटः" यह ज्ञान आज हुवा-वहाँ कल अर्थात् दूसरे दिन घट के साथ इन्द्रियसम्बन्ध के विना भी 'सर्वे घटाः' इत्याकारक अलौकिकभान प्राचीन मत में होना चाहिये—कारण कि आज हमको जो चक्षुरिन्द्रिय का घट के सम्बन्ध होकर "अयं घटः" यह ज्ञान हुवा—उस ज्ञान में प्रकारीभूतसामान्य (घटत्व) नित्य होने के कारण सर्वदा रहेगा तो कल भी रहेगा—तो सामान्यरूप कारण जब कि है तो कार्य (अलौकिक प्रत्यक्ष) क्यों नहीं होता है यह अन्वयव्यभिचार प्राचीन नत में दूसरा दोष हुवा—अतः सामान्य ज्ञान को ही प्रत्यासत्ति (सन्निकर्ष मानना चाहिये चाहिये—सो अब सामान्यलक्षणाशब्द का अर्थ हो गया—सामान्यविषयक ज्ञान। प्रश्न—प्राचीन कहता है कि सामान्यज्ञान को प्रत्यासत्ति माननेसे तुम्हारे यहाँ दोनों दोष कैसे वारित हो गये। उत्तर—नवीन कहता है कि प्रथमपक्ष में घट के नाश होने पर भी घट का ज्ञान तो है ही। द्वितीय पक्ष में सामान्य-घटत्व के नित्य-होने पर भी इन्द्रियसम्बन्ध के विना उसका ज्ञान सर्वथा असंभव है वही कहा है कि "सामान्यविषयकं ज्ञानं प्रत्यासत्तिर्नतु सामान्यम्"। प्रश्न—सामान्यलक्षणशब्द से सामान्यविषयकज्ञान यह अर्थ कैसे आया। उत्तर—लक्षण शब्द का ही विषय अर्थ है अतः सामान्यविषयकज्ञान को प्रत्यासत्तित्व का लाभ हो गया। वही कहा है कि "तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरि-

---

रेकादिति भावः। वस्तुतः प्राचीनमते इन्द्रियभेदेन विषयभेदेन च कार्यकारणभावानन्त्य प्रसंगो बोध्यः। **लक्षणशब्दस्य विषयोऽर्थ** इति। तथाच सामान्यं विषयो यस्येति बहुव्रीहिलभ्यार्थमाह। **सामान्यविषयकं ज्ञानमिति।** इन्द्रियसंबद्धविशेष्यकं सामान्य प्रकारकज्ञानमित्यर्थः। तथाच तत्पुरुषीयघटत्वादिप्रकारकचाक्षुषं प्रति तदीयचक्षुःसन्निकृष्टधर्मिकतदीयघटत्वादिप्रकारकचाक्षुषत्वेन हेतुत्वम्। अलौकिकमुख्य विशेष्यत्वं कार्यतावच्छेदकसंबन्धः। कारणतावच्छेदकसंबन्धश्च स्वप्रकारीभूतसामान्याश्रयनिष्ठ विशेष्यत्वम्। वस्तुतो नव्यमते तत्प्रकारकप्रत्यक्षत्वावच्छिन्नं प्रति "निर्विकल्पकादिसाधारण" तद्विषयकज्ञानत्वेनैव हेतुत्वम्, न तु तत्प्रकारकज्ञानत्वेन, गौरवात्। अत्र च स्वप्रकारीभततत्तत्सामान्याश्रयनिष्ठविशेष्यत्वं कार्यतावच्छेदकसंबन्धः,

तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्षते ॥६४॥

नतु चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र वर्तते तत्र सकलघटादीनां चाक्षुषप्रत्यक्षं स्यादत आह तदिति। अस्यार्थः—यदा बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानं जननीयं तदा यत्किंचिद्धर्मिणि तत्सामान्यस्य तदिन्द्रियजन्यज्ञानस्य सामग्री अपेक्षिता, सा च सामग्री चक्षुःसंयोगालोकसंयोगादिकं, तेनान्धकारादौ चक्षुरादिना तादृशज्ञानं न जायते ॥६४॥

त्यर्थो लभ्यते"। प्रश्न—जहाँ चक्षुःसंयोग के विना ही सामान्य (घटत्व) का शाब्दिक-या स्मरणात्मक ज्ञान हो गया है वहाँ "सर्वेघटाः" इत्याकारक सकल घटों का अलौकिक चाक्षुष प्रत्यक्ष होना चाहिये। उत्तर--आप जब चक्षुरादि बहिरिन्द्रिय से सामान्य लक्षणा के द्वारा अलौकिक चाक्षुषप्रत्यक्ष करना चाहें–उस समय यत्किञ्चित् धर्मी (उस घट में) उस सामान्य (घटत्व) का चक्षु आदि इन्द्रिय से उत्पन्न होने वाले ज्ञान की सामग्री अपेक्षित है। (उस सामग्री के विना वह ज्ञान नहीं हो सकता है) वह सामग्री चक्षुः संयोग आदि है। अतः पूर्वोक्त स्थल में चक्षुः संयोग के बिना अलौकिक चाक्षुष प्रत्यक्ष नहीं हो सकता है। आलोकसंयोग भी सामग्र्यन्तर्गत है-अतः अन्धकार में घट आदि का चक्षु से अलौकिक चाक्षुष प्रत्यक्ष नहीं होता है। ६४॥

कारणतावच्छेदकसंबन्धश्च स्वविषयीभूततत्सामान्याश्रयनिष्ठविषयत्वरूपः। अतो नातिप्रसंगः।

नचैवं निर्विकल्पकोत्तरं जातस्य घटत्वविशिष्टप्रत्यक्षस्यापि यावद्घटविषयकत्वापत्तिः, इष्टत्वात्। सामान्यप्रकारकत्वेन हेतुत्वोपगमेपि निर्विकल्पकतृतीयक्षणे यावद्घटावगाहिप्रत्यक्षोत्पत्त्या क्षणविलंबस्य शपथनिर्णेयत्वात्। न च विशेष्यतासंबन्धेन तत्प्रकारकप्रत्यक्षत्वावच्छिन्नं प्रतीत्येवोच्यतां, किं निष्ठान्तेनेति वाच्यम्। घटत्वपटत्व "निर्विकल्पक" ज्ञानोत्तरं घटः पटश्चेति समूहालंबनस्य यावद्घटविषयकप्रत्यक्षस्यानुपपत्तिः, समूहालंबनात्मकतादृशघटत्वप्रकारकप्रत्यक्षस्य विशेष्यतासंबन्धेन पटेऽप्युत्पत्त्या तत्र स्वविषयीभूतघटत्वाश्रयनिष्ठविषयतासंबन्धेन घटत्वज्ञानविरहात्। तदुपादाने तु तादृशसमूहालंबनस्य स्वप्रकारीभूतघटत्वाश्रयनिष्ठविशेष्यतासंबन्धेन घटेऽप्युत्पत्त्या न व्यभिचारः। अत्रेदं बोध्यम्—नव्यमते सामान्यविषयकं ज्ञानं प्रत्यासत्तिः। कार्यकारणभावश्च नात्मनिष्ठप्रत्यासत्त्या "विषयनिष्ठप्रत्यासत्त्यस्यैव हेतुत्वमिति" प्राचीनप्रवादानुरोधात्, किन्तु विषयनिष्ठप्रत्यासत्त्यैव। एवं चात्र कल्पे तत्पुरुषीयत्वनिवेश आवश्यकः, अन्यथा घटचक्षुःसंयोगकाले निर्विकल्पकक्षणे वा सामान्यलक्षणाजन्यप्रत्यक्षापत्तिः, पुमन्तरीयज्ञानमादाय तादृशज्ञानविषयीभूतघटत्वाश्रयनिष्ठविषयतायाः घटे सत्त्वात्। यद्यपि विशिष्टबुद्धौ विशेषणज्ञानस्य समवायघटितसामानाधिकरण्यप्रत्यासत्त्या कारणतया तद्विरहान्न तदापत्तिः, तथापि घटत्वप्रकारकज्ञानदशायां कालिकेन पुरुषान्तरस्य घटत्वप्रकारकं ज्ञानं तत्र

समवायेन घटत्वप्रकारकज्ञानवतः पुरुषस्य कालिकेन तदाश्रयप्रत्यक्षापत्तिः। तदानीं कालिकेतरसंबन्धानवच्छिन्नतन्निष्ठविषयताशालिपुमन्तरीयज्ञानरूपहेतोः सत्वात्, तादृशज्ञानस्य चोक्तसंबन्धेन घटे सत्वात्। नचैवं नव्यमते किं लाघवमिति वाच्यम्। इन्द्रियभेदेन कार्यकारणभावभेदविरहादिति ध्येयम्। ननु "तदिन्द्रियजन्यत्व" चाक्षुषत्वादेरनिवेशे घटादेः स्पार्शनोत्तरं यावद्घटविषयकचाक्षुषापत्तिः, घटत्वज्ञानसत्वादित्याशंकते। **नन्विति**। स्पार्शनादिसहकृतेन घटत्वादिज्ञानेन घटादिचाक्षुषाद्यजननात्तदिन्द्रियजन्येति बोधविशेषणं मूले। धूमादौ बाष्पत्वादिभ्रमजनकदोषदशायां चक्षुःकरणकबोधसामग्रीसत्वेपि धूमत्वादिप्रकारकतदाश्रयचाक्षुषाभावात्तद्धर्मेति। तथाच धूमचक्षुःसंयोगसत्वेपि धूमादौ धूमत्वादिग्रहप्रतिबन्धकदोषसमवधाने तादृशसहकारिविरहादेव नापत्तिरिति भावः। **सा च सामग्रीति**। अवधारणार्थकश्चशब्दः संयोगादिकमित्युत्तरं योजनीयः। अयंभावः सामान्यलक्षणाजन्य घटत्वादिप्रकारकचाक्षुषत्वव्यापकं घटत्वादिप्रकारकलौकिकचाक्षुषत्वम्, इति व्याप्यधर्मावच्छिन्ने कार्ये जननीये व्यापकधर्मावच्छिन्नकार्यसामग्री अपेक्षितेति सामान्यलक्षणाजन्ये समवायादिना घटत्वप्रकारकघटत्वाश्रयविशेष्यकचाक्षुषे जननीये घटत्वप्रकारतानिरूपितयत्किंचिद्घटनिष्ठलौकिकविशेष्यताशालिसामग्री, एवं तादृशसंबन्धेन स्पार्शनादिपूर्वं निरुक्तलौकिकविशेष्यताशालिसामग्री अपेक्षिता। सा च सामग्री महत्वावच्छिन्नोद्भूतरूपावच्छिन्नालोकसंयोगावच्छिन्न चक्षुःसंयोगरूपा। एवं महत्वावच्छिन्नोत्भूतस्पर्शावच्छिन्नत्वक्संयोगरूपा च। तत एव तत्पुरुषीयचक्षुःसंयोगादिघटितसामग्रीविरहदशायां तत्पुरुषीयसामान्यप्रत्यासत्तिजन्यघटत्वादिप्रकारकचाक्षुषापादनं न संभवतीति नव्यमते अतिरिक्तकार्यकारणभावस्य अकल्पनात्, इन्द्रियभेदेन कार्यकारणभावविरहाच्च लाघवमक्षतमेवेति ध्येयम्।

अथ सामान्यलक्षणाजन्यज्ञाने लौकिकसन्निकर्षस्य केन रूपेण हेतुत्वम्, घटचक्षुःसंयोगाभावदशायां घटे घटत्वाभावभ्रमदशायां पटचक्षुःसंयोगदशायामपि घटत्वेन पटांशे लौकिकविषयताशालियावद्घटविषयकप्रत्यक्षोत्पत्ते र्व्यभिचारान्न घटचक्षुःसंयोगस्य सामग्रीत्वम्, एवं घटत्वप्रकारतानिरूपितविशेष्यतासंबन्धेन प्रत्यक्षमनागतघटे, तत्र समवायेन चक्षुःसंयोगस्य व्यभिचारादिति चेन्न। घटत्वप्रकारकघटविशेष्यकप्रत्यक्षं प्रति घटत्वज्ञानस्य हेतुता। विशेषसामग्री चाऽननुगतत्तत्संयोगादिरेव। कारणता तु तस्य लौकिकप्रत्यक्षं प्रति चक्षुःसंयोगत्वादिना क्लृप्तैनैव। अथवा घटत्वप्रकारतानिरूपितघटमुख्यशालिचाक्षुषं प्रति घटत्वप्रकारतानिरूपितमुख्यविशेष्यताश्रयचक्षुःसंयोगत्वादिनैव हेतुत्वम्। पटे घटत्वभ्रमदशायां पटसंयोग एव तादृश इति न व्यभिचार इति संक्षेपः।

ननु सामान्यं यदि न प्रत्यासत्तिः, किन्तु तद्ज्ञानं, तदा ज्ञानलक्षलक्षणया सह एतस्याः को भेद इत्याशंकते। **नन्विति**। **यदि ज्ञानरूपेति**। अत्र यदि शब्दः सामान्यलक्षणापीत्युत्तरं योजनीयः। **तस्यैवेति**। एवकारेण तदाश्रयस्य व्यवच्छेदः। तथाच कार्यकारणभावभेदात्तयोर्भेदः। तत्प्रकारकतदाश्रयप्रत्यक्षं प्रति तद्विषयकज्ञानं

विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ।

ननु ज्ञानलक्षणाप्रत्यासत्तिर्यदि ज्ञानरूपा, सामान्यलक्षणाऽपि ज्ञानरूपा तदा तयोर्भेदो न स्यादत आह । विषयीति । सामान्यज्ञानरूपा हि प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति, ज्ञानलक्षणाप्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिः । अत्रायमर्थः । प्रत्यक्षे सन्निकर्षं विना भानं न संभवति । तथाच सामान्यलक्षणां विना धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां च भानं कथं भवेत्, तदर्थं सामान्यलक्षणा स्वीक्रियते । न च सकलवह्नि-

प्रश्न—सामान्य लक्षणासन्निकर्ष भी पूर्वोक्तरीत्याज्ञानस्वरूप ही सिद्ध हुवा—और ज्ञानलक्षणा प्रत्यासत्ति (सम्निकर्ष) तो ज्ञानरूप है ही-तब फिर इन दोनों सन्निकर्षों में क्या अन्तर हुवा । उत्तर—सामान्यलक्षणा सन्निकर्ष अपने आश्रय के अलौकिक प्रत्यक्ष में कारण होता है अर्थात् सामान्य के सकल आश्रयों का प्रत्यक्ष सामान्य लक्षणा के द्वारा होता है—जैसे घटत्वज्ञानरूप सामान्यलक्षणा से घटत्वाश्रय सकल घटों का अलौकिक प्रत्यक्ष होता है (सर्वे घटा:) इत्याकारक । और ज्ञानलक्षणा सन्निकर्ष जिसका विषयी (ज्ञान होता है उसी का व्यापार सन्निकर्ष होता है—आश्रय का नहीं । जैसे "सुरभि चन्दनम्" यहाँ पर चन्दन को देखकर सौरभ (सुगन्ध) का ही स्मरणात्मक ज्ञानरूप ज्ञानलक्षणा सन्निकर्ष के द्वारा अलौकिकभान होता है—न कि सौरभाश्रय चन्दन का—क्योंकि 'चक्षुःसंयुक्तमनः संयुक्तात्मसमवेतस्मृतिविषयत्व' यही ज्ञानलक्षणा वस्तु है । सो चन्दन को देखने के बाद सुगन्ध की स्मृति होती है अतः तादृशस्मृतिविषयत्वरूप ज्ञानलक्षणा सौरभ का ही सन्निकर्ष है-चन्दन का नहीं-क्योंकि चन्दन का तो चाक्षुष ही हो रहा है । नैयायिकों का अभिप्राय यह है कि सामान्य लक्षणा अलौकिक सन्निकर्ष न मानने पर समस्त सामान्याश्रयों का भान नहीं हो सकेगा-क्योंकि प्रत्यक्षमात्र में सन्निकर्ष कारण है । वही कहा है कि "प्रत्यक्षे सन्निकर्षं बिना" इत्यादि । इसलिये सामान्य लक्षणा के बिना धूमत्वेन समस्त धूमों का वन्हित्वेन समस्त वन्हियों का अलौकिक प्रत्यक्ष कैसे होगा—इसके लिये सामान्य लक्षणा का स्वीकार करना आवश्यक है । प्रश्न—सकलवन्हि तथा

हेतुरिति सामान्यलक्षणायाः कार्यकारणभावः । अलौकिकविषयतासंबन्धेन तद्विषयकप्रत्यक्षं प्रति विषयतासंबन्धेन तद्ज्ञानं हेतुरितिज्ञानलक्षणायाः कार्यकारणभावः । एवं तद्धर्मप्रकारकतदाश्रयप्रत्यक्षत्व, तद्वृत्तिधर्माप्रकारकलौकिकसन्निकर्षाजजन्यतद्विषयकप्रत्यक्षत्वयोः कार्यतावच्छेदकयोर्भेदादित्यपि बोध्यम् । सामान्यलक्षणस्वीकारे बीजमाह । अयमर्थ इति । अयं भावइ त्यर्थः । भानं = विषयता न संभवतीति । प्रत्यक्षनिरूपितविषयत्वं सन्निकर्षं विना स्थातुं नार्हतीत्यर्थः । तथा च सन्निकर्षस्य प्रत्यक्षनिरूपितविषयताव्यापकत्वेन व्यापकीभूतसन्निकर्षाभावे व्याप्यभूतविषयताया अभावप्रसंगादिति भावः ।

धूमभानाऽभावे का क्षतिरिति वाच्यम्। प्रत्यक्षधूमे वह्निसम्बन्धस्य गृहीतत्वादन्यधूमस्य चाऽनुपस्थितत्वाद् धूमो वह्निव्याप्यो न वेति संशयानुपपत्तेः। मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीयधूमे वह्निव्याप्यत्वसंशयः संभवति। न च सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने जाते सार्वज्ञापत्तिरिति वाच्यम्। प्रमेयत्वेन सकलप्रमेयज्ञाने जातेपि विशिष्य सकलपदार्थानामज्ञातत्वेन सार्वज्ञाभावात्।

एवं ज्ञानलक्षणाया अस्वीकारे सुरभिचन्दनमितिज्ञाने सौरभभानं कथं भवेत्। यद्यपि सामान्यलक्षणयाऽपि सौरभभानं संभवति, तथापि सौरभत्वस्य भानं ज्ञानलक्षणया। एवं यत्र धूमत्वेन धूलीपटलं ज्ञातं तत्र धूलीपटस्यानुव्यवसाये भानं ज्ञानलक्षणया।

सकलधूम का भान यदि न हो तो क्याहानि है। उत्तर—'धूमो वन्हिव्याप्यो न वा' यह संशयपक्षता अनुपपन्न हो जावेगी-क्योंकि प्रत्यक्षीभूत महानसीय आदि धूम में तो वन्हि का व्याप्तिरूप सम्बन्ध ही निश्चित है–और अन्य (कालान्तरीय-देशान्तरीय) धूम की उपस्थिति ही नहीं है-तो फिर संशय होगा किस धूम में। और मेरे मत (नैयायिक के) में सामान्यलक्षणा से सकल धूमों की उपस्थिति होने पर कालान्तरीय-देशान्तरीय धूम में व्याप्तिनिश्चय न होने प्रयुक्त वह्नि व्याप्ति का संशय हो जायेगा। प्रश्न—सामान्यलक्षणा यदि स्वीकार कर ली गयी तब प्रमेयत्वरूप सामान्य लक्षणा के द्वारा समस्त प्रमेयो का ज्ञान हो जाने से सार्वज्ञ्य सर्वज्ञता) की आपत्ति हो जावेगी। उत्तर—प्रमेयत्वरूप सामान्यलक्षणा के द्वारा सामान्यतः यावत प्रमेय का ज्ञान होने पर भी घटत्व-पट आदि तत्तद्विशेषधर्मों के द्वारा घट-पट आदि सकल धर्मीरूप पदार्थ अज्ञात होने के नाते सार्वज्ञ्यदोष की आपत्ति नहीं है। इसी प्रकार ज्ञानलक्षणा यदि नहीं मानेंगे तो "सुरभिचन्दनम्" इस ज्ञान में सौरभ का भान कैसे होगा–अतः ज्ञानलक्षणा भी मानना चाहिये। प्रश्न—'सुरभि चन्दनम्' यहाँ पर सौरभत्वरूप सामान्यलक्षणा के द्वारा सौरभ का ज्ञान हो सकता है तो फिर ज्ञानलक्षणा क्यों मानना। उत्तर—उक्तस्थल में सौरभ का भान सामान्यलक्षणा से होने पर भी सौरभत्व का भान ज्ञानलक्षणा से ही होगा—अतः "सुरभिचन्दनम्" यहाँ पर सौरभत्व के भान के लिये ज्ञान लक्षणा माननी चाहिये। इसी प्रकार जहाँ धूमत्वरूप से धूलीपटल का ज्ञान हुवा–अर्थात् "धूमत्वेन धूलीपटल महं जानमि" यह अनुव्यवसाय हुवा-इस अनुव्यवसाय में धूलीपटल का भान ज्ञानलक्षणा से ही होगा—अतः ज्ञानलक्षणा

सामान्यलक्षणायाः कारणत्वानंगीकारे दोषं प्रदर्श्य ज्ञानलक्षणायाः कारणत्वानंगीकारे दोषमाह। **एवमिति। कथं भवेदिति।** चन्दनखण्डस्य चाक्षुषे जायमाने उपस्थितसौरभभानं न स्यात्, सौरभांशे लौकिकचक्षुःसन्निकर्षाभावात्। चन्दनखण्डे चक्षुसंयोगदशायां सौरभांशे चक्षुःसंयुक्तसमवायसत्वेपि तस्य लौकिक-

त्वाभादिदित्यर्थः। न सामान्यलक्षणयैव सौरभभानसंभवः। सौरभत्वप्रकारकलौकिकप्रत्यक्षसामग्र्याः सहकारिण्या विरहेण सौरभत्वसामान्यलक्षणयापि सौरभभानाऽसंभवात्। शंकते। **यद्यपीति।** **सामान्यलक्षणयापीति।** सामान्यलक्षणयैवेत्यर्थः। **सौरभभानं संभवतीति।** सौरभत्वप्रकारेण सकलसौरभस्य भानं संभवतीत्यर्थः। एवंच ज्ञानलक्षणा न स्वीकार्येति भावः। सौरभत्वप्रकारकलौकिकप्रत्यक्ष-सौरभत्वावच्छिन्नप्रकारकप्रत्यक्षाऽन्यतरसामग्रीसहकारेणैव तस्याः फलजनकत्वांगीकारात्, प्रकृते च द्वितीयसामग्र्याः सहकारिण्याः सत्वादित्यभिप्रायः। **सौरभत्वस्य भान मिति।** स्वरूपतःसौरभत्वस्य भानमित्यर्थः। तेन प्रमेयत्वादिसामान्यलक्षणया सौरभत्वादेर्भानेपि न क्षतिः। तथा च सुरभि चन्दनमितिचाक्षुषे सौरभत्वांशे धर्मान्तरस्याऽगृहीततथा सामान्यलक्षणाप्रत्यासत्त्याऽनिर्वाहादिति भावः। न न्वेवमपि सौरभत्वपर्यन्तानुधावनं व्यर्थम्, सौरभत्वप्रकारतानिरूपितसौरभविशेष्यताशालिचाक्षुषे सौरभत्वप्रकारकलौकिकप्रत्यक्षसामग्र्याः अपेक्षणीयतया प्रकृते तदसंभवेन सौरभभानार्थंसौरभत्वसामान्यलक्षणातो भानासंभवेन सौरभभानार्थं ज्ञानलक्षणांया आवश्यकत्वादिति चेन्न। नव्यमते प्रकारसाधारणविशेष्ये लौकिकचाक्षुषसामग्र्या अनपेक्षणात्, सौरभमुख्यचाक्षुषं प्रत्येव सौरभांशे तस्याः हेतुत्वादिति। **एवमिति। अनुव्यवसाये इति।** धूपत्वेन धूलीपटलज्ञानप्रकारक "धूमवानहमित्वनुव्यवसायेइत्यर्थः। **ज्ञानलक्षणया** ज्ञानलक्षणयैव। तत्र धूलीपाटलेन सह लौकिकसन्निकर्षाभावात्, स्वविषयधूमत्ववत्वसंबन्धेन सामान्यलक्षणायास्तत्राऽभावाच्चधूलीपटलस्त्वस्याऽज्ञानाच्च। ज्ञानलक्षणाप्रत्यासत्तिस्तु चक्षुःसंयुक्तमनः संयुक्तात्मसमवेतस्मृतिविषयस्त्वरूपा।

ज्ञानलक्षणायाः कार्यकारणभावस्तु विषयतासंबन्धेन "लौकिकालौकिकसाधारण" तत्प्रकारकप्रत्यक्षं प्रति विषयतासंबन्धेन तद्ज्ञानं हेतुरित्याकारकः। अत एव प्राथमिकस्य घटत्वचैत्रत्वादिप्रकारकप्रत्यक्षस्य घटत्वचैत्रत्वादिनिर्विकल्पकं बिनाऽनुपपत्तेस्तसिद्धिरस्यावश्यकी। अयं भावः—लौकिकसन्निकर्षं विनापि सोयमित्यादिप्रत्यभिज्ञायां स्मरणाद्युपनीततत्तायाः, घटो नास्तीत्यभावप्रत्यक्षादौ प्रतियोग्यादीनां, तत्तदिन्द्रियग्रहणयोग्यतां बिनापि सुरभि चन्दनमित्याकारकचाक्षुषादौ सौरभादीनां घटमहं जानामीत्याकारकमानसादौ घटादीनां ज्ञानलक्षणाप्रत्यासत्तितो भावाद् ज्ञानस्य सन्निकर्षमुद्रया प्रत्यक्षहेतुताकल्प्यते "ज्ञानरूपसन्निकर्षजन्यप्रत्यक्षमेवो" पनीतभावमुच्यते इत्यन्यत्र विस्तरः।

चिन्ताविशेषोपि सहकारीति। **चिन्ताविशेष**=योगाभ्यासजनितधर्मविशेषो–भयसहकृतमनसा युञ्जानस्य सूक्ष्मपदार्थविषयकं मानसं भवति। यद्यदिन्द्रियस्य यद्योग्यं तत्सर्वं सूक्ष्ममसन्निकृष्टं भूतं भव्यं च योगाभ्यासजनितधर्मविशेषसहकृततत्तदिन्द्रियेण गृह्यते। परन्तु चक्षुरादियोग्यं त्वगादिना न गृह्यते। अतएव।

योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ॥६५॥
युक्तस्य सर्वदाभानं चिन्तासहकृतोऽपरः ।

योगज इति । योगाभ्यासजनितो धर्मविशेषः श्रुतिपुराणादिप्रतिपाद्य इत्यर्थः । युक्तयुञ्जानरूपयोगिद्वैविध्याद्धर्मस्यापि द्वैविध्यमिति भावः ॥६५॥

युक्तस्येति युक्तस्य तावद्योगजधर्मसहायेन मनसा आकाशपरमाण्वादि निखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति, द्वितीयस्य तु चिन्ताविशेषोपि सहकारीति ।

इति श्री विश्वनाथ पञ्चानन भट्टाचार्य विरचितायां सिद्धान्तमुक्तावल्यां
प्रत्यक्ष परिच्छेदः समाप्तः ।

अवश्य मानना चाहिये । "योगज" अलौकिक सन्निकर्ष युक्त-युञ्जान-के भेद से दो प्रकार का है। योगाभ्यास से उत्पन्न हुवा "योगज अलौकिक सन्निकर्ष" रूप धर्मविशेष श्रुति-पुराण आदि से प्रतिपाद्य है । युक्त-युञ्जान-रूप योगी दो प्रकार के हैं-अतःउनका धर्म जो योगज है-वह भी दो प्रकार का है । इससे यह सिद्ध हुवा कि एक युक्त योगी होता है--दूसरा युञ्जान योगी होता है—उसमें भी युक्त योगी को योगज धर्म की सहायता से युक्त मन के द्वारा आकाश-परमाणु आदि सकल पदार्थों का ज्ञान सर्वदा ही होता रहता है और दूसरे युञ्जान योगी को आकाश-परमाणु आदि समस्त पदार्थों का ज्ञान चिन्ताविशेष (ध्यान विशेष) करने पर ही होता है ।

श्री ज्वालाप्रसाद विरचित सिद्धान्त मुक्तावली भाषाटीका
प्रत्यक्ष खण्ड समाप्त ।

तत्राप्यतिशयो दृष्टः स्वस्वार्थानतिलंघनात् ।

स्थूलसूक्ष्मादिबुद्धौ स्यात् न रूपे श्रोत्रवृत्तितेति प्रशस्तदेवः अस्यार्थः— तत्र = योगाभ्यासजनितधर्मविशेषे। अतिशयोपि = सामर्थ्यविशेषोपि । दृष्टः = प्रमितः। स्वस्वार्थानतिलंघनादिति लाब्लोपे पञ्चमी स्वस्वर्थाननतिलंघ्येत्यर्थः । तत्तदिन्द्रिययोग्ययावदर्थान्विषयीकृत्येत्यर्थः । उक्ताऽर्थमेव विवृणोति । स्थूलसूक्ष्मादिति । बुद्धौ=प्रत्यक्षे । सामर्थ्यविशेषाभावमुपपादयति । न रूपे इति । स्यादिति । नास्तीत्यर्थः । श्रोत्रवृत्तिता ।

ज्वालाप्रसादकृते प्रत्यक्षे च सविस्तरे समाप्तिमगमच्चैव मुक्तावलिविलासनी ।

शुभं भूयात् ।